Each directory should have a file called README bib.txt. with bibliographic entry with following details:-

I.	Discipline	:	**VYAKARANA**
	Name of the text	:	**VYAKARANA MAHABHASYAM**
	Author	:	**PATANJALI**

File named "README_type_log.txt" containing the following details:-

i.	Name of the institute	:	**Jaipur Campus**
ii.	(a) Principal Investigator	:	**Prof. Radhavallabh Tripathi**
	(b) Investigator	:	**Prof. K.B. Subbarayudu**
	(c) Co-investigator	:	**Dr. Shukla Mukherjee**
	(d) Editor	:	**Prof. Shivkant Jha**
iii.	Name of the typist	:	**Rajesh Kumar Sharma**
iv.	Completion date of data entry	:	**15.03.2011**
v.	Name of the proof reader	:	**Prof. Shivkant Jha** **Dr. Sridhar Mishra** **Dr. Vishnukant Pandey**
vi.	Completion date of proof reading	:	**28.07.2011**
vii.	Name of the approval authority from Rashtriya Sanskrit Sansthan	:	**Prof. Arknath Choudhary**
viii.	Date of approval	:	**28.07.2011**

श्रीमद्भगवत्पतञ्जलिमुनिनिर्मितं

व्याकरणमहाभाष्यम्

(नवाह्निकम्)

महामहोपाध्यायश्रीगिरिधरशर्मा चतुर्वेदः

महाभाष्य विषयानुक्रमणिका

अथ नवाह्निकसूत्रपाठः

पस्पशाह्निके

अथ शब्दानुशासनम् (पा. भा.)

द्वितीयाह्निके

(शिवसूत्राणि 1-14)

1. अइउण्
2. ऋलृक्
3. एओङ्
4. ऐऔच्
5. हयवरट्
6. लण्
7. ञमङणनम्
8. झभञ्
9. घढधष्
10. जबगडदश्
11. खफछठथचटतव्
12. कपय्

13. शषशर्

14. हल्

प्रथमाध्यायप्रथमपादस्थपाणिनिसूत्राणि 1-15

तृतीयाह्निके

1. वृद्धिरादैच्

2. अदेङ्गुणः

3. इको गुणवृद्धी

चतुर्थाह्निके

1. न धातुलोप आर्धधातुके

2. क्ङिति च

3. दीधीवेवीटाम्

4. हलोऽनन्तराः संयोगः

5. मुखनासिकावचनोऽनुनासिकः

6. तुल्यास्यप्रयत्नं सवर्णम्

7. नाज्झलौ

पञ्चमाह्निके

8. ईदूदेद्विवचनं प्रगृह्यम्

9. अदसो मात्

10. शे

11. निपात एकाजनाङ्

12. ओत्

13. सम्बुद्धौ शाकल्यस्येतावनार्षे

14. ञ्नित्यादिर्नित्यम्

15. ऊँ

16. ईदूतौ च सप्तम्यर्थे

17. दा धा ध्वदाप्

18. आद्यन्तवदेकस्मिन्

19. तरप्तमपौ घः

20. बहुगणवतुडति संख्या

21. ष्णान्ता षट्

22. डति च

23. क्तक्तवतू निष्ठा

षष्ठाह्निके

1. सर्वादीनि सर्वनामानि

2. विभाषा दिक्समासे बहुव्रीहौ

3. न बहुव्रीहौ

4. तृतीयासमासे

5. द्वन्द्वे च

6. विभाषा जसि

7. प्रथमचरमतयाल्पार्धकतिपयनेमाश्च

8. पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम्

9. स्वमज्ञातिधनाख्यायाम्

10. अन्तरं बहिर्योगोपसंव्यानयोः

11. स्वरादिनिपातमव्ययम्

12. तद्धितश्चासर्वविभक्तिः

13. कृन्मेजन्तः

14. क्त्वातोसुन्कसुनः

15. अव्ययीभावश्च

16. शि सर्वनामस्थानम्

17. सुडनपुंसकस्य

18. न वेति विभाषा

सप्तमाह्निके

1. इग्यणः सम्प्रसारणम्

2. आद्यन्तौ टकितौ

3. मिदचोऽन्त्यात्परः

4. एच इग्घ्रस्वादेशे

5. षष्ठी स्थानेयोगा

6. स्थानेऽन्तरतमः

7. ऊरण् रपरः

8. अलोन्त्यस्य

9. ङिच्च

10. आदेः परस्य

11. अनेकालशित्सर्वस्य

अष्टमाह्निके

1. स्थानिवदादेशोऽनल्विधौ

2. अचः परस्मिन् पूर्वविधौ

3. न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चविधिषु

4. द्विर्वचनेऽचि

नवमाह्निके

1. अदर्शनं लोपः

2. प्रत्ययस्य लुक्श्लुलुपः

3. प्रत्ययलोपे प्रत्ययलक्षणम्

4. न लुमताऽङ्गस्य

5. अचोऽन्त्यात्पूर्व उपधा

6. तस्मिन्निति निर्दिष्टे पूर्वस्य

7. तस्मादित्युत्तरस्य

8. स्वं रूपं शब्दस्याशब्दसंज्ञा

9. अणुदित्सवर्णस्य चाप्रत्ययः

10. तपरस्तत्कालस्य

11. आदिरन्त्येन सहेता

12. येन विधिस्तदन्तस्य

13. वृद्धिर्यस्याचामादिस्तद्वृद्धम्

14. त्यादादीनि च

15. एङ् प्राचां देशे

श्रीमत्पतञ्जलिमुनिविरचितं

महाभाष्यम्

प्रदीपोद्योततत्त्वालोकैर्विभूषितम्

प्रथमाध्याये प्रथमपादे प्रथममाह्निकम्

(शास्त्रारम्भप्रतिज्ञाभाष्यम्)

॥ अथ शब्दानुशासनम्॥

अथेत्ययं शब्दोऽधिकारार्थः प्रयुज्यते।

शब्दानुशासनं नाम शास्त्रमधिकृतं वेदितव्यम्॥

(अनुशासनीयशब्दनिर्णयाधिकरणम् ।)

(आक्षेपभाष्यम्)

केषां शब्दानाम्?॥

(समाधानभाष्यम्)

लौकिकानां वैदिकानां च। तत्र लौकिकास्तावद्-गौरश्वः पुरुषो हस्ती शकुनिर्मृगो ब्राह्मण इति॥ वैदिकाः खल्वपि-शं नो देवीरभिष्टये। इषे त्वोर्जे त्वा। अग्निमीले पुरोहितम्। अग्न आ याहि वीतय इति॥

(आक्षेपभाष्यम्)

अथ गौरित्यत्र कः शब्दः? ॥

(आक्षेपोपपादकभाष्यम्)

किं यत्तत्सास्नालाङ्गूलककुदखुरविषाण्यर्थरूपं स शब्दः? ॥

(आक्षेपबाधकभाष्यम्)

नेत्याह। द्रव्यं नाम तत्।

(आक्षेपोपपादकभाष्यम्)

यत्तर्हि तदिङ्गितं चेष्टितं निमिषितमिति स शब्दः? ॥

(निराकरणभाष्यम्)

नेत्याह। क्रिया नाम सा ॥

(आक्षेपोपपादकभाष्यम्)

यत्तर्हि तच्छुक्लो नीलः कपिलः कपोत इति, स शब्दः? ॥

(निराकरणभाष्यम्)

नेत्याह । गुणो नाम सः।

(आक्षेपोपपादकभाष्यम्)

यत्तर्हि तद्भिन्नेष्वभिन्नं छिन्नेष्वच्छिन्नं सामान्यभूतं स शब्दः?॥

(निराकरणभाष्यम्)

नेत्याह । आकृतिर्नाम सा।

(आक्षेपोपसंहारभाष्यम्)

कस्तर्हि शब्दः?॥

(समाधानभाष्यम्)

येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां संप्रत्ययो भवति स शब्दः॥

(समाधानान्तरभाष्यम्)

अथवा-प्रतीतपदार्थको लोके ध्वनिः शब्द इत्युच्यते । तद्यथा शब्दं कुरु, मा शब्दं कार्षीः शब्दकार्ययं माणवकः, इति ध्वनिं कुर्वन्नेवमुच्यते। तस्माद् ध्वनिः शब्दः॥

(शब्दानुशासनशास्त्रप्रयोजनाधिकरणम्)

(आक्षेपभाष्यम्)

कानि पुनः शब्दानुशासनस्य प्रयोजनानि? ॥

(समाधानभाष्यम्)

रक्षोहागमलध्वसंदेहाः प्रयोजनम्।

(रक्षापदार्थनिरूपणभाष्यम्)

रक्षार्थं वेदानामध्येयं व्याकरणम् । लोपागमवर्णविकारज्ञो हि सम्यग्वेदान्परिपालयिष्यतीति॥

(ऊहपदार्थनिरूपणभाष्यम्)

ऊहः खल्वपि-न सवैर्लिङ्गैर्न च सर्वाभिर्विभक्तिभिर्वेदे मन्त्रा निगदिताः। ते चावश्यं यज्ञगतेन पुरुषेण यथायथं विपरिणमयितव्याः। तान्नावैयाकरणः शक्नोति यथायथं विपरिणमयितुम् । तस्मादध्येयं व्याकरणम्॥

(आगमपदार्थनिरूपणभाष्यम्)

आगमः खल्वपि-'ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च' इति॥ प्रधानं च षट्स्वङ्गेषु व्याकरणम्। प्रधाने च कृतो यत्नः फलवान्भवति॥

(लघुपदार्थनिरूपणभाष्यम्)

लध्वर्थं चाध्येयं व्याकरणम्। ''ब्राह्मणेनावश्यं शब्दा ज्ञेयाः''इति। न चान्तेरण व्याकरणं लघुनोपायेन शब्दा शक्या ज्ञातुम्॥

(असंदेहपदार्थनिरूपणभाष्यम्)

असंदेहार्थं चाध्येयं व्याकरणम्। याज्ञिकाः पठन्ति-''स्थूलपृषतीमाग्निवारुणी-मनड्वाहीमालभेते''ति। तस्यां सन्देहः-स्थूला चासौ पृषती च स्थूलपृषती, स्थूलानि पृषन्ति यस्याः सेयं स्थूलपृषतीति । तां नावैयाकरणः स्वरतोऽध्यवस्यति-यदि पूर्वपदप्रकृतिस्वरत्वं ततो बहुव्रीहिः, अथ समासान्तोदात्तत्त्वं ततस्तत्पुरुष इति॥

(व्याकरणाध्ययनसाधकागमप्रतीकभाष्यम्)

इमानि च भूयः शब्दानुशासनस्य प्रयोजनानि-तेऽसुराः। दुष्टः शब्दः। यदधीतम्। यस्तु प्रयुङ्क्ते। अविद्वांसः। विभक्तिं कुर्वन्ति । यो वा इमाम्। चत्वारि। ऊत त्वः। सक्तुमिव। सारस्वतीम्। दशम्यां पुत्रस्य। सुदेवो असि वरुण इति ॥

(भाष्यम्)

तेऽसुराः-

''तेऽसुरा हेलयो हेलय इति कुर्वन्तः पराबभूवुः। तस्माद् ब्राह्मणेन न म्लेच्छितवै नापभाषितवै, म्लेच्छो ह वा एष यदपशब्दः''॥ म्लेच्छा मा भूमेत्यध्येयं व्याकरणम्। तेऽसुराः॥

(भाष्यम्)

दुष्टः शब्दः

''दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह।

स-वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोपराधाद्॥'' इति॥

दुष्टाञ्छब्दान्मा प्रयुक्ष्महीत्यध्येयं व्याकरणम्॥ दुष्टः शब्दः॥

(भाष्यम्)

यदधीतम् -

''यदधीतमविज्ञातं निगदेनैव शब्द्यते।

अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित्॥''

तस्मादनर्थकं माधिगीष्महीत्यध्येयं व्याकरणम्॥

यदधीतम्॥

(भाष्यम्)

यस्तु प्रयुङ्क्ते-

''यस्तु प्रयुङ्क्ते कुशलो विशेषे शब्दान्यथावद् व्यवहारकाले।

सोऽनन्तमाप्नोति जयं परत्र वाग्योगविद् दुष्यति चापशब्दैः॥''

कः?॥

वाग्योगविदेव॥

कुत एतत्?॥

यो हि शब्दाञ्जानात्यपशब्दानप्यसौ जानाति। यथैव हि शब्दज्ञाने धर्मः, एवमपशब्दज्ञानेऽप्यधर्मः। अथवा भूयानधर्मः प्रप्नोति। भूयांसोऽपशब्दाः, अल्पीयांसः शब्दा इति। एकैकस्य हि शब्दस्य बहवोऽपभ्रंशाः। तद्यथा गौरित्यस्य शब्दस्य गावी

गोणी गोता गोपोतलिकेत्यादयो बहवोऽपभ्रंशाः। अथ योऽवाग्योगविद्, अज्ञानं तस्य शरणम्॥

(बाधकभाष्यम्)

विषम उपन्यासः। नात्यन्तायाज्ञानं शरणं भवितुमर्हति ।

यो ह्यजानन् वै ब्राह्मणं हन्यात्सुरां वा पिबेत् सोऽपि मन्ये पतितः स्यात्॥

(सिद्धान्तव्याख्याभाष्यम्)

एवं तर्हि-

''सोऽनन्तमाप्नोति जयं परत्र

वाग्योगविद् दुष्यति चापशब्दैः॥''

कः?॥

अवाग्योगविदेव। अथ यो वाग्योगविद्, विज्ञानं तस्य शरणम्॥

(आक्षेपभाष्यम्)

क्व पुनरिदं पठितम्?॥

(समाधानभाष्यम्)

भ्राजा नाम श्लोकाः॥

(आक्षेपभाष्यम्)

किं च भोः श्लोका अपि प्रमाणम्?॥

किं चातः?॥

यदि श्लोका अपि प्रमाणम्, अयमपि श्लोकः प्रमाणं भवितुमर्हति -

‘‘यदुदुम्बरवर्णानां घटीनां मण्डलं महत् ॥’’

पीतं न गमयेत्स्वर्गं किं तत् क्रतुगतं नयेत्॥’’ इति॥

(समाधानभाष्यम्)

प्रमत्तगीत एष तत्रभवतः। यस्त्वप्रमत्तगीतस्तत्प्रमाणम्॥ यस्तु प्रयुङ्क्ते॥

(भाष्यम्)

अविद्वांसः-

‘‘अविद्वांसः प्रत्यभिवादे नाम्नो ये न प्लुतिं विदुः।

कामं तेषु तु विप्रोष्य स्त्रीष्विवायमहं वदेत्॥’’

अभिवादे स्त्रीवन्मा भूमेत्यध्येयं व्याकरणम् ॥

अविद्वांसः॥

(भाष्यम्)

विभक्तिं कुर्वन्ति-

याज्ञिकाः पठन्ति-‘‘प्रयाजाः सविभक्तिकाः कार्याः’’ इति। नचान्तरेण व्याकरणं प्रयाजाः सविभक्तिकाः शक्याः कर्तुम् ॥ विभक्तिं कुर्वन्ति॥

(भाष्यम्)

यो वा इमाम्-

‘‘यो वा इमां पदशः स्वरशोऽक्षरशश्च वाचं विदधाति स आर्त्विजीनो भवति’’ आर्त्विजीना स्यामेत्यध्येयं व्याकरणम्॥ यो वा इमाम्॥

(भाष्यम्)

चत्वारि-

‘‘चत्वारि श्रृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य।

त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आविवेश’’॥ इति॥

चत्वारि श्रृङ्गाणि। चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्च॥ त्रयो अस्य पादाः॥ त्रयः काला भूतभविष्यद्वर्तमानाः॥ द्वे शीर्षे। द्वौ शब्दात्मानौ नित्यः कार्यश्च॥ सप्त हस्तासो अस्य । सप्त विभक्तयः। त्रिधा बद्धः। त्रिषु स्थानेषु बद्ध उरसि कण्ठे शिरसीति॥ वृषभो वर्षणात् ॥ रोरवीति शब्दं करोति॥ कुत एतद्?।

रौतिः शब्दकर्मा ॥ महोदेवो मर्त्यां आविवेशेति। महान्देवः शब्दः॥ मर्त्या मरणधर्माणो मनुष्यास्तानाविवेश । महता देवेन नः साम्यं यथा स्यादित्यध्येयं व्याकरणम्॥

(भाष्यम्)

अपर आह-

‘‘चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः।

गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति॥’’

‘चत्वारि वाक्परिमिता पदानि।’ चत्वारि पदजातानि नामाख्यातोपसर्ग-निपाताश्च॥ तानि विदुर्ब्राह्मणा ये मनीषिणः।' मनस ईषिणो मनीषिणः। गुहा त्रीणि निहिता नेङ्गयन्ति।' गुहायां त्रीणि निहितानि नेङ्गयन्ति। न चेष्टन्ते। न निमिषन्तीत्यर्थः॥ तुरीयं वाचो मनुष्या वदन्ति।’ तुरीयं वा एतद्वाचो यन्मनुष्येषु वर्तते चतुर्थमित्यर्थः॥ चत्वारि॥

(भाष्यम्)

उत त्वः-

''उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनाम्।

उतो त्वस्मै तन्वं विसस्रे जायेव पत्य उशती सुवासाः॥''

'उत त्वः' अपि खल्वेकः पश्यन्नपि न पश्यति वाचम् । अपि खल्वेकः शृण्वन्नपि न शृणोत्येनामिति। अविद्वांसमाहार्धम्॥ उतो त्वस्मै। तन्वं विसस्रे तनुं विवृणुते॥ जायेव पत्य उशती सुवासाः। तद्यथा जाया पत्ये कामयमाना सुवासाः स्वमात्मानं विवृणुते, एवं वाग् वाग्विदे स्वात्मानं विवृणुते॥ वाङ्नो विवृणुयादात्मानमित्यध्येयं व्याकरणम्॥

(भाष्यम्)

सक्तुमिव-

''सक्तुमिव तितउना पुनन्तो

यत्र धीरा मनसा वाचमक्रत।

अत्रा सखायः सख्यानि जानते

भद्रैषां लक्ष्मीर्निहिताधिवाचि॥''

सक्तुः- सचतेर्दुर्धावो भवति, कसतेर्वा विपरीताद्विकसितो भवति । तितउ-परिपवनं भवति- ततवद्वा तुन्नवद्वा। धीरा ध्यानवन्तः । मनसा प्रज्ञानेन। वाचमक्रत वाचमकृषत। अत्रा सखायः सख्यानि जानते। अत्र सखायः सन्तः सख्यानि जानते।

क्व?

य एष दुर्गो मार्गः, एकगम्यो वाग्विषयः॥

के पुनस्ते?।

वैयाकरणाः॥

कुत एतत्॥

'भद्रैषां लक्ष्मीर्निहिताधिवाचि।'

एषां वाचि भद्रा लक्ष्मीर्निहिता भवति। लक्ष्मीर्लक्षणाद्भासनात्परिवृढा भवति। सक्तुमिव॥

(भाष्यम्)

सारस्वतीम्-

याज्ञिकाः पठन्ति-'' आहिताग्निरपशब्दं प्रयुज्य प्रायश्चित्तीयां सारस्वतीमिष्टिं निर्वपेत्'' इति॥ प्रायश्चित्तीया मा भूमेत्यध्येयं व्याकरणम्॥

सारस्वतीम्।

(भाष्यम्)

दशम्यां पुत्रस्य-

याज्ञिकाः पठन्ति- ''दशम्युत्तरकालं पुत्रस्य जातस्य नाम विदध्याद् घोषवदाद्यन्तरन्तस्थमवृद्धं त्रिपुरुषानूकमनरिप्रतिष्ठितम्। तद्धि प्रतिष्ठिततमं भवति। द्व्यक्षरं चतुरक्षरं वा नाम कृतं कुर्यान्न तद्धितम्'' इति॥

नचान्तरेण व्याकरणं कृतस्तद्धिता वा शक्या विज्ञातुम्॥ दशम्यां पुत्रस्य॥

(भाष्यम्)

सुदेवो असि-

सुदेवो असि वरुण यस्य ते सप्त सिन्धवः।

अनुक्षरन्ति काकुदं सूर्म्यं सुषिरामिव॥''

सुदेवो असि वरुण सत्यदेवोऽसि। यस्य ते सप्त सिन्धवः सप्त विभक्तयः। अनुक्षरन्ति काकुदम्। काकुदं तालु । काकुर्जिह्वा, साऽस्मिन्नुद्यत इति काकुदम्। सूर्म्यं सुषिरामिव। तद्यथा- शोभनामूर्मिं सुषिरामग्निरन्तः प्रविश्य दहति, एवं ते सप्त सिन्धवः सप्त विभक्तयस्ताल्वनुक्षरन्ति। तेनासि सत्यदेवः॥ सत्यदेवाः स्यामेत्ययेयं व्याकरणम्॥ सुदेवो असि॥

(उक्तप्रयोजनग्रन्थोपपत्तिप्रकरणम्)

(आक्षेपभाष्यम्)

किं पुनरिदं व्याकरणमेवाधिजिगांसमानेभ्यः प्रयोजनमन्वाख्यायते, न पुनरन्यदपि किञ्चित्- ऊँ इत्युक्त्वा वृत्तान्तशः शमित्येवमादीन् शब्दान्पठन्ति? ॥

(समाधानभाष्यम्)

पुराकल्प एतदासीत् - संस्कारोत्तरकालं ब्राह्मणा व्याकरणं स्माधीयते। तेभ्यस्तत्तत्स्थानकरणनादानुप्रदानज्ञेभ्यो वैदिकाः शब्दा उपदिश्यन्ते ॥ तदद्यत्वे न तथा। वेदमधीत्य त्वरिता वक्तारो भवन्ति- वेदान्नो वैदिकाः शब्दाः सिद्धाः, लोकाच्च लौकिकाः अनर्थकं व्याकरणम् इति। तेभ्य एवं विप्रतिपन्नबुद्धिभ्योऽध्येतृभ्यः सुहृद् भूत्वा आचार्य इदं शास्त्रमन्वाचष्टे - इमानि प्रयोजनान्यध्येयं व्याकरणम्-इति॥'

(अनुबन्धचतुष्टयोपसंहारभाष्यम्)

उक्तः शब्दः। स्वरूपमप्युक्तम्। प्रयोजनान्यप्युक्तानि॥

(अथ शास्त्रनिर्माणरीतिनिरूपणभाष्यम्)

(आक्षेपभाष्यम्)

शब्दानुशासनमिदानीं कर्त्तव्यम्। तत्कथं कर्तव्यम् । किं शब्दोपदेशः कर्तव्यः, आहोस्विदपशब्दोपदेशः, आहोस्विदुभयोपदेश इति?॥

(समाधानम्)

अन्यतरोपदेशेन कृतं स्यात्। तद्यथा भक्ष्यनियमेनाभक्ष्यप्रतिषेधो गम्यते। पञ्च पञ्चनखा भक्ष्या इत्युक्ते गम्यत एतद्- अतोऽन्येऽभक्ष्या इति॥ अभक्ष्यप्रतिषेधेन वा भक्ष्यनियमः। तद्यथा ''अभक्ष्यो ग्राम्यकुक्कुटः अभक्ष्यो ग्राम्यसूकरः' इत्युक्ते गम्यत एतद्- आरण्यो भक्ष्य-इति। एवमिहापि। यदि तावच्छब्दोपदेशः क्रियते, गौरित्येतस्मिन्नुपदिष्टे गम्यत एतद् गाव्यादयोऽपशब्दा इति। अथाप्यपशब्दोपदेशः क्रियते, गाव्यादिषूपदिष्टेषु गम्यत एतद्-गौरित्येष शब्द इति॥

(आक्षेपभाष्यम्)

किं पुररत्र ज्यायः?॥

(समाधानभाष्यम्)

लघुत्वाच्छब्दोपदेशः।

लघीयाञ्छब्दोपदेशः। गरीयानपशब्दोपदेशः। एकैकस्य शब्दस्य बहवोऽपभ्रंशाः। तद्यथा- गौरित्यस्य शब्दस्य गावीगोणीगोतागोपोतलिकेत्येवमादयोऽपभ्रंशाः। इष्टान्वाख्यानं खल्वपि भवति॥

(आक्षेपभाष्यम्)

अथैतस्मिञ्शब्दोपदेशे सति किं शब्दानां प्रतिपत्तौ प्रतिपदपाठः कर्त्तव्यः-गौरश्वः पुरुषो हस्ती शकुनिर्मृगो ब्राह्मण इत्येवमादयः शब्दाः पठितव्याः?॥

(समाधानभाष्यम्)

नेत्याह। अनभ्युपाय एष शब्दानां प्रतिपत्तौ प्रतिपदपाठः॥ एवं हि श्रूयते- ‘‘बृहस्पति- रिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच नान्तं जगाम’’॥ बृहस्पतिश्च प्रवक्ता, इन्द्रश्चाध्येता, दिव्यं वर्षसहस्त्रमध्ययनकालो, न चान्तं जगाम, किं पुनरद्यत्वे। यः सर्वथा चिरं जीवति वर्षशतं जीवति। चतुर्भिश्च प्रकारैर्विद्योपयुक्ता भवति-आगमकालेन, स्वाध्यायकालेन,प्रवचनकालेन, व्यहारकालेनेति। तत्र चास्यागम- कालेनैवायुः कृत्स्नं पर्युपयुक्तं स्यात्। तस्मादनभ्युपायः शब्दानां प्रतिपत्तौ प्रतिपदपाठः॥

(आक्षेपभाष्यम्)

कथं तर्हीमे शब्दाः प्रतिपत्तव्याः?॥

(समाधानभाष्यम्)

किंचित्सामान्यविशेषवल्लक्षणं प्रवर्त्यम्। येनाल्पेन यत्नेन महतो महतः शब्दौघान् प्रतिपद्येरन्॥

किं पुनस्तत्? ॥

उत्सर्गापवादौ। कश्चिदुत्सर्गः कर्तव्यः, कश्चिदपवादः॥

(आक्षेपभाष्यम्)

कथं जातीयकः पुनरुत्सर्गः कर्तव्यः, कथंजातीयकोऽपवादः॥

(समाधानम्)

सामान्येनोत्सर्गः कर्तव्यः। तद्यथा ‘‘कर्मण्यण् । तस्य विशेषेणापवादः। तद्यथा- ’’आतोऽनुपसर्गे कः॥’‘

(जातिव्यक्तिपदार्थनिर्णयाधिकरणम्)

(आक्षेपभाष्यम्)

किं पुनराकृतिः पदार्थः आहोस्विद् द्रव्यम्?॥

(समाधानभाष्यम्)

उभयमित्याह॥

कथं ज्ञायते?।

उभयथा ह्याचार्येण सूत्राणि पठितानि। आकृतिं पदार्थं मत्वा- ''जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्याम्'' इत्युच्यते। द्रव्यं पदार्थ मत्वा ''सरूपाणाम्'' इत्येकशेष आरभ्यते॥

(शब्दनित्यत्वानित्यत्वविचारभाष्यम्)

(आक्षेपभाष्यम्)

किं पुनर्नित्यः शब्दः, आहोस्वित्कार्यः?॥

(समाधानभाष्यम्)

संग्रह एतत्प्राधान्येन परीक्षितम्-नित्यो वा स्यात्कार्यो वेति। तत्रोक्ता दोषाः, प्रयोजनान्यप्युक्तानि। तत्र त्वेष निर्णयः-यद्येव नित्यः, अथापि कार्यः, उभयथापि लक्षणं प्रवर्त्यमिति॥

(नित्यशब्दवादेपि शास्त्रस्य धर्मजनकताधिकरणम्)

(आक्षेपभाष्यम्)

कथं पुनरिदं भगवतः पाणिनेराचार्यस्य लक्षणं प्रवृत्तम्-

(आक्षेपसाधकवार्तिकप्रथमखण्डम्)

॥*॥ सिद्धे शब्दार्थसम्बन्धे॥*॥

(व्याख्याभाष्यम्)

सिद्धे शब्देऽर्थे सम्बन्धे चेति॥

(वार्तिकघटकसिद्धशब्दार्थनिरूपणभाष्यम्)

(आक्षेपभाष्यम्)

अथ सिद्धशब्दस्य कः पदार्थः?॥

(समाधानम्)

नित्यपर्यायवाची सिद्धशब्दः॥ कथं ज्ञायते ? ॥ यत्कूटस्थेष्वविचालिषु भावेषु वर्तते। तद्यथा-सिद्धा द्यौः, सिद्धा पृथिवी, सिद्धमाकाशमिति॥

(आक्षेपभाष्यम्)

ननु च भोः कार्येष्वपि वर्तते। तद्यथा- सिद्ध ओदनः, सिद्धः सूपः, सिद्धाः यवागूरिति। यावता कार्येष्वपि वर्तते, तत्र कुत एतन्नित्यपर्यायवाचिनो ग्रहणम्, न पुनः कार्ये यः सिद्धशब्द इति? ॥

(समाधानभाष्यम्)

संग्रहे तावत्कार्यप्रतिद्वन्द्विभावान्मन्यामहे नित्यपर्यायवाचिनो ग्रहणमिति। इहापि तदेव॥

(समाधानान्तरभाष्यम्)

अथवा सन्त्येकपदान्यप्यवधारणानि। तद्यथा-अब्भक्षो वायुभक्ष इति- अप एव भक्षयति, वायुमेव भक्षयतीति गम्यते। एवमिहापि सिद्ध एव, न साध्य इति॥

(समाधानान्तरभाष्यम्)

अथवा पूर्वपदलोपोऽत्र द्रष्टव्यः- अत्यन्तसिद्धः सिद्ध इति। तद्यथा - देवदत्तो दत्तः, सत्यभामा भामेति।

(समाधानान्तरभाष्यम्)

अथवा ''व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणम्'' इति नित्यपर्याय-वाचिनो ग्रहणमिति व्याख्यास्यामः॥

(समाधानभाष्यम्)

॥ मङ्गलार्थम्॥

माङ्गलिक आचार्यो महतः शास्त्रौघस्य मङ्गलार्थं सिद्धशब्दमादितः प्रयुङ्क्ते। मङ्गलादीनि हि शास्त्राणि प्रथन्ते वीरपुरुषाणि च भवन्ति, आयुष्मत्पुरुषाणि चाध्येतारश्च सिद्धार्था यथा स्युरिति॥

(समाधानभाष्यशेषभाष्यम्)

अयं खलु नित्यशब्दो नावश्यं कूटस्थेष्वविचालिषु भावेषु वर्तते॥

किं तर्हि? ॥

आभीक्ष्ण्येपि वर्तते। तद्यथा नित्यप्रहसितो नित्यप्रजल्पित इति। यावताभीक्ष्ण्येऽपि वर्तते तत्राप्यनेनैवार्थः स्यात्-''व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम्'' इति। पश्यति त्वाचार्यो मङ्गलार्थश्चैव सिद्धशब्द आदितः प्रयुक्तो

भविष्यति, शक्ष्यामि चैनं नित्यपर्यायवाचिनं वर्णयितुमिति। अतः सिद्धशब्द एवोपात्तो न नित्यशब्दः॥

(नित्यतासाधकपक्षनिरूपणम्)

(आक्षेपभाष्यम्)

अथ कं पुनः पदार्थं मत्वा एष विग्रहः क्रियते। सिद्धे शब्देऽर्थे सम्बन्धे चेति?॥

(समाधानाभाष्यम्)

आकृतिमित्याह॥

कुत एतत्? ॥

आकृतिर्हि नित्या द्रव्यमनित्यम्॥

(आक्षेपभाष्यम्)

अथ द्रव्ये पदार्थे कथं विग्रहः कर्त्तव्यः? ॥

(समाधानान्तरभाष्यम्)

सिद्धे शब्दे अर्थसम्बन्धे चेति। नित्यो ह्यर्थवतामर्थैरभिसम्बन्धः॥

(द्रव्यपदार्थाभ्युपगमभाष्यम्)

अथवा द्रव्य एव पदार्थे एष विग्रहो न्याय्यः-सिद्धे शब्दे अर्थे सम्बन्धे चेति। द्रव्यं हि नित्यमाकृतिरनित्या॥

कथं ज्ञायते? ॥

एवं हि दृश्यते लोके मृत्कयाचिदाकृत्या युक्ता पिण्डो भवति, पिण्डाकृतिमुपमृद्य घटिकाः क्रियन्ते, घटिकाकृतिमुपमृद्य कुण्डिकाः क्रियन्ते। तथा सुवर्णं कयाचिदाकृत्या

युक्तं पिण्डो भवति, पिण्डाकृतिमुपमृद्य रुचकाः क्रियन्ते, रुचकाकृतिमुपमृद्य कटकाः क्रियन्ते, कटकाकृतिमुपमृद्य स्वस्तिकाः क्रियन्ते। पुनरावृत्तः सुवर्णपिण्डः पुनरपरयाकृत्या युक्तः खदिराङ्गारसवर्णे कुण्डले भवतः। आकृतिरन्या चान्या च भवति, द्रव्यं पुनस्तदेव। आकृत्युपमर्देन द्रव्यमेवावशिष्यते॥

(आकृतिपदार्थाभ्युपगमभाष्यम्)

आकृतावपि पदार्थ एष विग्रहो न्याय्यः-सिद्धे शब्दे अर्थे सम्बन्धे चेति॥

(आक्षेपस्मारणभाष्यम्)

ननु चोक्तम्- आकृतिरनित्या-इति॥

(समाधानभाष्यम्)

नैतदस्ति। नित्याऽऽकृतिः॥

कथम् ?॥

न क्वचिदुपरतेति कृत्वा सर्वत्रोपरता भवति। द्रव्यान्तरस्था तूपलभ्यते॥

(समाधानसाधकनित्यलक्षणभाष्यम्)

अथवा नेदमेव नित्यलक्षणम्- ध्रुवं कूटस्थमविचाल्यनपायोपजनविकार्यनुत्पत्त्य-वृद्धयव्ययययोगि यत्तन्नित्यमिति। तदपि नित्यं यस्मिंस्तत्त्वं न विहन्यते।

किं पुनस्तत्त्वम्? ॥

तस्य भावस्तत्त्वम्॥ आकृतावपि तत्त्वं न विहन्यते।

(नित्यानित्यत्वविचारस्याप्रकृतत्वबोधकभाष्यम्)

अथवा किं न एतेन-इदं नित्यमिदमनित्यमिति। यन्नित्यं तं पदार्थं मत्वैष विग्रहः क्रियते-सिद्धे शब्देऽर्थे सम्बन्धे चेति॥

(प्रत्याक्षेपभाष्यम्)

कथं पुनर्ज्ञायते-सिद्धः शब्दोऽर्थः सम्बन्धश्चेति ॥

(१ प्रत्याक्षेपसमाधानवार्तिकद्वितीयखण्डम्)

॥ ॥ लोकतः॥ ॥

(भाष्यम्)

यल्लोकेऽर्थमर्थमुपादाय शब्दान्प्रयुञ्जते, नैषां निर्वृत्तौ यत्नं कुर्वन्ति। ये पुनः कार्या भावा निर्वृत्तौ तावतेषां यत्नः क्रियते। तद्यथा-घटेन कार्यं करिष्यन् कुम्भकारकुलं गत्वाह-कुरु घटं कार्यमनेन करिष्यामीति। न तद्वच्छब्दान्प्रयुयुक्षमाणो वैयाकरणकुलं गत्वाह-कुरु शब्दान्प्रयोक्ष्य इति। तावत्येवार्थमुपादाय शब्दान्प्रयुञ्जते॥

(आक्षेपोपसंहारभाष्यम्)

यदि तर्हि लोक एषु प्रमाणम्, किं शास्त्रेण क्रियते?

(१ समाधानभूतं तृतीयखण्डम्॥३॥)

॥ ॥ लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः ॥ ॥

(भाष्यम्)

लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः क्रियते॥

किमिदं धर्मनियम इति॥

धर्माय नियमो धर्मनियमः,धर्मार्थो वा नियमो धर्मनियमः, धर्मप्रयोजनो वा नियमो धर्मनियमः॥

(१ वार्तिकचतुर्थखण्डम्॥ ४॥)

॥*॥ यथा लौकिकवैदिकेषु॥*॥

प्रियतद्धिता दाक्षिणात्याः-''यथा लोके वेदे चे'ति प्रयोक्तव्ये ''यथा लौकिकवैदिके'ष्विति प्रयुञ्जते॥ अथवा युक्त एवात्र तद्धितार्थः। यथा लौकिकेषु वैदिकेषु च कृतान्तेषु॥

लोके तावद् 'अभक्ष्यो ग्राम्यकुक्कुटः, अभक्ष्यो ग्राम्यसूकर' इत्युच्यते। भक्ष्यं च नाम क्षुत्प्रतिघातार्थमुपादीयते। शक्यं चानेन श्वमांसादिभिरपि क्षुत्प्रतिहन्तुम्। तत्र नियमः क्रियते - इदं भक्ष्यमिदमभक्ष्यमिति॥ तथा- खेदात्स्त्रीषु प्रवृत्तिर्भवति। सामान्श्च खेदविगमो गम्यायां चागम्यायां च । तत्र नियमः क्रियते-इयं गम्येयमगम्येति॥

(भाष्यम्)

वेदे खल्वपि-''पयोव्रतो ब्राह्मणो यवागूव्रतो राजन्य आमिक्षाव्रतो वैश्यः'' इत्युच्यते। व्रतं च नामाभ्यवहारार्थमुपादीयते। शक्यं चानेन शालिमांसादीन्यपि व्रतयितुम्। तत्र नियमः क्रियते।

तथा- ''बैल्वः खादिरो वा यूपः स्याद्'' इत्युच्यते। यूपश्च नाम पश्वनुबन्धार्थमुपादीयते। शक्यं चानेन यत्किंचिदेव काष्ठमुच्छ्रित्यानुच्छ्रित्य वा पशुरनुबन्धुम्। तत्र नियमः क्रियते।

तथा ''अग्नौ कपालान्यधिश्रित्याभिमन्त्रयते-भृगूणामङ्गिरसां धर्मस्य तपसा तप्यध्वम्'' इति । अन्तरेणापि मन्त्रमग्निर्दहनकर्मा कपालानि संतापयति। तत्र च नियमः क्रियते- एवं क्रियमाणमभ्युदयकारि भवतीति॥

(दार्ष्टान्तिक उपसंहारभाष्यम्)

एवमिहापि समानायामर्थावगतौ शब्देन चापशबदेन च धर्मनियमः क्रियते- शब्देनैवार्थोऽभिधेयो नापशब्देनेति॥ एवं क्रियमाणमभ्युदयकारि भवतीति॥

(अनुपलब्धप्रयोगसाधुशब्दसाधकशास्त्रसार्थक्याधिकरणम्)

(२ आक्षेपवार्तिकम्॥१॥)

॥॥ अस्त्यप्रयुक्तः॥॥

(भाष्यम्)

सन्ति वै शब्दा अप्रयुक्ताः। तद्यथा-ऊष, तेर,चक्र, पेचेति॥

किमतो यत्सन्त्यप्रयुक्ताः?॥

प्रयोगाद्धि भवाञ्छब्दानां साधुत्वमध्यवस्यति। य इदानीमप्रयुक्ता नामी साधवः स्युः॥

(आक्षेपासंगतिभाष्यम्)

इदं तावद्विप्रतिषिद्धम्-यदुच्यते- ''सन्ति वै शब्दा अप्रयुक्ता'' इति । यदि सन्ति नाप्रयुक्ताः, अथाप्रयुक्ता न सन्ति, सन्ति चाप्रयुक्ताश्चेति विप्रतिषिद्धम्। प्रयुञ्जान एव खलु भवानाह-सन्ति शब्दा अप्रयुक्ता इति। कश्चेदानीमन्यो भवज्जातीयकः पुरुषः शब्दानां प्रयोगे साधुः स्यात्? ॥

(आक्षेपासंगतिबाधकभाष्यम्)

नैतद्विप्रतिषिद्धम्। सन्तीति तावद्ब्रूमः। यदेताञ्शास्त्रविदः शास्त्रेणानुविदधते॥ अप्रयुक्ता इति ब्रूमः। यल्लोकेऽप्रयुक्ता इति॥ यदप्युच्यते-कश्चेदानीमन्यो भवञ्जातीयकः पुरुषः शब्दानां प्रयोगें साधुः स्यादिति। न ब्रूमोऽस्माभिरप्रयुक्ता इति॥

किं तर्हि?॥

लोकेऽप्रयुक्ता इति॥

(आक्षेपभाष्यम्)

ननु च भवानप्यभ्यन्तरो लोके॥

(समाधानभाष्यम्)

अभ्यन्तरोऽहं लोके, न त्वहं लोकः॥

(३ आक्षेपबाधकवार्तिकम्॥२॥)

॥*॥ अस्त्यप्रयुक्त इति चेन्नार्थे शब्दप्रयोगात् ॥*॥

(भाष्यम्)

अस्त्यप्रयुक्त इति चेत्। तन्न ॥ किं कारणम्? ॥ अर्थे शब्दाः प्रयुज्यन्ते। सन्ति चैषां शब्दानामर्था येष्वर्थेषु प्रयुज्यन्ते॥

(५ आक्षेपसाधकवार्तिकम्)

॥*॥ अप्रयोगः प्रयोगान्यत्वात्॥*॥

(भाष्यम्)

अप्रयोगः खल्वप्येषां शब्दानां न्याय्यः॥ कुतः?॥ प्रयोगान्यत्वाद्। यदेषां शब्दानामर्थेऽन्याञ्छब्दान्प्रयुञ्जते। तद्यथा-ऊषेत्यस्य शब्दस्यार्थे-क्व यूयमूषिताः, तेरेत्यस्यार्थे-क्व यूयं तीर्णाः, चक्रेत्यस्यार्थे-क्व यूयं कृतवन्तं। पेचेत्यस्यार्थे क्व यूयं पक्ववन्त इति॥

(१ सिद्धान्तसमाधानवार्तिकम्)

॥*॥ अप्रयुक्ते दीर्घसत्रवत्॥*॥

(भाष्यम्)

यद्यप्यप्रयुक्ताः, अवश्यं दीर्घसत्रवल्लक्षणेनानुविधेयाः। तद्यथा दीर्घसत्राणि वार्षशतिकानि वार्षसहस्रिकाणि च। न चाद्यत्वे कश्चिदप्याहरति। केवलमृषिसंप्रदायो धर्म इति कृत्वा याज्ञिकाः शास्त्रेणानुविदधते॥

(६ सिद्धान्तसमाधानवार्तिकम्॥५॥)

॥*॥ सर्वे देशान्तरे॥*॥

(भाष्यम्)

सर्वे खल्वप्येते शब्दा देशान्तरेषु प्रयुञ्ज्यन्ते॥

(आक्षेपभाष्यम्)

न चैवोपलभ्यन्ते॥

उपलब्धौ यत्नः क्रियताम्॥ महान् शब्दस्य प्रयोगविषयः। सप्तद्वीपा वसुमती त्रयो लोकाः, चत्वारो वेदाः साङ्गाः सरहस्या बहुधा भिन्ना एकशतध्वर्युशाखाः सहस्रवर्त्मा सामवेदः, एकविंशतिधा बाह्वृच्यं नवधाथर्वणो वेदः वाकोवाक्यमितिहासः पुराणं

वैयकमित्येतावाञ्छब्दस्य प्रयोगविषयः। एतावन्तं शब्दस्य प्रयोगविषयमननुनिशम्य 'सन्त्यप्रयुक्ता' इति वचनं केवलं साहसमात्रमेव॥

एतस्मिंश्चातिमहति शब्दस्य प्रयोगविषये ते ते शब्दास्तत्र तत्र नियतविषया दृश्यन्ते। तद्यथा शवतिर्गतिकर्मा कम्बोजेष्वेव भाषितो भवति, विकार एवैनमार्या भाषन्ते शव इति। हम्मतिः सुराष्ट्रेषु रंहतिः प्राच्यमध्येषु, गमिमेव त्वार्याः प्रयुञ्जते। दातिर्लवनार्थे प्राच्येषु, दात्रमुदीच्येषु॥ ये चाप्येते भवतोऽप्रयुक्ता अभिमताः शब्दा एतेषामपि प्रयोगो दृश्यते॥ क्व? ॥ वेदे। तद्यथा-''सप्तास्ये रेवतीरेवदूष, यद्वो रेवतीरेवत्यां तमृष, यन्मे नरः श्रुत्यं ब्रह्म चक्र, यत्रा नश्चक्रा जरसं तनूनाम्'' इति॥

(अथ शब्दज्ञानस्य धर्मजनकताधिकरणम्)

(आक्षेपभाष्यम्)

किं पुनः शब्दस्य ज्ञाने धर्मः आहोस्वित्प्रयोगे? ॥

(प्रत्याक्षेपभाष्यम्)

कश्चात्र? विशेषः?

(७ ज्ञानपक्षदूषणवार्तिकम्)

॥*॥ ज्ञाने धर्म इति चेत्तथाऽधर्मः॥ *॥

(भाष्यम्)

ज्ञाने धर्म इति चेत्तथाऽधर्मोपि प्राप्नोति। यो हि शब्दान् जानात्यपशब्दानप्यसौ जानाति। यथैव शब्दज्ञाने धर्म एवमपशब्दज्ञानेऽप्यधर्मः॥

(अधर्माधिक्यभाष्यम्)

अथवा भूयानधर्मः प्राप्नोति। भूयांसो ह्यपशब्दा अल्पीयांसः शब्दाः। एकैकस्य शब्दस्य बहवोऽपभ्रंशाः। तद्यथा गौरित्यस्य गावीगोणीगोतागोपोतलिकेत्येवमादयोऽपभ्रंशाः॥

॥*॥ आचारे नियमः॥*॥

(८ ज्ञानपक्षे दूषणान्तरवार्तिकम्)

(भाष्यम्)

आचारे पुनऋषिर्नियमं वेदयते-'' तेऽसुरा हेलयो हेलय इति कुर्वन्तः पराबभूवुः''॥ इति॥

(अथ प्रयोगपक्षाङ्गीकारभाष्यम्)

अस्तु तर्हि प्रयोगे॥

(९ प्रयोगपक्षे दूषणवार्तिकम्)

॥ ॥ प्रयोगे सर्वलोकस्य। । ॥

(भाष्यम्)

यदि प्रयोगे धर्मः, सर्वो लोकोऽभ्युदयेन युज्येत॥

(आक्षेपभाष्यम्)

कश्चेदानीं भवतो मत्सरो, यदि सर्वो लोकोऽभ्युदयेन युज्येत? ।

(समाधानभाष्यम्)

न खलु कश्चिन्मत्सरः। प्रयत्नानर्थक्यं तु भवति। फलवता च नाम यत्नेन भवितव्यम्। न च प्रयत्नः फलाद्व्यतिरेच्यः॥

(समाधानबाधकभाष्यम्)

ननु च ये कृतप्रयत्नास्ते साधीयः शब्दान्प्रयोक्ष्यन्ते, त एव साधीयोऽभ्युदयेन योक्ष्यन्ते॥

(समाधानसाधकभाष्यम्)

व्यतिरेकोऽपि वै लक्ष्यते। दृश्यन्ते हि कृतप्रयत्नाश्चाप्रवीणाः। अकृतप्रयत्नाश्च प्रवीणाः। तत्र फलव्यतिरेकोऽपि स्यात्॥

(पक्षद्वयनिराकरणोपसंहारभाष्यम्)

एवं तर्हि-नापि ज्ञान एव धर्मो नापि प्रयोग एव॥

किं तर्हि?॥

(१० सिद्धान्तसमाधानवार्तिकम्॥)

॥*॥ शास्त्रपूर्वके प्रयोगेऽभ्युदयस्तत्तुल्यं वेदशब्देन॥*॥

(भाष्यम्)

शास्त्रपूर्वकं यः शब्दान्प्रयुङ्क्ते सोऽभ्युदयेन युज्यते। तत्तुल्यं वेदशब्देन। वेदशब्दा अप्येवमभिवदन्ति ''योऽग्निष्टोमेन यजते य उ चैनमेवं वेद'' ''योऽग्निं नाचिकेतं चिनुते य उ चैनमेवं वेद''॥

(व्याख्यान्तरभाष्यम्)

अपर आह- तत्तुल्यं वेदशब्देनेति। यथा वेदशब्दा नियमपूर्वमधीताः फलवन्तो भवन्त्येवं यः शास्त्रपूर्वकं शब्दान्प्रयुक्ते सोऽभ्युदयेन युज्यत इति।

(प्रथमपक्षाभ्युपगमभाष्यम्)

अथ वा पुनरस्तु- ज्ञान एव धर्म इति॥

(आक्षेपस्मारणभाष्यम्)

ननु चोक्तम् ज्ञाने धर्म इति चेत्तथाऽधर्म इति॥

(आक्षेपनिराकरणभाष्यम्)

नैष दोषः, शब्दप्रमाणका वयम्, यच्छब्द आह तदस्माकं प्रमाणम्। शब्दश्च शब्दज्ञाने धर्ममाह, नापशब्दज्ञानेऽधर्मम्॥ यच्च पुनरशिष्टाप्रतिषिद्धम्, नैव तद्दोषाय भवति, नाभ्युदयाय। तद्यथा हिक्किकितहसितकण्डूयितानि नैव दोषाय भवन्ति, नाभ्युदयाय॥

(समाधानान्तरभाष्यम्)

अथवाभ्युपाय एवापशब्दज्ञानं शब्दज्ञाने । यो ह्यपशब्दाञ्जानाति शब्दानप्यसौ जानाति। तदेवं ''ज्ञाने धर्मः'' इति ब्रुवतोऽर्थादापन्नं भवति- ''अपशब्दज्ञानपूर्वके शब्दज्ञाने धर्मः'' इति॥

(समाधानान्तरभाष्यम्)

अथ वा कूपखानकवदेतद्भविष्यति। तद्यथा कूपखानकः कूपं खनन्यद्यपि मृदा पांसुभिश्चावकीर्णो भवति। सोऽप्सु संजातासु तत एव तं गुणमासादयति। येन च स दोषो निर्हण्यते, भूयसा चाभ्युदयेन योगो भवति। एवमिहापि यद्यप्यपशब्दज्ञानेऽधर्मस्तथापि यस्त्वसौ शब्दज्ञाने धर्मस्तेन च स दोषो निघार्निष्यते भूयसा चाभ्युदयेन योगो भविष्यति॥

(द्वितीयदूषणनिरासभाष्यम्)

यदप्युच्यते-आचारे नियम इति॥

याज्ञे कर्मणि स नियमोऽन्यत्रानियमः। एवं हि श्रूयते-''यर्वाणस्तर्वाणो नाम ऋषयो बभूवुः प्रत्यक्षधर्माणः परापरज्ञा विदितवेदितव्या अधिगतयाथातथ्याः।' ते

तत्रभवन्तो यद्वा नस्तद्वा न इति प्रयोक्तव्ये यर्वाणस्तर्वाण इति प्रयुज्यते, याज्ञे पुनः कर्मणि नापभाषन्ते॥ तैः पुनरसुरैर्याज्ञे कर्मण्यपभाषितम्, ततस्ते पराभूताः॥

(अथ व्याकरणपदार्थनिरूपण आक्षेपभाष्यम्)

अथ व्याकरणमित्यस्य शब्दस्य कः पदार्थः॥

(समाधानभाष्यम्)

॥सूत्रम्॥

(११ सूत्रपक्षे आक्षेपवार्तिकम्)

॥*॥ सूत्रे व्याकरणे षष्ठ्यर्थोऽनुपपन्नः॥*॥

(भाष्यम्)

सूत्रे व्याकरणे पष्ठ्यर्थो नोपपद्यते-''व्याकरणस्य सूत्रम्'' इति ॥ किं हि तदन्यत्सूत्राद् व्याकरणम्, यस्यादः सूत्रं स्यात्॥

(१२ आक्षेपान्तरवार्तिकम्)

॥*॥ शब्दाप्रतिपत्तिः॥*॥

(भाष्यम्)

शब्दानां चाप्रतिपत्तिः प्राप्नोति-''व्याकरणाच्छब्दान्प्रतिपद्यामहे'' इति । नहि सूत्रत एव शब्दान्प्रतिपद्यन्ते॥

किं तर्हि?॥

व्याख्यानतश्च॥

(आक्षेपबाधकभाष्यम्)

ननु च तदेव सूत्रं विगृहीतं व्याख्यानं भवति॥

(आक्षेपसाधकभाष्यम्)

न केवलानि चर्चापदानि व्याख्यानम्-''वृद्धिःआत्'' ऐज्'' इति॥

किं तर्हि? ॥

उदाहरणं प्रत्युदाहरणं वाक्याध्याहार इत्येतत्समुदितं व्याख्यानं भवति॥

(पक्षान्तरभाष्यम्)

एवं तर्हि शब्दः।

(१३ आक्षेपवार्तिकम्)

॥*॥ शब्दे ल्युडर्थः॥*॥

(भाष्यम्)

यदि शब्दो व्याकरणं ल्युडर्थो नोपपद्यते-व्याक्रियन्ते शब्दा अनेनेति व्याकरणम् । नहि शब्देन किञ्चिद् व्याक्रियते॥

केन तर्हि?॥

सूत्रेण॥

(१४ आक्षेपान्तरवार्तिकम्)

॥*॥ भवे च तद्धितः॥*॥

(भाष्यम्)

भवे च तद्धितो नोपपद्यते-''व्याकरणे भवो योगो वैयाकरणः'' इति। नहि शब्दे भवो योगः॥

क्व तर्हि? ॥

सूत्रे॥

(१५ आक्षेपान्तरवार्तिकम्)

॥*॥ प्रोक्तादयश्च तद्धिताः॥*॥

(भाष्यम्)

प्रयोक्तादयश्च तद्धिता नोपपद्यन्ते। पाणिनिना प्रोक्तं पाणिनीयम्। आपिशलं काशकृत्स्नमिति। नहि पाणिनिना शब्दाः प्रोक्ताः।

किं तर्हि? ॥

सूत्रम्॥

(आक्षेपभाष्यम्)

किमर्थमिदमुभयमुच्यते भवे प्रोक्तादयश्च तद्धिता इति। न प्रोक्तादयश्च तद्धिता इत्येव भवेऽपि तद्धितश्चोदितः स्यात्?॥

(परिहारभाष्यम्)

पुरस्तादिदमाचार्येण दृष्टम् भवे च तद्धित इति, तत्पठितम्। तत उत्तरकालमिदं दृष्टम् प्रोक्तादयश्च तद्धिताः इति, तदपि पठितम्। न चेदानीमाचार्याः सूत्राणि कृत्वा निर्वतयन्ति॥

(प्रथमाक्षेपकबाधकभाष्यम्)

अयं तावददोषः-यदुच्यते शब्दे ल्युडर्थः इति। नावश्यं करणाधिकरणयोरेव ल्युड्विधीयते॥

किं तर्हि? ॥

अन्येष्वपि कारकेषु-''कृत्यल्युटो बहुलम्'' इति। तद्यथा प्रस्कन्दनं प्रपतनमिति॥

(करणल्युट्समर्थनभाष्यम्)

अथ वा शब्दैरपि शब्दा व्याक्रियन्ते। तद्यथा गौरित्युक्ते सर्वे सन्देहा निवर्तन्ते, नाश्वो न गर्दभ इति॥

(अनुद्धृतदोषप्रर्दशकभाष्यम्)

अयं तर्हि दोषः-भवे प्रोक्तादयश्च तद्धिताः इति॥

(समाधानभाष्यम्)

एवं तर्हि-

(१९ सिद्धान्तवार्तिकम्॥१६॥)

॥*॥ लक्ष्यलक्षणे व्याकरणम्॥*॥

(भाष्यम्)

लक्ष्यं च लक्षणं चैतत्समुदितं व्याकरणं भवति॥ किं पुर्नलक्ष्यम्, किं वा लक्षणम्? ॥

शब्दो लक्ष्यः, सूत्रं लक्षणम्?॥

(समाधानबाधकभाष्यम्)

एवमप्ययं दोषः-समुदाये व्याकरणशब्दः प्रवृत्तोऽवयवे नोपद्यते। सूत्राणि चाप्यधीयान इष्यते-वैयाकरण इति॥

(समाधानसाधकभाष्यम्)

नैषं दोषः। समुदायेषु हि शब्दाः प्रवृत्त्वा अवयवेष्वपि वर्तन्ते। तद्यथा पूर्वे पञ्चालाः, उत्तरे पञ्चालाः,तैलं भुक्तम्, घृतं भुक्तम्, शुक्लो नीलः कपिलः कृष्ण इति॥ एवमयं समुदाये व्याकरणशब्दः प्रवृतोऽवयवेष्वपि वर्तते॥

(प्रथमपक्षाभ्युपगमभाष्यम्)

अथ वा पुनरस्तु सूत्रम्॥

(प्रथमाक्षेपस्मारणभाष्यम्)

ननु चोक्तम् सूत्रे व्याकरणे षष्ठ्यर्थोऽनुपपन्न इति॥

(प्रथमाक्षेपनिरासभाष्यम्)

नैष दोषः, व्यपदेशिवद्भावेन भविष्यति॥

(द्वितीयाक्षेपस्मारणभाष्यम्)

यदप्युच्यते शब्दाप्रतिपत्तिः इति। नहि सूत्रत एव शब्दान्प्रतिपद्यन्ते॥ किं तर्हि? ॥ व्याख्यानतश्चेति॥ परिहृतमेतत्-तदेव सूत्रं विगृहीतं व्याख्यानं भवतीति॥

(परिहारबाधकस्मारणभाष्यम्)

ननु चोक्तम्- न केवलानि चर्चापदानि व्याख्यानम्- वृद्धिःआत् ऐजिति॥

किं तर्हि? ॥

‘‘उदाहरणं प्रत्युदाहरणं वाक्याध्याहार इत्येतत्समुदितं व्याख्यानं भवति’’इति॥

(परिहारसाधकभाष्यम्)

अविजानत एतदेवं भवति। सूत्रत एव हि शब्दान् प्रपिपद्यन्ते॥ आतश्च सूत्रत एव। यो ह्युत्सूत्रं कथयेन्नादो गृह्येत॥

(इति व्याकरणपदार्थनिरूपणम्)

(अथ वर्णोपदेशप्रयोजनाधिकरणम्)

(आक्षेपभाष्यम्)

अथ किमर्थो वर्णानामुपदेशः? ॥

(१७ समाधानवार्तिकम्)

॥*॥ वृत्तिसमवायार्थ उपदेशः॥*॥

वृत्तिसमवायार्थो वर्णानामुपदेशः॥

किमिदं वृत्तिसमवायार्थ इति? ॥

वृत्तये समवायो वृत्तिसमवायः। वृत्यर्थो वा समवायो वृत्तिसमवायः। वृत्तिप्रयोजनो वा समवायो वृत्तिसमवायः॥

का पुनर्वृत्तिः? ॥

शास्त्रप्रवृत्तिः॥

अथ कः समवायः? ॥

वर्णनामानुपूर्व्येण संनिवेशः॥

अथ क उपदेशः? ॥

उच्चारणम्॥

कुत एतत्॥

दिशिरुचारणक्रियः। उच्चार्य हि वर्णानाह-उपदिष्टा इमे वर्णा इति॥

(१८ वर्णोपदेशप्रयोजनान्तरवार्तिकम्)

॥*॥ अनुबन्धकरणार्थश्च॥*॥

(भाष्यम्)

अनुबन्धकरणार्थश्च वर्णानामुपदेशः कर्तव्यः। अनुबन्धानासङ्क्ष्यामीति। नह्यनुपदिश्य वर्णाननुबन्धाः शक्या आसङ्क्तुम्। स एष वर्णानामुपदेशो वृत्तिसमवायार्थश्चानुबन्ध-करणार्थश्च। वृत्तिसमवायश्चानुबन्धकरणं च प्रत्याहारार्थम्। प्रत्याहारो वृत्त्यर्थः॥

(१९ वर्णोपदेशप्रयोजनान्तरवार्तिकम)

॥*॥ इष्टबुद्धर्थश्च॥*॥

(भाष्यम्)

इष्टबुद्धर्थश्च वर्णानाममुपदेशः-'इष्टान्वर्णान् भोत्स्यामहे' इति। नह्यनुपदिश्य वर्णानिष्टा वर्णाः शक्या विज्ञातुम्॥

(२० आक्षेपवार्तिकम्॥४॥)

॥*॥ इष्टबुद्धर्थश्चेति चेदुदात्तानुदात्तस्वरितानुनासिकदीर्घप्लुतानामप्युपदेशः॥*॥

(भाष्यम्)

इष्टबुद्ध्यर्थश्चेति चेदुदात्तानुदात्तस्वरितानुनासिकदीर्घप्लुतानामप्युपदेशः कर्त्तव्यः। एवंगुणा अपि हि वर्णा इष्यन्ते॥

(२१ सिद्धान्तवार्तिकम्॥५॥)

॥*॥ आकृत्युपदेशात्सिद्धम्॥*॥

(भाष्यम्)

अवर्णाकृतिरुपदिष्टा सर्वमवर्णकुलं ग्रहीष्यति। तथेवर्णाकृतिः। तथोवर्णाकृतिः॥

(२२ आक्षेपवार्तिकम् ॥६॥)

॥*॥ आकृत्युपदेशात्सिद्धमिति चेत् संवृतादीनां प्रतिषेधः॥*॥

(भाष्यम्)

आकृत्युपदेशात्सिद्धमिति चेत् संवृतादीनां प्रतिषेधो वक्तव्यः॥

के पुनः संवृतादयः?॥

संवृतः, कलो ध्मात, एणीकृतोऽम्बूकृतोऽर्धको, ग्रस्तो, निरस्तः, प्रगीत, उपगीतः, क्ष्विण्णो, रोमश, इति॥ अपर आह-

''ग्रस्तं निरस्तमवलम्बितं निर्हतमम्बूकृतं ध्मातमथो विकम्पितम्।

संदष्टमेणीकृतमर्धकं द्रुतं विकीर्णमेताः स्वरदोषभावनाः'' इति ॥

अतोऽन्ये व्यञ्जनदोषाः॥

(सिद्धान्तिभाष्यम्)

नैष दोषः॥

(२३ समाधानवार्तिकम्॥ ७ ॥)

॥*॥ गर्गादिबिदादिपाठात्संवृतादीनां निवृत्तिः॥*॥

(भाष्यम्)

गर्गादिबिदादिपाठात्संवृतादीनां निवृत्तिर्भविष्यति॥

(आक्षेपभाष्यम्)

अस्त्यन्यद् गर्गादिबिदादिपाठे प्रयोजनम्॥ किम्? ॥

समुदायानां साधुत्वं यथा स्यादिति॥

(समाधानैकदेशिभाष्यम्)

एवं तर्ह्यष्टादशधा भिन्नां निवृत्तकलादिकामवर्णस्य प्रत्यापत्तिं वक्ष्यामि॥

(आक्षेपभाष्यम्)

सा तर्हि वक्तव्या॥

(२४ एकदेशिसमाधानवार्तिकम्)

॥*॥ लिङ्गार्था तु प्रत्यापत्तिः॥*॥

(भाष्यम्)

लिङ्गार्था सा तर्हि भवति॥

(आक्षेपभाष्यम्)

तत्तर्हि वक्तव्यम्॥

(समाधानभाष्यम्)

यद्यप्येतदुच्यते। अथवैतर्हि अनेकमनुबन्धशतं नोच्चार्यमित्संज्ञा च न वक्तव्या, लोपश्च न वक्तव्यः। यदनुबन्धैः क्रियते तत्कलादिभिः करिष्यते॥

(आक्षेपभाष्यम्)

सिद्धत्येवम्। अपाणिनीयं तु भवति॥

(सिद्धान्तिभाष्यम्)

यथान्यासमेवास्तु॥

(आक्षेपस्मारणभाष्यम्)

ननु चोक्तम् आकृत्युपदेशात्सिद्धिमिति चेत्संवृतादीनां प्रतिषेध इति॥

(समाधानभाष्यम्)

परिहृतमेतत् - गर्गादिबिदादिपाठात् संवृतादीनां निवृतिर्भविष्यति इति॥

(समाधानबाधकभाष्यम्)

ननु चान्यद् गर्गादिबिदादिपाठे प्रयोजनमुक्तम्। किम्? । समुदायानां साधुत्वं यथा स्यादिति॥

(समाधानसाधकभाष्यम्)

एवं तर्ह्युभयमनेन क्रियते-पाठश्चैव विशेष्यते, कलादयश्च निर्वर्त्यन्ते॥

कथं पुनरेकेन यत्नेनोभयं लभ्यम्? ॥

लभ्यमित्याह॥

कथम्? ॥

द्विगता अपि हेतवो भवन्ति। तद्यथा-आम्राश्च सिक्ताः पितरश्च प्रीणिता इति॥ तथा वाक्यान्यपि द्विष्ठानि भवन्ति-श्वेतो धावति, अलम्बुसानां यातेति॥

(भाष्यम्)

अथ वा इदं तावदयं प्रष्टव्यः-क्वेमे संवृतादयः श्रूयेरन्निति? ॥

आगमेषु॥

आगमाः शुद्धाः पठ्यन्ते॥

विकारेषु तर्हि॥

विकारा अपि शुद्धाः पठ्यन्ते॥

प्रत्ययेषु तर्हि॥

प्रत्यया अपि शुद्धाः पठ्यन्ते॥

धातुषु तर्हि॥

धातवोऽपि शुद्धाः पठ्यन्ते॥

प्रातिपदिकेषु तर्हि॥

प्रातिपदिकान्यपि शुद्धानि पठ्यन्ते॥

यानि तर्ह्यग्रहणानि प्रातिपदिकानि॥

एतेषामपि स्वरवर्णानुपूर्वीज्ञानार्थ उपदेशः कर्तव्यः। शशः षष इति मा भूत्। पलाशः पलाष इति मा भूत्। मञ्चको मञ्जक इति मा भूत्॥

'आगमाश्च विकाराश्च प्रत्ययाः सह धातुभिः।

उच्चार्यन्ते ततस्तेषु नेमे प्राप्ताः कलादयः'॥१॥

॥इति श्रीमद्भगवत्पतञ्जलिविरचितं महाभाष्ये प्रथमं पस्पशाह्निकम्॥

अथ द्वितीयं प्रत्याहाराह्निकम्।

(शिवसूत्रम्)

अइउण्॥१॥

(२५ विवृतोपदेशप्रतिज्ञावार्तिकम्॥१॥)

॥ *॥ अकारस्य विवृतोपदेश आकारग्रहणार्थः॥*॥

(भाष्यम्)

अकारस्य विवृतोपदेशः कर्त्तव्यः।

किं प्रयोजनम्? ॥

आकारग्रहणार्थः। अकारः सवर्णग्रहणेनाऽऽकारमपि यथा गृह्णीयात्॥

(आक्षेपभाष्यम्)

किं च कारणं न गृह्णीयात्? ॥

(समाधानभाष्यम्)

विवारभेदात्॥

(आक्षेपभाष्यम्)

किमुच्यते-विवारभेदादिति, न पुनः कालभेदादपि। यथैव ह्ययं विवारभिन्नः, एवं कालभिन्नोऽपि? ॥

(समाधानभाष्यम्)

सत्यमेवमेतत्। वक्ष्यति ‘‘तुल्यास्यप्रयत्नं सवर्णम् ’’ इत्यत्रास्यग्रहणस्य प्रयोजनम्-आस्ये येषां तुल्यो देशः प्रयत्नश्च ते सवर्णसंज्ञा भवन्तीति। बाह्यश्च पुनरास्यात्कालः तेन स्यादेव कालभिन्नस्य ग्रहणम्, न पुनर्विवारभिन्नस्य॥?

(आक्षेपभाष्यम्)

किं पुनरिदं विवृतस्योपदिश्यमानस्य प्रयोजनमन्वाख्यायते, आहोस्वित् संवृतस्योपदिश्यमानस्य विवृतोपदेशश्चोद्यते ?॥

(समाधानभाष्यम्)

विवृतस्योपदिश्यमानस्य प्रयोजनमन्वाख्यायते॥

कथं ज्ञायते॥

यदयम्-‘‘अ अ’’-इत्यकारस्य विवृतस्य संवृतताप्रत्यापत्तिं शास्ति॥

(समाधानबाधकभाष्यम्)

नैतदस्ति ज्ञापकम्। अस्ति ह्यन्यदेतस्य वचने प्रयोजनम्॥

किम्? ॥

अतिखट्वः अतिमालः इत्यत्रान्तर्यतो विवृतस्य विवृतः प्राप्नोति, संवृतः स्यादित्येवमर्था प्रत्यापत्तिः॥

(समाधानसाधकभाष्यम्)

नैतदस्ति। नैव लोके न च वेदेऽकारो विवृतोऽस्ति॥

कस्तर्हि।

संवृतः, योऽस्ति स भविष्यति॥ तदेतत्प्रत्यापत्तिवचनं ज्ञापकमेव भविष्यति ''विवृतस्योपदिश्यमानस्य प्रयोजनमन्वाख्यायते'' इति॥

(आक्षेपभाष्यम्)

कः पुनरत्र विशेषः-विवृतस्योपदिश्यमानस्य प्रयोजनमन्वाख्यायेत,संवृतस्योपदिश्यमानस्य वा विवृतोपदेशश्चोद्येतेति? ॥

(समाधानभाष्यम्)

न खलु कश्चिद्विशेषः। आहोपुरुषिकामात्रं तु भवानाह-संवृतस्योपदिश्यमानस्य विवृतोपदेशश्चोद्यत इति। वयं तु ब्रूमो विवृतस्योपदिश्यमानस्य प्रयोजनमन्वाख्यायत इति॥

(॥२६॥ धात्वादिषु विवृतत्वप्रतिज्ञावार्तिकम् ॥२॥)

॥*॥ तस्य विवृतोपदेशादन्यत्रापि विवृतोपदेशः सवर्णग्रहणार्थः॥*॥

(भाष्यम्)

तस्यैतस्याक्षरसमाम्नायिकस्य विवृतोपदेशादन्यत्रापि विवृतोपदेशः कर्तव्यः॥ क्वान्यत्र? धातुप्रातिपदिकप्रत्ययनिपातस्थस्य॥

किं प्रयोजनम्,। सवर्णग्रहणार्थः। आक्षरसमाम्नायिकेनास्य ग्रहणं यथा स्यात्।

किं च कारणं न स्यात्?

विवारभेदादेव॥

(धात्वादिषु ज्ञापकेन विवृतत्वसाधकज्ञापकविघटनभाष्यम्)

आचार्यप्रवृतिर्ज्ञापयति भवत्याक्षरसमाम्नायिकेन धात्वादिस्थस्य ग्रहणमिति। यदयम् ''अकः सवर्णे दीर्घ'' इति प्रत्याहारेऽको ग्रहणं करोति॥

कथं कृत्वा ज्ञापकम्?।

न हि द्वयोराक्षरसमाम्नायिकयोर्युगपत्समवस्थानमस्ति॥

(धात्वादिषु विवृतत्वप्रतिज्ञासाधकभाष्यम्)

नैतदस्ति ज्ञापकम्। अस्ति ह्यन्यदेतस्य वचने प्रयोजनम्॥

किम्?॥

यस्याक्षरसमाम्नायिकेन ग्रहणमस्ति, तदर्थमेतत्स्यात् खट्वाढकं, मालाढकमिति। सति प्रयोजने न ज्ञापकं भवति । तस्माद्विवृतोपदेशः कर्तव्यः॥

(आक्षेपभाष्यम्)

क एष यत्नश्चोद्यते, विवृतोपदेशो नाम। विवृतो वोपदिश्येत, संवृतो वा। कोन्वत्र विशेषः?॥

(समाधानभाष्यम्)

स एष सर्व एवमर्थो यत्नः क्रियते। यान्येतानि प्रातिपदिकान्यग्रहणानि तेषामेतेनाभ्युपायेनोपदेशश्चोद्यते, तद् गुरु भवति। तस्माद्वक्तव्यम्-'धात्वादिस्थश्च विवृत' इति॥

(॥२७॥ प्रयोजनान्तरवार्तिकम्)

॥*॥ दीर्घप्लुतवचने च संवृतनिवृत्त्यर्थः॥*॥

(भाष्यम्)

दीर्घप्लुतवचने च संवृतनिवृत्यर्थो विवृतोपदेशः कर्तव्यः, दीर्घप्लुतौ संवृतौ मा भूतामिति। वृक्षाभ्याम्, देवदत्ता इति॥

(निराकरणभाष्यम्)

नैव लोके न च वेदे दीर्धप्लुतौ संवृतौ स्तः। कौ तर्हि?॥ विवृतौ ॥ यौ स्तस्तौ भविष्यतः।

(एकदेशिप्रयोजनसाधकभाष्यम्)

'स्थानी प्रकल्पयेदेतावनुस्वारो यथा यणम्'।

संवृतः स्थानी संवृतौ दीर्धप्लुतौ प्रकल्पयेद्। अनुस्वारो यथा यणम्। तद्यथा- सँय्यन्ता, सँव्वत्सरः, यँल्लोकं, तँल्लोकमिति-अनुस्वारः स्थानी यणमनुनासिकं प्रकल्पयति॥

(निराकरणभाष्यम्)

विषम उपन्यासः। युक्तं यत्सतस्तत्र प्रक्लृप्तिर्भवति। सन्ति हि यणः सानुनासिका निरनुनासिकाश्च। दीर्धप्लुतौ पुनर्नैव लोके नैव च वेदे संवृतौ स्तः॥ कौ तर्हि? । विवृतौ, यौ स्तस्तौ भविष्यतः॥

(आक्षेपभाष्यम्)

एवमपि कुत एतत्-तुल्यस्थानौ प्रयत्नभिन्नौ भविष्यतः न पुनस्तुल्यप्रयत्नौ स्थानभिन्नौ स्याताम् ईकार ऊकारो वेति?॥

(समाधानभाष्यम्)

वक्ष्यति- 'स्थानेऽन्तरतमः' इत्यत्र 'स्थाने' इति वर्तमाने पुनः 'स्थाने' ग्रहणस्य प्रयोजनम्। 'यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयो भवति' इति॥

(इति विवृतत्वप्रतिज्ञानिरूपणम्)

(वर्णसमाम्नाये जातिपक्षाधिकरणम्)

(२८ पूर्वपक्ष्याक्षेपवार्तिकम्॥१॥)

॥*॥ तत्रानुवृत्तिनिर्देशे सवर्णाग्रहणमनण्त्वात् ॥*॥

(भाष्यम्)

तत्रानुवृत्तिनिर्देशे सवर्णानां ग्रहणं न प्राप्नोति – ''अस्य च्वौ'' ''यस्येति च''॥ किं कारणम्? ।

अनण्त्वात्। न ह्येतेऽणः येऽनुवृत्तौ॥ के तर्हि?। येऽक्षरसमाम्नाये उपदिश्यन्ते।

(२९ एकदेशिसमाधानवार्तिकम्॥२॥)

॥ *॥ एकत्वादकारस्य सिद्धम्॥*॥

(भाष्यम्)

एकोऽयमकारो यश्चाक्षरसमाम्नाये, यश्चानुवृत्तौ, यश्च धात्वादिस्थः॥

(३० आक्षेपवार्तिकम् ॥ ३॥)

॥*॥ अनुबन्धसङ्करस्तु॥*॥

(भाष्यम्)

अनुबन्धसङ्करस्तु प्राप्नोति । ''कर्मण्यण्'' ''आतोऽनुपसर्गे कः'' इति केऽपि णित्कृतं प्राप्नोति॥

(३१ द्वितीयाक्षेपवार्तिकम्॥ ४॥)

॥*॥ एकाजनेकाज्ग्रहणेषु चानुपपत्तिः॥*॥

(भाष्यम्)

एकाजनेकाज्ग्रहणेषु चानुपपत्तिर्भवति। तत्र को दोषः?॥ किरिणा गिरिणेत्येका-ज्लक्षणमन्तोदात्तत्वं प्राप्नोति। इह च घटेन तरति घटिक इति द्वज्लक्षणः ठन् न प्राप्नोति॥

(३२ तृतीयाक्षेपवार्तिकम् ॥५॥)

॥*॥ द्रव्यवच्चोपचाराः॥*॥

(भाष्यम्)

द्रव्यवच्चोपचाराः प्राप्नुवन्ति। तद्यथा-द्रव्येषु नैकेन घटेनानेको युगपत्कार्यं करोति। एवमिममकारं नानेको युगपदुच्चारयेत्॥

(३३ प्रथमाक्षेपनिराकरणवार्तिकम्॥ ६॥)

॥*॥ विषयेण तु नानालिङ्गकरणात्सिद्धम्॥*॥

यदयं विषये विषये नानालिङ्गमकारं करोति- ''कर्मष्यण्'' ''आतोऽनुपसर्गे कः'' इति । तेन ज्ञायते-नानुबन्धसङ्करोऽस्तीति। यदि हि स्यात् नानालिङ्गकरणमनर्थकं स्यात्, एकमेवायं सर्वगुणमुच्चारयेत्॥

(ज्ञापकनिराकरणभाष्यम्)

नैतदस्ति ज्ञापकम्। इत्संज्ञाप्रक्लृप्त्यर्थमेतत्स्यात्। न ह्ययमनुबन्धैः शल्यकवच्छक्य उपचेतुम्। इत्संज्ञायां हि दोषः स्यात् । आयम्य हि द्वयोरित्संज्ञा स्यात्॥

कयोः?॥

आद्यन्तयोः॥

(न्यासान्तरेण व्याख्याभाष्यम्)

एवं तर्हि-

(विषयेण तु पुनर्लिङ्गकरणात्सिद्धम्।)

यदयं विषये विषये पुनर्लिङ्गमकारं करोति- ''प्राग्दीव्यतोऽण्'' ''शिवादिभ्योऽण्'' इति तेन ज्ञायते- नानुबन्धसङ्करोऽस्तीति। यदि हि स्यात्पुनर्लिङ्गकरणमनर्थकं स्यात्॥

(प्रथमव्याख्याभ्युपगमभाष्यम्)

अथवा पुनरस्तु-

विषयेण तु नानालिङ्गकरणात्सिद्धम् इत्येव।

(ज्ञापकनिराकरणस्मारणभाष्यम्)

ननु चोक्तम् इत्संज्ञा प्रक्लृप्त्यर्थमेतत् स्यादिति।

(साधकभाष्यम्)

नैष दोषः लोकत एतत्सिद्धम्। तद्यथा लोके कश्चिदेवं देवदत्तमाह - इह मुण्डो भव, इह जटिलो भव, इह शिखी भवेति यल्लिङ्गो यत्रोच्यते। तल्लिङ्गस्तत्रोपतिष्ठते। एवमयमकारो यल्लिङ्गो यत्रोच्यते तल्लिङ्गस्तत्रोपस्थास्यते॥

(द्वितीयाक्षेपानुवादभाष्यम्)

यदप्युच्यते एकाजनेकाज्ग्रहणेषु चानुपपत्तिः इति॥

(३४ द्वितीयाक्षेपनिराकरणवार्तिकम्)

॥*॥ एकाजनेकाज्ग्रहणेषु चावृत्तिसंख्यानात्॥*॥

(भाष्यम्)

एकाजनेकाज्ग्रहणेषु चावृत्तेः संख्यानादनेकाच्त्वं भविष्यति। तद्यथा- ''सप्तदश सामिधेन्यो भवन्ति'' इति ''त्रिः प्रथमामन्वाह त्रिरूत्तमाम्'' इत्यावृत्तितः सप्तदशत्वं भवति। एवमिहाप्या-वृत्तित्ततोऽनेकाच्त्वं भविष्यति॥

(आक्षेपभाष्यम्)

भवेदावृत्तितः कार्यं परिहृतम्। इह तु खलुकिरिणा गिरिणेत्येकाज्लक्षणमन्तोदात्तत्वं प्राप्नोत्येव॥

(समाधानभाष्यम्)

एतदपि सिद्धम्॥

कथम्?॥

लोकतः। तद्यथा-ऋषिसहस्रमेकां कपिलामेकैकशः सहस्रकृत्वो दत्त्वा तया सर्वे ते सहस्रदक्षिणाः संपन्नाः॥

एवमिहाप्यनेकाच्त्वं भविष्यति॥

(तृतीयाक्षेपनिराकरणभाष्यम्)

यदप्युच्यते- द्रव्यवच्चोपचाराः प्राप्नुवन्तीति। भवेद् यदसंभवि कार्यं तन्नानेको युगपत्कुर्याद्। यत्तु खलु संभवि कार्यमनेकोऽपि तद्युगपत्करोति। तद्यथा घटस्य दर्शनं स्पर्शनं च। संभवि चेदं कार्यमकारस्योच्चारणं नाम। अनेकोऽपि तद्युगपत्करिष्यति॥

(३५ पूर्वपक्षिसंमतनानात्वसाधकवार्तिकम्)

॥*॥ आन्यभाव्यं तु कालशब्दव्यवायात्॥*॥

(भाष्यम्)

आन्यभाव्यं त्वकारस्य॥ कुतः? कालशब्दव्यवायात्। कालव्यवायाच्छब्दव्य-वायाच्च कालव्यवायात् दण्ड अग्रम्। शब्दव्यवायाद्-दण्डः। नचैकस्यात्मनो व्यवायेन भवितव्यम्। भवति चेद्भवत्यान्यभाव्य-मकारस्य।

(३६ नानात्वहेतुवार्तिकम्)

॥*॥ युगपच्च देशपृथक्त्वदर्शनात्॥*॥

(भाष्यम्)

युगपच्च देशपृथक्त्वदर्शनान्मन्यामहे-आन्यभाव्यमकारस्येति। यदयं युगपच्च द्देशपृथक्त्वेषूपलभ्यते अश्वः, अर्कः, अर्थ इति। न ह्येको देवदत्तो युगपत्स्रुग्घ्ने च भवति मथुरायां च ॥

(एकत्ववादिभाष्यम्)

यदि पुनरिमे वर्णाः-

(३७ एकत्वसाधकवार्तिकम्)

॥*॥ शकुनिवत्स्युः ॥*॥

(भाष्यम्)

तद्यथा-शकुनय आशुगामित्वात्पुरस्तादुत्पतिताः पश्चाद्दृश्यन्ते। एवमयमकारो ''द'' इत्यत्र दृष्टो ''ण्ड'' इत्यत्र दृश्यते॥

(नानात्ववादिभाष्यम्)

नैवं शक्यम्। अनित्यत्वमेवं स्यात्। नित्याश्च शब्दाः। नित्येषु च शब्देषु कूटस्थैरविचालि-भिर्वर्णैर्भवितव्यमनपायोपजनविकारिभिः। यदि चायं द इत्यत्र दृष्टः ण्ड इत्यत्र दृश्येत, नायं कूटस्थः स्यात्॥

यदि पुनरिमे वर्णाः-

(एकत्वसाधकभाष्यम्)

(३७ एकत्वादिमतवार्तिकम्)

॥*॥ आदित्यवत्स्युः ॥*॥

(भाष्यम्)

तद्यथा एक आदित्योऽनेकाधिकरणस्थो युगपद्देशपृथक्त्वेषूपलभ्यते॥

(नानात्ववादिभाष्यम्)

विषम उपन्यासः-नैको द्रष्टा आदित्यमनेकाधिकरणस्थं युगपदेशपृथक्त्वेषूपलभ्यते। अकारं पुनरुपलभते॥

(एकत्वावादिभाष्यम्)

अकारमपि नोपलभते । किं कारणम्।? श्रोत्रोपलब्धिर्बुद्धिनिर्ग्राह्यः प्रयोगेणाभिज्वलित आकाशदेशः शब्दः। एकं च पुनराकाशम्॥

(नानात्ववादिभाष्यम्)

आकाशदेशा अपि बहवः। यावता बहवः, तस्मादान्यभाव्यमकारस्य॥

(३८ सिद्धान्तसमाधानभाष्यम्)

॥*॥ आकृतिग्रहणात्सिद्धम्॥*॥

(भाष्यम्)

अवर्णाकृतिरुपदिष्टा सर्वमवर्णकुलं ग्रहीष्यति। तथेवर्णाकृतिः तथोवर्णाकृतिः॥

(सिद्धान्तवार्तिकद्वितीयखण्डम्)

॥*॥ तद्वच्च तपरकरणम्॥*॥

(भाष्यम्)

एवं च कृत्वा तपराः क्रियन्ते-आकृतिग्रहणेनातिप्रसक्तमिति॥

(सिद्धान्तदूषकभाष्यम्)

ननु च सवर्णग्रहणेनातिप्रसक्तमिति कृत्वा तपराः क्रियेरन्॥

(सिद्धान्तभूषकभाष्यम्)

प्रत्याख्यायते तत् सवर्णेऽण्ग्रहणमपरिभाष्यमाकृतिग्रहणादनन्यत्वाच्च इति॥

(४० सिद्धान्तवार्तिकम्)

॥*॥ हल्ग्रहणेषु च ॥*॥

(भाष्यम्)

किम्?॥

''आकृतिग्रहणात्सिद्धम्''इत्येव। ''झलो झलि'' अवात्ताम् अवात्तम् अवात्त यत्रैतन्नास्ति अण्सवर्णान्गृह्णाति इति॥

(५१ सिद्धान्तसमाधानवार्तिकम्॥ १८॥)

॥*॥ रूपसामान्याद्वा॥*॥

(भाष्यम्)

रूपसामान्याद्वा सिद्धमेतत्। तद्यथा-''तानेव शाटकानाच्छादयामः, ये मथुरायाम्'' ''तानेव शालीन् भुञ्ज्महे, ये मगधेषु 'तदेवेदं भवतः कार्षापणं यन्मथुरायां गृहीतम्' अन्यस्मिंश्चान्यस्मिन् रूपसामान्यात् तदेवेदमिति भवति एवमिहापि रूपसामान्यात् सिद्धम्॥?॥

(शिवसूत्रम्)

॥*॥ ऋलृक्॥*॥

(आक्षेपभाष्यम्)

अथ लृकारोपदेशः किमर्थः?॥

(आक्षेपबाधकभाष्यम्)

किं विशेषेण लृकारोपदेशश्चोद्यते, न पुनरन्येषामपि वर्णानामुपदेशश्चोद्येत, यदि किंचिदन्येषामपि वर्णानामुपदेशे प्रयोजनमस्ति लृकारोपदेशस्यापि तद् भवितुमर्हति। को वा विशेषः?।

(आक्षेपसाधकभाष्यम्)

अयमस्ति विशेषः। अस्य हि लृकारस्याल्पीयांश्चैव प्रयोगविषयः। यश्चापि प्रयोगविषयः सोऽपि क्लृपिस्थस्यैव । कृपेश्च लत्वमसिद्धम्। तस्यासिद्धत्वाद्कारस्यैवाच्कार्याणि भविष्यन्ति नार्थ लृकारोपदेशेन।

(भाष्यम्)

अत उत्तरं पठति-

(४२ समाधानवार्तिकम्)

॥*॥ लृकारोपदेशो यदृच्छाऽशक्तिजानुकरणप्लुत्याद्यर्थः॥*॥

(भाष्यम्)

लृकारोपदेशः क्रियते- यदृच्छाशब्दार्थोऽशक्तिजानुकरणार्थः प्लुत्याद्यर्थश्च।

यदृच्छाशब्दार्थस्तावत्- यदृच्छया कश्चिद् लृतको नाम। तस्मिन्नच्कार्याणि यथा स्युः-दध्यत्र्लृतकाय देहि मध्व्त्र्लृतकाय देहि, उदङ्ङ्लृतकोऽगमत्, प्रत्यङ्ङ्लृतकोऽगमत्। चतुष्टयी शब्दानां प्रवृत्तिः- जातिशब्दाः, गुणशब्दाः, क्रियाशब्दाः, यदृच्छाशब्दाश्चतुर्थाः॥

(भाष्यम्)

अशक्तिजानुकरणार्थः-अशक्त्या कयाचिद् ब्राह्मण्या ऋतक इति प्रयोक्तव्ये लृतक इति प्रयुक्तम्। तस्यानुकरणं ब्राह्मण्यत्र्लृतक इत्याह कुमार्य् लृतक इत्याहेति॥

(वार्तिकविवरणभाष्यम्)

प्लुत्याद्यर्थश्च लृकारोपदेशः कर्तव्यः॥

के पुनः प्लुत्यादयः?॥

प्लुतद्विर्वचनस्वरिताः क्लृ३प्तशिख। क्लृप्तः। प्रक्लृप्तः। प्लुत्यादिषु कार्येषु कृपेर्लत्वं सिद्धम्। तस्य सिद्धत्वादच्कार्याणि न सिद्धयन्ति। तस्माद् लृकारोपदेशः क्रियते॥

(अथ प्रयोजननिराकरणभाष्यम्)

नैतानि सन्ति प्रयोजनानि।

(४३ प्रयोजनप्रत्याख्यानवार्तिकम्)

॥*॥ न्याय्यभावात्कल्पनं संज्ञादिषु॥*॥

न्याय्यस्य ऋतकशब्दस्य भावात् कल्पनं संज्ञादिषु, साधु मन्यन्ते-ऋतक एवासौ, न लृतक इति॥

(व्याख्यान्तरभाष्यम्)

अपर आह-न्याय्य ऋतकशब्दः शास्त्रान्वितोऽस्ति। स कल्पयितव्यः साधुः संज्ञादिषुऋतक एवासौ, न लृतकः॥

(प्रत्याख्यानबाधकभाष्यम्)

अयं तर्हि यदृच्छाशब्दोऽपरिहार्यः-लृफिडः, लृफिड्डश्चेति॥

(प्रत्याख्यानसाधकभाष्यम्)

एषोपि ऋफिडः, ऋफिडुश्च । कथम्? । अर्तिप्रवृत्तिश्चैव हि लोके लक्ष्यते। फिडफिड्डावौणादिकौ प्रत्ययौ॥ त्रयी च शब्दानां प्रवृत्तिः – जातिशब्दाः, गुणशब्दाः, क्रियाशब्दा इति। न सन्ति यदृच्छाशब्दाः॥

(प्रयोजनवादिभाष्यम्)

अन्यथा कृत्वा प्रयोजनमुक्तम्, अन्यथा कृत्वा परिहारः। सन्ति यदृच्छाशब्दा इति कृत्वा प्रयोजनमुक्तम्, न सन्तीति परिहारः। समाने चार्थे शास्त्रान्वितोऽशास्त्रान्वितस्य निवर्तको भवति। तद्यथा देवदत्तशब्दो देवदिण्णशब्दं निवर्तयति, न गाव्यादीन्॥

(प्रत्याख्यानभाष्यम्)

नैष दोषः। पक्षान्तरैरपि परिहारा भवन्ति॥

(॥४४॥ द्वितीयप्रयोजनप्रत्याख्यानवार्तिकम्)

॥*॥ अनुकरणं शिष्टाशिष्टाप्रतिषिद्धेषु यथा लौकिकवैदिकेषु॥*॥

(भाष्यम्)

अनुकरणं हि शिष्टस्य वा साधु भवति, अशिष्टाप्रतिषिद्धस्य वा नैव तद्दोषाय भवति, नाभ्युदयाय॥ यथा लौकिकवैदिकेषु। यथा लौकिकेषु वैदिकेषु च कृतान्तेषु। लोके तावद्-य-एवमसौ ददाति य एवमसौ यजते, य एवमसावधीते, इति। तस्यानुकुर्वन् दद्याच्च यजेत वाधीयीत च । सोऽप्यभ्युदयेन युज्यते॥ वेदेऽपि – ''य एवं विश्वसृजः सत्राण्यध्यासते'' इति, तेषामनुकुर्वन् तद्वत्सत्राण्यध्यासीत। सोऽप्यभ्युदयेन युज्यते॥ अशिष्टाप्रतिषिद्धम्। यथा- य एवमसौ हिक्कति, य एवमसौ हसति, य एवमसौ कण्डूयतीति। तस्यानुकुर्वन् हिक्केच्च हसेच्च कण्डूयेच्च, नैव तद्दोषाय स्यान्नाभ्युदयाय॥ यस्तु खल्वेवमसौ ब्राह्मणं हन्ति एवमसौ सुरां पिबतीति तस्यानुकुर्वन् ब्राह्मणं हन्यात्सुरां वा पिबेत्, सोऽपि मन्ये पतितः स्यात्॥

(प्रयोजनसमर्थनभाष्यम्)

विषम उपन्यासः। यश्चैवं हन्ति, यश्चानुहन्ति, उभौ तौ हतः। यश्चापि पिबति, यश्चानुपिबति, उभौ तौ पिबतः। यस्तु खल्वेवमसौ ब्राह्मणं हन्ति एवमसौ सुरां पिबतीति तस्यानुकुर्वन्स्नातानुलिप्तो माल्यगुणकण्ठः कदलीस्तम्भं छिन्द्यात्पयो वा पिबेत्, न स मन्ये पतितः स्यात्॥

(वार्तिकार्थनिगमनभाष्यम्)

एवमिहापि य एवमसावपशब्दं प्रयुङ्क्ते इति तस्यानुकुर्वन्नपशब्दं प्रयुञ्जीत, सोऽप्यपशब्दभाक् स्यात्॥

(समाधानभाष्यम्)

अयं त्वन्योऽपशब्दपदार्थकः शब्दो, यदर्थ उपदेशः कर्त्तव्यः । न चापशब्दपदार्थकः शब्दोऽपशब्दो भवति। अवश्यं चैतदेवं विज्ञेयम्। यो हि मन्यतेऽपशब्दपदार्थकः शब्दोऽपशब्दो भवतीति, अपशब्द इत्येव तस्यापशब्द स्यात् । न चैषोऽपशब्दः॥

(प्रयोजनभाष्यम्)

अयं खल्वपि भूयोऽनुकरणशब्दोऽपरिहार्यः, यदर्थ उपदेशः कर्त्तव्यः-साध्व्लृकारमधीते मध्व्लृकारमधीत इति॥

(खण्डनभाष्यम्)

क्वस्थस्य पुनरेतदनुकरणम्? ॥

क्लृपिस्थस्य॥

यदि क्लृपिस्थस्य, क्लृपेश्च लत्वमसिद्धम्॥ तस्यासिद्धत्वादृकार एवाच्कार्याणि भविष्यन्ति॥

(प्रयोजनभाष्यम्)

भवेत्तदर्थेन नार्थः स्यात्। अयं त्वन्यः क्लृपिस्थपदार्थकः शब्दः, यदर्थ उपदेशः कर्त्तव्यः॥

(खण्डनभाष्यम्)

न कर्त्तव्यः। इदमवश्यं कर्त्तव्यम्-'' प्रकृतिवदनुकरणं भवति'' इति॥ किं प्रयोजनम्?॥ ''द्विः पचन्त्वित्याह'' ''तिङ्ङतिङः'' इति निघातो यथा स्यात्॥ 'अग्नी इत्याह' ''ईदूदेद्द्विवचनं प्रगृह्यम्'' इति प्रगृह्यसंज्ञा यथा स्यात्॥

(खण्डनोपसंहारभाष्यम्)

यदि-प्रकृतिवदनुकरणं भवतीत्युच्यते, अपशब्द एवासौ भवति कुमार्यलृतक इत्याह ब्राह्मण्यलृतक इत्याह। अपशब्दो ह्यस्य प्रकृतिः॥

(प्रयोजनभाष्यम्)

न चापशब्दः प्रकृतिः। नह्यपशब्दा उपदिश्यन्ते। न चानुपदिष्टा प्रकृतिरस्ति॥

(४५ तृतीयप्रयोजनप्रत्याख्यानवार्तिकम्)

॥*॥ एकदेशविकृतस्यानन्यत्वात्प्लुत्यादयः॥*॥

''एकदेशविकृतमनन्यवद्भवति'' इति प्लुत्यादयोऽपि भविष्यन्ति॥

(प्रयोजनवाद्याक्षेपभाष्यम्)

यदि 'एकदेशविकृतमनन्यवद्भवति' इत्युच्यते, ''राज्ञः क च'' ''राजकीयम् ''अल्लोपोऽन'' इति लोपः प्राप्नोति॥

(प्रत्याख्यातृसमाधानभाष्यम्)

एकदेशविकृतमनन्यवत् षष्ठीनिर्दिष्टस्य॥

(प्रयोजनवादिभाष्यम्)

यदि-षष्ठीनिर्दिष्टस्येत्युच्यते, ''क्लृ३शिख'' इति प्लुतो न प्राप्नोति। नह्यत्र ऋकारः षष्ठीनिर्दिष्टः। कस्तर्हि?॥ रेफः॥

(प्रत्याख्यातृभाष्यम्)

ऋकारोऽप्यत्र षष्ठीनिर्दिष्टः?॥ कथम्?॥ अविभक्तिको निर्देशः-कृप उः रः लः ''कृपो रो ल'' इति॥

(प्रत्याख्यातुरेव भाष्यम्)

अथवा पुनरस्तु अविशेषेण॥

(आक्षेपस्मारणभाष्यम्)

ननु चोक्तं-''राज्ञः क च ''राजकीयम् ''अल्लोपोऽनः''इति प्राप्नोतीति॥

(आक्षेपबाधकभाष्यम्)

नैष दोषः। वक्ष्यत्येतत्- ''श्वादीनां संप्रसारणे नकारान्तग्रहणमनकारान्तप्रतिषेधार्थम्'' इति। तत्प्रकृतमुत्तरत्रानुवर्तिष्यते-''अल्लोपोऽनः'' नकारान्तस्येति।

(प्रयोजनवाद्याक्षेपभाष्यम्)

इह तर्हि क्लृप्तशिख ''अनृत'' इति प्रतिषेधः प्राप्नोति॥

(४६ प्रत्याख्यातृसमाधानवार्तिकम्)

॥*॥ रवत्प्रतिषेधाच्च॥*॥

(भाष्यम्)

रवत्प्रतिषेधाच्चैतत्सिध्यति। ''गुरोररवतः'' इति वक्ष्यामि॥

(आक्षेपभाष्यम्)

यदि अरवतः इत्युच्यते होतृ-ऋकारः ''होतृकारः' अत्र न प्राप्नोति॥

(आक्षेपभाष्यम्)

''गुरोररवतो ह्रस्वस्य'' इति वक्ष्यामि॥

(सिद्धान्तिभाष्यम्)

स एष सूत्रभेदेन लृकारोपदेशः प्लुत्याद्यर्थः सन्प्रत्याख्यायते, सैषा महतो वंशस्तम्बाल्लप्ट्वाऽनुकृष्यते॥२॥

(शिवसूत्रे)

एओङ्॥ ३॥ ऐऔच्॥ ४॥

(संध्यक्षरेषु अतपरत्वस्थापनभाष्यम्)

इदं विर्चायते-'इमानि संध्यक्षराणि तपराणि वोपदिश्येरन् 'एत् ओत् ङ्' 'ऐत् औत् च्' इति, अतपराणि वा यथान्यासम्' इति॥

(भाष्यम्)

कश्चात्र विशेषः?॥

(४७ तपरपक्षदूषकवार्तिकम्)

॥*॥ संध्यक्षरेषु तपरोपदेशश्चेत्तपरोच्चारणम्॥*॥

(भाष्यम्)

संध्यक्षरेषु तपरोपदेशश्चेत्तपरोच्चारणं कर्तव्यम्।

(४८ तपरत्वपक्षदूषणवार्तिकम्॥ २॥)

॥*॥ प्लुत्यादिष्वज्विधिः॥*॥

(भाष्यम्)

प्लुत्यादिष्वजाश्रयो विधिर्न सिध्यति॥ गो३त्रात नौ४त्रात इत्यत्र ''अनचि च'' इत्यच उत्तरस्य यरो द्वे भवत इति द्विर्वचनं न प्राप्नोति॥ इह च प्रत्यङै४तिकायन 'उदङौ४पगव' इति ''अचि'' इति ङमुडागमो न प्राप्नोति॥

(४९ तपरत्वपक्षदूषणवार्तिकम्॥ ३॥)

॥*॥ प्लुतसंज्ञा च ॥*॥

(भाष्यम्)

प्लुतसंज्ञा च न सिध्यति॥ ऐ३तिकायन औ३पगव ''ऊकालोज्झ्रस्वदीर्घप्लुतः'' इति प्लुतसंज्ञा न प्राप्नोति॥

(अतपरपक्षाभ्युपगमभाष्यम्)

सन्तु तर्ह्यतपराणि॥

(५० अतपरपक्षदूषणवार्तिकम्)

॥*॥ अतपर एच इग्घ्रस्वादेशे॥*॥

(भाष्यम्)

यद्यतपराणि ''एच इग्घ्रस्वादेशे'' इति वक्तव्यम्॥ किं प्रयोजनम्? ॥ एचो (ङो) ह्रस्वादेशशासनेष्वर्ध एकारोऽर्ध ओकारो वा मा भूदिति॥

(अतपरवादिनः शङ्काभाष्यम्)

ननु च यस्यापि तपराणि, तेनाप्येतद्वक्तव्यम्। इमावैचौ समाहारवर्णौ-मात्राऽवर्णस्य मात्रेवर्णौवर्णयोः स्तयोर्ह्रस्वादेशशासनेषु कदाचिदवर्णः स्यात् कदाचिदिवर्णोवर्णौमा कदाचिदवर्णौ भूदिति॥

(तपरवादिन उत्तरभाष्यम्)

प्रत्याख्यायत एतत्, -''*ऐचोश्चोत्तरभूयस्त्वात्*'' इति॥

(समाधानसिद्धान्तिभाष्यम्)

यदि प्रत्याख्यानपक्षः, इदमपि प्रत्याख्यायते-''*सिद्धमेङः सस्थानत्वात्*'' इति।

(आक्षेपभाष्यम्)

ननु चैङः सस्थानतरावर्धं एकारोऽर्धं ओकारः॥

(समाधानभाष्यम्)

न तौ स्तः। यदि हि तौ स्यातां तावेवायमुपदिशेत्॥

(आक्षेपभाष्यम्)

ननु च भोश्छन्दोगानां सात्यमुग्रिराणायनीया अर्धमेकारमर्धमोकारं चाधीयते-सुजाते एश्वसृनृते, अध्वर्यो ओद्रिभिः सुतम्, शुक्रं ते एन्यद् यजतं ते एन्यत्-इति॥

(समाधानभाष्यम्)

पारिषदकृतिरेषा तत्रभवताम्। नैव हि लोके नान्यस्मिन्वेदेऽर्धं एकारोर्धं ओकारो वास्ति॥

(५१ अतपरपक्षदूषणवार्तिकम्)

॥*॥ एकादेशे दीर्घग्रहणम्॥*॥

(भाष्यम्)

एकादेशे दीर्घग्रहणं कर्तव्यम्- ''आद्गुणो दीर्घः'' ''वृद्धिरेचि दीर्घः'' इति॥ किं प्रयोजनम्?॥ आन्तर्यतस्त्रिमात्रचतुर्मात्राणां स्थानिनां त्रिमात्रचतुर्मात्रा आदेशा मा

भूवन्निति। खट्वा इन्द्रः खट्वेन्द्रः, खट्वा उदकं खट्वोदकं, खट्वा ईषा खट्वेषा, खट्वा ऊढा खट्वोढा , खट्वा एलका खट्वैलका, खट्वा ओदनः खट्वौदनः, खट्वा एतिकायनः ''खट्वैतिकायनः, खट्वा औपगवः खट्वौपगव इति॥

(आक्षेपभाष्यम्)

तर्तर्हि दीर्घग्रहणं कर्त्तव्यम्॥

(समाधानभाष्यम्)

न कर्तव्यम्। उपरिष्टाद्योगविभागः करिष्यते - ''अकः सवर्णे'' एको भवति॥ ततो ''दीर्घ'' दीर्घश्च स भवति, यः स ''एकः पूर्वपरयोः'' इत्येवं निर्दिष्ट इति॥

(आक्षेपभाष्यम्)

इहापि तर्हि प्राप्नोति-पशुं, विद्धं, पचन्तीति॥

(समाधानभाष्यम्)

नैष दोषः। इह तावत्पशुमिति, ''अम्येक'' इतीयता सिद्धम्। सोऽयमेवं सिद्धे सति यत्पूर्वग्रहणं करोति तस्यैतत्प्रयोजनम् - यथाजातीयकः पूर्वस्तथाजातीयक उभयोर्यथा स्यादिति॥

विद्धमिति। पूर्व इत्येवानुवर्तते॥ अथवा आचार्यप्रवृत्तिर्ज्ञापयति नानेन संप्रसारणस्य दीर्घो भवतीति यदयं हल उत्तरस्य सम्प्रसारणस्य दीर्घत्वं शास्ति॥

पचन्तीति। ''अतो गुणे पर इतीयता सिद्धम्। सोऽयमेवं सिद्धे सति यद्रूपग्रहणं करोति, तस्यैतत्प्रयोजनम्-यथाजातीयकं परस्य रूपं तथाजातीयकमुभयो यथा स्यादिति॥

(दीर्घग्रहणाक्षेपभाष्यम्)

इह तर्हि खट्वश्र्यो मालश्र्य इति दीर्घवचनादकारो न, अनान्तर्यादेकारौकारौ न ॥ [तत्र को दोषः?॥] विगृहीतस्य श्रवणं प्रसज्येत।

(समाधानभाष्यम्)

न ब्रूमो-यत्र क्रियमाणे दोषस्तत्र कर्तव्यमिति॥ किं तर्हि? यत्र क्रियमाणेन दोषस्तत्र कर्तव्यमिति॥

(आक्षेपभाष्यम्)

क्व च क्रियमाणे न दोषः? ॥

(समाधानभाष्यम्)

संज्ञाविधौ। वृद्धिरादैज् दीर्घ, अदेङ् गुणो दीर्घ इति॥

(आक्षेपभाष्यम्)

तत्तर्हि दीर्घग्रहणं कर्तव्यम्? ॥

(सिद्धान्तिसमाधानभाष्यम्)

न कर्तव्यम्॥

(आक्षेपभाष्यम्)

कस्मादेवान्तर्यतस्त्रिमात्रचतुर्मात्राणां स्थानिनां त्रिमात्रचतुर्मात्रा आदेशा न भवन्ति? ॥

(समाधानभाष्यम्)

तपरे गुणवृद्धी॥

(आक्षेपभाष्यम्)

ननु च तः परो यस्मात्सोऽयं तपरः॥

(समाधानभाष्यम्)

नेत्याह, तादपि परस्तपर इति॥

(आक्षेपभाष्यम्)

यदि तादपि परस्तपरः ''ऋदोरब्'' इतीहैव स्यात्- यवः, स्तवः, लवः, पव इत्यत्र न स्यात्॥

(समाधानभाष्यम्)

नैष तकारः॥ कस्तर्हि? ॥ दकारः॥

(आक्षेपभाष्यम्)

किं दकारे प्रयोजनम्? ॥

(प्रतिबन्धीसमाधानभाष्यम्)

अथ किं तकारे? ॥ यद्यसंदेहार्थस्तकारः, दकारोऽपि। अथ मुखसुखार्थस्तकारः, दकारोऽपीति॥

(इति सन्ध्यक्षरेष्वतपरपाठनिर्णयः॥)

(अथ वर्णैकदेशग्रहणाग्रहणनिर्णयः॥)

(भाष्यम्)

इदं विचार्यते- य एते वर्णेषु वर्णैकदेशा वर्णान्तरसमानाकृतय एतेषामवयवग्रहणेन ग्रहणं स्याद्वा न वेति॥ कुतः पुनरियं विचारणा? ॥ इह हि समुदाया अप्युपदिश्यन्ते,

अवयवा अपि। अभ्यन्तरश्च समुदायेऽवयवः, तद्यथा वृक्षः प्रचलन् सहायवयवैः प्रचलति। तत्र समुदायस्थस्यावयवस्यावयवग्रहणेन ग्रहणं स्याद्वा न वेति जायते विचारणा॥

कश्चात्र विशेषः?॥

(५२ ग्रहणपक्ष आक्षेपवार्तिकम् ॥ ६॥)

॥*॥ वर्णैकदेशा वर्णग्रहणेन चेत्संध्यक्षरे समानाक्षरविधिप्रतिषेधः॥*॥

(भाष्यम्)

वर्णैकदेशा वर्णग्रहणेन चेत्संध्यक्षरे समानाक्षरे विधिः प्राप्नोति। स प्रतिषेध्यः॥ अग्ने इन्द्रम्, वायो उदकम्, ''अकः सवर्णे दीर्घः'' इति दीर्घत्वं प्राप्नोति॥

(५३ आक्षेपान्तरवार्तिकम्॥ ७॥)

॥*॥ दीर्घे ह्रस्वविधिप्रतिषेधः॥*॥

(भाष्यम्)

दीर्घे ह्रस्वाश्रयो विधिः प्राप्नोति, स प्रतिषेध्यः।

आलूय, प्रलूय ''ह्रस्वस्य पिति कृति तुग्भवति'' इति तुक् प्राप्नोति॥

(आक्षेपबाधकभाष्यम्)

नैष दोषः, आचार्यप्रवृत्तिर्ज्ञापयति-''न दीर्घे ह्रस्वाश्रयो विधिर्भवति' इति। यदयं दीर्घाच्छे तुकं शास्ति॥

(आक्षेपसाधकभाष्यम्)

नैतदस्ति ज्ञापकम्, अस्ति ह्यन्यदेतस्य वचने प्रयोजनम्॥ किम् ?॥ ''पदान्ताद्वा'' इति विभाषां वक्ष्यामीति॥

(आक्षेपबाधकभाष्यम्)

यत्तर्हि योगविभागं करोति। इतरथा हि ''दीर्घात्पदान्ताद्वा'' इत्येव ब्रूयात्॥

(आक्षेपभाष्यम्)

इह तर्हि-खट्वाभिः मालाभिः, ''अतो भिस ऐस्'' इत्यैस्भावः प्राप्नोति॥

(आक्षेपबाधकभाष्यम्)

तपरकरणसामर्थ्यान्न भविष्यति॥

(आक्षेपभाष्यम्)

इह तर्हि- याता वाता अतो लोप आर्धधातुके'' इत्यकारलोपः प्राप्नोति॥

(आक्षेपबाधकभाष्यम्)

ननु चात्रपि तपरकरणसामर्थ्यादेव न भविष्यति॥

(आक्षेपसाधकभाष्यम्)

अस्ति ह्यन्यत्तपरकरणे प्रयोजनम्॥ किम् ॥ सर्वस्य लोपो मा भूदिति॥

(प्रयोजनबाधकभाष्यम्)

अथ क्रियमाणेऽपि तपरे परस्य लोपे कृते पूर्वस्य कस्मान्न भवति ? ॥

(प्रयोजनसाधकभाष्यम्)

परलोपस्य स्थानिवद्भावादसिद्धत्वाच्च॥ ? ?

(समाधानसाधकभाष्यम्)

एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति- 'न आकारस्थस्याकारस्य लोपो भवति' इति। यदयम् 'आतोऽनुपसर्गे कः' इति ककारमनुबन्धं करोति॥ कथं कृत्वा ज्ञापकम्?॥

कित्करणे एतत्प्रयोजनम्-कितीत्याकारलोपो यथा स्यादिति। यद्याकारस्थस्याकारस्य लोपः स्यात्, कित्करणमनर्थकं स्यात्। परस्याकारस्य लोपे कृते द्वयोरकारयोः पररूपे हि सिद्धं रूपं स्याद्-गोदः कम्बलद इति। पश्यति त्वाचार्यो-नाकारस्थस्याकारस्य लोपः स्यादिति, अतः ककारमनुबन्धं करोति॥

(समाधानबाधकभाष्यम्)

नैतदस्ति ज्ञापकम्। उत्तरार्थमेतत्स्यात्-''तुन्दशोकयोः परिमृजापनुदोः'' इति॥

(समाधानसाधकभाष्यम्)

यत्तर्हि ''गापोष्टक्'' इत्यनन्यार्थं ककारमनुबन्धं करोति॥

(५४ आक्षेपवार्तिकम् ॥ ७॥)

॥*॥ एकवर्णवच्च॥*॥

एकवर्णवच्च दीर्घो भवतीति वक्तव्यम्॥ किं प्रयोजनम् ?॥ वाचा तरतीति द्वयज्लक्षणष्ठन्मा भूदिति। इह च वाचो निमित्तम्, ''तस्य निमित्तं संयोगोत्पातौ'' द्वज्लक्षणो यन्मा भूदिति॥

(आक्षेपबाधकभाष्यम्)

अत्रापि गोनौग्रहणं ज्ञापकम्-''दीर्घाद् द्वज्लक्षणो विधिर्न भवति' इति॥

(सर्वाक्षेपपरिहारभाष्यम्)

अयं तु सर्वेषामेव परिहारः-

(५५ सिद्धान्तसमाधानवार्तिकम् ॥ ९॥)

॥*॥ नाव्यपवृक्तस्यावयवस्य तद्विधिर्यथा द्रव्येषु॥*॥

(भाष्यम्)

नाव्यपवृक्तस्यावयवस्यावयवाश्रयो विधिर्भवति यथा द्रव्येषु । तद्यथा ''द्रव्येषु सप्तदश सामिधेन्यो भवन्ति'' इति न सप्तदशारत्निमात्रं काष्ठमग्नावभ्याधीयते॥

(दृष्टान्तवैषम्यभाष्यम्)

विषम उपन्यासः। प्रत्यृचं चैव हि तत्कर्म चोद्यते। असंभवश्चाग्नौ वेद्यां च ॥

(दृष्टान्तान्तरभाष्यम्)

यथा तर्हि ''सप्तदश प्रादेशमात्रीराश्वत्थीः समिधोऽभ्यादधीत'' इति न सप्तदशप्रादेशमात्रं काष्ठमग्नावभ्याधीयते॥

(दृष्टान्तवैषम्यभाष्यम्)

अत्रापि प्रतिप्रणवं चैतत्कर्म चोद्यते। तुल्यश्चासंभवोऽग्नौ वेद्यां च ॥

(सिद्धान्तिदृष्टान्तभाष्यम्)

यथा तर्हि ''तैलं न विक्रेतव्यम्' ,''मांसं न विक्रेतव्यम्'' इति व्यपवृक्तं च न विक्रीयते, अव्यपवृक्तं गावः सर्षपाश्च विक्रीयन्ते। तथा ''लोमनखं स्पृष्ट्वा शौचं कर्तव्यम्'' इति व्यपवृक्तं स्पृष्ट्वा नियोगतः कर्तव्यम्, अव्यपवृक्ते कामचारः॥

(आक्षेपभाष्यम्)

यत्र तर्हि व्यपवर्गोऽस्ति ॥ क्व च व्यपवर्गोऽस्ति ? ॥ सन्ध्यक्षरेषु॥

(५६ समाधानवार्तिकम् ॥१०॥)

॥*॥ सन्ध्यक्षरेषु विवृतत्वात्॥*॥

यदत्रावर्णम्, विवृततरं तदन्यस्मादवर्णाद्। ये अपीवर्णोवर्णे, विवृततरे ते अन्याभ्यामिवर्णोवर्णाभ्याम्॥

(अग्रहणपक्षाभ्युपगमभाष्यम्)

अथवा पुनर्न गृह्यन्ते।

(५७ अग्रहणपक्षदूषणवार्तिकम्)

॥*॥ अग्रहणं चेन्नुड्विधिलादेशविनामेषु ऋकारग्रहणम् ॥*॥

(भाष्यम्)

अग्रहणं चेन्नुड्विधिलादेशविनामेषु ऋकारग्रहणं कर्तव्यम्। ''तस्मान्नुड् द्विहलः'' ऋकारे चेति वक्तव्यम्॥ इहापि यथा स्यात्-आनृधतुः, आनृधुरिति। यस्य पुनर्गृह्यन्ते 'द्विहलः' इत्येव तस्य सिद्धम्॥

(अग्रहणपक्षदूषणोद्धारभाष्यम्)

यस्यापि न गृह्यन्ते, तस्याप्येष न दोषः। द्विहल्ग्रहणं न करिष्यते। तस्मान्नुड् भवतीत्येव॥

यदि न क्रियते, आटतुः, आटुरित्यत्रापि प्राप्नोति॥

अश्नोतिग्रहणं नियमार्थं भविष्यति-अश्नोतेरेवावर्णोपधस्य नान्यस्यावर्णोपधस्येति॥ (नुड्विधिः)

(वार्तिकोक्तद्वितीयदूषणभाष्यम्)

लादेशे च ऋकारग्रहणं कर्तव्यम्। ''कृपो रो लः'' ऋकारस्य चेति वक्तव्यम्॥ इहापि यथा स्यात्-क्लृप्तः क्लृप्तवानिति। यस्य पुनर्गृह्यन्ते, र इत्येव तस्य सिद्धम्॥

(द्वितीयदूषणोद्धारभाष्यम्)

यस्यापि न गृह्यन्ते तस्याप्येष न दोषः। ऋकारोप्यत्र निर्दिश्यते॥ कथम् ?॥ अविभक्तिको निर्देशः- कृप, ऽः, रः, लः –''कृपो रो लः'' इति॥ अथवा ऽभयतः स्फोटमात्रं निर्दिश्यते-रश्रुतेर्लश्रुतिर्भवतीति॥ (लादेशः)॥

(वार्तिकोक्ततृतीदूषणभाष्यम्)

विनामे ऋकारग्रहणं कर्तव्यम्। ''रषाभ्यां नो णः समानपदे'' ऋकाराच्चेति वक्तव्यम्। इहापि यथा स्यात्-मातृणां पितृणामिति। यस्य पुनर्गृह्यन्ते रषाभ्यामित्येव तस्य सिद्धम्॥

(अग्रहणवादिभाष्यम्)

न सिध्यति। यत्तद्रेफात्परं भक्तेस्तेन व्यवहितत्वान्न प्राप्नोति॥

(ग्रहणवादिभाष्यम्)

मा भूदेवम्। अड्व्यवाय इत्येव सिद्धम्॥

(अग्रहणवादिभाष्यम्)

न सिध्यति। वर्णैकदेशाः के वर्णग्रहणेन गृह्यन्ते, ये व्यपवृक्ता अपि वर्णा भवन्ति। यश्चापि रेफात्परं भक्तेः, न तत्क्वचिदपि व्यपवृक्तं दृश्यते॥

(ग्रहणवादिभाष्यम्)

एवं तर्हि योगविभागः करिष्यते, ''रषाभ्यां नो णः समानपदे'' ततः-''व्यवाये' व्यवाये च रषाभ्यां नो णो भवतीति। ततः -''अट्कुप्वाङ्नुम्भिः' इति।

इदमिदानीं किमर्थम्? ॥

नियमार्थम्-'एतैरेवाक्षरसमाम्नायिकैर्व्यवाये, नान्यैः' इति॥

(अग्रहणवादिभाष्यम्)

यस्यापि न गृह्यन्ते तस्याप्येष न दोषः। आचार्यप्रवृत्तिर्ज्ञापयति- भवत्यृकारान्नो णत्वमिति। यदयं क्षुभ्नादिषु नृनमनशब्दं पठति॥

(ग्रहणवादिभाष्यम्)

नैतदस्ति ज्ञापकम्। वृद्ध्यर्थमेतत्स्यात्-नार्नमनिः॥

(अग्रहणवादिभाष्यम्)

यर्तर्हि तृप्नोतिशब्दं पठति॥

(एकदेशिभाष्यम्)

यश्चापि नृनमनशब्दं पठति॥

(बाधकस्मारणभाष्यम्)

ननु चोक्तम्-वृद्ध्यर्थमेतत्स्यात्॥

(समाधानभाष्यम्)

बहिरङ्गा वृद्धिरन्तरङ्गं णत्वम्। असिद्धं बहिरङ्गमन्तरङ्गे॥ अथवा उपरिष्टाद्योगविभागः करिष्यते- ''ऋतः'' नो णो भवति। ततः-''छन्दस्यवग्रहात्'' ऋत इत्येव॥

(९७ आक्षेपवार्तिकम्)

॥*॥ प्लुतावैच इदुतौ॥*॥

(भाष्यम्)

एतच्च वक्तव्यम्। यस्य पुनर्गृह्यन्ते गुरोष्टेरित्येव प्लुत्या तस्य सिद्धम्॥

(आक्षेपबाधकभाष्यम्)

यस्यापि न गृह्यन्ते तस्याप्येष न दोषः। क्रियत एतन्न्यास एव॥

(५९ आक्षेपवार्तिकम्)

॥*॥ तुल्यरूपे संयोगे द्विव्यञ्जनविधिः॥*॥

तुल्यरूपे संयोगे द्विव्यञ्जनाश्रयो विधिर्न सिध्यति-कु३क्कुटः पि३प्पली पि३त्तमिति। यस्य पुनर्गृह्यन्ते तस्य द्वौ ककारौ, द्वौ पकारौ, द्वौ तकारौ॥

(आक्षेपबाधकभाष्यम्)

यस्यापि न गृह्यन्ते तस्यापि द्वौ ककारौ, द्वौ पकारौ, द्वौ तकारौ॥ कथम् ? ॥ मात्राकालोऽत्र गम्यते। न च मात्रिकं व्यञ्जनमस्ति। अनुपदिष्टं सत्कथं शक्यं विज्ञातुम्। असच्च कथं शक्यं प्रतिपत्तुम्॥

(आक्षेपसाधकभाष्यम्)

यद्यपि तावदत्रैतच्छक्यते वक्तुं यत्रैतन्नास्ति-'अण् सवर्णान् गृह्णाति' इति॥ इह तु कथम्-सय्यँन्ता, सव्वँत्सरः, यँल्लोकम्, तँल्लोकमिति यत्रैतदस्त्यण् सवर्णान् गृह्णातीति?॥

(आक्षेपबाधकभाष्यम्)

अत्रापि मात्राकालो गृह्यते । न च मात्रिकं व्यञ्जनमस्ति। अनुपदिष्टं सत्कथं शक्यं विज्ञातुम्।

(शिवसूत्रम्)

हयवरट्॥ ५॥

(अथ हकाराधिकरणम्)

(वार्तिकावतरणभाष्यम्)

सर्वे वर्णाः सकृदुपदिष्टाः, अयं हकारो द्विरुपदिश्यते-पूर्वश्चैव परश्च। यदि पुनः पूर्व एवोपदिश्येत, पर एव वा। कश्चात्र विशेषः?॥

(६० पूर्वत्रानुपदेशे दूषणवार्तिकम्॥ १॥)

॥*॥ हकारस्य परोपदेशेऽड्ग्रहणेषु हग्रहणम्॥* ॥

(भाष्यम्)

हकारस्य परोपदेशेऽड्ग्रहणेषु हग्रहणं कर्तव्यम् ''आतोऽटि नित्यम्'' ''शश्छोऽटि'' ''दीर्घादटि समानपादे'' हकारे चेति वक्तव्यम्॥ इहापि यथा स्यात् महाँ हि सः॥

(६१ पूर्वत्रानुपदेशे दूषणवार्तिकम्॥ २॥)

॥*॥ ऊत्वे च ॥ ॥

(भाष्यम्)

ऊत्वे च हकारग्रहणं कर्तव्यम्। ''अतो रोरप्लुतादप्लुते हशि च'' हकारे चेति वक्तव्यम्। इहापि यथा स्यात्-पुरुषो हसति, ब्राह्मणो हसतीति॥

(पूर्वापदेशाङ्गीकारभाष्यम्)

अस्तु तर्हि पूर्वोपदेशः।

(६३-६३ परत्रानुपदेशे दूषणभाष्यवार्तिकम्॥३-४॥)

॥*॥ पूर्वोपदेशे कित्त्वक्सेड्विधयो झल्ग्रहणानि च ॥*॥

यदि पूर्वोपदेशः कित्त्वं विधेयम्-स्निहित्वा स्नेहित्वा सिस्निहिषति स्निस्नेहिषति ''रलोऽव्युपधाद्धलादेः'' इति कित्त्वं न प्राप्नोति।

क्सविधिः-क्सश्च विधेयः-अधुक्षत् अलिक्षत् ''शल इगुपधादनिटः क्सः'' इति क्सो न प्राप्नोति॥

इड् विधिः। इट् च विधेयः-रूदिहि। वलादिलक्षण इण् न प्राप्नोति॥

झल्ग्रहणानि च॥

किम्? ॥

अहकाराणि स्युः॥

''झलो झलि'' इतीह न स्यात्-अदाग्धाम् अदाग्धम्। तस्मात्पूर्वश्चैवोपदेष्टव्यः परश्च॥

(उपसंहारभाष्यम्)

यदि च किंचिदन्यत्राप्युपदेशे प्रयोजनमस्ति, तत्राप्युपदेशः कर्तव्यः॥

(अथ रेफोपदेशस्थानाधिकरणम्)

इदं विचार्यते-अयं रेफो यकारवकाराभ्यां पूर्व एवोपदिश्येत-हरयवडिति, पर एव वा यथा न्यासमिति। कश्चात्र विशेषः?॥

(६४ यथान्यासोपदेशदूषणवार्तिकम्॥ ५॥)

॥*॥ रेफस्य परोपदेशेऽनुनासिकद्विर्वचनपरसवर्णप्रतिषेधः ॥*॥

(भाष्यम्)

रेफस्य परोपदेशेऽनुनासिकद्विर्वचनपरसवर्णानां प्रतिषेधो वक्तव्यः॥

अनुनासिकस्य-स्वर्नयति प्रातर्नयति। ''यरोऽनुनासिकेऽनुनासिको वा'' इत्यनुनासिकः प्राप्नोति॥

द्विर्वचनस्य-मद्रह्रदः भद्रह्रदः, ''यरः'' इति द्विर्वचनं प्राप्नोति। परसवर्णस्य-कुण्डं रथेन; वनं रथेन ''अनुस्वारस्य ययि-''इति परसवर्णः प्राप्नोति॥

(इति यथान्यासे दूषणानि॥)

(यकारात्पूर्वत्रपाठाभ्युगमभाष्यम्)

अस्तु तर्हि पूर्वोपदेशः॥

(६५-६६ पूर्वोपदेशदूषणभाष्यवार्तिकम् ६-७)

॥*॥ पूर्वोपदेशे कित्वप्रतिषेधो व्यलोपवचनं च ॥*॥

(भाष्यम्)

यदि पूर्वोपदेशः कित्त्वं प्रतिषेध्यम्। देवित्वा दिदेविषति। ''रलोऽव्युपधादिति कित्त्वं प्राप्नोति॥

(दूषणनिराकरणभाष्यम्)

नैषः दोषः, नैवं विज्ञायते-''रलो व्युपधाद्'' इति॥

किं तर्हि? ॥

''रलः अव् व्युपधाद्''इति॥

''किमिदम् अव् व्युपधाद्''इति ?॥

अवकारान्तात्व्युपधात् अवव्युपधादिति॥

(भाष्यम्)

व्यलोपवचनं च॥ व्योश्च लोपो वक्तव्यः। गौधेरः,पचेरन्, यजेरन्, 'जीवे रदानुः' जीरदानुः। वलीति लोपो न प्राप्नोति॥

(दूषणनिराकरणभाष्यम्)

नैष दोषः, रेफोऽप्यत्र निर्दिश्यते-''लोपो व्योर्वलि इति रेफे च वलि चेति''॥

(यथान्यासाऽभ्युपगमभाष्यम्)

अथ वा पुनरस्तु परोपदेशः॥

(दोषस्मारणभाष्यम्)

ननु चोक्तम् रेफस्य परोपदेशेऽनुनासिकद्विर्वचनपरसवर्णप्रतिषेध इति॥

(समाधानभाष्यम्)

अनुनासिकपरसवर्णयोस्तावत्प्रतिषेधो न वक्तव्यः, रेफोष्मणां सवर्णा न सन्ति॥

(भाष्यम्)

द्विर्वचनेऽपि। नेमौ रहौ कार्यिणौ द्विर्वचनस्य॥

किं तर्हि ?॥ निमित्तमिमौ रहौ द्विर्वचनस्य। तद्यथा ''ब्राह्मणा भोज्यन्तां माठरकौण्डिन्यौ परिवेविषाताम्' इति। नेदानीं तौ भुञ्जाते॥

(अथायोगवाहोपदेशाधिकरणम्)

इदं विचार्यते-इमेऽयोगवाहा न क्वचिदुपदिश्यन्ते, श्रूयन्ते च। तेषां कार्यार्थ उपदेशः कर्तव्यः। के पुनरयोगवाहाः?॥ विसर्जनीयजिह्वामूलीयोपध्मानीयानुस्वारनासिक्ययमाः॥ कथं पुनरयोगवाहाः?॥ यदयुक्ता वहन्ति, अनुपदिष्टाश्च श्रूयन्ते॥

(भाष्यम्)

क्व पुनरेषामुपदेशः कर्तव्यः?॥

(६७ सिद्धान्तवार्तिकम्)

॥*॥ अयोगवाहानामट्सु णत्वम् ॥*॥

(भाष्यम्)

अयोगवाहानामट्सूपदेशः कर्तव्यः? ॥

किं प्रयोजनम् ? ॥ णत्वम्। ठरःकेण, ठर केण, ठरःपेण, ठरˆपेण। ‘‘अड्व्यवाये’‘ इति णत्वं सिद्धं भवति॥

(सिद्धान्तवार्तिकम्)

॥*॥ शर्षु जश्भावषत्वे॥*॥

(भाष्यम्)

शर्षूपदेश कर्तव्यः॥ किं प्रयोजनम ? ॥ जश्भावषत्वे । अयमुब्जिरुपध्मानीयोपधः पठ्यते। तस्य जश्त्वे कृते ठब्जिता ठब्जितुमित्येतद्रूपं यथा स्यात्॥

(ठपध्मानीयोपधदूषणभाष्यम्)

यद्युब्जिरुपध्मानीयोपधः पठ्यते, ठब्जिजिषतीत्युपध्मानीयादेरेव द्विर्वचनं प्राप्नोति। दकारोपधे पुनर् ‘‘न न्द्राः संयोगादयः’‘ इति प्रतिषेधः सिद्धो भवति॥

(दकारोपधदूषणभाष्यम्)

यदि दकारोपधः पठ्यते, का रूपसिद्धि ठब्जिता ठब्जितुमिति ?॥

(दकारोपधदूषणनिराकरणभाष्यम्)

असिद्धे भ ठद्जेः।

इदमस्ति-''स्तोः श्चुना श्चुः'' इति, ततो वक्ष्यामि ''भ उद्जेः'' उद्जेः श्चुना सन्निपाते भो-भवतीति।''

(आक्षेपभाष्यम्)

तर्तर्हि वक्तव्यम्॥

(समाधानभाष्यम्)

न वक्तव्यम्, निपातनादेव सिद्धम्। किं निपातनम् ? ॥ ''भुजन्युब्जौ पाण्युपतापयोः'' इति॥

(समाधानबाधकभाष्यम्)

इहापि तर्हि प्राप्नोति-अभ्युद्रः समुद्र इति॥

(समाधानसाधकभाष्यम्)

अकुत्वविषये तन्निपातनम्॥ अथवा नैतदुब्जे रूपं, गमेरेतद् द्व्युपसर्गाड्डो विधीयते। अभ्युद्रतोऽभ्युद्रः समुद्रतः समुद्र इति॥

(प्रयोजनभाष्यम्)

षत्वं च प्रयोजनम्। सर्पिःषु। धनुःषु। ''शर्व्यवाये'' इति षत्वं सिद्धं भवतीति ''नुम्विसर्जनीयशर्व्यवायेऽपि इति विसर्जनीयग्रहणं न कर्तव्यं भवति॥

(आक्षेपभाष्यम्)

नुमश्चापि तर्हि ग्रहणं शक्यमकर्तुम्।

कथं, सर्पींषि धनूंषि ?।

अनुस्वारे कृते 'शर्व्यवाये' इत्येव सिद्धम्॥

(समाधानभाष्यम्)

अवश्यं नुमो ग्रहणं कर्तव्यम्। अनुस्वारविशेषणं नुम्ग्रहणम्, नुमो योऽनुस्वारस्तत्र यथा स्याद्, इह मा भूत-पुंस्विति॥

(भाष्यम्)

अथवाऽविशेषेणोपदेशः कर्तव्यः॥

(भाष्यम्)

किं प्रयोजनम् ?॥

(६९ सिद्धान्तवार्तिकम्)

॥*॥ अविशेषेण संयोगोपधासंज्ञाऽलोऽन्त्यद्विर्वचनस्थानिवद्भावप्रतिषेधाः॥*॥

(भाष्यम्)

अविशेषेण संयोगसंज्ञा प्रयोजनम् उ३ब्जकः ''हलोऽनन्तराः संयोगः'' इति संयोगसंज्ञा, ''संयोगे गुर्विति'' गुरुसंज्ञा, ''गुरो'' रिति प्लुतो भवति॥

(प्रयोजनभाष्यम्)

उपधासंज्ञा च प्रयोजनम्-दुष्कृतं, निष्कृतं, दुष्पीतं निष्पीतम् ''इदुदुपधस्य चाप्रत्ययस्ये'' ति षत्वं सिद्धं भवति॥

(प्रयोजननिरासभाष्यम्)

नैतदस्ति प्रयोजनम्। न इदुदुपधग्रहणेन विसर्जनीयो विशेष्यते॥

कि तर्हि? ॥

सकारो विशेष्यते-इदुदुपधस्य सकारस्य यो विसर्जनीय इति॥

अथवा उपधाग्रहणं न करिष्यते, इदुद्भ्यां तु परं विसर्जनीयं विशेषयिष्यामः- इदुद्भ्यामुत्तरस्य विसर्जनीयस्येति॥

(प्रयोजनभाष्यम्)

अलोऽन्त्यविधिश्च प्रयोजनम्-वृक्षस्तरति प्लक्षस्तरति ''अलोऽन्त्यस्य'' विधयो भवन्तीत्यलोन्त्यस्य सत्वं सिद्धं भवति॥

(प्रयोजननिराकरणभाष्यम्)

एतदपि नास्ति प्रयोजनम्-''निर्दिश्यमानस्यादेशा भवन्ति'' इति विसर्जनीयस्यैव भविष्यति॥

(प्रयोजनभाष्यम्)

द्विर्वचनं प्रयोजनम्-उरˆकः। उरˆपः। ''अनचि च'' एच उत्तरस्य यरो द्वे भवत इति द्विर्वचनं सिद्धं भवति॥

(प्रयोजनभाष्यम्)

स्थानिवद्भावप्रतिषेधश्च प्रयोजनम्-यथेह भवति-उरःकेण, उरःपेणेति ''अड्व्यवाय'' इति णत्वम् एवमिहापि स्थानिवद्भावात्प्राप्नोति-व्यूढोरस्केन महोरस्केनेति। तत्र ''अनल्विधौ'' इति प्रतिषेधः सिद्धो भवति॥

(इत्ययोगवाहोपदेशाधिकरणम्)

(अथ वर्णार्थवत्ताधिकरणम्)

(भाष्यम्)

किं पुनरिमे वर्णा अर्थवन्तः, आहोस्विदनर्थकाः? ॥

(७० अर्थवत्तासाधकप्रथमवार्तिकम्)

॥*॥ अर्थवन्तो वर्णा धातुप्रातिपदिकप्रत्ययनिपातानामेकवर्णानामर्थदर्शनात्॥*॥

(भाष्यम्)

अर्थवन्तो वर्णाः॥

कुतः ?॥

धातुप्रातिपदिकप्रत्ययनिपातानामेकवर्णानामर्थदर्शनात्॥

धातव एकवर्णा अर्थवन्तो दृश्यन्ते-एति, अध्येति, अधीत इति॥

प्रातिपदिकान्येकवर्णान्यर्थवन्ति-आभ्याम्, एभिः, एषु॥

प्रत्यया एकवर्णा अर्थवन्तः, औपगवः, कापटवः॥

निपाता एकवर्णा अर्थवन्तः, अ अपेहि, इ इन्द्रं पश्य, उ उत्तिष्ठ, ए अपक्राम। धातुप्रातिपदिकप्रत्ययनिपातानामेकवर्णानामर्थदर्शनान्मन्यामहे-अर्थवन्तो वर्णा इति।

(७१ अर्थवत्तासाधकद्वितीयवार्तिकम्॥ १२॥)

॥*॥ वर्णव्यत्यये चार्थान्तरगमनात्॥*॥

(भाष्यम्)

वर्णव्यत्यये चार्थान्तरगमनान्मन्यामहेऽर्थवन्तो वर्णा इति। कूपः सूपो यूप इति। कूप इति सककारेण कश्चिदर्थो गम्यते। सूप इति ककारापाये सकारोपजने चार्थान्तरं

गम्यते। यूप इति ककारसकारापाये यकारोपजने चार्थान्तरं गम्यते। तेन मन्यामहे-यः कूपे कूपार्थः स ककारस्य, यः सूपे सूपार्थः स सकारस्य, यो यूपे यूपार्थः स यकारस्येति॥

(७२ अर्थवत्तासाधकतृतीयवार्तिकम्॥ १३॥)

॥*॥ वर्णानुपलब्धौ चानर्थगतेः॥*॥

(भाष्यम्)

वर्णानुपलब्धौ चानर्थगतेर्मन्यामहेऽर्थवन्तो वर्णा इति। वृक्षः, ऋक्षः, काण्डीरः, आण्डीरः। वृक्ष इति सवकारेण कश्चिदर्थो गम्यते, ऋक्ष इति वकारापाये सोऽर्थो न गम्यते, काण्डीर इति सककारेण कश्चिदर्थो गम्यते, आण्डीर इति ककारापाये सोऽर्थो न गम्यते॥

(आक्षेपभाष्यम्)

किं तर्ह्युच्यते-'अनर्थगतेः' इति। न साधीयो ह्यत्रार्थस्य गतिर्भवति॥

(समाधानभाष्यम्)

एवं तर्हीदं पठितव्यं स्याद्-''वर्णानुपलब्धौ चातदर्थगतेः'' इति ॥

किमिदम्-अतदर्थगतेरिति॥

तस्यार्थस्तदर्थः, तदर्थस्य गतिस्तदर्थगतिः, न तदर्थगतिरतदर्थगतिरतदर्थगतेरिति॥ अथवा सोर्थस्तदर्थस्तदर्थस्य गतिस्तदर्थगतिर्न तदर्थगतिरतदर्थगतिरतदर्थगतेरिति॥

(आक्षेपभाष्यम्)

स तर्हि तथा निर्देशः कर्तव्यः? ॥

(सिद्धान्तभाष्यम्)

न कर्तव्यः। उत्तरपदलोपोऽत्र द्रष्टव्यः। तद्यथा-उष्ट्रमुखमिव मुखमस्य उष्ट्रमुखः खरमुखः। एवमतदर्थगतेरनर्थगतेरिति॥

(७३ अर्थवत्तासाधकचतुर्थवार्तिकम्)

॥*॥ संघातार्थवत्त्वाच्च॥*॥

(भाष्यम्)

संघातार्थवत्त्वाच्च मन्यामहेऽर्थवन्तो वर्णा इति। येषां संघाता अर्थवन्तोऽवयवा अपि तेषामर्थवन्तः॥ [येषां पुनरवयवा अनर्थकाः समुदाया अपि तेषामनर्थकाः।] तद्यथा एकश्चक्षुष्मान्दर्शने समर्थः तत्समुदायश्च शतमपि समर्थम्, एकश्च तिलस्तैलदाने समर्थः तत्समुदायश्च खार्यपि तैलदाने समर्था॥ येषां पुनरवयवा अनर्थकाः, समुदाया अपि तेषामनर्थकाः। तद्यथा-एकोऽन्धो दर्शनेऽसमर्थस्तत्समुदायश्च शतमप्यसमर्थम्, एका च सिकता तैलदानेऽसमर्था तत्समुदायश्च खारीशतमप्यसमर्थम्॥

(अर्थवत्तादूषणभाष्यम्)

यदि तर्हीमे वर्णा अर्थवन्तः। अर्थवत्कृतानि प्राप्नुवन्ति॥

कानि? ॥

''अर्थवत्प्रातिपदिकम्'' इति प्रतिपदिकसंज्ञा, ''प्रातिपदिकाद्'' इति स्वाद्युत्पत्तिः, ''सुबन्तं पदम्'' इति पदसंज्ञा॥

तत्र को दोषः? ॥

''पदस्य'' इति नलोपादीनि प्राप्नुवन्ति-धनं वनमिति॥

(७४ अर्थवत्तायां दोषनिराकरणवार्तिकम्॥ १५॥)

॥*॥ संघातस्यैकार्थात्सुबभावो वर्णात् ॥*॥

(भाष्यम्)

संघातस्यैकत्वमर्थः। तेन वर्णात्सुबुत्पत्तिर्न भविष्यति॥

(७५ अनर्थकतासाधकप्रथमवार्तिकम्॥१६॥)

॥*॥ अनर्थकास्तु प्रतिवर्णमर्थानुपलब्धेः॥*॥

(भाष्यम्)

अनर्थकास्तु वर्णाः॥

कुतः? ॥

प्रतिवर्णमर्थानुपलब्धेः। नहि प्रतिवर्णमर्था उपलभ्यन्ते॥

किमिदं प्रतिवर्णम् ॥

वर्णं वर्णं प्रति प्रतिवर्णम्॥

(७६ अनर्थकत्वसाधकद्वितीयवार्तिकम् ॥१७॥)

॥*॥ वर्णव्यत्ययापायोपजनविकारेष्वर्थदर्शनात्॥*॥

(भाष्यम्)

वर्णव्यत्ययापायोपजनविकारेष्वर्थदर्शनान्महे-अनर्थका वर्णा इति॥ वर्णव्यत्यये-कृतेस्तर्कः, कसेः सिकताः, हिंसेः सिंहः। वर्णव्यत्ययो नार्थव्यत्ययः॥ अपायो लोपः-हतः घ्नन्ति, घ्नन्तु घ्नन्। वर्णापायो नार्थापायः॥ उपजन आगमः-लविता, लवितुम्। वर्णोपजनो नार्थोपजनः॥ विकार आदेशः घातयति घातकः। वर्णविकारो नार्थविकारः॥

यथैव वर्णव्यत्ययापायोपजनविकारा भवन्ति तद्वदर्थव्यत्ययापायोपजनविकारैर्भवितव्यम्॥ न चेह तद्वद्॥ अतो मन्यामहे-अनर्थका वर्णा इति॥

(तटस्थाक्षेपभाष्यम्)

ऽभयमिदं वर्णेषूक्तम्-अर्थवन्तोऽनर्थका इति च। किमत्र न्याय्यः?॥

(समाधानभाष्यम्)

ऽभयमित्याह॥ कुतः? ॥

स्वभावतः। तद्यथा समानमीहमानानां चाधीयानानां च केचिदर्थैर्युज्यन्ते अपरे न। न चेदानीं कश्चिदर्थवानिति कृत्वा सर्वैरर्थवद्भिः शक्यं भवितुम्, कश्चिद्वाऽनर्थक इति कृत्वा सर्वैरनर्थकैः। तत्र किस्माभिः शक्यं कर्तुम्-यद्धातुप्रातिपदिकप्रत्ययनिपाता एकवर्णा अर्थवन्तोऽतोन्येऽनर्थका इति। स्वाभाविकमेतत्॥

(आक्षेपभाष्यम्)

कथं य एष भवता वर्णानामर्थवत्तायां हेतुरुपदिष्टः-'अर्थवन्तो वर्णा धातुप्रातिपदिकप्रत्ययनिपातानामेकवर्णानामर्थदर्शनाद्वर्णव्यत्यये चार्थान्तरगमनाद्वर्णानुपलब्धौ चानर्थगतेः संघातार्थवत्त्वाच्च' इति?॥

(समाधानभाष्यम्)

संघातान्तराण्येवैतान्येवंजातीयकानि अर्थान्तरेषु वर्तन्ते-कूपः सूपो यूप इति। यदि हि वर्णव्यत्ययकृतमर्थान्तरगमनं स्यात्, भूयिष्ठः कूपार्थः सूपे स्यात्, सूपार्थश्च कूपे, कूपार्थश्च यूपे, यूपार्थश्च कूपे, सूपार्थश्च यूपे, यूपार्थश्च सूपे। यतस्तु खलु न किंचित्सूपस्य वा यूपे, यूपस्य वा कूपे, कूपस्य वा यूपे, सूपस्य वा कूपे, कूपस्य वा सूपे, यूपस्य वा सूपे। अतो मन्यामहे-संघातान्तराण्येतान्येवंजातीयकान्यर्थान्तरेषु वर्तन्त इति। इदं खल्वपि-

भवता वर्णानामर्थवत्तां ब्रुवता साधीयोऽनर्थकत्वं द्योतितम्। यो हि मन्यते-यः कूपे कूपार्थः स ककारस्य, यः सूपे सूपार्थः स सकारस्य, यो यूपे यूपार्थः स यकारस्येति। ऊपशब्दस्त्वस्यानर्थकः स्यात्॥

तदुक्तं:-

'न कूपसूपयूपानामन्वयोऽर्थस्य विद्यते।

अतोऽर्थान्तरवाचित्वं संघातस्यैव गम्यते॥'

(आक्षेपभाष्यम्)

तत्रेदमपरिहृतम्- *संघातार्थवत्त्वाच्च* इति॥

(समाधानभाष्यम्)

एतस्यापि प्रातिपदिकसंज्ञायां परिहारं वक्ष्यति॥

(इति वर्णानामर्थवताधिकरणम्)

(अथ प्रत्याहारेष्वित्संज्ञकग्रहणाभावाधिकरणम्)

(भाष्यम्)

अउइण् ऋलृक् एओङ् ऐऔच्।

(७७ आक्षेपवार्तिकम् ॥ १८ ॥)

॥*॥'प्रत्याहारेऽनुबन्धानां कथमज्ग्रहणेषु न'॥*॥

य एतेऽक्षु प्रत्याहरार्था अनुबन्धाः क्रियन्ते, एतेषामज्ग्रहणेन ग्रहणं कस्मान्न भवति?।,

किं च स्यात्।

दधि णकारीयति , मधुणकारीयति , 'इको यणचि' इति यणादेशः प्रसज्येत॥

(७८ सिद्धान्तसमाधानवार्तिकखण्डनम्॥१९॥)

॥*॥ आचारात्॥*॥

(भाष्यम्)

किमिदमाचारादिति ? ॥

आचार्याणामुपचारात्। नैतेष्वाचार्या अच्कार्याणि कृतवन्तः॥

(७९ सिद्धान्तसमाधानवार्तिकखण्डनम्॥ २०॥)

॥*॥'अप्रधानत्वात्'॥*॥

(भाष्यम्)

अप्रधानत्वाच्च। न खल्वप्येतेषामक्षु प्राधान्येनोपदेशः क्रियते॥

क्व तर्हि? ।

हल्षु ॥

कुत एतत्? ॥

एषा ह्याचार्यस्य शैली लक्ष्यते-यत्तुल्यजातीयांस्तुल्यजातीयेषूपदिशति-अचोऽक्षु हलो हल्षु॥

(८० सिद्धान्तसमाधानवार्तिकखण्डनम्)

॥*॥'लोपश्च बलवत्तरः'॥*॥

(भाष्यम्)

लोपः खल्वपि तावद्भवति॥

(८१ सिद्धान्तसमाधानरीत्यन्तरवार्तिकम् ॥२२॥)

॥*॥ ऊकालोऽजिति वा योगस्तत्कालानां यथा भवेत्।

अचां ग्रहणमच्कार्यं तेनैषां न भविष्यति॥*॥

(भाष्यम्)

अथवा योगविभागः करिष्यते-''ऊकालोऽच्'' उ ऊ ऊ ३ इत्येवं कालोऽज्भवति। ततो ''ह्रस्वदीर्घप्लुतः'' ह्रस्वदीर्घप्लुतसंज्ञश्च भवति-ऊकालोच्॥

(आक्षेपभाष्यम्)

एवमपि कुक्कुट इत्यत्रापि प्राप्नोति॥

(समाधानभाष्यम्)

तस्मात्पूर्वोक्त एव परिहारः॥

(भाष्यम्)

एष एवार्थः॥ अपर आह-

॥*॥ ह्रस्वादीनां वचनात् प्राग्यावत्तावदेव योगोऽस्तु। अच्कार्याणि यथा स्युस्तत्कालेष्वक्षु कार्याणि॥*॥

(इति प्रत्याहारेष्वितां ग्रहणाभावाधिकरणम्॥)

('अणुदित्सूत्रेऽण्पदप्रयोजनाधिकरणम्')

(आक्षेपभाष्यम्)

अथ किमर्थमन्तःस्थानामण्सूपदेशः क्रियते? ॥

(समाधानभाष्यम्)

इह सय्यँन्ता सव्वँत्सरः यल्लोँकं तल्लोँकमिति परसवर्णस्यासिद्धत्वादनुस्वारस्यैव द्विर्वचनम्। तत्र परस्य परसवर्णे कृते तस्य यय्ग्रहणेन ग्रहणात् पूर्वस्यापि परसवर्णो यथा स्यात्॥

(समाधानबाधकभाष्यम्)

नैतदस्ति प्रयोजनम्। वक्ष्यत्यत्येतत्-द्विर्वचने परसवर्णत्वं सिद्धं वक्तव्यम् इति॥ यावता सिद्धत्वमुच्यते परसवर्ण एव तावद्भवति॥

(समाधानसाधकभाष्यम्)

परसवर्णे तर्हि कृते तस्य यर्ग्रहणेन ग्रहणाद्द्विर्वचनं यथा स्यात्॥

(समाधानबाधकभाष्यम्)

मा भूत् द्विर्वचनम्॥

(समाधानसाधकभाष्यम्)

ननु च भेदो भवति-सति द्विर्वचने त्रियकारम्, असति द्विर्वचने द्वियकारम्॥

(समाधानबाधकभाष्म्)

नास्ति भेदः, सत्यपि द्विर्वचने द्वियकारमेव॥

कथम्?॥

''हलो यमां यमि लोपः'' इत्येवमेकस्य लोपेन भवितव्यम्।

(समाधानसाधकभाष्यम्)

एवमपि भेदः। सति द्विर्वचने कदाचिद्द्वियकारम्, कदाचित् त्रियकारम्। असति द्वियकारमेव॥ स एष कथं भेदो न स्याद् ?॥ यदि नित्यो लोपः स्याद्॥ विभाषा च स लोपः॥

(समाधानबाधकैकदेशिभाष्यम्)

यथाऽभेदस्तथाऽस्तु॥

(समाधानसाधकसिद्धान्तिवार्तिकम्)

॥*॥ अनुवर्तते विभाषा, शरोऽचि यद्वारयत्ययं द्वित्वम्॥*॥

(भाष्यम्)

यदयं ''शरोऽचि इति द्विर्वचनप्रतिषेधं शास्ति, तज्ज्ञापयत्याचार्यः अनुवर्तते विभाषेति॥''

(जिज्ञासाभाष्यम्)

कथं कृत्वा ज्ञापकम्?

(तस्यैव हेतुसूचकमुत्तरार्धम्)

॥*॥ नित्ये हि तस्य लोपे प्रतिषेधार्थो न कश्चित्स्यात्॥*॥

(भाष्यम्)

यदि नित्यो लोपः स्यात्, प्रतिषेधवचनमनर्थकं स्यात्। अस्त्वत्र द्विर्वचनम्, ''झरो झरि सवर्णे'' इति लोपो भविष्यति। पश्यति त्वाचार्यः-विभाषा सलोप इति ततो द्विर्वचनप्रतिषेधं शास्ति॥

(समाधानबाधकभाष्यम्)

नैतदस्ति ज्ञापकम्। नित्येऽपि तस्य लोपे स प्रतिषेधोऽवश्यं वक्तव्यः। यदेतत् ''अचो रहाभ्याम्'' इति द्विर्वचनम्, लोपापवादः स विज्ञायते॥

कथम् ?॥

यर इत्युच्यते॥ एतावन्तश्च यरः- यदुत झरो वा यमो वा। यदि चात्र लोपः स्याद्द्विर्वचनमनर्थकं स्यात्॥

किं तर्हि तयोर्योगयोरुदाहरणम् ?॥

यदकृते द्विर्वचने त्रिव्यञ्जननः संयोगः-प्रत्तम्, अवत्तम्, आदित्यः॥ इहेदानीं कर्त्ता हर्त्तेति द्विर्वचनसामर्थ्यात्लोपो न भवति। एवमिहापि लोपो न स्यात्- कर्षति- वर्षतीति। तस्मान्नित्येऽपि लोपेऽवश्यं स प्रतिषेधो वक्तव्यः॥

(उपसंहारभाष्यम्)

तदेतदत्यन्तसंदिग्धमाचार्याणां वर्तते विभाषानुवर्तते न वेति॥ ५॥

(शिवसूत्रम्)

लण्॥ ६॥

(व्याख्यानत इति परिभाषाधिकरणम्)

(आक्षेपभाष्यम्)

अयं णकारो द्विरनुबध्यते पूर्वश्चैव परश्च। तत्राण्ग्रहणेष्विण्ग्रहणेषु च संदेहो भवति-पूर्वेण वा स्युः, परेण वेति॥

(प्रत्याक्षेपभाष्यम्)

कतमस्मिंस्तावदण्ग्रहणे संदेहः? ॥

(प्रत्याक्षेपसमाधानभाष्यम्)

''ढ्रलोपे पूर्वस्य दीर्घोऽणः'' इति॥

(७२ सिद्धान्तिसमाधानवार्तिकम्॥ १॥)

(॥*॥ असंदिग्धम्॥*॥)

(भाष्यम्)

असंदिग्धम्-पूर्वेण, न परेण॥

(हेत्वाक्षेपभाष्यम्)

कुत एतत्? ॥

(७३ सिद्धान्त्येकदेशिहेतुवार्तिकम् ॥ २॥)

॥*॥ पराभावात्॥*॥

(भाष्यम्)

न हि ढ्रलोपे परेऽणः सन्ति॥

(हेतुनिरासभाष्यम्)

ननु चायमस्ति -आतृढ; आवृढः इति॥

(सिद्धान्तिसमाधानभाष्यम्)

एवं तर्हि सामर्थ्यात्पूर्वेण, न परेण । यदि हि परेण स्यादण्ग्रहणमनर्थकं स्याद् ''ढ्रलोपे पूर्वस्य दीर्घोऽचः'' इत्येव ब्रूयात्॥ अथवा एतदपि न ब्रूयाद्। अचो ह्येतद्भवति- ह्रस्वः दीर्घः प्लुत इति॥

(समाधानभाष्यम्)

अस्मिंतर्ह्यण्ग्रहणे संदेहः-''केऽणः'' इति॥

(आक्षेपभाष्यम्)

असंदिग्धं पूर्वेण, न परेण॥

कुत एतत् ? ॥

पराभावात्॥

न हि के परेऽणः सन्ति॥

(हेतुनिरासभाष्यम्)

ननु चायमस्ति-गोका, नौकेति॥

(सिद्धान्तिभाष्यम्)

एवं तर्हि सामर्थ्यात्पूर्वेण, न परेण। यदि हि परेण स्यादण्ग्रहणमनर्थकं स्यात्, ''केऽचः'' इत्येव ब्रूयात्। अथवा-एतदपि न ब्रूयात्। अचो ह्येतद्भवति-ह्रस्वो दीर्घः प्लुत इति॥

(आक्षेपभाष्यम्)

अस्मिंस्तर्ह्यण्ग्रहणे संदेहः-''अणोऽप्रगृह्यस्यानुनासिकः'' इति॥

(समाधानभाष्यम्)

असंदिग्धं पूर्वेण, न परेण॥

कुत एतत् ?॥

पराभावात्। नहि पदान्ताः परेऽणः सन्ति॥

(हेतुनिरासभाष्यम्)

ननु चायमस्ति-कर्तृ हर्तृ इति॥

(सिद्धान्तिभाष्यम्)

एवं तर्हि सामर्थ्यात्पूर्वेण, न परेण। यदि हि परेण स्यात्, अण्ग्रहणमनर्थकं स्यात् ''अचोऽप्रगृह्यस्यानुनासिकः'' इत्येव ब्रूयात्। अथवा- एतदपि न ब्रूयात्, अच एव हि प्रगृह्या भवन्ति॥

(आक्षेपभाष्यम्)

अस्मिंस्तर्ह्यण्ग्रहणे संदेहः-''उरण् रपरः'' इति॥

(समाधानभाष्यम्)

असंदिग्धं पूर्वेण, न परेण॥

कुत एतत्? ॥

पराभावात्॥

न ह्युः स्थाने परेऽणः सन्ति॥

(हेतुनिरासभाष्यम्)

ननु चायमस्ति-कर्त्रर्थे हर्त्रर्थमिति।

(आपत्तिप्रश्नभाष्यम्)

किं च स्यात् यद्यत्र रपरत्वं स्यात्?॥

(आपत्तिदर्शनभाष्यम्)

द्वयो रेफयोः श्रवणं प्रसज्ये।

(आपत्तिबाधकभाष्यम्).

''हलो यमां यमि लोपः''इत्येवमेकस्यात्र लोपो भविष्यतीति॥

(आपत्तिसाधकभाष्यम्)

विभाषा स लोपः, विभाषाश्रवणं प्रसज्येत॥

(आपत्तिबाधकभाष्यम्)

अयं तर्हि नित्यो लोपः ''रो रि'' इति॥

(आपत्तिसाधकभाष्यम्)

'पदान्तस्य' इत्येवं सः॥

(आपत्तिबाधकभाष्यम्)

न शक्यः स पदान्तस्य इत्येवं विज्ञातुम्। इह हि लोपो न स्यात्, जर्गृघेर्लङ्.अजर्घाः, - पास्पर्द्धेः अपास्पाः इति॥

(आपत्तिसाधकभाष्यम्)

इह तर्हि-मातृ पितृणामिति रपरत्वं प्रसज्येत॥

(आपत्तिबाधकभाष्यम्)

आचार्यप्रवृतिर्ज्ञापयति-नात्र रपत्वं भवतीति। यदयम् ''ऋत इद्धातोः'' इति धातुग्रहणं करोति॥

कथं कृत्वा ज्ञापकम्?

धातुग्रहणस्यैतत्प्रयोजनम्- इह मा भूत- मातृणां पितृणामिति। यदि चात्र रपरत्वं स्याद्धातुग्रहणमनर्थकं स्याद्। रपरत्वे कृतेऽनन्त्यत्वादित्वं न भविष्यति। पश्यति त्वाचार्यः- नात्र रपरत्वं भवतीति। ततो धातुग्रहणं करोति॥

(आपत्तिसाधकभाष्यम्)

इहापि तर्हि न प्राप्नोति- चिकीर्षति जिहीर्षतीति॥

(आपत्तिबाधकभाष्यम्)

मा भूदेवम्। ''उपधायाश्च'' इत्येवं भविष्यति॥

(आपत्तिसाधकभाष्यम्)

इहापि तर्हि प्राप्नोति- मातृणामिति॥ तस्मात्तत्र धातुग्रहणं कर्तव्यम्॥

(सिद्धान्तिसमाधानभाष्यम्)

एवं तर्हि-सामर्थ्यात्पूर्वेण, न परेण। यदि हि परेण स्यात्, अण्ग्रहणमनर्थकं स्याद् ''ऽरञ्परः'' इत्येव ब्रूयात्।

(आक्षेपभाष्यम्)

अस्मिंस्तर्ह्यण्ग्रहणे संदेहः-''अणुदित्सवर्णस्य चाप्रत्ययः'' इति॥

(समाधानभाष्यम्)

असन्दिग्धं परेण, न पूर्वेण॥

(हेत्वाक्षेपभाष्यम्)

कुत एतत् ?॥

(८४ सिद्धान्तवार्तिकम्)

॥*॥ सवर्णेऽण् तपरं ह्युऋत्॥*॥

(भाष्यम्)

यदयम् ''ऽर्ऋत्'' इत्यृकारे तपरकरणं करोति, तज्ज्ञापयत्याचार्यः-परेण, न पूर्वेणेति॥

(आक्षेपभाष्यम्)

इण्ग्रहणेषु तर्हि संदेहः॥

(समाधानभाष्यम्)

असन्दिग्धम् परेण, न पूर्वेणं॥

(हेतुजिज्ञासाभाष्यम्)

कुत एतत् ?॥

(८५ सिद्धान्तहेतुवार्तिकम्)

॥*॥ य्वोरन्यत्र परेणेण् स्यात्॥*॥

(भाष्यम्)

यत्रेच्छति पूर्वेण, संमृद्य ग्रहणं तत्र करोति-य्वोरिति। तच्च गुरु भवति॥

कथं कृत्वा ज्ञापकम् ?॥

तत्र विभक्तिनिर्देशे संमृद्यग्रहणे चार्धचतस्रो मात्राः, प्रत्याहारग्रहणे पुनस्तिस्रो मात्राः। सोऽयमेवं लघीयसा न्यासेन सिद्धे सति यद्गरीयांसं यत्नमारभते तज्ज्ञापयत्याचार्यः-परेण, न पूर्वेणेति॥

(आक्षेपभाष्यम्)

किं पुनर्वर्णोत्सत्ताविवायं णकारो द्विरनुबध्यते? ॥

(८६ समाधानवार्तिकम्)

॥*॥ व्याख्यानाच्च द्विरुक्तिः॥*॥

एतज्ज्ञापयत्याचार्यः-भवत्येषा परिभाषा-''व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहाद-लक्षणम्'' इति। ''अणुदित्सवर्णस्य-''इत्येतत्परिहाय पूर्वेणाण्ग्रहणम्, ''परेणेण्ग्रहणम्'' इति व्याख्यास्यामः॥ ६॥

(शिवसूत्रे)

ञमङणनम् ॥ ७॥ झभञ् ॥ ८।।

(आक्षेपभाष्यम्)

किमर्थमिमौ मुखनासिकावचनो वर्णानुभावनुबध्येते, न ञकार एवानुबध्येत ?॥

(प्रत्याक्षेपभाष्यम्)

कथं-यानि मकारेण ग्रहणानि?॥ 'हलो यमां यमि लोपः'

(प्रत्याक्षेपभाष्यम्)

सन्तु ञकारेण॥, 'हलो यञां यञि लोपः' इति

(आक्षेपभाष्यम्)

[कथम्] ''हलो यमां यमि लोपः'' इति॥

(इष्टापत्तिबाधकभाष्यम्)

[अस्तु ञकारेण] ''हलो यञां यञि लोपः'' इति॥

(इष्टापत्तिसाधकभाष्यम्)

नैवं शक्यम्। झकारभकारयोरपि झकारभकारयोर्लोपः प्रसज्येत॥

(इष्टापत्तिसाधकभाष्यम्)

न झकारभकारौ झकारभकारयोः स्तः॥

(आक्षेपभाष्यम्)

कथं- ''पुमः खय्यम्परे'' इति? ॥

(इष्टापत्तिभाष्यम्)

एतदप्यस्तु ञकारेण ''पुमः खय्यञ्परे ''इति॥

(इष्टापत्तिबाधकभाष्यम्)

नैवं शक्यम्। झकारभकारपरेऽपि हि खयि रुः प्रसज्येत॥

(इष्टापत्तिसाधकभाष्यम्)

न झकारभकारपरः खयस्ति॥

(आक्षेपभाष्यम्)

कथं-''ङमो ह्रस्वादचि ङमुण्नित्यम्'' इति ?॥

(इष्टापत्तिभाष्यम्)

एतदप्यस्तु ञकारेण ''ङ्ञो ह्रस्वादचि ङ्ञुण्नित्यम्'' इति॥

(इष्टापत्तिबाधकभाष्यम्)

नैव शक्यम्। झकारभकारयोरऽपि हि पदान्तयोर्झकारभकारावागमौ स्याताम्॥

(इष्टापत्तिसाधकभाष्यम्)

न झकारभकारौ पदान्तौ स्तः॥

(इष्टापत्तिबाधकैकदेशिभाष्यम्)

एवमपि पञ्चागमास्त्रय आगमिनः वैषम्यात्संख्यातानुदेशो न प्राप्नोति॥

(इष्टापत्तिसाधकैकदेशिभाष्यम्)

सन्तु तावद्येषामागमानामागमिनः सन्ति। झकारभकारौ पदान्तौ न स्त इति कृत्वा आगमावपि न भविष्यतः॥

(अथाक्षरशब्दनिर्वचनम्)

(आक्षेपभाष्यम्)

अथ किमिदमक्षरमिति?

(८८ सिद्धान्तसमाधानभाष्यम्)

॥*॥ 'अक्षरं न क्षरं विद्यात्' ॥'॥

(भाष्यम्)

न क्षीयते न क्षरतीति वाऽक्षरम्॥

(८८ सिद्धान्तसमाधानान्तरवार्तिकम्॥२॥)

॥*॥ अश्नोतेर्वा सरोऽक्षरम्'॥*॥

(भाष्यम्)

अश्नोतेर्वा पुनरयमौणादिकः सरन्प्रत्ययः। अश्नुते इत्यक्षरम्॥

(सिद्धान्तसमाधानवार्तिकम्॥ ३॥)

॥*॥ 'वर्ण वाऽऽहुः पूर्वसूत्रे'॥*॥

(भाष्यम्)

अथवा पूर्वसूत्रे वर्णस्याक्षरमिति संज्ञा क्रियते॥

(इत्यक्षरशब्दनिर्वचनम्)

(अथाक्षरसमाम्नायोपदेशप्रयोजनम्)

(९० प्रश्नवार्तिकम्)

॥*॥'किमर्थमुपदिश्यते'॥*॥

(भाष्यम्)

अथ किमर्थमुपदेशः क्रियते।

(९१ समाधानवार्तिकम्॥।२॥)

॥*॥ 'वर्णज्ञानं वाग्विषयो यत्र च ब्रह्म वर्तते ॥

तदर्थमिष्टबुद्धयर्थं लध्वर्थं चोपदिश्यते'॥ २॥*॥

(भाष्यम्)

सोयमक्षरसमाम्नायो वाक्समाम्नायः पुष्पितः फलितश्चन्द्रतारकवत्प्रतिमण्डितो वेदितव्यो ब्रह्मराशिः, सर्ववेदपुण्यफलावाप्तिश्चास्य ज्ञाने भवति, मातापितरौ चास्य स्वर्गे लोके महीयेते॥

॥ इति श्रीमद्भगवत्पतञ्जलिविरचिते महाभाष्ये

प्रथमस्याध्यायस्य प्रथमे पादे द्वितीयमाह्निकम्॥

अथ प्रथमाध्याये प्रथमपादे तृतीयाह्निकम्।

अथ पाणिनीयं विधिशेषप्रकरणम्।

(१-वृद्धिसंज्ञासूत्रम् १।१।३।१॥)

वृद्धिरादैच् (१। १।१)॥

(असाधुत्वनिराकरणाधिकरणम्)

(आक्षेपभाष्यम्)

कुत्वं कस्मान्न भवति ''चोः कुः, पदस्य'' इति? ॥

(समाधानभाष्यम्)

भत्वात्।

(आक्षेपभाष्यम्)

कथं भसंज्ञा? ॥

(समाधानभाष्यम्)

''अयस्मयादीनि च्छन्दसि'' इति॥

(समाधानबाधकभाष्यम्)

छन्दसीत्युच्यते, न चेदं छन्दः।

(समाधानसाधकभाष्यम्)

छन्दोवत्सूत्राणि भवन्ति॥

(आक्षेपभाष्यम्)

यदि भसंज्ञा, ''वृद्धिरादैजदेङ्गुणः'' इति जश्त्वमपि न प्राप्नोति॥

(समाधानभाष्यम्)

उभयसंज्ञान्यपि छन्दांसि दृश्यन्ते। तद्यथा 'स सुष्ठुभास ऋक्वता गणेन' पदत्वात्कुत्वम्, भत्वाज्जश्त्वं न भवति। एवमिहापि पदत्वाज्जश्त्वम्, भत्वात्कुत्वं न भविष्यति॥

(अथ तद्धावितपक्षनिराकरणाधिकरणम्।)

(उभयपक्षस्वरूप-तद्धावितपक्षदूषणभाष्यम्)

किं पुनरिदं तद्धावितग्रहणम्-वृद्धिरित्येवं ये आकारैकारौकारा भाव्यन्ते, तेषां ग्रहणम्, आहोस्विदादैज्मात्रस्य?॥

किं चातः? ॥

यदि तद्धावितग्रहणम्, शालीयो मालीय इति वृद्धलक्षणश्छो न प्राप्नोति। आम्रमयम्, शालमयम्, वृद्धिलक्षणो मयण्न प्राप्नोति। आम्रगुप्तायनिः, शालगुप्तायनिः, वृद्धलक्षणः फिञ् न प्राप्नोति।

(आदैज्मात्रग्रहणे दूषणभाष्यम्)

अथादैज्मात्रस्य ग्रहणम्, सर्वो भासः सर्वभास इति ''उत्तरपदवृद्धौ सर्वं च'' इत्येष विधिः प्राप्नोति॥ इह च तावती भार्या यस्य तावद्भार्यः ''वृद्धिनिमित्तस्य'' इति पुवंद्भावप्रतिषेधः॥

(सिद्धान्तभाष्यम्)

अस्तु तर्हि-आदैज्मात्रस्य ग्रहणम्॥

(आक्षेपभाष्यम्)

ननु चोक्तम्-सर्वो भास : सर्वभास इति ‘‘उत्तरपदवृद्धौ सर्वं च’‘ इत्येष विधिः प्राप्नोति॥

(समाधानभाष्यम्)

नैष दोषः। नैवं विज्ञायते-उत्तरपदस्य वृद्धिरुत्तरपदवृद्धिरुत्तरपदवृद्धाविति॥

कथं तर्हि? ॥

‘‘उत्तरपदस्य’‘ इत्येवं प्रकृत्य या वृद्धिस्तद्वत्युत्तरपदे, इत्येवमेतद्विज्ञायते॥ अवश्यं चैतदेवं विज्ञेयम्। तद्धावितग्रहणे सत्यपीह प्रसज्येत-सर्वः कारकः सर्वकारक इति॥

(द्वितीयदूषणनिराकरणभाष्यम्)

यदप्युच्यते- इह तावती भार्या यस्य तावद्भार्यः यावद्भार्य इति च ‘‘वृद्धिनिमित्तस्य-’‘ इति पुवंद्भावप्रतिषेधः प्राप्नोति॥ नैष दोषः। नैवं विज्ञायते- वृद्धेर्निमित्तं वृद्धिनिमित्तं वृद्धिनिमित्तस्येति॥

कथं तर्हि? ॥

वृद्धेर्निमित्तं यस्मिन्सोऽयं वृद्धिनिमित्तं वृद्धिनिमित्तस्येति॥

किं च वृद्धेर्निमित्तम्? ॥

योऽसौ ककारो ञकारो णकारो वा ॥

अथवा यः कृत्स्नाया वृद्धेर्निमित्तम्॥

कश्च कृत्स्नाया वृद्धेर्निमित्तम्? ॥

यस्त्रयाणामाकारैकारौकाराणाम्॥

(इति तद्धावितपक्षनिराकरणम्)

(अथ संज्ञासूत्रत्वसाधकाधिकरणम्)

(९१ आक्षेपवार्तिकप्रथमखण्डम् ॥ १ ॥)

॥ '॥ संज्ञाधिकारः संज्ञासंप्रत्ययार्थः॥ '॥

''अथ संज्ञा'' इत्येवं प्रकृत्य वृद्ध्यादयः शब्दाः पठितव्याः॥

किं प्रयोजनम्? ॥

संज्ञासंप्रत्ययार्थः। वृद्ध्यादीनां शब्दानां ÷संज्ञा' इत्येष संप्रत्ययो यथा स्यात्॥

(९२ आक्षेपवार्तिकद्वितीयखण्डम् ॥ १॥)

॥ '॥ इतरथा ह्यसंप्रत्ययो यथा लोके॥ '॥

अक्रियमाणे हि संज्ञाधिकारे वृद्ध्यादीनां संज्ञेत्येष संप्रत्ययो न स्यात्॥

इदमिदानीं बहुसूत्रमनर्थकं स्यात्॥

अनर्थकमित्याह॥

कथम्? ॥

''यथा लोके''। लोके ह्यर्थवन्ति चानर्थकानि च वाक्यानि दृश्यन्ते। अर्थवन्ति तावत्- देवदत्त गामभ्याज शुल्कां दण्डेन' देवदत्त गामभ्याज कृष्णाम्' इति। अनर्थकानि-''दश दाडिमानि षडपूपाः कुण्डमजाजिनं पललपिण्डः अधरोरुकमेतत्कुमार्याः स्फैयकृतस्य पिता प्रतिशीनः' इति॥

(९३ आक्षेपान्तरवार्तिकम्॥ २॥)

॥ '॥ संज्ञासंज्ञ्यसंदेहश्च ॥ '॥

क्रियमाणेऽपि संज्ञाधिकारे संज्ञासंज्ञिनोरसंदेहो वक्तव्यः॥ कुतो ह्येतत्,-वृद्धिशब्दः संज्ञा, आदैचः संज्ञिन इति। न पुरादैचः संज्ञा, वृद्धिशब्दः संज्ञीति? ॥

(आक्षेपनिराकरणभाष्यम्)

यत्तावदुच्यते- ''संज्ञाधिकारः कर्त्तव्यः संज्ञासंप्रत्ययार्थः' इति॥ न कर्त्तव्यः।

(९४ सिद्धान्तवार्तिकप्रथमखण्डम् ॥ ३॥)

॥*॥ आचार्याचारात्संज्ञासिद्धिः॥* ॥

आचार्याचारात्संज्ञासिद्धिर्भविष्यति॥

किमिदम्-आचार्यादिति? ॥

आचार्याणामुपचारात्॥

(सिद्धान्तिवार्तिकद्वितीयखण्डम् ॥ ३॥)

॥*॥ यथा लौकिकवैदिकेषु॥*॥

तद्यथा लौकिकेषु वैदिकेषु च कृतान्तेषु॥ लोके तावन्मातापितरौ पुत्रस्य जातस्य संवृतेऽवकाशे नाम कुर्वाते-देवदत्तो यज्ञदत्त इति। तयोरुपचारादन्येऽपि जानन्ति इयमस्य संज्ञेति॥ वेदे याज्ञिकाः संज्ञां कुर्वन्ति-स्फ्यो यूपश्चषाल इति। तत्रभवतामुपचारादन्येऽपि जानन्ति-इयमस्य संज्ञेति॥

(दार्ष्टान्तिकभाष्यम्)

एवमिहापि-इहैव तावत्केचिद्वयाचक्षाणा आहुः-वृद्धिशब्दः संज्ञा, आदैचः संज्ञिन इति॥ अपरे पुनः ''सिचि वृद्धिः'' इत्युक्त्वाऽऽकारैकारौकारानुदाहरन्ति। तेन मन्यामहे-यया प्रत्याय्यन्ते सा संज्ञा, ये प्रतीयन्ते ते संज्ञिन इति।

(आक्षेपान्तरानुवादभाष्यम्)

यदप्युच्यते-क्रियमाणेऽपि संज्ञाधिकारे संज्ञासंज्ञिनोरसंदेहो वक्तव्य इति॥

(१५ सिद्धान्तवार्तिकम्)

॥ '॥ संज्ञासंज्ञ्यसंदेहश्च॥ '॥

संज्ञासंज्ञिनोश्चासंदेहः सिद्धः॥

कुतः? ॥

आचार्याचारादेव। उक्त आचार्याचारः॥

(१९ सिद्धान्तहेतुवार्तिकप्रयमखण्डम् ॥ ५॥)

॥*॥ अनाकृतिः॥*॥

अथवाऽनाकृतिः संज्ञा, आकृतिमन्तः संज्ञिनः। लोकेऽपि ह्याकृतिमतो मांसपिण्डस्य देवदत्त इति संज्ञा क्रियते॥

(सिद्धान्तहेतुवार्तिकद्वितीयखण्डम् ॥ ५॥)

॥*॥ लिङ्गेन वा ॥*॥

(भाष्यम्)

अथ वा-किंचिल्लिङ्गमासज्य वक्ष्यामि-इत्यंलिङ्गा संज्ञेति। वृद्धिशब्दे च तत् लिङ्गं करिष्यते, नादैच्छब्दे॥

(आक्षेपभाष्यम्)

इदं तावदयुक्तम्। यदुच्यते-आचार्याचारादिति॥

किमत्रायुक्तम्? ॥

तमेवोपालभ्य अगमकं ते सूत्रम् इति, तस्यैव पुनः प्रमाणीकरणमित्येतदयुक्तम्। अपरितुष्यन् खल्वपि भवाननेन ''अनाकृतिर्लिङ्गेन वा'' इत्याह॥

(तृतीयहेतौ गौरवाक्षेपभाष्यम्)

तच्चापि वक्तव्यम्॥

(तृतीयहेतुस्वीकारे लाघवप्रर्दशकभाष्यम्)

यद्यप्येतदुच्यते। अथवैतर्हि इत्संज्ञा न वक्तव्या। लोपश्च न वक्तव्यः। संज्ञालिङ्गमनुबन्धेषु करिष्यते। न च संज्ञायाः निवृर्त्तिरुच्यते। स्वभावतः संज्ञा संज्ञिनं प्रत्याय्य स्वयं निवर्तते तेनानुबन्धानामपि निवृत्तिर्भविष्यति॥

(आक्षेपभाष्यम्)

सिध्यत्येवम्। अपाणिनीयं तु भवति॥

(सिद्धान्तिभाष्यम्)

यथान्यासमेवास्तु॥

(आक्षेपस्मारणभाष्यम्)

ननु चोक्तम्-''संज्ञाधिकारः संज्ञासंप्रत्ययार्थ इतरथा ह्यसंप्रत्ययो यथा लोके'' इति॥

(समाधानभाष्यम्)

न च यथा लोके, तथा व्याकरणे। प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुचाववकाशे प्राङ्मुख उपविश्य महता प्रयत्नेन सूत्राणि प्रणयति स्म। तत्राशक्यं वर्णेनाप्यनर्थकेन भवितुम्, किं पुनरियता सूत्रेण॥

किमतो यदशक्यम्?॥

अतः संज्ञासंज्ञिनावेव॥

(आक्षेपभाष्यम्)

कुतो नु खल्वेतत्-संज्ञासंज्ञिनावेवेति। न पुनः साध्वनुशासनेऽस्मिञ्शास्त्रे साधुत्वमनेन क्रियते? ॥

(आक्षेपनिराकरणभाष्यम्)

कृतमनयोः साधुत्वम् ॥

कथम्?

वृद्धिरस्मायविशेणपदिष्टः प्रकृतिपाठे, तस्मात् क्तिन्प्रत्ययः आदैचोऽप्यक्षरसमाम्नाये उपदिष्टाः॥

(आक्षेपभाष्यम्)

प्रयोगनियमार्थं तर्हीदं स्यात्-वृद्धिशब्दात्परे आदैचः प्रयोक्तव्या इति॥

(आक्षेपनिराकरणभाष्यम्)

नेह प्रयोगनियम आरभ्यते॥ किं तर्हि ?॥ संस्कृत्य संस्कृत्य पदान्युत्सृज्यन्ते तेषां यथेष्टभिसम्बन्धो भवति तद्यथा-आहर पात्रम्, पात्रमाहरेति॥

(आक्षेपभाष्यम्)

आदेशास्तर्हीमे स्युः। वृद्धिशब्दस्यादैच आदेशाः॥

(आक्षेपनिराकरणभाष्यम्)

षष्ठीनिर्दिष्टस्यादेशा उच्यन्ते। न चात्र षष्ठीं पश्यामः॥

(आक्षेपभाष्यम्)

आगमास्तर्हिमे स्युर्वृद्धिशब्दास्यादैच आगमाः॥

(आक्षेपनिरासभाष्यम्)

आगमा अपि षष्ठीनिर्दिष्टस्यैवोच्यन्ते। लिङ्गेन च । न चात्र षष्ठी, न खल्वप्यागमलिङ्गं पश्यामः॥

(सिद्धान्तसमाधानभाष्यम्)

इदं खल्वपि भूयः सामानाधिकरण्यमेकविभक्तित्वं च। द्वयोश्चैतद्भवति॥

कयोः? ॥

विशेषणविशेष्ययोर्वा संज्ञासंज्ञिनोर्वा॥

तत्रैतत्स्याद्विशेषणविशेष्ये इति॥

तच्च न, द्वयोर्हि प्रतीतपदार्थकर्योलोके विशेषणविशेष्यभावो भवति। न चादैच्छब्दः प्रतीतपदार्थकः। तस्मात्संज्ञासंज्ञिनावेव॥

(सिद्धान्तभाष्यम्)

तत्र त्वेतावान्संदेहः-कः संज्ञी का संज्ञेति॥ स चापि क्व संदेहः ?॥ यत्रोभे समानाक्षरे?॥ यत्र त्वन्यतरल्लघु सा संज्ञा, यद्गुरु स संज्ञी ॥

कुत एतत्? ॥

लध्वर्थं हि संज्ञाकरणम्॥ तत्राप्ययं नावश्यं गुरुलघुतामेवोपलक्षयितुमर्हति॥ किं तर्हि? ॥ अनाकृतितामपि। अनाकृतिः संज्ञा, आकृतिमन्तः संज्ञिनः। लोकेऽपि ह्याकृतिमतो मांसपिण्डस्य देवदत्त इति संज्ञा क्रियते॥

(समाधानान्तरभाष्यम्)

अथवाऽऽवर्तिन्यः संज्ञा भवन्ति। वृद्धिशब्दश्चावर्तते, नादैच्छब्दः। तद्यथा-इतरत्रापि देवदत्तशब्द आवर्तते, न मांसपिण्डः॥

(समाधानन्तरभाष्यम्)

अथवा पूर्वोच्चारितः संज्ञी, परोच्चारिता संज्ञा॥ कुत एतत्? सतो हि कार्यिणः कार्येण भवितव्यम्। तद्यथा-इतरत्रापि सतो मांसपिण्डस्य देवदत्त इति संज्ञा क्रियते॥

(आक्षेपभाष्यम्)

कथं ''वृद्धिरादैज्'' इति? ॥

(समाधानभाष्यम्)

एतदेकमाचार्यस्य मंगलार्थं मृष्यताम्। माङ्गलिक आचार्यो महतः शास्त्रौघस्य मङ्गलार्थं वृद्धिशब्दमादितः प्रयुङ्क्ते। मङ्गलादीनि हि शास्त्राणि प्रथन्ते वीरपुरुषकाणि भवन्त्यायुष्मत्पुरुषकाणि चाध्येतारश्च वृद्धियुक्ता यथा स्युरिति॥ सर्वत्रैव हि व्याकरणे पूर्वोच्चारितः संज्ञी, परोच्चारिता संज्ञा ''अदेङ् गुणः'' इति यथा॥

(सिद्धान्तिभाष्यम्)

दोषवान्खल्वपि संज्ञाधिकारः। अष्टमेऽपि हि संज्ञा क्रियते-''तस्य परमाम्रेडितम्'' इति॥ तत्रापीदमनुर्त्यं स्यात्॥

(समाधानभाष्यम्)

अथवाऽस्थानेऽयं यत्नः क्रियते। न हीदं लोकाद्भिद्यते। यदीदं लोकाद्भिद्यत ततो यत्नार्हं स्यात्। तद्यथा -अगोज्ञाय कश्चिद्गां सक्थनि कर्णे वा गृहीत्वोपदिशति-अयं गौरिति। न चास्मयाचष्टे ÷इयमस्य संज्ञा' इति। भवति चास्य संप्रत्ययः॥

(आक्षेपभाष्यम्)

तत्रैतत्स्यात्-÷कृतस्तत्र पूर्वैरभिसंबन्धः' इति॥

(समाधानभाष्यम्)

इहापि कृतः पूर्वैरभिसंबन्धः॥

कैः? ॥

आचार्यैः॥

(आक्षेपभाष्यम्)

तत्रैतत्स्यात्-यस्मै तर्हि संप्रत्युपदिशति तस्याकृत इति॥

(समाधानभाष्यम्)

लोकेऽपि हि यस्मै संप्रत्युपदिशति तस्याकृतः। अथ तत्र कृतः, इहापि कृतो द्रष्टव्यः॥

(इति संज्ञाधिकारसंज्ञासंज्ञिसंदेहापाकरणाधिकरणम्)

(अन्योन्याश्रयपरिहाराधिकरणम्)

(९८ अथान्योन्याश्रयाक्षेपवार्तिकम् ॥ १॥)

॥*॥ सतो वृद्ध्यादिषु संज्ञाभावात्तदाश्रय इतरेतराश्रयत्वादप्रसिद्धिः॥*॥

(भाष्यम्)

सतः संज्ञिनः संज्ञाभावात्। तदाश्रये संज्ञाश्रये संज्ञिनि वृद्धादिष्वितरेतराश्रयत्वादप्रसिद्धिः॥ का इतरेतराश्रयता?॥ सतामादैचां संज्ञया भवितव्यम्, संज्ञया चादैचो भाव्यन्ते। तदेतदितरेतराश्रयं भवति। इतरेतराश्रयाणि च कार्याणि न प्रकल्पन्ते। तद्यथा- नौर्नाविबद्धा नेतरत्राणाय भवति॥

(इतरेतराश्रयिदृष्टान्तभाष्यम्)

ननु च भो इतरेतराश्रयाण्यपि कार्याणि दृश्यन्ते। तद्यथा - नौः शकटं वहति, शकटं च नावं वहति॥

(दृष्टान्तनिरासभाष्यम्)

अन्यदपि तत्र किंचिद्भवति जलं स्थलं वा। स्थले शकटं नावं वहति। जले नौः शकटं वहति॥

(इतरेतराश्रयिदृष्टान्तरभाष्यम्)

यथा तर्हि त्रिविष्टब्धकम्॥

(दृष्टान्तरनिराकरणभाष्यम्)

तत्राप्यन्ततः सूत्रकं भवति॥

(आक्षेपोपंसहारभाष्यम्)

इदं पुनरितरेतराश्रयमेव॥

(९८ अन्योन्याश्रयवारकसिद्धान्तिवार्तिकम्)

॥*॥ सिद्धं तु नित्यशब्दत्वात्॥*॥

सिद्धमेतत्? ॥

कथम्? ॥

नित्यशब्दत्वात्। नित्याः शब्दाः, नित्येषु शब्देषु सतामादैचां संज्ञा क्रियते, न च संज्ञया आदैचो भाव्यन्ते॥

(आक्षेपभाष्यम्)

यदि तर्हि नित्याः शब्दाः, किमर्थं शास्त्रम्? ॥

(९१ आक्षेपवार्तिकम् ॥ ३॥)

॥*॥ किमर्थं शास्त्रमिति चेन्निवर्तकत्वात्सिद्धम्॥*॥

निवर्तकं शास्त्रम् ॥

कथम्?॥

मृजिरस्मायविशेषेणोपदिष्टः तस्य सर्वत्र मृजिबुद्धिः प्रसक्ताः। तत्रानेन निवृतिः क्रियते मृजेरङ्कित्सु प्रत्ययेषु मृजिप्रसंगे मार्जिः साधुर्भवति॥

(इत्यन्योन्यश्रयनिराकरणाधिकरणम्)

(अथ समुदितसंज्ञानिराकरणधिकरणम्)

(१०० आक्षेपवार्तिकम् ॥ ४॥)

॥*॥ वृद्धिगुणसंज्ञयोः प्रत्येकं वचनम् ॥*॥

(भाष्यम्)

वृद्धिगुणसंज्ञयोः प्रत्येकं ग्रहणं कर्तव्यम्॥ प्रत्येकं वृद्धिगुणसंज्ञे भवत इति वक्तव्यम्॥

किं प्रयोजनम्? ॥

समुदाये मा भूतामिति॥

(१०१ आक्षेपवारकसिद्धान्तिवार्तिकम् ॥ ४॥)

॥*॥ अन्यत्र सहचवनात्समुदाये सङ्ज्ञाप्रसङ्गः॥*॥

(भाष्यम्)

अन्यत्र सहचवनात्समुदाये वृद्धिगुणसंज्ञयोरप्रसङ्गः। यत्रेच्छति सहभूतानां कार्यं, करोति तत्र सहग्रहणम्। तद्यथा ‘‘सह सुपा’‘ ‘‘उभे अभ्यस्तं सह’‘ इति॥

(१०२ आक्षेपवारकसिद्धान्तिवार्तिकम्)

॥ *॥ प्रत्यवयवं च वाक्यपरिसमाप्तेः॥*॥

(भाष्यम्)

प्रत्यवयवं च वाक्यपरिसमाप्तिर्दृश्यते। तद्यथा देवदत्तयज्ञदत्तविष्णुमित्रा भोज्यन्तामिति। न चोच्यते प्रत्येकमिति। प्रत्येकं च भुजिः परिसमाप्यते॥

(आक्षेपभाष्यम्)

ननु चायमप्यस्ति दृष्टान्तः-''समुदाये वाक्यपरिसमाप्तिः'' इति। तद्यथा- ÷गर्गाः शतं दण्ड्यन्ताम्' इति। अर्थिनश्च राजानो हिरण्येन भवन्ति। न च प्रत्येकं दण्डयन्ति॥

(समाधानभाष्यम्)

सत्येतस्मिन्दृष्टान्ते यदि तत्र सह ग्रहणं क्रियते, इहापि प्रत्येकमिति वक्तव्यम् ! अथ तत्रान्तरेण सहग्रहणं सहभूतानां कार्यं भवति, इहापि नार्थः प्रत्येकमिति वचनेन॥

(इति समुदायसंज्ञानिराकरणभाष्यम्)

(अथ तपरग्राह्यनिराकरणीयाधिकरणम्)

(आक्षेपभाष्यम्)

अथ किमर्थमाकारस्तपरः क्रियते? ॥

(१०३ सिद्धान्तसमाधानवार्तिकम्)

॥ ॥ आकारस्य तपरकरणं सवर्णार्थम्॥ ॥

(भाष्यम्)

आकारस्य तपरकरणं क्रियते।

किं प्रयोजनम्?॥

सवर्णार्थम्॥ ''तपरस्तत्कालस्य'' इति तत्कालानां सवर्णानां ग्रहणं यथा स्यात्॥

केषाम्? ॥

उदात्तानुदात्तस्वरितानाम्॥

(कारणजिज्ञासाभाष्यम्)

किं च कारणं न स्याद्? ॥

(१०४ कारणप्रदर्शकैकदेशिवार्तिकम् ॥ २॥)

॥ ॥ भेदकत्वात्स्वरस्य॥ ॥

(भाष्यम्)

भेदका उदात्तादयः॥

कथं पुनर्ज्ञायते-भेदका उदात्तादय इति? ॥

एवं हि दृश्यते लोके, य उदात्ते कर्तव्येऽनुदात्तं करोति खण्डिकोपाध्यायस्तस्मै चपेटां ददाति अन्यत्त्वं करोषीति॥

(भाष्यम्)

अस्ति प्रयोजनमेतत्॥ किं तर्हि? ॥ इति-

(१०५ कारणप्रदर्शकवार्तिकन्यासान्तरम्॥ २॥)

॥ ॥ भेदकत्वात्गुणस्य ॥ ॥

(भाष्यम्)

भेदकत्वाद्गुणस्येति वक्तव्यम्॥

किं प्रयोजनम्॥

आनुनासिक्यं नाम गुणः, तद्भिन्नस्यापि ग्रहणं यथा स्यात्॥

किं च कारणं न स्यात्? ॥

भेदकत्वाद्गुणस्य। भेदका गुणाः॥

कथं पुनर्ज्ञायते-भेदका गुणा इति? ॥

एवं हि दृश्यते लोके, एकोऽयमात्मा उदकं नाम, तस्य गुणभेदादन्यत्वं भवति-अन्यदिदं शीतम्, अन्यदिदमुष्णमिति।

(अभेदकत्वाक्षेपसिद्धन्तिभाष्यम्)

ननु च भो अभेदका अपि गुणा दृश्यन्ते। तद्यथा देवदत्तो मुण्ड्यपि जट्यपि शिख्यपि स्वामाख्यां न जहाति, तथा बालो युवा वृद्धो वत्सो दम्यो बलीबर्द इति॥

(आक्षेपभाष्यम्)

उभयमिदं गुणेषूक्तम्-भेदकाः, अभेदका इति। किं पुनरत्र न्याय्यम्? ॥

(सिद्धान्तसमाधानभाष्यम्)

अभेदका गुणा इत्येव न्याय्यम्॥

कुत एतत्? ॥

यदयम्- ''अस्थिदधिसक्थ्यक्ष्णानमनडुदात्तः'' इत्युदात्तग्रहणं करोति तज्ज्ञापयत्याचार्योऽभेदका गुणा इति। यदि हि भेदका गुणा स्युः, उदात्तमेवोच्चारयेत्॥

(आक्षेपभाष्यम्)

यदि तर्ह्यभेदका गुणा अनुदात्तादेरन्तोदात्ताच्च यदुच्यते तत्स्वरितादेः स्वरितान्ताच्च प्राप्नोति॥

(समाधानभाष्यम्)

नैष दोषः। आश्रीयमाणो गुणो भेदको भवति। तद्यथा- शुक्लमालभेत' ÷कृष्णमालभेत'। तत्र यः शुक्ल आलब्धव्ये कृष्णमालभते, न हि तेन यथोक्तं कृतं भवति॥

(एकदेशिसमाधानभाष्यम्)

असंदेहार्थस्तर्हि तकारः। ऐजित्युच्चमाने संदेहः स्यात् किमिमावैचावेव, आहोस्वदाकारोऽप्यत्र निर्दिश्यत इति? ॥

(समाधानबाधकभाष्यम्)

संदेहमात्रमेतद्भवति। सर्वसंदेहेषु चेदमुपतिष्ठते ÷व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणम्' इति। त्रयाणां ग्रहणमिति व्याख्यास्यामः। अन्यत्रापि ह्ययमेवंजातीयकेषु संदेहेषु न कश्चिद्यत्नं करोति। तद्यथा-''औतोम्शसोः'' इति॥

(सिद्धान्तिसमाधानभाष्यम्)

इदं तर्हि प्रयोजनम्-आन्तर्यतस्त्रिमात्रचतुर्मात्राणां स्थानिनां त्रिमात्रचतुर्मात्रा आदेशा मा भूवन्निति। खट्वा इन्द्रः खट्वेन्द्रः, खट्वा उदकं खट्वोदकम्, खट्वा ईषा खट्वेषा, खट्वा ऊढा खट्वोढा, खट्वा एलका खट्वैलका, खट्वा ओदनः खट्वौदनः, खट्वा ऐतिकायनः खट्वैतिकायनः, खट्वा औपगवः खट्वौपगव इति॥

(आक्षेपभाष्यम्)

अथ क्रियमाणेऽपि तकारे कस्मादेव त्रिमात्रचतुर्मात्राणां स्थानिनां त्रिमात्रचतुर्मात्रा आदेशा न भवन्ति?॥

(समाधानभाष्यम्)

''तपरस्तत्कालस्य'' इति नियमात्॥

(समाधानबाधकभाष्यम्)

ननु तः परो यस्मात्सोऽयं तपरः॥

(समाधानसाधकभाष्यम्)

नेत्याह, तादपि परस्तपरः॥

(इष्टानुपत्तिसाधकभाष्यम्)

यदि तादपि परस्तपरः ''ऋदोरप्'' इतीहैव स्यात्-यवः स्तवः, लवः पव इत्यत्र न स्यात्॥

(अनुपपत्तिबाधकभाष्यम्)

नैषः तकारः ॥

कस्तर्हि? ॥

दकारः॥

(आक्षेपभाष्यम्)

किं दकारे प्रयोजनम्? ॥

(प्रतिबन्धा समाधानभाष्यम्)

अथ किं तकारे?॥ यद्यसंदेहार्थस्तकारः, दकारोऽपि। अथ मुखसुखार्थस्तकारः, दकारोऽपि। वृद्धिरादैच्?॥

(२ परिभाषासूत्रम् ॥ १।१।३। आ.२॥)

इको गुणवृद्धी ॥ १।१।३॥

(योगविभागप्रयोजनाधिकरणम्)

(आक्षेपभाष्यम्)

इग्ग्रहणं किमर्थम्? ॥

(१०५ समाधानवार्तिकम्)

॥ ॥ इग्ग्रहणमात्सन्ध्यक्षरव्यञ्जननिवृत्यर्थम्॥

(भाष्यम्)

इग्ग्रहणं क्रियते॥

किं प्रयोजनम्? ॥

आकारनिवृत्यर्थं सन्ध्यक्षरनिवृत्यर्थं व्यजञ्ननिवृत्यर्थं च॥

(प्रथमप्रयोजनोपपादनभाष्यम्)

आकारनिवृत्त्यर्थं तावद्-याता वाता। आकारस्य गुणः प्राप्नोति। इग्ग्रहणान्न भवति॥

(द्वितीयप्रयोजनोपपादनभाष्यम्)

सन्ध्यक्षरनिवृत्त्यर्थम्-ग्लायति म्लायति। सन्ध्यक्षरस्य गुणः प्राप्नोति। इग्ग्रहणान्न भवति॥

(तृतीयप्रयोजनोपपादनभाष्यम्)

व्यञ्जनिवृत्त्यर्थम्-ऽम्भिता ऽम्भितुम् ऽम्भितव्यम्। व्यजञ्नस्य गुणः प्राप्नोति। इग्ग्रहणान्न भवति॥

(प्रथमप्रयोजननिराकरणभाष्यम्)

आकारनिवृत्त्यर्थेन तावन्नार्थः। आचार्यप्रवृत्तिर्ज्ञापयति-नाकारस्य गुणो भवतीति। यदयम् ''आतोऽनुपसर्गे कः'' इति ककारमनुबन्धं करोति॥

कथं कृत्वा ज्ञापकम्? ॥

कित्करण एतत्प्रयोजनम्-कितीत्याकारलोपो यथा स्याद्। यदि चाकारस्य गुणः स्यात्, कित्करणगमनर्थकं स्याद्। गुणे कृते द्वयोरकारयोः पररूपेण सिद्धं रूपं स्याद्-गोदः कंबलद इति। पश्यति त्वाचार्यो-नाकारस्य गुणो भवतीति, ततः ककारमनुबन्धं करोति॥

(द्वितीप्रयोजननिराकरणभाष्यम्)

सन्ध्यक्षरनिवृत्त्यर्थेनापि नार्थः। उपदेशसामथ्यात्सन्ध्यक्षरस्य गुणो न भवति॥

(तृतीयप्रयोजननिराकरणभाष्यम्)

व्यञ्जननिवृत्त्यर्थेनापि नार्थः। आचार्यप्रवृत्तिर्ज्ञापयति- न व्यञ्जनस्य गुणो भवतीति। यदयं जनेर्डं शास्ति॥

कथं कृत्वा ज्ञापकम्? ॥

डित्करण एतत्प्रयोजनम्-डितीति टिलोपो यथा स्याद्। यदि व्यञ्जनस्य गुणः स्याद्, डित्करणमनर्थकं स्याद्। गुणे कृते त्रयाणामकाराणां पररूपेण सिद्धं रूपं स्यादुपसरजो मन्दुरज इति। पश्यति त्वाचार्यो न व्यजनस्य गुणो भवतीति। ततो जनेर्डं शास्ति॥

(प्रथमप्रयोजनबाधकज्ञापकनिराकरणभाष्यम्)

नैतानि सन्ति ज्ञापकानि। यत्तावदुच्यते कित्करणं ज्ञापकं नाकारस्य गुणो भवतीति,॥ उत्तरार्थमेतत्स्यात्-''तुन्दशोकयोः परिमृजापनुदोः'' इति॥

(प्रथमप्रयोजनबाधकज्ञापकान्तरभाष्यम्)

यत्तर्हि ''गोपोष्टग्'' इत्यनन्यार्थं ककारमनुबन्धं करोति॥

(द्वितीयप्रयोजनसाधकसामर्थ्यदूषकभाष्यम्)

यदप्युच्यते-उपदेशसामर्थ्यात्संध्यक्षरस्य गुणो न भवतीति॥ यदियद्यत्संध्यक्षरस्य प्राप्नोति, तत्तदुपदेशसामर्थ्याद्बाध्यते। आयादयोऽपि तर्हि न प्राप्नुवन्ति॥

(सामर्थ्यदूषणनिराकरणभाष्यम्)

नैष दोषः।

बाध्यते।

यं विधिं प्रत्युपदेशोऽनर्थकः: स विधिर्बाध्यते। यस्य तु विधेर्निमित्तमेव नासौ बाध्यते। गुणं च प्रत्युपदेशोऽनर्थकः, आयादीनां पुनर्निमित्तिमेव॥

(तृतीयप्रयोजनबाधकज्ञापकनिराकरणभाष्यम्)

यदप्युच्यते-जनेर्डवचनं ज्ञापकम्? - न व्यञ्जनस्य गुणो भवतीति। सिद्धे विधिरारभ्यमाणोज्ञापकार्थो भवति। न च जनेर्गुणेन सिध्यति। कुतो ह्येतत्-जनेर्गुण उच्यमानोऽकारो भवति, न पुनरेकारो वा स्यादोकारो वेति?॥

(ज्ञापकसाधकभाष्यम्)

आन्तर्यतोऽर्धमात्रिकस्य व्यञ्जनस्य मात्रिकोऽकारो भविष्यति॥

(ज्ञापकबाधकभाष्यम्)

एवमप्यनुनासिकः प्राप्नोति॥

(ज्ञापकसाधकभाष्यम्)

पररूपेण शुद्धो भविष्यति॥

(ज्ञापकबाधकभाष्यम्)

एवं तर्हि गमेरप्ययं डो वक्तव्यः। गमेश्च गुण उच्यमान आन्तर्यत ओकारः प्राप्नोति॥ तस्मादिग्ग्रहणं कर्तव्यम्॥

(इति योगविभागप्रयोजननिरूपणाधिकरणम्)

(अथ इक्पदोपस्थापकलिङ्गाधिकरणम्)

(आक्षेपभाष्यम्)

यदीग्ग्रहणं क्रियते, द्यौः, पन्थाः, सः, इममिति, एतेऽपीकः प्राप्नुवन्ति॥

(१०६ सिद्धान्तसमाधनवार्तिकम्)

॥ ॥ संज्ञया विधाने नियमः॥ ॥

संज्ञया ये विधीयन्ते तेषु नियमः॥

(आक्षेपभाष्यम्)

किं वक्तव्यमेतत्? ॥

(समाधानभाष्यम्)

नहि,॥

कथमनुच्यमानं गंस्यते? ॥

गुणवृद्धिसामर्थ्यात्॥

(आक्षेपसाधकभाष्यम्)

कथं पुनरन्तरेण गुणवृद्धिग्रहणमिको गुणवृद्धी स्याताम्? ॥

(समाधानसाधकभाष्यम्)

प्रकृतं गुणवृद्धिग्रहणमनुवर्तते॥

क्व प्रकृतम्? ॥

‘‘वृद्धिरादैजदेङ्गुणः’‘ इति॥

(आक्षेपभाष्यम्)

यदि तदनुवर्तते ''अदेङ्गुणो वृद्धिश्च'' इत्यदेङां वृद्धिसंज्ञाऽपि प्राप्नोति॥

(समाधानभाष्यम्)

सम्बन्धमनुवर्तिष्यते-''वृद्धिरादैच्। ''अदेङ्गुणः'' इति वृद्धिरादैच्। ततः ''इको गुणवृद्धी'' इति, गुणवृद्धिग्रहणमनुवर्तते आदैजदेङ्ग्रहणं निवृत्तम्॥

(समाधानान्तरभाष्यम्)

अथवा मण्डूकगतयोऽधिकाराः। यथा मण्डूका उत्प्लुपत्योत्प्लुत्य गच्छन्ति तद्वदधिकाराः॥

(एकदेशिसमाधानान्तरभाष्यम्)

अथवैकयोगः करिष्यते-''वृद्धिरादैजदेङ्गुणः'' ततः ''इको गुणवृद्धी'' इति। न चैकयोगेऽनुवृत्तिर्भवति।

(समाधानान्तरभाष्यम्)

अथवा-

अन्यवचनाच्चकारकरणाच्च प्रकृतापवादो विज्ञायते, यथोत्सर्गेण प्रसक्तस्यापवादो बाधको भवति॥

अन्यस्याः संज्ञाया वचनाच्चकारस्य चानुकर्षणार्थस्याकरणात्प्रकृताया वृद्धिसंज्ञाया गुणसंज्ञा बाधिका भविष्यति। यथोत्सर्गेण प्रसक्तापवादो बाधको भवति॥

(समाधानान्तरभाष्यम्)

अथवा वक्ष्यत्येतद्-''अनुवर्तन्ते च नाम विधयः। न चानुवर्तनादेव भवन्ति। किं तर्हि? यत्राद्धवन्ति॥ इति॥

(समाधानान्तरभाष्यम्)

अथवा-ऽभयं निवृत्तम्। तदपेक्षिष्यामहे॥

(इतीक्पदोपस्थापकलिङ्गाधिकरणम्)

(अथ परिभाषात्वसाधकाधिकरणम्)

(आक्षेपभाष्यम्)

किं पुनरयमलोन्त्यशेषः, आहोस्विदलोन्त्यापवादः?॥

(प्रत्याक्षेपभाष्यम्)

कथं चायं तच्छेषः स्यात्, कथं वा तदपवादः? ॥

(प्रत्याक्षेपसमाधानभाष्यम्)

यद्येकं वाक्यम्-तच्चेदं च, अलोन्त्यस्य विधयो भवन्ति-÷इको गुणवृद्धी अलोन्त्यस्य' इति। ततोऽयं तच्छेषः॥ अथ नानावाक्यम्-तच्चेदं च, अलोन्त्यस्य विधयो भवन्ति', ÷इको गुणवृद्धी अन्त्यस्य चानन्त्यस्य च', इति। ततोऽयं तदपवादः॥

(भाष्यम्)

कश्चात्र विशेषः?॥

(१०७ तच्छेष पक्षदूषणवार्तिकम्॥३॥)

(१०७ वृद्धिगुणावलोन्त्यस्येति चेन्मिदिमृजिपुगन्तलधूपधच्छिदृशिक्षिप्रक्षुद्रेष्विग्ग्रहणम्॥)

(व्याख्याभाष्यम्)

वृद्धिगुणावलोन्त्यस्येति चेन्मिदिमृजिपुगन्तलधूपधच्छिदृशिक्षिप्रक्षुद्रेष्विग्ग्रहणं कर्तव्यम्॥ ''मिदेर्गुणेः'' ''इक इति वक्तव्यम्'' अनन्त्यत्वाद्धि न प्राप्नोति॥ ''मृजेर्वृद्धिः'' ''इक इति वक्तव्यम्'' अनन्त्यत्वाद्धि न प्राप्नोति॥ पुगन्तलधूपधस्य गुणः, ''इक इति वक्तव्यम्'' अनन्त्यत्वाद्धि न प्राप्नोति॥ ऋच्छेर्लिटि गुणः ''इक इति वक्तव्यम्'' अनन्त्यत्वाद्धि न

प्राप्नोति॥ ऋदृशोङि गुणः ''इक इति वक्तव्यम्'' अनन्त्यत्वाद्धि न प्राप्नोति॥ क्षिप्रक्षुद्रयोर्गुणः ''इक इति वक्तव्यम्'' अनन्त्यत्वाद्धि न प्राप्नोति॥

(१०७ तच्छेषदूषणान्तरवार्तिकम्)

॥*॥ सर्वादेशप्रसंगश्चानिगन्तस्य ॥*॥

(एकदेशिव्याख्या भाष्यम्)

सर्वादेशश्च गुणोऽनिगन्तस्य प्राप्नोति॥ याता वाता॥

किं कारणम्? ॥

''अलोन्त्यस्य'' इति षष्ठी चैव ह्यन्त्यमिकमुपसंक्रान्ता, अङ्गस्येति च स्थानषष्ठी। तद्यदिदानीमनिगन्तमङ्गं तस्य गुणः सर्वादेशः प्राप्नोति॥

(दूषणोद्धारभाष्यम्)

नैष दोषः यथैव ह्यलोन्त्यस्येति षष्ठी अन्त्यमिकमुपसंक्राता, एवमंगस्येत्यपि स्थानषष्ठी। तद्यदिदानीमनिगन्तमङ्गं तत्र षष्ठ्येव नास्ति, कुतो गुणः कुतः सर्वादेशः॥

(वार्तिकसमन्वयान्तरभाष्यम्)

एवं तर्हि नायं दोषसमुच्चयः॥

किं तर्हि? ॥

पूर्वापेक्षोऽयं दोषः। ह्यर्थे चायं चः पठितः-

मिदिमृजिपुगन्तलघूपधच्छ्रदृशिक्षिप्रक्षुद्रेष्विग्ग्रहणं सर्वादेशप्रसंगो'' ह्यनिगन्तस्य इति॥

मिदेगुर्णः ÷इक' इति वचनादन्त्यस्य। न, 'अलोन्त्यस्य' इति वचनादिको न। उच्यते च गुणः स सर्वादेशः प्राप्नोति। एवं सर्वत्र॥

(इति तच्छेषपक्षदूषणम्।)

(अथ तदपवादपक्षाभ्युपगमभाष्यम्)

अस्तु तर्हि तदपवादः ॥

(१०५ तदपवादपक्षदूषणवार्तिकम् ॥ ५॥)

॥॥ इञ्मात्रस्येति चेज्जुसिसार्वधातुकार्धधातुकह्रस्वाद्योर्गुणेष्वनन्त्यप्रतिषेधः॥ ॥

(भाष्यम्)

इञ्मात्रस्येति चेज्जुसिसार्वधातुकार्धधातुकह्रस्वाद्योर्गुणेष्वनन्त्यप्रतिषेधो वक्तव्यः॥

जुसि गुणः स यथेह भवति-÷अजुहवुः अबिभयुः' इति। एवम् ÷अनेनिजुः पर्यवेविषुः' अत्रापि प्राप्नोति॥

सार्वधातुकार्धधातुकयोर्गुणः स यथेह भवति- 'कर्ता हर्ता नयति तरति' इति' एवम् 'ईहिता ईहितुम् ईहितव्यम्' इत्यत्रापि प्राप्नोति॥

ह्रस्वस्य गुणः:- स यथेह भवति –हे अग्ने हे वायो' इति। एवम् हे अग्निचित् हे सोमसुद्' इत्यत्रापि प्राप्नोति॥

जसि गुणः स यथेह भवति-अग्नयो वायवः' इति। एवम् अग्निचितः सोमसुतः इत्यत्रापि प्राप्नोति॥

ऋतो ङिसर्वनामस्थानयोर्गुणः स यथेह भवति-÷कर्तरि कर्तारौ कर्तारः' इति। एवं ÷सुकृति सुकृतौ सुकृतः' इत्यत्रापि प्राप्नोति॥

घेर्ङिति गुणः स यथेह भवति-अग्नये वायवे' इति। एवम् अग्निचिते सोमसुते' इत्यात्रपि प्राप्नोति॥

ओर्गुणः स यथेह भवति-वाभ्रव्यो माण्डव्यः' इति। एवं सुश्रुत्-सौश्रुतः' इत्यत्रापि प्राप्नोति॥

(भाष्यम्)

नैष दोषः॥

(१०८ सिद्धान्त्येकदेशवार्तिकम् ६)

॥*॥ पुगन्तलघूपधग्रहणमनन्त्यनियमार्थम्॥*॥

(भाष्यम्)

पुगन्तलघूपधग्रहणमनत्यनियमार्थं भविष्यति-पुगन्तलघूपधस्यैवानन्त्यस्य नान्यस्यानन्त्यस्येति॥

(नियमदूषणभाष्यम्)

प्रकृतस्यैव नियमः स्यात् ॥

किं च प्रकृतम्? ॥

''सार्वधातुकार्धधातुकयोः'' इति तेन भवेदिह नियमान्न स्याद् ÷ईहिता ईहितुम् ईहितव्यम्' इति । ह्रस्वाद्योगुर्णस्त्वनियतः सोऽनन्त्यस्यापि प्राप्नोति॥

(नियमान्तरदूषणभाष्यम्)

अथाप्येवं नियमः स्यात्- पुगन्तलघूपधस्य सार्वधातुकार्धधातुकयोरेवेति॥ एवमपि सार्वधातुकार्धधातुकयोर्गुणोऽनियतः सोऽनन्त्यस्यापि प्राप्नोति- ईहिता ईहितुम् ईहिव्यमिति॥

(उभयविधनियमदूषणभाष्यम्)

अथाप्युभयतो नियमः स्यात्-पूगन्तलघूपधस्यैवसार्वधातुकार्धधातुकयोः। सार्वधातुकार्ध-धातुकयोरेव पुगन्तलघूपधस्येति॥ एवमप्ययं जुसिगुणोऽनियतः सोनन्त्यस्यापि प्राप्नोति-अनेनिजुः पर्यवेविषुः' इति॥

(इति तदपवादपक्षदूषणनिराकरणाधिकरणम्)

(अथासंबद्धपरिभाषानिराकरणाधिकरणम्)

एवं तर्हि-नायं तच्छेषः, नापि तदपवादः। अन्यदेवेदं परिभाषान्तरसंबद्धमनया परिभाषया॥

(भाष्यम्)

परिभाषान्तरमिति च मत्वा क्रोष्ट्रीयाः पठन्ति-

॥*॥ नियमादिको गुणवृद्धी भवतो विप्रतिषेधेन ॥ * ॥

इति॥ यदि चायं तच्छेषः स्यातेनैव तस्यायुक्तो विप्रतिषेधः। अथापि तदपवादः, उत्सर्गापवादयोरप्ययुक्तो विप्रतिषेधः॥ तत्र नियमस्यावकाशः- ''राज्ञः क च '' इति राजकीयम्। ''इको गुणवृद्धी'' इत्यस्यावकाशः-÷चयनं चायको लवनं लावकः' इति॥ इहोभयं प्राप्नोति-मेयति मार्ष्टि' इति॥ ''इको गुणवृद्धी'' इत्येतद्भवति विप्रतिषेधेन॥

(विप्रतिषेधबाधकभाष्यम्)

नैष युक्तो विप्रतिषेधः। ''विप्रतिषेधे परम्'' इत्युच्यते। पूर्वश्चायं योगः, परो नियमः॥

(विप्रतिषेधसाधकभाष्यम्)

इष्टवाची परशब्दः। विप्रतिषेधे परं यदिष्टं तद्भवतीति॥

(विप्रतिषेधबाधकभाष्यम्)

एवमप्ययुक्तो विप्रतिषेधः। द्विकार्ययोगो हि विप्रतिषेधः। न चात्रैको द्विकार्ययुक्तः॥

(विप्रतिषेधसाधकभाष्यम्)

नावश्यं द्विकार्ययोग एव विप्रतिषेधः॥

किं तर्हि? ॥

असंभवोऽपि। स चास्त्यत्रासंभवः॥

कोऽसावसंभवः? ॥

इह तावद्-÷वृक्षेभ्यः प्लक्षेभ्यः' इति- एकः स्थानी, द्वावादेशौ, न चास्ति संभवः यदेकस्य स्थानिनो द्वावादेशौ स्याताम्। इहेदानीं-मेयति मेयतः, मेयन्ति' इति द्वौ स्थानिनौ, एक आदेशः, न चास्ति संभवः-द्वयोः स्थानिनोरेक आदेशः स्यादित्येषोऽसंभवः। सत्येतस्मिन्नसंभवे युक्तो विप्रतिषेधः॥

(विप्रतिषेधबाधकभाष्यम्)

एवमप्ययुक्तो विप्रतिषेधः। द्वयोर्हि सावकाशयोः समवस्थितयोर्विप्रतिषेधो भवति। अनवकाशश्चायं योगः॥

(विप्रतिषेधसाधकभाष्यम्)

ननु च-इदानीमेवास्यावकाशः प्रक्लृप्तः-चयनं चायको लवनं लावक इति॥

(विप्रतिषेधबाधकभाष्यम्)

अत्रापि नियमः प्राप्नोति। नाप्राप्ते नियमेऽयं योग आरभ्यते। यावता च नाप्राप्ते नियमेऽयं योग आरभ्यते, ततस्तस्यापवादोऽयं योगो भवति॥ उत्सर्गापवादयोश्चायुक्तो विप्रतिषेधः॥ अथापि कथंचिद् ‘‘इको गुणवृद्धी‘‘ इत्यस्यावकाशः स्यात्। एवमपि यथेह

विप्रतिषेधादिको गुणो भवति मेयति मेयतः मेयन्ति, इति, एवमिहापि स्यात्-अनेनिजुः पर्यवेविषुरिति॥

(इत्यसंबद्धपरिभाषापक्षनिरासाधिकरणम्)

(अथ सिद्धान्तभूतपदोपस्थितिपक्षनिरूपणम्)

(सिद्धान्तिभाष्यम्)

एवं तर्हि-वृद्धिर्भवति गुणो भवतीति यत्र ब्रूयाद् इकः' इत्येत्तत्रोपस्थितं द्रष्टव्यम्॥

किं कृतं भवति? ॥

द्वितीया षष्ठी प्रादुर्भाव्यते॥ तत्र कामाचारः-गृह्यमाणेन वेकं विशेषयितुम्, इका वा गृह्यमाणम्। यावता कामचारः, इह तावन्मिदिमृजिपुगन्तलघूपधच्छिदृशिक्षिप्रक्षुद्रेषु गृह्यमाणेनेकं विशेषयिष्यामः- एतेषां य इगिति। इहेदानीं जुसिसार्वधातुकार्धधातुकङ्स्वाद्योर्गुणेष्विका गृह्यमाणं विशेषयिष्यामः एतेषां गुणो भवति इकः' इगन्तानामिति॥

(तच्छेषपक्षोक्तनिराकरणभाष्यम्)

अथवा सर्वत्रैवात्र स्थानी निर्दिश्यते। इह तावन्मिदेरित्यविभक्तिको निर्देशः- मिद् एः मिदेरिति॥ अथवा षष्ठीसमासो भविष्यति-मिद इः मिदिः मिदेरिति॥

पुगन्तलघूपधस्येति। नैवं विज्ञायते-पुगन्ताङ्गस्य लघूपधस्य चेति॥

कथं तर्हि?॥

पुकि अन्तः पुगन्तः, लघ्वी उपधा लघूपधा, पुगन्तश्च लघूपधा च पुगन्तलघूपधम्, पुगन्तलघूपधस्येति। अवश्यं चैतदेवं विज्ञेयम्, अङ्गविशेषणे सतीह प्रसज्येत भिनत्ति छिनत्तीति॥

ऋच्छेरपि प्रश्लिष्टनिर्देशोऽयम्- ऋच्छति ऋ ऋ ऋताम्- 'ऋच्छत्यृताम्' इति॥

दृशेरपि योगविभागः करष्यिते, -''उरङि गुणः'' उः अङि गुणो भवति। ततो ''दृशोः'' दृशेश्चाङि गुणो भवति॥ उरित्येव॥

क्षिप्रक्षुद्रयोरपि ‘‘यणादिपरं गुणः’’ इतीयता सिद्धम्। सोऽयमेवं सिद्धे सति यत्पूर्वग्रहणं करोति तस्यैतत्प्रयोजनम्-इको यथा स्यादनिको मा भूदिति॥

(वृद्धिपदप्रयोजनाधिकरणम्)

(आक्षेपभाष्यम्)

अथ वृद्धिग्रहणं किमर्थम्?॥

(प्रत्याक्षेपभाष्यम्)

किं विशेषेण वृद्धिग्रहणं चोद्यते न पुनर्गुणग्रहणमपि। यदि किंचिद्गुणग्रहणस्य प्रयोजनमस्ति, वृद्धिग्रहणस्यापि तद्भवितुमर्हति। को वा विशेषः? ॥

(प्रत्याक्षेपसमाधानभाष्यम्)

अयमस्ति विशेषः। गुणविधौ न क्वचित्स्थानी निर्दिश्यते, तत्रावश्यं स्थानिनिर्देशार्थं गुणग्रहणं कर्तव्यम्। वृद्धिविधौ पुनः सर्वत्रैव स्थानी निर्दिश्यते ‘‘अचोञ्णिति’’ ‘‘अत उपधायाः’’ ‘‘तद्धितेष्वचामादेः’’ इति॥

(समाधानभाष्यम्)

अत उत्तरं पठति-

(११० सिद्धान्तिसमाधानवार्तिकप्रथमखण्डम्)

॥ ॥ वृद्धिग्रहणमुत्तरार्थम् ॥ ॥

वृद्धिग्रहणं क्रियते॥ किमर्थम्? ॥ उत्तरार्थम्। ‘‘क्ङिति’’ इति प्रतिषेधं वक्ष्यति। स वृद्धेरपि यथा स्यात्॥

(पूर्वपक्षिभाष्यम्)

कश्चेदानीं किङ्त्प्रत्ययेषु वृद्धेः प्रसङ्गः। यावता 'स्थिति' इत्युच्यते।

(११० सिद्धान्तिसमाधानवार्तिकद्वितीयखण्डम् ॥ ७॥)

॥ ॥ तच्च मृज्यर्थम्॥ ॥

(भाष्यम्)

मृजेवृद्धिरविशेषेणोच्यते॥ सा क्ङिति मा भूत् मृष्टः मृष्टवानिति॥

(१११ सिद्धान्तिसमाधानान्तरवार्तिकम्)

॥ ॥ इहार्थं चापि॥ ॥

इहार्थं चापि मृज्यर्थं वृद्धिग्रहणं कर्तव्यम्। मृजेर्वृद्धिरविशेषेणोच्यते। सेको यथा स्यात्, अनिको मा भूदिति॥

(११२ अन्यथोपपत्तिवार्तिकम्॥ ९॥)

॥ ॥ मृज्यर्थमिति चेद्योगविभागात्सिद्धम् ॥ ॥

मृज्यर्थमिति चेद्योगविभागः करिष्यते-''मृजेर्वृद्धिरचः''। ततः-''ञ्णिति'' ञिति णिति च वृद्धिर्भवति ÷अचः' इत्येव॥

(अन्यथोपपत्तिबाधकभाष्यम्)

यद्यचो वृद्धिरुच्यते, ÷न्यमार्ट्' अटोऽपि वृद्धिः प्राप्नोति॥

(११२ अन्यथोपपत्तिसाधकशेषवार्तिकम्)

॥ ॥ अटि चोक्तम्॥ ॥

(भाष्यम्)

किमुक्तम्? ॥

÷अनन्त्यविकारेऽन्त्यसदेशस्य कार्यं भवति' इति॥

(११३ सिद्धान्तवार्तिकम्)

॥ ॥ वृद्धिप्रतिषेधानुपपत्तिस्त्विक्प्रकरणात् (तस्मादिग्लक्षणा वृद्धिः)॥ ॥

वृद्धेस्तु प्रतिषेधो नोपपद्यते।

किं कारणम्? ॥

इक्प्रकरणात्। इग्लक्षणयोर्गुणवृद्ध्योः प्रतिषेधः। न चैवं सति मृजेरिग्लक्षणा वृद्धिर्भवति। तस्मान्मृजेरिग्लक्षणा वृद्धिरेषितव्याः॥

(इक्परिभाषोपस्थितिसूचकभाष्यम्)

एवं तर्हि-इहान्ये वैयाकरणा मृजेरजादौ संक्रमे विभाषा वृद्धिमारभन्ते-परिमृजन्ति परिमार्जन्ति परिमृजन्तु परिमार्जन्तु परिममृजतुः परिमार्जतुरित्याद्यर्थम्॥ तदिहापि साध्यम्॥ तस्मिन् साध्ये योगविभागः करिष्यते- ''मृजेर्वृद्धिरचो'' भवति॥

ततः-÷अचि क्ङिति' अजादौ च क्ङिति मृजेर्वृद्धिर्भवति। परिमार्जन्ति परिमार्जन्तु परिममार्जतुः॥ किमर्थमिदम्? ॥ नियमार्थम्, अजादावेव क्ङिति नान्यत्र क्वान्यत्र मा भूत्? ॥

मृष्टः मृष्टवानिति॥

ततो 'वा' वाचि क्ङिति मृजेर्वृद्धिर्भवति। परिमृजन्ति परिमार्जन्ति परिममृजतुः परिममार्जतुरिति॥

(इक्परिभाषोपस्थितिसूचकभाष्यम्)

इहार्थमेव तर्हि सिजर्थं वृद्धिग्रहणं कर्तव्यम्। सिचि वृद्धिरविशेषेणोच्यते सेको यथा स्याद्, अनिको मा भूदिति॥

(इक्परिभाषानुपस्थितिभाष्यम्)

कस्य पुनरनिकः प्राप्नोति? ॥

(इक्परिभाषानुपस्थितिभाष्यम्)

अकारस्य। अचिकीर्षीत् अजिहीर्षीत्॥

(इक्परिभाषानुपस्थितिभाष्यम्)

नैतदस्ति। लोपोऽत्र बाधको भविष्यति॥

(इक्परिभाषोनुपस्थितिभाष्यम्)

आकारस्य तर्हि प्राप्नोति-अयासीत् अवासीत्॥

(इक्परिभाषानुपस्थितिभाष्यम्)

नास्त्यत्र विशेषः सत्यां वृद्धावसत्यां वा ॥

(इक्परिभाषोपस्थितिभाष्यम्)

संध्यक्षरस्य तर्हि प्राप्नोति॥

(इक्परिभाषापस्थितिभाष्यम्)

नैव संध्यक्षरमनत्यमस्ति॥

(इक्परिभाषोपस्थितिभाष्यम्)

ननु चेदमस्ति ढलोपे कृते उदवोढाम् उदवोढम् उदवोढेति॥

(इक्परिभाषानुपस्थितिभाष्यम्)

नैदस्ति। असिद्धो ढलोपः। तस्यासिद्धत्वान्नैतदन्त्यं भवति॥

(इक्परिभाषोपस्थितिभाष्यम्)

व्यञ्जनस्य तर्हि प्राप्नोति अभैत्सीत् अच्छैत्सीत्॥

(इक्परिभाषानुपस्थितिभाष्यम्)

हलन्तलक्षणा वृद्धिर्बाधिका भविष्यति॥

(इक्परिभाषोपस्थितिभाष्यम्)

यत्र तर्हि सा प्रतिषिध्यते- ''नेटि'' इति अकोषीद् अमोषीत्॥

(इक्परिभाषानुपस्थितिभाष्यम्)

सिचिवृद्धेरप्येष प्रतिषेधः॥

कथम्?॥

लक्षणं हि नाम ध्वनति भ्रमति मुहूर्तमपि नावतिष्ठते॥

(इक्परिभाषानुपस्थितिभाष्यम्)

अथवा ''सिचि वृद्धिः परस्मैपदेषु'' इति सिचि वृद्धिः प्राप्नोति॥ तस्या हलन्तलक्षणा वृद्धिर्बाधिका। तस्या अपि नेटि' इति प्रतिषेधः॥

(इक्परिभाषोपस्थापकभाष्यम्)

अस्ति पुनः क्वचिदन्यत्रापि अपवादे प्रतिषिद्धे ऽत्सर्गोऽपि न भवति ? ॥

(इक्परिभाषानुपस्थितिभाष्यम्)

अस्तीत्याह, सुजाते अश्वसूनुते, अध्वर्यो अद्रिभिः सुतम्, शुक्रं ते अन्यदिति। पूर्वरूपे प्रतिषिद्धेऽयादयोऽपि न भवन्ति॥

(प्रयोजनान्तरभाष्यम्)

उत्तरार्थमेव तर्हि सिजर्थं वृद्धिग्रहणं कर्तव्यम्। सिचि वृद्धिरविशेषेणोच्यते सा क्ङिति मा भूत् न्यनुवीत् न्यधुवीत् ॥

(प्रयोजनान्तरनिराकरणभाष्यम्)

नैतदस्ति प्रयोजनम्। अन्तरङ्गत्वादत्रोवङ्डादेशे कृतेऽनन्त्यत्वाद्वृद्धिर्न भविष्यति॥

(सिद्धान्तिभाष्यम्)

यदि तर्हि सिच्यन्तरङ्गं भवति-''अकार्षीत्, अहार्षीत्, गुणे कृते रपरत्वे चानन्त्यत्वाद्वृद्धिर्न' प्राप्नोति॥

(पूर्वपक्षिभाष्यम्)

मा भूदेवम्॥ ''हलन्तस्य'' इत्येवं भविष्यति॥

(दूषणभाष्यम्)

इह तर्हि- न्यस्तारीत् न्यदारीत्। गुणे कृते रपरत्वे चान्त्यत्वाद्वृद्धिर्न प्राप्नोति॥ हलन्तलक्षणायाश्च ''नेटि'' इति प्रतिषेधः॥

(दूषणनिराकरणभाष्यम्)

मा भूदेवम्। ''ल्रान्तस्य'' इत्येवं भविष्यति॥

(दूषणभाष्यम्)

इह तर्हि अलावीत् अयावीत्। गुणे कृतेऽवादेशे चानन्त्यत्वाद्वृद्धिर्न प्राप्नोति। हलन्तलक्षणायाश्च ''नेटि'' इति प्रतिषेधः॥

(दूषणनिराकरणभाष्यम्)

मा भूदेवम्। ‘‘ल्रान्तस्य‘‘ इत्येवं भविष्यति॥

(निराकरणबाधकभाष्यम्)

‘‘ल्रान्तस्य’’ इत्युच्यते, न चेदं ल्रान्तम्।

(निराकरणसाधकभाष्यम्)

‘‘ल्रान्तस्य’’ इत्यत्र वकारोऽपि निर्दिश्यते॥

किं वकारो न श्रूयते॥

लुसनिर्दिष्टो वकारः॥

(निराकरणभाष्यम्)

यद्येवम्- मा भवानवीत्, मा भवान् मवीद् अत्रापि प्राप्नोति॥

(निराकरणसाधकभाष्यम्)

अविमव्योर्नेति वक्ष्यामि॥

(आक्षेपभाष्यम्)

तद्वक्तव्यम्॥

(समाधानबाधकभाष्यम्)

न वक्तव्यम्। ‘णिश्रिभ्यां तौ निमातव्यौ'।

यद्यप्येतदुच्यते। अथवैतर्हि णिश्र्योः प्रतिषेधो न वक्तव्यो भवति। गुणे कृतेऽयादेशे च यान्तानां नेत्येव प्रतिषेधो भविष्यति॥

(भाष्यम्)

एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति-न सिच्यन्तरङ्गं भवति-इति। यदयम् ''अतो हलोदेर्लघोः'' इत्यकारग्रहणं करोति॥

कथं कृत्वा ज्ञापकम् ?॥

अकारग्रहणस्यैतत्प्रयोजनम्। इह मा भूत्-अकोषीत्, अमोषीत्। यदि सिच्यन्तरङ्गं स्याद्, अकारग्रहणमनर्थकं स्याद्। गुणे कृतेऽलघुत्वाद्वृद्धिर्न भविष्यति। पश्यति त्वाचार्यो ''न सिच्यन्तरङ्गं भवति'' इति। ततोऽकारग्रहणं करोति॥

(ज्ञापकनिराकरणभाष्यम्)

नैतदस्ति ज्ञापकम्। अस्त्यन्यदेतस्य वचने प्रयोजनम्॥

किम्? ॥

यत्र गुणः प्रतिषिद्धयते तदर्थमेतत्स्यात्। न्यकुटीत्, न्यपुटीत्॥

(ज्ञापकान्तरभाष्यम्)

यत्तर्हि णिश्चयोः प्रतिषेधं शास्ति। तेन 'नेहान्तरङ्गमस्ति' इति दर्शयति॥

(पूर्वोक्तज्ञापकस्थिरीकरणभाष्यम्)

यच्च करोत्यकारग्रहणं लघोरिति कृतेऽपि॥

(सिद्धान्तिवार्तिकोपसंहारखण्डम्)

॥*॥ तस्मादिग्लक्षणा वृद्धिः॥*॥

(भाष्यम्)

तस्मादिग्लक्षणा वृद्धिरास्थेया॥

(इति पदोपस्थितिस्थापनाधिकरणम्॥)

(अथ स्वतन्त्रविधित्वनिराकरणाधिकरणम्)

(११४ आक्षेपवार्तिकप्रथमखण्डम्॥ १२॥)

॥ *॥ षष्ठ्याः स्थानेयोगत्वादिग्निवृत्तिः॥* ॥

(भाष्यम्)

षष्ठ्याः स्थानेयोगत्वात्सर्वेषामिकां निवृत्तिः प्राप्नोति। अस्यापि प्राप्नोति दधि मधु॥

(अस्य स्वतन्त्रत्वे दूषणभाष्यम्)

पुनर्वचनमिदानीं किमर्थं स्यात्?॥

(११४ स्वतंत्रत्वे दूषणसमाधानवार्तिक २ खण्डम्॥ १३॥)

॥ ॥ अन्यतरार्थं पुनर्वचनम्॥॥

(भाष्यम्)

अन्यतरार्थमेतत्स्यात्-सार्वधातुकार्धधातुकयोर्गुण एवेति॥

(११५ आक्षेपवार्तिकप्रथमखण्डम्)

॥*॥ प्रसारणे च ॥*॥

(भाष्यम्)

प्रसारणे च सर्वेषां यणां निवृतिः प्राप्नोति। अस्यापि प्राप्नोति-याता वाता॥

(स्वातन्त्र्ये दूषणभाष्यम्)

पुनर्वचनमिदानीं किमर्थं स्यात्? ॥

(११५ स्वातन्त्र्ये दूषणनिराकरणवार्तिक 2 खण्डम्॥ १५॥)

॥*॥ विषयार्थं पुनर्वचनम् ॥*॥

(भाष्यम्)

विषयार्थमेतत्स्यात्, वचिस्वपियजादीनां कित्येवेति॥

(११६ आक्षेपवार्तिकम्॥ १६॥)

॥*॥ ऊरण्परे च॥*॥

ऊरण्परे च सर्वेषामृकाराणां निवृतिः प्राप्नोति। अस्यापि प्राप्नोति-कर्तृ हर्तृ॥

(११७ सर्वाक्षेपनिराकरणसिद्धान्तवार्तिकम्॥ १७॥)

॥ *॥ सिद्धं तु षष्ठ्यधिकारे वचनात्॥*॥

(भाष्यम्)

सिद्धतेतत्॥

कथम् ?॥

षष्ठ्यधिकारे इमे योगाः कर्तव्याः। एकस्तावत् क्रियते तत्रैव । इमावपि योगौ षष्ठ्यधिकारमनुवर्तिष्येते॥

(भाष्यम्)

अथवा- षष्ठ्यधिकारे इमौ योगावपेक्षिष्यामहे॥

(समाधान्तरभाष्यम्)

अथवेदं तावदयं प्रष्टव्यः- ''सार्वधातुकार्धधातुकयोर्गुणो भवति'' इतीह कस्मान्न भवति- याता वाता?॥ इदं तत्रापेक्षिष्यते- ''इको गुणवृद्धी'' इति॥ यथैव तर्हि इदं तत्रापेक्षिष्यते, एवमिहापि तदपेक्षिष्यामहे ''सार्वधातुकार्धधातुकयोः'' इति॥ इको गुणवृद्धी ॥ ३॥

(इति श्रीमद्भगवत्पतञ्जलिविरचिते महाभाष्ये प्रथमस्याध्यायस्य प्रथमे पादे तृतीयमाह्निकम्॥ ३॥)

प्रथमाध्याये प्रथमपादे चतुर्थमाह्निकम्।

(३ परिभाषासूत्रम्॥१।१।४॥ आ । सू.)

न धातुलोप आर्धधातुके॥१।१।३॥

(पदकृत्यनिर्वचनाधिकरणम्)

(आक्षेपभाष्यम्)

धातुग्रहणं किम्?॥

(समाधानभाष्यम्)

इह मा भूत्-लूञ् लविता लवितुम्, पूञ् पविता॥ पवितुम्॥

(आक्षेपभाष्यम्)

आर्धधातुक इति किमर्थम्?॥

(समाधानभाष्यम्)

'त्रिधा बद्धो वृषभो रोरवीति' (ऋ.सं. ४।५८।३)॥

(अथार्धधातुकपदार्थान्वयविचाराधिकरणम्)

(आक्षेपभाष्यम्)

किं पुनरिदमार्धधातुकग्रहणं लोपविशेषणम्-आर्धधातुकनिमित्ते लोपे सति ये गुणवृद्धी प्राप्नुतस्ते न भवतः' इति।

आहोस्विद् गुणवृद्धिविशेषणमार्धधातुकग्रहणम्-'धातुलोपे सत्यार्धधातुकनिमित्ते ये गुणवृद्धी प्राप्नुतस्ते न भवतः' इति?॥

(विशेषप्रश्नभाष्यम्)

किं चातः?॥

(विशेषदर्शनभाष्यम्)

यदि लोपविशेषणम्, 'उपेद्धः, प्रेद्धः' अत्रापि प्राप्नोति। अथ गुणवृद्धिविशेषणम्, 'क्नोपयति' अत्रापि प्राप्नोति॥

(उभयेष्टापत्तिभाष्यम्)

यथेच्छसि तथास्तु॥

(प्रथमपक्षाङ्गीकारभाष्यम्)

अस्तु लोपविशेषणम्॥

(आक्षेपभाष्यम्)

कथम्- 'उपेद्धः प्रेद्धः' इति?॥

(समाधानभाष्यम्)

बहिरङ्गो गुणोऽन्तरङ्गः प्रतिषेधः 'असिद्धं बहिरङ्गमन्तरङ्गे'॥

(लाघवभाष्यम्)

यद्येवं, नार्थो घातुग्रहणेन॥

(आक्षेपभाष्यम्)

इह कस्मान्न भवति लूञ् लविता लवितुम्?।

(समाधानभाष्यम्)

आर्धधातुकनिमित्ते लोपे प्रतिषेधः। न चैष आर्धधातुकनिमित्तो लोपः॥

(द्वितीयपक्षस्वीकारभाष्यम्)

अथवा-पुनरस्तु गुणवृद्धिविशेषणम्॥

(आक्षेपस्मारणभाष्यम्)

ननु चोक्तम्-क्नोपयतीत्यत्रापि प्राप्नोति॥

(समाधानभाष्यम्)

नैष दोषः,

निपातनात्सिद्धम्॥

किं निपातनम्?॥

'चेले क्नोपेः' इति॥

(इत्यार्धधातुकपदार्थान्वयविचाराधिकरणम्)

(अथ परिगणनाधिकरणम्)

(भाष्यम्)

परिगणनं कर्तव्यम्-

(११८ परिगणनपूर्वपक्षिवार्तिकम् ॥२॥)

॥*॥ यङ्यक्क्यवलोपे प्रतिषेधः॥*॥

(भाष्यम्)

यङ्यक्क्यवलोपे प्रतिषेधो वक्तव्यः॥

यङ्- बेभिदिता मरीमृजः॥

यक्-कुषुभिता मगधकः॥

क्य-समिधिता दृषदकः॥

बलोपे-जीरदानुः॥

(भाष्यम्)

किं प्रयोजनम्?॥

(११८ परिगणनसाधकवार्तिकद्वितीयखण्डनम् ॥२॥)

॥*॥ नुम्लोपस्निव्यनुबन्धलोपेऽप्रतिषेधार्थम्॥*॥

(भाष्यम्)

नुम्लोपे स्निव्यनुबन्धलोपे च प्रतिषेधो मा भूदिति॥

नुम्लोपे-अभाजि, रागः, उपबर्हणम्॥

स्निवेः-आस्नेमाणम्॥

अनुबन्धलोपे-लूञ् लविता लवितुम्॥

(आक्षेपभाष्यम्)

यदि परिगणनं क्रियते, 'स्यदः, प्रश्नथः, हिमश्रथः' इत्यत्रापि प्राप्नोति॥

(समाधानभाष्यम्)

वक्ष्यत्येतद् *निपातानात्स्यदादिषु* इति॥

(आक्षेपभाष्यम्)

तत्तर्हि परिगणनं कर्तव्यम्॥

(परिगणनप्रत्याख्यानभाष्यम्)

न कर्तव्यम्॥

(आक्षेपभाष्यम्)

नुम्लोपे कस्मान्न भवति?॥

(११९ सिद्धान्तसमाधानवार्तिकम्॥३॥)

॥*॥ इक्प्रकरणान्नुम्लोपे वृद्धिः॥*॥

(भाष्यम्)

इग्लक्षणयोर्गुणवृद्ध्योः प्रतिषेधः। न चैषेग्लक्षणा वृद्धिः॥

(आक्षेपभाष्यम्)

यदीग्लक्षणयोर्गुणवृद्धयोः प्रतिषेधः 'स्यदः, प्रश्रथः हिमश्रथः' इत्यत्र न प्राप्नोति। इह च प्राप्नोति-'अवोदः, एध-, ओघ्रः' इति॥

(१२० सिद्धान्तसमाधानवार्तिकम्॥४॥)

॥*॥ निपातनात्स्यदादिषु॥*॥

(भाष्यम्)

निपातनात्स्यदादिषु प्रतिषेधो भविष्यति, न च भविष्यति॥

(आक्षेपभाष्यम्)

यदीग्लक्षणयोर्गुणवृद्ध्योः प्रतिषेधः स्निव्यनुबन्धलोपे कथम्?॥

(१२१ सिद्धान्तसमाधानवार्तिकम्॥५॥)

॥ प्रत्ययाश्रयत्वादन्यत्र सिद्धम् ॥

(भाष्यम्)

आर्धधातुकनिमित्ते लोपे प्रतिषेधः। न चैष आर्धधातुकनिमित्तो लोपः॥

(आक्षेपभाष्यम्)

यद्यार्धधातुकनिमित्ते लोपे प्रतिषेधः, 'जीरदानुः' (ऋ.सं. ५।८३।१॥) अत्र न प्राप्नोति॥

(११२ सिद्धान्तसमाधानवार्तिकम् ॥ ६॥)

॥*॥ रकि ज्यः सम्प्रसारणम्॥*॥

(भाष्यम्)

नैतज्जीवेः रुपम्, रक्येतज्ज्यः सम्प्रसारणं भवति॥

(एकदेशिभाष्यम्)

यावतां चेदानीं रकि जीवेरपि सिद्धं भवति॥

(पूर्वपक्षभाष्यम्)

कथमुपबर्हणम्?॥

(सिद्धान्तिभाष्यम्)

बृहिः प्रकृत्यन्तरम्॥

(आक्षेपभाष्यम्)

कथं ज्ञायते-बृहिः प्रकृत्यन्तरमिति?॥

(सिद्धान्तिभाष्यम्)

अचीति हि लोप उच्यते, अनजादावपि दृश्यते-निबृह्यते।

अनिटीति चोच्यते, इडादावपि दृश्यते-निबर्हिता निबर्हितुमिति।

अजादावपि न दृश्यते-बृंहयति बृंहकः॥

(उपसंहारभाष्यम्)

तस्मान्नार्थः परिगणनेन॥

(आक्षेपभाष्यम्)

यदि परिगणनं न क्रियते 'भेद्यते, छेद्यते' अत्रापि प्राप्नोति॥

(समाधानभाष्यम्)

नैष दोषः। धातुलोप इति नैवं विज्ञायते-'धातोर्लोपो धातुलोपो' धातुलोपे इति॥

कथं तर्हि?॥

'धातोर्लोपो यस्मिस्तदिदं धातुलोप धातुलोपे' इति॥

(उपसंहारभाष्यम्)

तस्मादिग्लक्षणा वृद्धिः॥

(इति परिगणनाधिकरणम्)

(अथेग्लक्षणत्वे दोषनिराकरणाधिकरणम्)

(आक्षेपभाष्यम्)

यदि तर्हीग्लक्षणयोर्गुणवृद्ध्योः प्रतिषेधः, पापचकः पापठकः, मगधकः, दृषदकः' अत्र न प्राप्नोति।

(११३ सिद्धान्तिसमाधानवार्तिकम् ॥७॥)

॥*॥ अल्लोपस्य स्थानिवत्त्वात्॥*॥

(भाष्यम्)

अकारलोपे कृते तस्य स्थानिवत्त्वाद् गुणावृद्धी न भविष्यतः॥

(इतीग्लक्षणत्वे दोषनिराकरणम्)

(अथ सूत्रप्रत्याख्यानाधिकरणम्)

(११४ सिद्धान्तवार्तिकम्॥८॥)

॥*॥ अनारम्भो वा॥*॥

(भाष्यम्)

अनारम्भो वा पुनरस्य योगस्य न्याय्यः॥

(आक्षेपभाष्यम्)

कथं 'बेभिदिता मरीमृजकः कुषुभिता समिधिता' इति?॥

(समाधानभाष्यम्)

अत्राप्यकारलोपे कृते तस्य स्थानिवद्भावाद् गुणवृद्धी न भविष्यतः॥

(आक्षेपभाष्यम्)

यत्र तर्हि स्थानिवद्भावो नास्ति तदर्थमयं योगो वक्तव्यः॥

क्व च स्थानिवद्भावो नास्ति?॥

यत्र हलचोरादेशः, लोलुवः पोपुवः मरीमृजः सरीसृप इति॥

(समाधानभाष्यम्)

अत्राप्यकारलोपे कृते तस्य स्थानिवद्भावाद् गुणवृद्धी न भविष्यतः॥

(समाधानबाधकभाष्यम्)

लुकि कृते न प्राप्नोति॥

(समाधानसाधकभाष्यम्)

इदमिह संप्रधार्यम्- लुक् क्रियतामल्लोप इति। किमत्र कर्तव्यम्?॥ परत्वादल्लोपः॥

(समाधानबाधकभाष्यम्)

नित्यो लुक्। कृतेऽप्यल्लोपे प्रप्नोति, अकृतेऽपि प्राप्नोति॥

(समाधानभाष्यम्)

लुगप्यनित्यः॥ कथम्?। अन्यस्य कृतेऽल्लोपे प्राप्नोति, अन्यस्याकृते॥ शब्दान्तरस्य च प्राप्नुवन्विधिरनित्यो भवति''॥

(समाधानबाधकभाष्यम्)

अनवकाशस्तर्हि लुक्॥

(समाधानसाधकभाष्यम्)

सावकाशो लुक्॥

कोऽवकाशः?॥

अवशिष्टः॥

(अभ्युपेत्य समाधानभाष्यम्)

अथापि कथंचिदनवकाशो लुक् स्यादेवमपि न दोषः। अल्लोपे योगविभागः करिष्यते- 'अतो लोपः'। ततो ''यस्य'' यस्य च लोपो भवति। अत इत्येव॥

किमर्थमिदम्?॥

लुकं वक्ष्यति तद्बाधनार्थम्॥

ततो 'हलः' हल उत्तरस्य यस्य च लोपो भवतीति।

(आक्षेपभाष्यम्)

इहापि तर्हि परत्वाद्योगविभागाद्वा लोपो लुकं बाधेत-''कृष्णो नोनाव वृषभो यदीदम् (ऋ.सं. १।७९।२॥)'' नोनूयतेर्नोनाव॥

(समाधानभाष्यम्)

समानाश्रयो लुग्लोपेन बाध्यते॥

कश्च समानाश्रयः?॥

यः प्रत्ययाश्रयः, अत्र च प्रागेव प्रत्ययोत्पत्तेर्लुग्भवति॥

(आक्षेपभाष्यम्)

कथम्-स्यदः प्रश्रथः हिमश्रथः 'जीरदानुः(ऋ.सं. ५।८३।१)' निकुचित इति?

(१२५ समाधानवार्तिक(भाष्य)म् ॥९॥)

॥*॥ उक्तं शेषे॥*॥

(भाष्यम्)

किमुक्तम्?॥

निपातनात्स्यदादिषु ।

[* प्रत्ययाश्रयत्वादन्यत्र सिद्धम्]

रकि ज्यः सम्प्रसारणम् इति॥

निकुचितेऽप्युक्तम्

किम्?।

सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येति॥

न धातुलोप0.॥४॥

(४ परिभाषासूत्रम्)

क्ङिति च ॥१।१।५॥

॥*॥ क्ङिति प्रतिषेधे तन्निमित्तग्रहणम् [उपधारोरवीत्यर्थम्] ॥*॥

(आक्षेपभागव्याख्याभाष्यम्)

क्ङिति प्रतिषेधे तन्निमित्तग्रहणं कर्तव्यम्। क्ङिन्निमित्ते ये गुणवृद्धी प्राप्नुतस्ते न भवत इति वक्तव्यम्॥

(भाष्यम्)

किं प्रयोजनम्?॥

(१२५ आक्षेपवार्तिकप्रयोजनखण्डनम् १)

॥*॥ उपधारोरवीत्यर्थम्॥*॥

(प्रयोजनमखण्डव्याख्याभाष्यम्)

उपधार्थ रोरवीत्यर्थं च॥

(प्रथमप्रयोजनसमन्वयभाष्यम्)

उपधार्थं तावत्- भिन्नः भिन्नवानिति॥

किं पुनः कारणं न सिध्यति॥

क्ङितीत्युच्यते। यत्र क्ङित्यनन्तरो गुणभावीगस्ति तत्रैव स्यात्-चितम्, स्तुतुम्। इह तु न स्याद्- भिन्नः भिन्नवानिति?॥

(प्रथमप्रयोजनबाधकभाष्यम्)

ननु च- यस्य गुण उच्यते, तत् क्ङित्परत्वेन विशेषयिष्यामः। पुगन्तलघूपधस्य चाङ्गस्य गुण उच्यते। भिन्नं, तच्चात्र क्ङित्परम्।

(प्रथमप्रयोजनसाधकभाष्यम्)

पुगन्तलघूपस्येति नैवं विज्ञायते-पुगन्तस्याङ्गस्य लघूपधस्य चेति॥

कथं तर्हि?॥

पुकि अन्तः पुगन्तः। लघ्वी उपधा लघूपधा। पुगन्तश्च लघूपधा च पुगन्तलघूपधं पुगन्तलघूपधस्येति॥ अवश्यं चैतदेवं विज्ञेयम्। अङ्गविशेषणे हि सतीहापि प्रसज्येत-भिनत्ति, छिनत्तीति॥

(द्वितीयप्रयोजनसमन्वयभाष्यम्)

रोरवीत्यर्थं च। 'त्रिधा बद्धो वृषभो रोरवीति॥

(आक्षेपभाष्यम्)

यदि तन्निमित्तग्रहणं क्रियते, शचङन्ते दोषः, रियति पियति घियति प्रादुद्रवत् प्रासुस्रवत्। अत्र न प्राप्नोति॥

(१२३ सिद्धान्तसमाधानवार्तिकम् ॥२॥)

॥*॥ शचङन्तस्यान्तरङ्गलक्षणत्वात्[सिद्धम्] ॥*॥

(भाष्यम्)

अन्तरङ्गलक्षणत्वादत्रेयङुवङोः कृतयोरनुपधात्वाद् गुणो न भविष्यति॥

(तन्निमित्तग्रहणस्य निर्दोषतोपसंहारभाष्यम्)

एवं क्रियते चेदं तन्निमित्तग्रहणम्। न च कश्चिद्दोषो भवति॥

(फलान्तरप्रदर्शकभाष्यम्)

इमानि च भूयस्तन्निमित्तग्रहणस्य प्रयोजनानि हतो हथः उपोयते औयत लौयमानिः पौयमानिः नेनिक्त इति॥

(फलान्तरप्रत्याख्यानभाष्यम्)

नैतानि सन्ति प्रयोजनानि। इह तावद्-हतो हथ इति प्रसक्तस्यानभिनिर्वृत्तस्य प्रतिषेधेन निवृत्तिः शक्या कर्तुम्। अत्र च धातूपदेशावस्थायामेवाकारः॥

(भाष्यम्)

इह चोपोयते औयत लौयमानिः पौयमानिरिति। बहिरङ्गे गुणवृद्धी, अन्तरङ्गः प्रतिषेधः। असिद्धं बहिरङ्गमन्तरङ्गे॥

(भाष्यम्)

नेनिक्त इति। परेण रूपेण व्यवहितत्वान्न भविष्यति॥

(अथ तन्निमित्तग्रहणप्रत्याख्यानभाष्यम्)

उपधार्थेन तावन्नार्थः। धातोरिति वर्तते। धातुं क्ङित्परत्वेन विशेषयिष्यामः॥

(आक्षेपभाष्यम्)

यदि धातुर्विशेष्यते, विकरणस्य न प्राप्नोति-चिनुतः सुनुतः लुनीतः पुनीत इति॥

(समाधानभाष्यम्)

नैष दोषः। विहितविशेषणं धातुग्रहणम्-धातोर्यो विहित इति॥

(आक्षेपभाष्यम्)

धातोरेव तर्हि न प्राप्नोति॥

(समाधानभाष्यम्)

नैवं विज्ञायते-धातोर्विहितस्य क्ङितीति॥

कथं तर्हि?

धातोर्विहिते क्ङितीति॥

(समाधानभाष्यम्)

अथवा-कार्यकालं संज्ञापरिभाषं यत्र कार्यं तत्र द्रष्टव्यम् ''पुगन्तलघूपधस्य गुणो भवति'' इत्युपस्थितमिदं भवति ''क्ङिति न'' इति।

(समाधानान्तरभाष्यम्)

अथवा यदेतस्मिन्योगे क्ङिद्ग्रहणं क्रियते तदनवकाशम्। तस्यानवकाशत्वाद् गुणवृद्धी न भविष्यतः॥

(समाधानान्तरभाष्यम्)

अथवाचार्यप्रवृत्तिर्ज्ञापयति-'भवत्युपधालक्षणस्य गुणस्य प्रतिषेधः' इति। यदयं 'त्रसिगृधिधृषिक्षिपेः क्नुः'' ''इको झल् हलन्ताच्च'' इति क्नुसनौ कितौ करोति॥

कथं कृत्वा ज्ञापकम्?॥

कित्करण एतत्प्रयोजनम्-गुणः कथं न स्याद् इति। यदि चात्र गुणप्रतिषेधो न स्यात्, कित्करणमनर्थकं स्यात्।पश्यति त्वाचार्यो-भवत्युपधालक्षणस्यापि गुणस्य प्रतिषेध-इति। ततः क्नुसनौ कितौ करोति॥

(द्वितीयप्रयोजनप्रत्याख्यानभाष्यम्)

रोरवीत्यर्थेनापि नार्थः। क्ङितीत्युच्यते, न चात्र क्ङितं पश्यामः॥

(आक्षेपभाष्यम्)

प्रत्ययलक्षणेन प्राप्नोति॥

(समाधानभाष्यम्)

''न लुमता तस्मिन्'' इति प्रत्ययलक्षणप्रतिषेधः। अथापि ''न लुमताङ्गस्य'' इत्युच्यते, एवमपि न दोषः॥

कथम्?॥

न लुमता लुप्तेऽङ्गाधिकारः प्रतिनिर्दिश्यते॥

किं तर्हि ?॥

योऽसौ लुमता लुप्यते तस्मिन्यदङ्गं तस्य यत्कार्यं तन्न भवतीति॥ अथाप्यङ्गाधिकारः प्रतिनिर्दिश्यते। एवमपि न दोषः॥

कथम्?॥

''कार्यकालं संज्ञापरिभाषम्'' यत्र कार्यं तत्र द्रष्टव्यम्। ''सार्वधातुकार्धधातुकयोर्गुणो भवति'' इत्युपस्थितमिदं भवति ''क्ङिति न'' इति॥

(समाधानान्तरभाष्यम्)

अथवा छान्दसमेतद्। दृष्टानुविधिश्छन्दसि भवति॥

(समाधानान्तरभाष्यम्)

अथवा बहिरङ्गो गुणोऽन्तरङ्गः प्रतिषेधः। ''असिद्धं बहिरङ्गमन्तरङ्गे॥

(समाधानान्तरभाष्यम्)

अथवा पूर्वस्मिन्योगे यदार्धधातुकग्रहणं, तदनवकाशम्। तस्यानवकाशत्वाद् गुणो भविष्यति॥

(आक्षेपभाष्यम्)

इह कस्मान्न भवति-'लैगवायनः' 'कामयते'?॥

(१२७ सिद्धान्तसमाधानवार्तिकम्॥३॥॥)

॥*॥ तद्धितकाम्योरिक्प्रकरणात्॥*॥

(भाष्यम्)

इग्लक्षणयोर्गुणवृद्ध्योः प्रतिषेधः। न चैते इग्लक्षणे॥

(इति निमित्तार्थत्वनिराकरणम्)

(अथ स्थानिवत्वप्राप्तदोषवारणम्)

(१२८ आक्षेपवार्तिकम्)

॥*॥ लकारस्य ङित्त्वादादेशेषु स्थानिवद्भावप्रसङ्गः॥*॥

(भाष्यम्)

लकारस्य ङित्त्वादादेशेषु स्थानिवद्भावः प्राप्नोति-अचिवनम् असुनवम् अकरवम्॥

(१२९ एकदेशिसमाधानवार्तिकम्)

॥*॥ लकारस्य ङित्त्वादादेशेषु स्थानिवद्भावप्रसंङ्ग इति चेद्यासुटो ङिद्वचनात्सिद्धम्॥*॥

(भाष्यम्)

यद्वयं यासुटो ङिद्वचनं शास्ति तज्ज्ञापयत्याचार्यो-न ङिदादेशा ङितो भवन्तीति॥

(आक्षेपभाष्यम्)

यद्येतज्ज्ञाप्यते, कथं-''नित्यं ङितः'' ''इतश्च'' इति?॥

(समाधानभाष्यम्)

ङितो यत्कार्यं तद्भवति, ङिति यत्कार्यं तन्न भवतीति॥

(आक्षेपभाष्यम्)

किं वक्तव्यमेतत्?।

(समाधानभाष्यम्)

न हि।

(आक्षेपभाष्यम्)

कथमनुच्यमानं गंस्यते?॥

(समाधानभाष्यम्)

यासुट एव ङिद्वचनात्। अपर्याप्तश्चैव हि यासुट् समुदायस्य ङित्त्वे, ङितं चैनं करोति। तस्यैत्प्रयोजनम् ङितो यत्कार्यं तद्यथा स्याद्, ङिति यत्कार्यं तन्मा भूदिति॥ क्ङिति च॥५॥

(५ परिभाषासूत्रम्॥१।१।४।३॥)

दीघीवेवीटाम्॥१।१।६॥

(आक्षेपभाष्यम्)

किमर्थमिदमुच्यते?॥

(समाधानभाष्यम्)

गुणवृद्धी मा भूतामिति। आदीध्यनम् आदीध्यकः। आवेव्यनम् आवेव्यकः॥

(दीघीवेवीप्रत्याख्यानभाष्यम्)

अयं योगः शक्योऽकर्तुम्॥

कथम्?॥

(१३० सिद्धान्तवार्तिकम् ॥१॥)

॥*॥ दीघीवेव्योश्छन्दोविषयत्वाद् दृष्टानुविधित्वाच्च छन्दसश्छन्दस्य दीघेददीधयुरिति च गुणदर्शनादप्रतिषेधः॥*॥

(भाष्यम्)

दीधीवेव्योश्छन्दोविषयत्वात्। दीधीवेव्यौ छन्दोविषयौ। दृष्टानुविधित्वाच्छन्दसः। दृष्टानुविधिश्च छन्दसि भवति। छन्दसि अदीधेददीधयुरिति च गुणस्य दर्शनादप्रतिषेधः

अनर्थकः प्रतिषेधः अप्रतिषेधः। ''प्रजापतिर्वै यत्किंचन मनसादीधेत्'', होत्राय वृतः कृपयन्नदीधेत् (ऋ0सं0 १०।९८।७॥)'' अदीधयुर्दाशराज्ञे वृतासः (ऋ0सं0 ७।३३।५)॥''

(आक्षेपभाष्यम्)

भवेदिदं युक्तमुदाहरणम्-अदीघेदिति। इदं त्वयुक्तम्-अदीधयुरिति। अयं जुसि गुणः प्रतिषेधविषय आरभ्यते, स यथैव ''क्ङिति न'' इत्येतं प्रतिषेधं बाधते, एवमिममपि बाधेत॥

(समाधानभाष्यम्)

नैष दोषः, जुसि गुणः प्रतिषेधविषय आरभ्यमाणस्तुल्यजातीयं प्रतिषेधं बाधते॥

कश्च तुल्यजातीयः प्रतिषेधः?

यः प्रत्ययाश्रयः। प्रकृत्याश्रयश्चायम्॥

(समाधानान्तरभाष्यम्)

अथवा – येन नाप्राप्ते तस्य बाधनं भवति। न चाप्राप्ते 'क्ङिति' नेत्येतस्मिन् प्रतिषेधे जुसि गुण आरभ्यते। अस्मिन्पुनः प्राप्ते चाप्राप्ते च॥

(आक्षेपभाष्यम्)

यदि तर्ह्ययं योगो नारभ्यते। कथं-दीध्यदिति?॥

(१३१ सिद्धान्तसमाधानवार्तिकम् ॥ २॥)

॥*॥ दीध्यदिति च श्यन्व्यत्ययेन ॥*॥

(भाष्यम्)

दीध्यदिति च श्यन् व्यत्ययेन भविष्यति॥

(एकदेशिप्रत्ययाख्यानभाष्यम्)

इटश्चापि ग्रहणं शक्यमकर्तुम्॥

(आक्षेपभाष्यम्)

कथम्-अकणिषम्, अरणिषम्, कणिता श्वः, रणिता श्व इति?॥

(समाधानभाष्यम्)

''आर्धधातुकस्येड्वलादेः'' इत्यत्र इडित्यनुवर्तमाने पुनरिड्ग्रहणस्य प्रयोजनम्-इड् इडेव यथा स्याद्, यदन्यत्प्राप्नोति तन्मा भूदिति॥

किं चान्यत्प्राप्नोति?॥

गुणः॥

(आक्षेपभाष्यम्)

यदि नियमः क्रियते, 'पिपठिषतेरप्रत्ययः पिपठीः' दीर्घत्वं न प्राप्नोति॥

(समाधानभाष्यम्)

नैष दोषः। आङ्गं यत्कार्यं तन्नियम्यते। न चैतदाङ्गम्॥

(समाधानान्तरभाष्यम्)

अथवा असिद्धं दीर्घत्वं तस्यासिद्धत्वान्नियमो न भविष्यति॥ दीधीवेविवीटाम्॥६॥

(६ संयोगसंज्ञासूत्रम्॥१।१।१। ४ आ. ४॥)

हलोऽनन्तराः संयोगः॥१।१।७॥

(अनन्तरपदार्थनिरूपणाधिकरणम्)

(आक्षेपभाष्यम्)

अनन्तरा इति। कथमिदं विज्ञायते-अविद्यमानमन्तरं येषामिति, आहोस्विदविद्यमाना अन्तरैषामिति?॥

(प्रत्याक्षेपभाष्यम्)

किं चातः?॥

(प्रत्याक्षेपसमाधानभाष्यम्)

यदि विज्ञायते-अविद्यमानमन्तरं येषामिति। अवग्रहे संयोगसंज्ञा न प्राप्नोति- 'अप्स्विवत्यप्ऽसु (ऋ.सं. पद० १।२३।१९॥) इति। विद्यते ह्यत्रान्तरम्॥

अथ विज्ञायते-अविद्यमाना अन्तरैषामिति, न दोषो भवति।

(द्वितीयपक्षाभ्युपगमभाष्यम्)

यथा न दोषस्तथास्तु।

(प्रथमपक्षाभ्युपगमभाष्यम्)

अथवा पुनरस्तु अविद्यमानमन्तरं येषामिति॥

(आक्षेपस्मारणभाष्यम्)

ननु चोक्तम्-अवग्रहे संयोगसंज्ञा न प्राप्नोति- 'अप्स्विवत्यप्ऽसु' इति। विद्यते ह्यत्रान्तरमिति॥

(आक्षेपबाधकभाष्यम्)

नैव दोषो न प्रयोजनम्॥

(अथ प्रत्येकं संयोगसंज्ञानिराकरणाधिकरणम्)

(१३२ आक्षेपवार्तिकम् ॥१॥)

॥*॥ संयोगसंज्ञायां सहवचनं यथान्यत्र॥*॥

(भाष्यम्)

संयोगसंज्ञायां सहग्रहणं कर्तव्यम्। ''हलोऽनन्तराः संयोगः सह' इति वक्तव्यम्।. किं प्रयोजनम्? सहभूतानां संयोगसंज्ञा यथा स्यादेकैकस्य मा भूदिति॥ यथान्यत्र। तद्यथान्यत्रापि यत्रेच्छति सहभूतानां कार्यं, करोति तत्र सहग्रहणम्। तद्यथा ''सह सुपा'' ''उभे अभ्यस्तं सह'' इति॥

(दूषणप्रश्नभाष्यम्)

किं च स्याद् यद्येकस्य संज्ञा स्यात्?।

(दोषप्रदर्शनभाष्यम्)

इह निर्यायात्, निर्वायात्, ''वान्यस्य संयोगादेः'' इत्येत्वं प्रसज्येत॥

इह च संह्रिषीष्टेति, ऋतश्च संयोगादेः'' इतीट् प्रसज्येत॥

इह च संह्रियत इति, ''गुणोऽर्तिसंयोगाद्योः'' इति गुणः प्रसज्येत॥

इह च – दृषत्करोति समित्करोतीति, ''संयोगान्तस्य'' (8/2/23) इति लोपः प्रसज्येत।

इह च सक्ता वस्तेति, ''स्कोः संयोगाद्योरन्ते च'' इति लोपः प्रसज्येत॥

इह च निर्यातो निर्वातः ''संयोगादेरातो धातोर्यण्वतः'' इति निष्ठानत्वं प्रसज्येत॥

(दोषबाधकभाष्यम्)

नैष दोषः। यत्तावदुच्येते-इह तावन्निर्यायात् निर्वायात् ''वान्यस्य संयोगादेः'' इत्येवं प्रसज्येतेति॥ नैवं विज्ञायते-संयोग आदिर्यस्य सोऽयं संयोगादिः संयोगादेरिति॥

कथं तर्हि?।

संयोगावादी यस्य सोऽयं संयोगादिः संयोगादेरिति। एवं तावत्सर्वमाङ्गं परिहृतम्॥

(द्वितीयदूषणोद्धारभाष्यम्)

यदप्युच्यये-इह च दृषत्करोति समित्करोति ''संयोगान्तस्य''-इति लोपः प्रसज्येतेति॥ नैवं विज्ञायते-संयोगोऽन्तो यस्य तदिदं संयोगान्तं संयोगान्तस्येति॥

कथं तर्हि ॥

संयोगावन्तौ यस्य तदिदं संयोगान्तं संयोगान्तं संयोगान्तस्येति॥

(तृतीयदूषणोद्धारभाष्यम्)

यदप्युच्यते-इह च शक्ता वस्तेति 'स्कोः संयोगाद्योः'' इति लोपः प्रसज्येतेति॥ नैवं विज्ञायते-संयोगावादी संयोगादी संयोगाद्योरिति। तर्हि?॥ संयोगयोरादी संयोगादी संयोगाद्योरिति॥

(चतुर्थदूषणोद्धारभाष्यम्)

यदप्युच्यते-इह च निर्यातो निर्वात इति ''संयोगादेरातो धातोर्यण्वतः'' इति निष्ठानत्वं प्रसज्येतेति॥ नैवं विज्ञायते- संयोग आदिर्यस्य सोऽयं संयोगादिः संयोगादेरिति॥

कथं तर्हि?॥

संयोगावादी यस्य सोयं संयोगादिः संयोगादेरिति।

(आक्षेपभाष्यम्)

कथं कृत्वा एकैकस्य संयोगसंज्ञा प्राप्नोति॥

(समाधानभाष्यम्)

प्रत्येकं वाक्यपरिसमाप्तिर्दृष्टा' इति। तद्यथा वृद्धिगुणसंज्ञे प्रत्येकं भवतः॥

(समाधानबाधकप्रतिबन्धीसिद्धान्तिभाष्यम्)

ननु चायमप्यस्ति दृष्टान्तः-'समुदाये वाक्यपरिसमाप्तिः' इति। तद्यथा- गर्गाः शतं दण्ड्यन्ताम्। अर्थिनश्च राजानो हिरण्येन भवन्ति। न च प्रत्येकं दण्डयन्ति॥

(सहग्रहणप्रत्याख्यानभाष्यम्)

सत्येतस्मिन्दृष्टान्ते यदि तत्र प्रत्येकमित्युच्यते, इहापि सहग्रहणं कर्तव्यम्। अथ तत्रान्तरेण प्रत्येकमितिवचनं प्रत्येकं गुणवृद्धिसंज्ञे भवतः, इहापि नार्थः सहग्रहणेन॥

(आक्षेपभाष्यम्)

अथ यत्र बहूनामानन्तर्यं, किं तत्र द्वयोर्द्वयोः संयोगसंज्ञा भवति, आहोस्विदविशेषेण॥

(भाष्यम्)

कश्चात्र विशेष?।

(१३३ आक्षेपवार्तिकम्॥ २॥)

॥*॥ समुदाये संयोगादिलोपो मस्जेः॥॥

(भाष्यम्)

समुदाये संयोगादिलोप मस्जेर्न सिद्धयति। मङ्क्ता मङ्क्तुम्॥

इह च निर्ग्लेयात् निर्ग्लायात् निर्म्लेयात् निर्म्लायादिति, ''वान्यस्य संयोगादेः'' इत्येत्त्वं न प्राप्नोति॥

इह च संस्वरिषीष्टेति, ''ऋतश्च संयोगादेः'' इतीट् न प्राप्नोति॥

इह च संस्वर्यते इति, ''गुणोऽर्तिसंयोगाद्योः'' इति गुणो न प्राप्नोति॥

इह च गोमान्करोति यवमान्करोतीति, ''संयोगान्तस्य लोपः'' इति लोपो न प्राप्नोति॥

इह च निर्ग्लानो निर्म्लान इति, ''संयोगादेरातो धातोर्यण्वतः'' इति निष्ठानत्वं न प्राप्नोति॥

(प्रथमपक्षाभ्युपगमभाष्यम्)

अस्तु तर्हि-द्वयोर्द्वयोः संयोगः॥

(१३४ आक्षेपवार्तिकम्॥३॥)

॥*॥ द्वर्योहलोः संयोग इति चेद्द्विर्वचनम्॥*॥

(भाष्यम्)

द्वयोर्हलोः संयोग इति चेद्द्विर्वचनं न सिद्धयति। इन्द्रमिच्छति इन्द्रीयति। इन्द्रीयतेः सन् इन्दिद्रीयिषति। इन्द्रीयतेः सन् इन्दीद्रीयिषति। ''न न्द्राः संयोगादयः'' इति द्विर्वचनं न प्राप्नोति॥

(१३५ समाधानवार्तिकम् ॥ ४॥)

॥*॥ न वाज्विधेः॥*॥

(भाष्यम्)

न वा एष दोषः॥

किं कारणम्?

अज्विधेः। न्द्राः संयोगादयो न द्विरुच्यन्ते। अजादेरिति वर्तते॥

(आक्षेपभाष्यम्)

अथ यद्येवं बहूनां संयोगसंज्ञा, अथापि द्वयोर्द्वयोः, किं गतमेतदियता सूत्रेण। आहोस्विदन्यतरस्मिन्पक्षे भूयः सूत्रं कर्तव्यम्?

(समाधानभाष्यम्)

गतमित्याह॥

कथम्?॥

यदा तावद्बहूनां संयोगसंज्ञा, तदैवं विग्रहः करिष्यते-'अविद्यमानमन्तरमेषाम्' इति॥

(समाधानशेषभाष्यम्)

यदा द्वयोर्द्वयोः संयोगसंज्ञा, तदैवं विग्रहः करिष्यते-'अविद्यमाना अन्तरैषाम्' इति द्वयोश्चैवान्तरा कश्चिद्विद्यते वा न वा॥

(आक्षेपभाष्यम्)

एवमपि बहूनामेव प्राप्नोति। यान् हि भवानत्र पष्ठ्या प्रतिनिर्दिशति, एतेषामन्येन व्यवाये न भवितव्यम्॥

(समुदायसंज्ञाभ्युपगमभाष्यम्)

अस्तु तर्हि समुदाये संज्ञा॥

(समुदायसंज्ञादूषणस्मारणभाष्यम्)

ननु चोक्तं-*समुदाये संयोगादिलोपो मस्ज्जेः* इति॥

(समुदायसंज्ञादूषणनिराकरणसिद्धान्तिभाष्यम्)

नैषः दोषः। वक्ष्यत्येतत्-''*अन्त्यात्पूर्वो मस्जेर्मिदनुषङ्गसंयोगादिलोपार्थम्*'' इति।

(समुदायसंज्ञादूषणनिराकरणैकदेशिभाष्यम्)

अथवाऽविशेषेण संयोगसंज्ञा विज्ञास्यते-द्वयोरपि, बहूनामपि तत्र द्वयोर्या संयोगसंज्ञा, तदाश्रयो लोपो भविष्यति॥

(समुदायसंज्ञापक्षोक्तदूषणान्तरनिराकरणसिद्धान्तिभाष्यम्)

यदप्युच्यते-'इह च निग्र्लेयात् निग्र्लायात् निर्म्लेयात् निर्म्लायादिति ''वान्यस्य संयोगादेः'' इत्येवं न प्राप्नोति' इति॥ अङ्गेन संयोगादिं विशेषयिष्यामः-अङ्गस्य संयोगादेरिति॥ एवं तावत्सर्वमाङ्गं परिहृतम्॥

यदप्युच्येते-इह च गोमान्करोति यवमानकरोतीति'' संयोगान्तस्य लोपः'' इति लोपो न प्राप्नोति' इति॥ पदेन संयोगान्तं विशेषयिष्यामः-धातोः संयोगान्तस्येति॥

यदप्युच्यते- इह च निग्र्लानो निर्म्लान इति ''सङ्योगादेरातो धातोर्यण्वतः'' इति निष्ठानत्वं न प्राप्नोति' इति।

धातुना संयोगादिं विशेषयिष्यामः धातोः संयोगादेरिति॥

(इति समुदायसंज्ञापक्षस्थापनम्)

(अथानन्तरशब्दार्थनिरूपणम्)

(१३६ आक्षेपवार्तिकम्॥ ५॥)

॥*॥ स्वरानन्तर्हितवचनम्॥*॥

(भाष्यम्)

स्वरैरनन्तर्हिता हलः संयोगसंज्ञा भवन्तीति वक्तव्यम्॥

किं प्रयोजनम्?

व्यवहितानां मा भूत्। पचति पनसम्॥

(आक्षेपबाधकभाष्यम्)

ननु चानन्तरा इत्युच्यते। तेन व्यवहितानां न भविष्यति॥

(१३६ दृष्टमानन्तर्यं व्यवहितेऽपि)

(भाष्यम्)

व्यवहितेऽप्यनन्तरशब्दो दृश्यते। तद्यथा-'अनन्तराविमौ ग्रामौ' इत्युच्यते, तयोश्चैवान्तरा नद्यश्च पर्वताश्च भवन्तीति॥

(आक्षेपबाधकभाष्यम्)

यदि तर्हि व्यवहितेऽप्यनन्तरशब्दो भवति। आनन्तर्यवचनमिदानीं किमर्थं स्यात्?॥

(१३७ आक्षेपसाधकवार्तिकम्॥७॥)

॥*॥ आनन्तर्यवचनं किमर्थमिति चेदेकप्रतिषेधार्थम्॥*॥

(भाष्यम्)

एकस्य हलः संयोगसंज्ञा मा भूदिति॥

किं च स्यात् यद्येकस्य हलः संयोगसंज्ञा स्याद्?।

इयेष उवोष,''इजादेश्च गुरुमतोनृच्छः'' इत्याम् प्रज्येत्॥

(१३८ समाधानवार्तिकम्॥८॥)

॥*॥ न वाऽतज्जातीयव्यवायात्॥*॥

(भाष्यम्)

न वा एष दोषः॥

किं कारणम्?।

अतज्जातीयस्य व्यवायात्। अतज्जातीयकं हि लोके व्यवधायकं भवति॥

(अनुयोगभाष्यम्)

कथं पुनर्ज्ञायते-ऽतज्जातीयकं लोके व्यवधायकं भवतीति?॥

(उत्तरभाष्यम्)

एवं हि कंचित् कश्चित्पृच्छति-'अनन्तरे एते ब्राह्मणकुले' इति। स आह-'नानन्तरे, वृषलकुलमनयोरन्तरा' इति॥

(आक्षेपभाष्यम्)

किं पुनः कारणं क्वचिदज्जातीयं व्यवधायकं भवति, क्वचिन्न?॥

(सनाधानभाष्यम्)

सर्वत्रैव ह्यतज्जातीयकं व्यवधायकं भवति॥

(आक्षेपभाष्यम्)

कथम्-अनन्तराविमौ ग्रामाविति?॥

(समाधानभाष्यम्)

ग्रामशब्दोयं बह्वर्थः। अस्त्येव शालासमुदाये वर्तते, तद्यथा-ग्रामो दग्ध इति। अस्ति वाटपरिक्षेपे वर्तते, तद्यथा-ग्रामं प्रविष्ट इति। अस्ति मनुष्येषु वर्तते, तद्यथा- ग्रामो गतो ग्राम आगत इति। अस्ति सारण्यके ससीमके सस्थण्डिलके वर्तते, तद्यथा-ग्रामो लब्ध इति॥ तद्यः सारण्यके ससीमके सस्थण्डिलके वर्तते तमभिसमीक्ष्यैतत्प्रयुज्यते-अनन्तराविमौ ग्रामाविति। सर्वत्रैव ह्यतज्जातीयकं व्यवधायकं भवति॥ हलोनन्तराः॥७॥

(७ अनुनासिकसंज्ञासूत्रम्॥१।१।४आ. ५॥)

मुखनासिकावचनोऽनुनासिकः॥१।१।८॥

(मुखनासिकावचनशब्दार्थनिरूपणम्)

(आक्षेपभाष्यम्)

किमिदं 'मुखनासिकावचनः' इति?॥

(समाधानभाष्यम्)

मुखं च नासिका च मुखनासिकम्। मुखनासिकं वचनमस्य सोयं मुखनासिकावचनः॥

(आक्षेपभाष्यम्)

यद्येवं मुखनासिकवचन इति प्राप्नोति॥

(समाधानभाष्यम्)

निपातनाद्दीर्घत्वं भविष्यति॥

(समाधानान्तरभाष्यम्)

अथ वा-मुखनासिकमावचनमस्य सोयं मुखनासिकावचनः॥

(आक्षेपभाष्यम्)

अथ किमिदमावचनमिति?॥

(समाधानभाष्यम्)

ईषद्वचनमावचनमिति, किंचिन्मुखवचनं किंचिन्नासिकावचनम्?

(समासान्तरभाष्यम्)

मुखद्वितीया वा नासिका वचनमस्य सोऽयं मुखनासिकावचनः॥

(समाधानान्तरभाष्यम्)

मुखोपसंहिता वा नासिका वचनमस्य सोऽयं मुखनासिकावचनः॥

(पदकृत्यनिर्वचनाक्षेपभाष्यम्)

अथ मुखग्रहणं किमर्थम्?॥

(समाधानभाष्यम्)

'नासिकावचनोऽनुनासिकः' इतीयत्युच्यमाने यमानुस्वाराणामेव प्रसज्येत। मुखग्रहणे पुनः क्रियमाणे न दोषो भवति॥

(आक्षेप भाष्यम्)

अथ नासिकाग्रहणं किमर्थम्?

(समाधान भाष्यम्)

'मुखवचनोनुनासिकः इतीयत्युच्यमाने क-च-ट-त- पानामेव प्रसज्येत। नासिकाग्रहणे पुनः क्रियमाणे न दोषो भवति।

(मुखग्रहणप्रत्याख्यानभाष्यम्)

मुखग्रहणं शक्यमकर्तुम्॥

(आक्षेपभाष्यम्)

केनेदानीमुभयवचनानां भविष्यति?॥

(समाधानभाष्यम्)

प्रासादवासिन्यायेन। तद्यथा-केचित्प्रासादवासिनः, केचिद् भूमिवासिनः, केचिदुभयवासिनः। [तत्र] ये प्रासादवासिनो गृह्यन्ते ते प्रासादवासिग्रहणेन। ये भूमिवासिनो गृह्यन्ते ते

भूमिवासिग्रहणेन। ये तूभयवासिनः, गृह्यन्त एव ते प्रासादवासिग्रहणेन भूमिवासिग्रहणेन च। एवमिहापि केचिन्मुखवचनाः, केचिन्नासिकावचनाः, केचिदुभयवचनाः। तत्र ये मुखवचना गृह्यन्ते ते मुखग्रहणेन। ये नासिकावचना गृह्यन्ते ते नासिकाग्रहणेन। ये उभयवचना गृह्यन्त एव ते मुखग्रहणेन नासिकाग्रहणेन च॥

(आक्षेपभाष्यम्)

भवेदुभयवचनानां सिद्धम्। यमानुस्वाराणामपि प्राप्नोति॥

(समाधानभाष्यम्)

नैव दोषो न प्रयोजनम्॥

(१३९ अन्योन्याश्रयपरिहारायाक्षेपवार्तिकम्॥१॥)

॥*॥ इतरेतराश्रयं तु भवति॥*॥

(भाष्यम्)

इतरेतराश्रयं तु भवति॥

का इतरेतराश्रयता?।

सतोनुनासिकस्य संज्ञया भवितव्यम्। संज्ञया च अनुनासिको भाव्यते॥ तदितरेतराश्रयं भवति। इतरेतराश्रयाणि च कार्याणि न प्रकल्प्यन्ते॥

(सिद्धान्तसमाधानवार्तिकम्)

॥*॥ अनुनासिकसंज्ञायामितरेतराश्रये उक्तम्॥*॥

(प्रश्नभाष्यम्)

किमुक्तम्?॥

(समाधानभाष्ये ९८ सिद्धान्तिवार्तिकम्)

***सिद्धं तु नित्यशब्दत्वात्* इति॥**

(प्रकृतोपयुक्तव्याख्याभाष्यम्)

नित्याः शब्दाः। नित्येषु शब्देषु सतोऽनुनासिकस्य संज्ञा क्रियते। न संज्ञयाऽनुनासिको भाव्यते।

(आक्षेपभाष्यम्)

यदि तर्हि नित्याः शब्दाः। किमर्थं शास्त्रम्?॥

(९१ सिद्धान्तवार्तिकम्॥५॥)

॥*॥ किमर्थं शास्त्रमिति चेन्निवर्तकत्वात्सिद्धम्॥*॥

(भाष्यम्)

निवर्तकं शास्त्रम्॥

कथम्?॥

आङस्मायविशेषेणोपदिष्टोऽननुनासिकः। तस्य सर्वत्राननुनासिकबुद्धिः प्रसक्ता। तत्रानेन निवृत्तिः क्रियते-छन्दस्यचि परत आङोऽननुनासिकस्य प्रसङ्गेनुनासिकः साधुर्भवतीति॥ मुखनासिकावचनोऽनुनासिकः॥

*****

(सवर्णसंज्ञाप्रकरणम्)

(८ सवर्णसंज्ञासूत्रम् ॥१।१।४ आ.सू. ६॥)

तुल्यास्यप्रयत्नं सवर्णम्॥१।१।९॥

(तुल्यास्यप्रयत्नपदार्थनिरूपणाधिकरणम्)

(आक्षेपभाष्यम्)

किमिदं तुल्यास्यप्रयत्नमिति?॥

(समाधानभाष्यम्)

तुलया संमितं तुल्यम्। आस्यं च प्रयत्नश्च आस्यप्रयत्नम्। तुल्यास्यं च तुल्यप्रयत्नं च सवर्णसंज्ञं भवति॥

(आक्षेपभाष्यम्)

किं पुनरास्यम्?।

(समाधानभाष्यम्)

लौकिमास्यम्। ओष्ठात्प्रभृति प्राक्काकलकात्॥

(आक्षेपभाष्यम्)

कथं पुरास्यम्?।

(समाधानभाष्यम्)

अस्यन्त्यनेन वर्णानिति आस्यम्। अन्नमेतदास्यन्दत इति वास्यम्।

(आक्षेपभाष्यम्)

अथ कः (पुनः) प्रयत्नः॥

(समाधानभाष्यम्)

प्रयतनं प्रयत्नः। प्रवूर्वाद्यततेर्भावसाधनो नङ् प्रत्ययः।

(आक्षेपभाष्यम्)

यदि लौकिकमास्यम्। किमास्योपादाने प्रयोजनम्। सर्वेषां हि तत्तुल्यम्?॥

(समाधानभाष्यम्)

वक्ष्यत्येतत्-प्रयत्नविशेषणमास्योपादानमिति।

(१४० आक्षेपवार्तिकम्)

॥*॥सर्वणसंज्ञायां भिन्नदेशेष्वतिप्रसङ्गः प्रयत्नसामान्यात्॥*॥

(भाष्यम्)

सवर्णसंज्ञायां भिन्नदेशेष्वतिप्रसङ्गो भवति। जबगडदशाम्॥

किं कारणम्?॥

प्रयत्नसामान्यात्। एतेषां हि समानः प्रयत्नः॥

(१४१ न्यासान्तरेण समाधानवार्तिकम् ॥२॥)

॥*॥ सिद्धं त्वास्ये तुल्यदेशप्रयत्नं सवर्णम्॥*॥

(भाष्यम्)

सिद्धमेतत्।

कथम्?॥

आस्ये येषां तुल्यो देशः प्रयत्नश्च ते सवर्णसंज्ञा भन्तीति वक्तव्यम्॥

(आक्षेपभाष्यम्)

एवमपि किमास्योपादाने प्रयोजनम्। सर्वेषां हि तत्तुल्यम्?॥

(समाधानभाष्यम्)

प्रयत्नविशेषणमास्योपादानम्। सन्ति ह्यास्याद्वाह्याः प्रयत्नाः। ते हापिता भवन्ति। तेषु सत्स्वसत्स्वपि सवर्णसंज्ञा सिद्धा भवति॥

के पुनस्ते?॥

विवारसंवारौ,श्वासनादौ, घोषवदघोषता, अल्पप्राणता, महाप्राणतेति॥

तत्र वर्गाणां प्रथमद्वितीया विकृतकण्ठाः, श्वासानुप्रदाना अघोषाश्च। एकेऽल्पप्राणाः, अपरे महाप्राणाः॥

तृतीयचतुर्थाः संवृतकण्ठा नादानुप्रदाना घोषवन्तः। एकेऽल्पप्राणाः, अपरे महाप्राणाः॥

यथा तृतीयस्तथा पञ्चमा आनुनासिक्यवर्जम्। आनुनासिक्यमेषामधिको गुणः॥

एवमप्यवर्णस्य सवर्णसंज्ञा न प्राप्नोति, बाह्यं ह्यास्यात्स्थानमवर्णस्य॥

(समाधानभाष्यम्)

सर्वमुखस्थानमवर्णम् एक इच्छन्ति॥

(आक्षेपभाष्यम्)

एवमपि व्यपदेशो न प्रकल्पते-'आस्ये येषां तुल्यो देशः' इति॥

(समाधानभाष्यम्)

व्यपदेशिवद्भावेन व्यपदेशो व्यपदेशो भविष्यति॥

(आक्षेपभाष्यम्)

सिध्यति। सूत्रं तर्हि भिद्यते॥

(सिद्धान्तिसमाधानभाष्यम्)

यथान्यासमेवास्तु॥

(आक्षेपभाष्यम्)

ननु चोक्तम्*सवर्णसंज्ञायां भिन्नदेशेष्वतिप्रसङ्गः प्रयत्नसामान्याद्* इति॥

(सिद्धान्तसमाधानभाष्यम्)

नैष दोषः॥ न हि लौकिकमास्यम्॥

किं तर्हि?।

तद्धितान्तमास्यम्। आस्ये भवमास्यम्। ''शरीरावयवाद्यत्''॥

किं पुनरास्ये भवम्?॥

स्थानं करणं च॥

(आक्षेपभाष्यम्)

एवमपि प्रयत्नोऽविषेषितो भवति॥

(समाधानभाष्यम्)

प्रयत्नश्च विशेषितः॥ कथम्? नहि प्रयतनं प्रयत्नः॥

किं तर्हि? प्रारम्भो यत्नस्य प्रयत्नः॥

(आक्षेपभाष्यम्)

यदि प्रारम्भो यत्नस्य प्रयत्नः, एवमप्यवर्णस्य एङोश्च सवर्णसंज्ञा प्राप्नोति॥

(समाधानभाष्यम्)

प्रश्लिष्टावर्णावेतौ॥

(आक्षेपभाष्यम्)

अवर्णस्य तर्ह्यैचोश्च सवर्णसंज्ञा प्राप्नोति॥

(समाधानभाष्यम्)

विवृततरावर्णावेतौ॥

(आक्षेपभाष्यम्)

एतयोरेव तर्हि मिथः सवर्णसंज्ञा प्राप्नोति॥

(समाधानभाष्यम्)

नैतो तुल्यस्थानौ॥

(आक्षेपभाष्यम्)

उदात्तादीनां तर्हि सवर्णसंज्ञा न प्राप्नोति॥

(समाधानभाष्यम्)

अभेदका उदात्तादयः॥

(एकदेशिभाष्यम्)

अथवा किं न एतेन-प्रारम्भो यत्नस्य प्रयत्न इति॥ किं तर्हि प्रयतनमेव प्रयत्नः॥ तदेव च तद्धितान्तमास्यम्। यत्समानं तदाश्रयिष्यामः॥

किं सति भेदे॥

सतीत्याह। सत्येव हि भेदे सवर्णसंज्ञया भवितव्यम्।

कुत एतत्?॥

भेदाधिष्ठाना हि सवर्णसंज्ञा, यदि हि यत्र सर्वं समानं तत्र स्यात्सवर्णसंज्ञावचनमनर्थकं स्याद्॥

(सिद्धान्तिन आक्षेपभाष्यम्)

यदि तर्हि 'सति भेदे किंचित्समानम्' इति कृत्वा सवर्णसंज्ञा भविष्यति। शकारच्छकारयोः षकारठकारयोः सकारथकारयोः सवर्णसंज्ञा प्राप्नोति। एतेषां हि सर्वमन्यत्समानं करणवर्जम्॥

(एकदेशिसमाधानाभाष्यम्)

एवं तर्हि-प्रयतनमेव प्रयत्नः। तदेव हि तद्धितान्तमास्यम्। न त्वयं द्वन्द्वः-आस्यं च प्रयत्नश्च आस्यप्रयत्नमिति।

किं तर्हि?

त्रिपदोयं बहुव्रीहिः-तुल्यःआस्ये प्रयत्न एषामिति।

(भाष्यम्)

अथवा पूर्वस्तत्पुरूषस्ततो बहुव्रीहिः तुल्य आस्ये तुल्यास्यस्तुल्यास्यः प्रयत्न एषामिति॥

(भाष्यम्)

अथवा परस्तत्पुरुषस्ततो बहुव्रीहि-आस्ये प्रयत्न आस्यप्रयत्नः तुल्य आस्यप्रयत्न एषामिति॥

(इति तुल्यास्यप्रयत्नशब्दार्थनिरूपणम्॥)

(अथानिष्टसावर्ण्यनिराकरणाधिकरणम्)

(१४२ आक्षेपवार्तिकम्॥३॥)

॥*॥ तस्य॥*॥

(भाष्यम्)

तस्येति तु वक्तव्यम्॥

किं प्रयोजनम्?॥

यो यस्य तुल्यास्यप्रयत्नः स तस्य सवर्णसंज्ञो यथा स्याद्। अन्यस्य तुल्यास्प्रयत्नोऽन्यस्य सवर्णसंज्ञो मा भूत्।

(१४३ समाधानवार्तिकम्॥४॥)

॥*॥ तस्यावचनं वचनप्रामाण्यात्॥*॥

(भाष्यम्)

तस्येति न वक्तव्यम्॥

अन्यस्य तुल्यास्यप्रयत्नोऽन्यस्य सवर्णसंज्ञः कस्मान्न भवति?॥

वचनप्रामाण्यात्। सवर्णसंज्ञावचनसामर्थ्यात्। यदि हि अन्यस्य यतुल्यास्यप्रयत्नोऽन्यस्य सवर्णसंज्ञः स्यात्। सवर्णसंज्ञावचनमर्थकं स्यात्॥

(१४४ समाधानवार्तिकम्॥५॥)

॥*॥ संबन्धिशब्दैर्वा तुल्यम्॥*॥

(भाष्यम्)

संबन्धिशब्दैर्वा पुनस्तुल्यमेतत्। तद्यथा-सम्बन्धिशब्दाः ''मातरि वर्तितव्यम्'' ''पितरि शुश्रूषितव्यम्'' इति। न चोच्यते-'स्वस्यां मातरि' 'स्वस्मिन्पितरि' इति। सम्बन्धाञ्चैतद्गम्यते-या यस्य माता, यश्च यस्य पितेति॥ एवमिहापि ''तुल्यास्यप्रयत्नं सवर्णम्'' इत्यत्र संबन्धिशब्दावेतौ, तत्र संबन्धादेतद्गन्तव्यम्-यत्प्रति यत्तुल्यास्यप्रयत्नं तत्प्रति तत्सवर्णसंज्ञं भवतीति॥

(इत्यनिष्टसावर्ण्यनिराकरणाधिकरणम्॥)

(अथ ऋलृवर्णयोः सावर्ण्याधिकरणम्)

(४५ आक्षेपवार्तिकम्॥६॥)

॥*॥ ऋकारलृकारयोः सवर्ण विधिः॥*॥

(भाष्यम्)

ऋकारलृकारयोः सवर्णसंज्ञा विधेया। होतृ लृकारः होतृकार इति॥

किं प्रयोजनम्?॥

''अकः सवर्णे दीर्घत्वं यथा स्यात्॥

(सावर्ण्यखण्डनभाष्यम्)

नैतदस्ति प्रयोजनम्। वक्ष्यत्येतत्-'*सवर्णदीर्घत्वे ऋति ऋ वा वचनम्-'' *लृति लृ वा वचनम्*' इति॥॥

(सावर्ण्यमण्डनभाष्यम्)

तत्सवर्णे यथा स्यात्। इह मा भूद्- दध्यृकारः मध्वृकार इति॥

(सावर्ण्यखण्डनभाष्यम्)

यदेतत्सवर्णदीर्घत्वे ऋतीति एतद्दत इति वक्ष्यामि॥ ततः-''लृति'' । लृकारे परत लृकारो वा भवतीति। ऋत इत्येव॥

(सावर्ण्यमण्डनभाष्यम्)

तन्न वक्तव्यं भवति॥

(सावर्ण्यखण्डनभाष्यम्)

अवश्यं तद्वक्तव्यम्। ऊकालोऽज्झ्रस्वदीर्घप्लुतसंज्ञो भवतीत्युच्यते। न च ऋकार लृकारो वाजस्ति॥

(सावर्ण्यमण्डनभाष्यम्)

ऋकारस्य लृकारस्य चाच्त्वं वक्ष्यामि॥ तच्चावश्यं वक्तव्यम्। प्लुतो यथा स्यात्। होतृ ऋकारः, होतृकारः, होतृ३कार इति। होतृ लृकारः होत्लृकारः होत्लृ३कार इति॥

(आक्षेपभाष्यम्)

किं पुनरत्र ज्यायः?॥

(समाधानभाष्यम्)

सवर्णसंज्ञावचनमेव ज्यायः। दीर्घत्वं चैव हि सिद्धं भवति। अपि च ऋकारग्रहणेन लृकारग्रहणं संनिहितं भवति। ''ऋत्यकः'' खट्वक्रृष्यः मालक्रृष्यः। इदमपि सिद्धं भवति-खट्वलृकारो माललृकार इति। ''वा सुप्यापिशलेः' उपर्कारीयति उपार्कारीयति। इदमपि सिद्धं भवति-उपल्कारीयति उपाल्कारीयति॥

(एकदेशिन आक्षेपभाष्यम्)

यदि तर्हि ऋकारग्रहणेन लृकारग्रहणं संनिहितं भवति,-''ऽरण्परः'' लृकारस्यापि रपरत्वं प्राप्नोति॥

(समाधानभाष्यम्)

लृकारस्य लपरत्वं वक्ष्यामि। तच्चावश्यं वक्तव्यम्। असत्यां सवर्णसंज्ञायां विध्यर्थम्। तदेव सत्यां रेफबाधनार्थं भविष्यति॥

(एकदेशिन आक्षेपभाष्यम्)

इह तर्हि-''रषाभ्यां नो णः समानपदेः'' इत्यृकारग्रहणं चोदितं मातृणां पितृणामित्येतदर्थम्। तदिहापि प्राप्नोति-क्लृप्यमानं पश्येति।

(प्रतिबन्दीभाष्यम्)

अथासत्यामपि सवर्णज्ञायाम् इह कस्मान्न भवति-प्रक्लृप्यमानं पश्येति॥

(प्रतिबन्दीसमाधानेनाक्षेपनिरासभाष्यम्)

''*चुटुतुलशर्व्याव्याये न* इति वक्ष्यामि। अपर आह-''त्रिभिश्च मध्यमैर्वर्गैर्लशसैश्च व्यवाये न'' इति वक्ष्यामीति। वर्णैकदेशाश्च वर्णग्रहणेन गृह्यन्त इति योऽसौ लृकारे लकारस्तदाश्रयः प्रतिषेधो भविष्यति॥

(सिद्धान्तोपसंहारभाष्यम्)

यद्येवं, नार्थो रषाभ्यां णत्वे ऋकारग्रहणेन। वर्णैकदेशाश्च वर्णग्रहणेन गृह्यन्त इति योऽसौ ऋकारे रेफः तदाश्रयं णत्वं भविष्यति॥ तुल्यास्य॥९॥

(९ संज्ञानिषेधसूत्रं॥ परिभाषासूत्रं वा॥ १।१।आ.७)

॥ नाज्झलौ॥ १।।१०॥

(शकारसावर्ण्यनिषेधनिराकरणम्)

(१३६ आक्षेपवार्तिकम्॥१॥)

॥*॥ अज्झलोः प्रतिषेधे शकारप्रतिषेधोऽज्ल्त्वात् [तत्र सवर्णलोपे दोषः]॥*॥

(आक्षेपवार्तिकाद्यभागव्याख्याभाष्यम्)

अज्झलोः प्रतिषेधे शकारस्य शकारेण सवर्णसंज्ञायाः प्रतिषेधः प्राप्नोति॥

किं कारणम्?॥

अज्झल्त्वात्। अच्चैव हि शकारो हल्च॥

कथं तावदच्त्वम्?॥

इकारः सवर्णग्रहणेन शकारमपि गृह्णातीत्येवमच्त्वम्। हल्षु चोपदेशाद्धल्त्वम्॥

(परिशिष्टवार्तिकांशावतरणभाष्यम्)

तत्र को दोषः?॥

(१४६ आक्षेपसाधकवार्तिकद्वितीयखण्डनः॥१॥)

॥*॥ तत्र सवर्णलोपो दोषः॥*॥

(आक्षेपसाधकवार्तिकभागव्याख्याभाष्यम्)

तत्र सवर्णलोपे दोषो भवति- पर२शतानि कार्याणि-''झरो झरि सवर्णे'' इति लोपो न प्राप्नोति॥

(१४७ समाधानवार्तिकम्॥२॥)

॥*॥ सिद्धमनच्त्वात्॥*॥

(भाष्यम्)

सिद्धमेतत्॥

कथम्?॥

अनच्त्वात्॥

कथमनच्त्वम्?॥

''स्पृष्टं करणं स्पर्शानाम्''। ''ईषत्स्पृष्टमन्तस्थानाम्''। ''विवृतमूष्मणाम्'' ईषदित्येवानुवर्तते॥ '' स्वराणां च'' विवृतम्। ईषदिति निवृत्तम्॥

(१४८ समाधानान्तरवार्तिकम्॥९॥)

॥*॥वाक्यपरिसमाप्तेर्वा॥

(भाष्यम्)

वाक्यापरिसमाप्तेर्वा पुनः सिद्धमेतत्॥

किमिदं वाक्यापरिसमाप्तेरिति?॥

वर्णानामुपदेशस्तावद्। उपदेशोत्तरकालेत्संज्ञा। इत्संज्ञोत्तरकाल ''आदिरन्त्येन सहेता'' इति प्रत्याहारः। प्रत्याहारोत्तरकाला सवर्णसंज्ञा। सवर्णसंज्ञोत्तरकालम्॥ अणुदित्सवर्णस्य चाप्रत्ययः॥ इत सवर्णग्रहणम्। एतेन सर्वेण समुदितेन वाक्येनान्यत्र सवर्णानां ग्रहणं भवति। न चात्रेकारः शकारं गृह्णाति॥

(आक्षेपभाष्यम्)

यथैवं तर्हीकारः शकारं न गृह्णाति। एवमीकारमपि न गृह्णीयात्॥

तत्र को दोषः?।

कुमारी ईहते कुमारीहते ''अकः सवर्णे'' (इति) दीर्घत्वं न प्राप्नोति॥

(समाधानभाष्यम्)

नैष दोषः। यदेतद् ''अकः सवर्णे दीर्घः'' इत्यत्र प्रत्याहारग्रहणं , तत्रेकार ईकारं गृह्णाति शकारं न गृह्णाति॥

(व्याख्यान्तरभाष्यम्)

अपर आह-

अज्झलोः प्रतिषेधे शकारप्रतिषेधोऽज्झल्त्वात्। । अज्झलोः प्रतिषेधे शकारस्य शकारेण सवर्णसंज्ञायाः प्रतिषेधः प्राप्नोति॥

किं कारणम्?।

अज्झल्त्वात्। अच्चैव हि शकारो हल्च॥

कथं तावदच्त्वम्?।

इकारः सवर्णग्रहणेन शकारमपि गृह्णातीत्येवमच्त्वम्, हल्षु चोपदेशाद्धल्त्वम्॥

तत्र को दोषः?॥

तत्र सवर्णलोपे दोषः॥

तत्र सवर्णलोपे दोषो भवति। परश्शतानि कार्याणि। ''झरो झरि सवर्णे'' इति लोपो न प्राप्नोति॥

सिद्धमनच्त्वात्।

सिद्धमेतत्॥

कथम्?॥

अनच्त्वात्॥

कथमनच्त्वम्?॥

वाक्यापरिसमाप्तेर्वा, उक्ता वाक्यापरिसमाप्तिः॥

(आक्षेपभाष्यम्)

अस्मिन्पक्षे-वेत्येतदसमर्थितं भवति॥

(समाधानभाष्यम्)

एतच्च समर्थितम्॥

कथम्?।

अस्तु वा शकास्य शकारेण सवर्णसंज्ञा, मा वा भूत्॥

(आक्षेपस्मारणभाष्यम्)

ननु चोक्तम्, परश्शतानि कार्याणि ''झरो झरि सवर्णे'' इति लोपो न प्राप्नोतीति॥

(आक्षेपबाधकभाष्यम्)

मा भूल्लोपः॥

(आक्षेपसाधकभाष्यम्)

ननु च भेदो भवति-सति लोपे द्विशकारकम्, असति लोपे त्रिशकारकम्॥

(आक्षेपबाधकभाष्यम्)

नास्ति भेदः-असत्यपि लोपे द्विशकारकमेव॥

कथम्?॥

विभाषाद्विर्वचनम्

(आक्षेपसाधकभाष्यम्)

एवमपि भेदः-असति लोपे-कदाचिद्द्वशकारकम्, कदाचित् त्रिशकारकम्। सति लोपे-द्विशकारकमेव॥

(तटस्थाक्षेपभाष्यम्)

स एष कथं भेदो न?॥

(तटस्थाक्षेपनिरासभाष्यम्)

स्याद्(भेदः) यदि नित्यो लोपः स्याद्। विभाषा तु स लोपः॥

(समाधानभाष्यम्)

यथाऽभेदस्तथास्तु॥ नाज्झलौ॥१०॥

इति श्रीमद्भगवत्पतञ्जलिविरचिते महाभाष्ये प्रथमाध्यायप्रथमपादे चतुर्थमाह्निकम्॥४॥

****

अथ प्रथमाध्यायस्य प्रथमपादे पञ्चमाह्निकम्।

(अथ प्रगृह्यसंज्ञाप्रकरणम्)

(१० प्रगृह्यसंज्ञासूत्रम्॥१।१।५॥ आ १ सू.॥)

ईदूदेद्द्विवचनं प्रगृह्यम्॥१।१।११॥

(अथ तपरपाठप्रयोजनाधिकरणम्)

(आक्षेपभाष्यम्)

किमर्थमिदानीं तपराणां प्रगृह्यसंज्ञोच्यते?॥

(समाधानभाष्यम्)

''तपरस्तत्कालस्य'' इति तत्कालानां सवर्णानां ग्रहणं यथा स्यात्॥

केषाम्?॥

उदात्तानुदात्तस्वरितानाम्॥

(भाष्यम्)

अस्ति प्रयोजनमेतत्॥

किं तर्हीति?॥

(१४९ आक्षेपवार्तिकम्॥१॥)

॥*॥ प्लुतानां तु प्रगृह्यत्वाप्रसङ्गोऽतत्कालत्वात्॥*॥

(भाष्यम्)

प्लुतानां तु प्रगृह्यसंज्ञा न प्राप्नोति॥

किं कारणम्?॥

अतत्कालत्वात्। न हि प्लुतास्तत्कालाः॥

(आक्षेपबाधकभाष्यम्)

असिद्धः प्लुतः। तस्यासिद्धत्वात्तत्काला एव भवन्ति॥

(आक्षेपसाधकभाष्यम्)

सिद्धः प्लुतः स्वरसन्धिषु॥

कथं ज्ञायते-'सिद्धः प्लुतः स्वरसन्धिषु-' इति?॥

यदयं ''प्लुतः प्रकृत्या'' इति प्लुतस्य प्रकृतिभावं शास्ति॥

कथं कृत्वा ज्ञापकम्?॥

सतो हि कार्यिणः कार्येण भवितव्यम्॥

(प्रयोजनप्रश्नभाष्यम्)

किमेतस्य ज्ञापने प्रयोजनम्?॥

(लाघवप्रदर्शनभाष्यम्)

अप्लुतादप्लुत इत्येतन्न वक्तव्यं भवति॥

(आक्षेपबाधकभाष्यम्)

किमतो-यत्सिद्धः प्लुतः स्वरसन्धिषु, संज्ञाविधावसिद्धः। तस्यासिद्धत्वात्तत्काला एव भवन्ति।

(आक्षेपसाधकभाष्यम्)

संज्ञाविधौ च सिद्धः।

कथम्?।

''कार्यकालं संज्ञापरिभाषम्'' यत्र कार्यं तत्रोपस्थितं द्रष्टव्यम्, ''प्रगृह्यः प्रकृत्या'' इत्युपस्थितमिदं भवति-''ईदूदेद्विवचनं प्रगृह्यम्'' इति॥

(आक्षेपबाधकभाष्यम्)

किं पुनः प्लुतस्य प्रगृह्यसंज्ञावचने प्रयोजनम्?॥

(आक्षेपसाधकभाष्यम्)

प्रगृह्याश्रयः प्रकृतिभावो यथा स्यात्॥

(आक्षेपबाधकभाष्यम्)

मा भूदेवम्। प्लुतः प्रकृत्येत्येवं भविष्यति।

(आक्षेपसाधकभाष्यम्)

नैवं शक्यम्। उपस्थिते हि दोषः स्यात् ''अप्लुतवदुपस्थिते'' इति। अत्र पठिष्यति ह्याचार्य-*वद्वचनं प्लुतकार्यप्रतिषेधार्थम्। प्लुतप्रतिषेधे हि प्रगृह्यप्लुतप्रतिषेधप्रसङ्गोऽन्येन विहितत्वाद्* इति। तस्मात्प्लुतस्य प्रगृह्यसंज्ञैषितव्या। प्रगृह्याश्रयः प्रकृतिभावो यथा स्यात्॥

(आक्षेपबाधकरीत्यन्तरनिराकरणभाष्यम्)

यदि पुनर्दीर्घाणामतपराणां प्रगृह्यसंज्ञोच्येत, एवमप्येकार एव एकः सवर्णान्गृह्णीयाद्, ईकारोकारौ न गृह्णीयाताम्?।

किं कारणम्?।

अनण्त्वात्॥

(आक्षेपबाधकरीत्यन्तरनिराकरणभाष्यम्)

यदि पुनर्ह्रस्वानामतपराणां प्रगृह्यसंज्ञोच्यते॥ अकुर्वद्व्यत्रेति॥

(आक्षेपोपसंहारभाष्यम्)

तस्माद्दीर्घाणामेव तपराणां प्रगृह्यसंज्ञा वक्तव्या। दीर्घाणां चोच्यमाना प्लुतानां न प्राप्नोति॥

(समाधानभाष्यम्)

एवं तर्हि किं न एतेन यत्नेन-यत्-'सिद्धः प्लुतः स्वरसंधिषु' इति। असिद्धः। तस्यासिद्धत्वात्तत्काला एव भवन्तीति॥

(आक्षेपभाष्यम्)

कथं यत्तज्ज्ञापकमुक्तम्-''प्लुतप्रगृह्या अचि'' इति?॥

(समाधानभाष्यम्)

प्लुतभावी प्रकृत्येत्येवमेतद्विज्ञायते॥

(आक्षेपभाष्यम्)

कथं यत्तत्प्रयोजनमुक्तम्?॥

(समाधानभाष्यम्)

क्रियते तन्न्यास एव-''अप्लुतादप्लुते'' इति॥

(समाधानभाष्यम्)

एवमपि यत्सिद्धे प्रगृह्यकार्यं तत्प्लुतस्य न प्राप्नोति-''अणोऽप्रगृह्यस्यानुनासिकः'' इति॥

(समाधानभाष्यम्)

एवं तर्हि किं न एतेन यत्नेन-'कार्यकालं संज्ञापरिभाषम्'-इति। यथोद्देशमेव संज्ञापरिभाषम्। अत्र चासावसिद्धः। तस्यासिद्धत्वात्तत्काला एव भवन्ति॥

(इति तपरप्रयोजननिरूपणम्)

****

(अथ द्विवचनविशेषणताविचारभाष्यम्)

कथं पुनरिदं विज्ञायते-ईदादयो यद् द्विवचनम्, आहोस्विदीदायन्तं यद्द्विवचनमिति॥

(विशेषजिज्ञासाभाष्यम्)

कश्चात्र विशेषः?॥

(१५० प्रथमपदे दोषप्रदर्शकवार्तिकम्॥२॥)

॥*॥ ईदादयो द्विवचनं प्रगृह्या इति चेदन्त्यस्य विधिः॥*॥

(भाष्यम्)

ईदादयो द्विवचनं प्रगृह्या इति चेद् अन्त्यस्य प्रगृह्यसंज्ञा विधेया-पचेते इति, पचेथे इति॥

(दूषणबाधकभाष्यम्)

वचनाद्भविष्यति॥

(दूषणसाधकभाष्यम्)

अस्ति वचने प्रयोजनम्॥

किम्?।

खट्वे इति, माले इति॥

(दूषणबाधकद्वितीयपक्षाभ्युपगमभाष्यम्)

अस्तु तर्हि-ईदाद्यन्तं यद्द्विचनम्-इति।

(१५१ द्वितीयपक्षे दूषणवार्तिकम्॥३॥)

॥*॥ ईदाद्यन्तमिति चेदेकस्य विधिः॥*॥

(भाष्यम्)

ईदाद्यन्तं द्विवचनमिति चेदेकस्य प्रगृह्यसंज्ञा विधेया-खट्वे इति, माले इति॥

(१५२ द्वितीयपक्षे समाधानवार्तिकम्॥४॥)

॥*॥ न वाद्यन्तवत्त्वात्॥*॥

(भाष्यम्)

न वा एष दोषः॥

किं कारणम्?॥

आद्यन्तत्त्वात्। आद्यन्तवदेकस्मिन्कार्यं भवतीत्येवमेकस्यापि भविष्यति॥

(पक्षान्तराभ्युपगमभाष्यम्)

अथवा एवं वक्ष्यामि-ईदाद्यन्तं यद्द्विचनान्तम्-इति॥

(१५३ आक्षेपवार्तिकम्॥५॥)

॥*॥ ईदाद्यन्तं द्विवचनान्तमिति चेल्लुकि प्रतिषेधः॥*॥

(भाष्यम्)

ईदाद्यन्तं द्विवचनान्तमिति चेल्लुकि प्रतिषेधो वक्तव्यः। कुमार्योरगारं कुमार्यगारम्। वध्वोरगारं वध्वगारम्। एतद्धीदाद्यन्तं श्रूयते, द्विवचनान्तं च भवति प्रत्ययलक्षणेन॥

(१५४ समाधानवार्तिकम्॥६॥)

॥*॥ सप्तम्यामर्थग्रहणं ज्ञापकं प्रत्ययलक्षणप्रतिषेधस्य॥*॥

(भाष्यम्)

यदयम् 'ईदूतौ च सप्तम्यर्थे' इत्यर्थ ग्रहणं करोति, तज्ज्ञापयत्याचार्यो न प्रगृह्यसंज्ञायां प्रत्ययलक्षणं भवतीति॥

(आक्षेपभाष्यम्)

तत्तर्हि ज्ञापकार्थमर्थग्रहणं कर्तव्यम्॥ ईदादिभिर्द्विवचनं विशेषयिष्याम; ईदादिविशिष्टेन च द्विवचनेन तदन्तविधिर्भविष्यति- ईदाद्यन्तं यद् द्विवचनं तदन्तमीदाद्यन्तम्-इति॥

(आक्षेपभाष्यम्)

एवमप्यशुक्ले वस्त्रे शुक्ले समधेतां शुक्ल्यास्तां वस्त्रे इत्यत्र प्राप्नोति। अत्र हीदादि च द्विवचनं तदन्तं च भवति प्रत्ययलक्षणेन॥

(समाधानभाष्यम्)

अत्राप्यकृते शीभावे लुग्भविष्यति॥

(आक्षेपसाधकभाष्यम्)

इदमिह संप्रधार्यं लुक् क्रियतां, शीभाव इति॥

किमत्र कर्तव्यम्?।

परत्वाच्छीभावः॥

(समाधानसाधकभाष्यम्)

नित्यो लुक्। कृते शीभावे प्राप्नोत्यकृतेऽपि प्राप्नोति॥

(आक्षेपसाधकभाष्यम्)

अनित्यो लुग्। अन्यस्याकृते शीभावे प्राप्नोत्यन्यस्य कृते। शब्दान्तरस्य च प्राप्नुवन्विधिरनित्यो भवति। शीभावोऽप्यनित्यः। न हि कृते लुकि प्राप्नोति। ऽभयोरनित्ययोः परत्वाच्छीभावः। शीभावे कृते लुक्॥

(आक्षेपदाढ्र्यभाष्यम्)

अथापि कथंचिन्नित्यो लुक्स्यात्। एवमपि दोषः,॥ वक्ष्यत्येत्, *पदसंज्ञायामन्तग्रहणमन्यत्र संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिप्रतिषेधार्थम्* इति। इदं चापि प्रत्ययग्रहणम्। अयं चापि संज्ञाविधिः॥ अवश्यं खल्वस्मिन्नपि पक्षे आद्यन्तवद्भाव एषितव्यः॥ तस्मादस्तु स एव मध्यमः पक्षः॥ ईददूदेत्॥११॥

(११ प्रगृह्यसंज्ञासूत्रम्॥१॥१॥४॥ आ. २॥)

अदसो मात्॥१।१।१॥१२॥

(मूत्वमीत्वयोरसिद्धत्वनिराकरणाधिकरणम्)

(१५९ आक्षेपवार्तिकम्॥१॥)

॥*॥ मात्प्रगृह्यसंज्ञायां तस्यासिद्धत्वादयावेकादेशप्रतिषेधः॥*॥

(भाष्यम्)

मात्प्रगृह्यसंज्ञायां तस्य ईत्वस्य ऊत्वस्य चासिद्धत्वादयावेकादेशाः प्राप्नुवन्ति, तेषां प्रतिषेधो वक्तव्यः। अमी अत्र, अमी आसते, अमू आसाते॥

(आक्षेपबाधकभाष्यम्)

ननु च प्रगृह्यसंज्ञावचनसामर्थ्यादयो न भविष्यन्ति॥

(१५५ आक्षेपवार्तिकद्वितीयखण्डनम्॥१॥)

॥*॥ वचनार्थो हि सिद्धेः॥*॥

(भाष्यम्)

नेदं वचनाल्लभ्यम्। अस्ति ह्यन्यदेतस्य वचने प्रयोजनम्॥

किम्?॥

यत्सिद्धे प्रगृह्यसंज्ञाकार्यं तदर्थमेतत्स्यात्-''अणोऽप्रगृह्यस्यानुनासिकः ''अणोऽप्रगृह्यस्यानुनासिकः'' इति॥

(आक्षेपबाधकभाष्यम्)

नैकं प्रयोजनं योगारम्भं प्रयोजयति। यद्येतावत्प्रयोजनं स्यात्तत्रैवायं ब्रूयाद्-''अणोऽप्रगृह्यस्यानुनासिकोऽदसो न'' इति॥

(१५६ समाधानवार्तिकम्॥२॥)

॥*॥विप्रतिषेधाद्वा (प्रगृह्यसंज्ञा)॥*॥

(भाष्यम्)

अथवा प्रगृह्यसंज्ञा क्रियताम् अयादयो वेति। प्रगृह्यसंज्ञा भविष्यति विप्रतिषेधेनेति॥

(समाधानबाधकभाष्यम्)

नैष युक्तो विप्रतिषेधः। ''विप्रतिषेधे परम्'' इत्युच्यते॥ पूर्वा च प्रगृह्यसंज्ञा, परेऽयादयः॥

(समाधानसाधकभाष्यम्)

परा प्रगृह्यसंज्ञा करिष्यते॥

(समाधानबाधकभाष्यम्)

सूत्रविपर्यासः कृतो भवति॥

(समाधानसाधकभाष्यम्)

एवं तर्हि परैव प्रगृह्यसंज्ञा॥

कथम्?॥

''कार्यकालं संज्ञापरिभाषम्'' यत्र कार्यं तत्रोपस्थितं द्रष्टव्यम्। ''प्रगृह्यः प्रकृत्या'' इत्युपस्थितमिदं भवति ''अदसो मात्'' इति।

(समाधानबाधकभाष्यम्)

एवमप्ययुक्तो विप्रतिषेधः॥

कथम्?॥

द्विकार्ययोगो हि विप्रतिषेधः। न चात्रैको द्विकार्ययुक्तः। एचामयादयः, ईदूतोः प्रगृह्यसंज्ञा॥

(समाधानसाधकभाष्यम्)

नावश्यं द्विकार्ययोग एव विप्रतिषेधः॥

किं तर्हि?॥

असंभवोऽपि। स चास्त्यत्रासंभवः॥

कोऽसावत्रसंभव?॥

प्रगृह्यसंज्ञाभिनिर्वर्तमाना अयादीन् बाधते, अयादयोऽभिनिर्वर्तमानाः प्रगृह्यसंज्ञाया निमित्तं विध्नन्तीत्येषोऽसंभवः। सत्यसंभवे युक्तो विप्रतिषेधः॥

(समाधानबाधकभाष्यम्)

एवमप्ययुक्तो विप्रतिषेधः। सतोर्हि विप्रतिषेधो भवति। न चात्रेत्वोत्वे स्तः। नापि मकारः॥ उभयमप्यसिद्धम्॥

(१५९ समाधानसाधकवार्तिकप्रथमखण्डनम्॥३॥)

॥*॥ आश्रयात्सिद्धत्वं यथा रोरुत्वे॥*॥

(भाष्यम्)

आश्रयात्सिद्धत्वं भविष्यति। तद्यथा रुरुत्वे आश्रयात्सिद्धो भवति॥

(समाधानबाधकाक्षेपभाष्यम्)

किं पुनः कारणं रुरुत्वे आश्रयात्सिद्धो भवति, न पुनर्यत्रैव रुः सिद्धः, तत्रैवोत्वमप्युच्येत?॥

(भाष्यम्)

नैवं शक्यम्॥

(१५७ समाधानसाधकवार्तिकसाधकखण्डम्॥३॥)

॥*॥ असिद्धे ह्युत्वे आद्गुणाप्रसिद्धिः॥

(भाष्यम्)

असिद्धे ह्युत्वे आद्गुणस्याप्रसिद्धिः स्यात्- वृक्षोत्र प्लक्षोऽत्र। तस्मात्तत्राश्रयात्सिद्धत्वमेषितव्यम्। यथा तत्राश्रयात्सिद्धत्वं भवति। एवमिहाप्याश्रयात्सिद्धत्वं भविष्यति॥

(१५८ समाधानान्तरवार्तिकम्॥४॥)

[॥*॥ वचनसामर्थ्याद्वा॥*॥]

(भाष्यम्)

अथवा प्रगृह्यसंज्ञावचनसामर्थ्यादयादयो न भविष्यन्ति॥

(१५९ समाधानान्तरवार्तिकम्॥५॥)

[॥*॥ योगाविभागाद्वा॥*॥]

(भाष्यम्)

अथ वा योगविभागः करिष्यते। ''अदसः'' अदस ईदादयः प्रगृह्यसंज्ञा भवन्तीति। ततो ''मात्'' माच्च परे ईदादयः प्रगृह्यसंज्ञा भवन्तीति। अदस इत्येव।

किमर्थो योगविभागः?॥

एको यत्तत्सिद्धे प्रगृह्यकार्यं तदर्थः॥ अपरो यदसिद्धे॥

(आक्षेपभाष्यम्)

इहापि तर्हि प्राप्नोति-अमुया अमुयोरिति॥

किंच स्यात् यद्यत्र प्रगृह्यसंज्ञा स्यात्?॥

प्रगृह्याश्रयः प्रकृतिभावः प्रसज्येत॥

(आक्षेपनिरासभाष्यम्)

नैष दोषः। पदान्तप्रकरणे प्रकृतिभावः। न चैष पदान्तः॥

(आक्षेपभाष्यम्)

एवमप्यमुकेऽत्र, अत्रापि प्राप्नोति॥

(आक्षेपबाधकभाष्यम्)

द्विवचनमिति वर्तते॥

(आक्षेपसाधकभाष्यम्)

यदि द्विवचनमिति वर्तते अमी अत्र, अत्र न प्राप्नोति॥

(आक्षेपबाधकभाष्यम्)

एवं तर्हि एदन्तमिति निवृत्तम्॥

(१३० समाधानान्तरवार्तिकम्॥६॥)

॥*॥ मार्थादीदाद्यर्थानां वा॥*॥

(भाष्यम्)

अथवाऽऽहायम्-''अदसो मात्'' इति। न च ईत्वोत्वे स्तः। नापि मकारः। तत एवं विज्ञास्यामः- 'मार्थादीदाद्यर्थानाम्'-इति॥

(१६१ समाधानान्तरवार्तिकम्॥७॥)

॥*॥ उक्तं वा ॥*॥

(भाष्यम्)

किमुक्तम्?॥

* अदस ईत्वोत्वे स्वरे बहिष्पदलक्षणे* (सिद्धे वक्तव्ये)* प्रगृह्यसंज्ञायां च* इति॥

(अनिष्टापत्तिनिवारणाधिकरणम्)

(१६२ आक्षेपवार्तिकम्॥८॥)

॥*॥ तत्र सकि दोषः॥*॥

(भाष्यम्)

तत्र सककारे दोषो भवति-अमुकेऽत्र॥

(१६३ समाधानवार्तिकम्॥९॥)

॥*॥ न वा ग्रहणविशेषणत्वात्॥*॥

(भाष्यम्)

न वा एष दोषः॥

किं कारणम्?॥

ग्रहणविशेषणत्वात्। न माद्ग्रहणेन ईदाद्यन्तं विशेष्यते॥

किं तर्हि?॥

ईदादयो विशेष्यन्ते-मात्परे ये ईदादय-इति॥ अदसो मात्॥१२॥

(१२ प्रगृह्यसंज्ञासूत्रम्॥१।१।५ आ. ३॥)

शे॥१।१।१३॥

(अनिष्टापत्तिनिराकरणाधिकरणम्)

(आक्षेपभाष्यम्)

इह कस्मान्न भवति- काशे, कुशे, वंशे, इति?॥

(१३४ समाधानवार्तिकम्॥१॥)

॥*॥ शेऽर्थवद्ग्रहणात्॥*॥

(भाष्यम्)

अर्थवतः शेशब्दस्य ग्रहणम्। न चैषोऽर्थवान्॥

(आक्षेपभाष्यम्)

एवमपि हरिशे, बभ्रुशे, इत्यत्रापि प्राप्नोति॥

(समाधानभाष्यम्)

एवं तर्हि 'लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव' इत्येवं न भविष्यति॥

(पूर्वोक्तसमाधानाभ्युपगमभाष्यम्)

अथ वा पुनरस्तु-'अर्थवद्ग्रहणे नानर्थकस्य' इति॥

कथं तर्हि- हरिशे, बभ्रुशे, इति?॥

एकोऽत्र विभक्त्यर्थेनार्थवान्, अपरस्तद्धितार्थेन। समुदायोऽनर्थकः॥ शे॥१३॥

(१३ प्रगृह्यसंज्ञासूत्रम्॥ १।१।५ आ. ४॥)

निपात एकाजनाङ् ॥१।१।१४॥

(पदकृत्याधिकरणम्)

(आक्षेपभाष्यम्)

निपात इति किमर्थम्?॥

(समाधानभाष्यम्)

चकारात्र जहारात्र॥

(आक्षेपभाष्यम्)

एकाजिति किमर्थम्?॥

(आक्षेपबाधकभाष्यम्)

प्रेदं ब्रह्म। प्रेदं क्षत्रम्॥

(आक्षेपबाधानुपपत्तिभाष्यम्)

एकाजित्यप्युच्यमानेऽत्रापि प्राप्नोति। एषोऽपि ह्येकाच्॥

(आक्षेपबाधोपपत्तिभाष्यम्)

एकाजिति नायं बहुव्रीहिः-एकोऽज् यस्मिन् सोऽयमेकाच् एकाजिति॥

किं तर्हि?

तत्पुरुषोऽयं समानाधिकरणः-एक अच् एकाच् एकाजिति॥

(आक्षेपभाष्यम्)

यदि तत्पुरुषोऽयं समानाधिकरणो, नार्थ एकग्रहणेन॥

(प्रत्याक्षेपभाष्यम्)

इह कस्मान्न भवति-प्रेदं ब्रह्म। प्रेदं क्षत्रम्।

(प्रत्याक्षेपबाधकभाष्यम्)

अजेव यो निपात इत्येवं विज्ञायते॥

(आक्षेपभाष्यम्)

किं वक्तव्यमेतत्?।

(समाधानभाष्यम्)

न हि॥

(आक्षेपभाष्यम्)

कथमनुच्यमानं गंस्यते?॥

(समाधानभाष्यम्)

अज्ग्रहणसामर्थ्यात् यदि हि अच्चान्यच्च तत्र स्याद्, अज्ग्रहणमनर्थकं स्यात्॥

(सामर्थ्यानुपपत्तिभाष्यम्)

अस्ति ह्यन्यदज्ग्रहणस्य प्रयोजनम्॥

किम्?॥

अजन्तस्य यथा स्यात्। हलन्तस्य मा भूत्॥

(सामर्थ्योपपत्तिभाष्यम्)

नैव दोषो न प्रयोजनम्॥

(सामर्थ्यानुपपत्तिभाष्यम्)

एवमपि कुत एतत्-द्वयोः परिभाषयोः सावकाशयोः समवस्थितयोः ''आद्यन्तवदेकस्मिन्'' ''येन विधिस्तदन्तस्य'' इति च-इयमिह परिभाषा भविष्यति-'आद्यन्तवदेकस्मिन्'' इति॥ इयं च न भविष्यति-''येन विधिस्तदन्तस्य'' इति?॥

(समार्थ्यानुपपत्तिनिराकरणभाष्यम्)

आचार्यप्रवृत्तिर्ज्ञापयति-इयमिह परिभाषा भवति-''आद्यन्तवदेकस्मिन्'' इति, इयं च न भवति। ''येन विधिस्तदन्तस्य'' इति। यदयम्-'अनाङ्' इति प्रतिषेधं शास्ति॥

(समाधानभाष्यम्)

एवं तर्हि-सिद्धे सति यदज्ग्रहणे क्रियमाणे एकग्रहणं करोति, तज्ज्ञापयत्याचार्यः-'अन्यत्र वर्णग्रहणं जातिग्रहणं भवति' इति॥

किमेतस्य ज्ञापने प्रयोजनम्?॥

दम्भेर्हल्ग्रहणस्य जातिवाचकत्वात् सिद्धम् इति यदुक्तं, तदुपपन्नं भवति॥

(आक्षेपभाष्यम्)

अनाङिति किमर्थम्?॥

(समाधानभाष्यम्)

आ ऽदकान्ताद् ओदकान्तात्॥

(आक्षेपभाष्यम्)

इह कस्मान्न भवति- आ एवं नु मन्यसे, आ एवं किल तदिति?॥

(समाधानभाष्यम्)

सानुबन्धकस्येदमाकारस्य ग्रहणम्, अननुबन्धकश्चात्राऽऽकारः॥

(आक्षेपभाष्यम्)

क्व पुनरयं सानुबन्धकः क्व निरनुबन्धकः?॥

(समाधानभाष्यम्)

'ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः। एतमातं ङितं विद्याद् वाक्यस्मरणयोरङित्॥१॥ निपात॥१४॥

(१४संज्ञासूत्रम्॥१॥१॥५ आ.५)

ओत्॥१।१।१४॥

(सूत्रवैयर्थ्यनिराकरणाधिकरणम्)

(आक्षेपभाष्यम्)

किमुदाहरणम्?॥

(समाधानभाष्यम्)

आहो इति, उताहो इति॥

(समाधानबाधकभाष्यम्)

नैतदस्ति प्रयोजनम्। निपातसमाहारोऽयम्। आह उ आहो इति। उत आह उ उताहो इति। तत्र ''निपात एकाजनाङ्'' इत्येव सिद्धम्॥

(समाधानसाधकभाष्यम्)

एवं तर्ह्येकनिपाता इमे॥

(समाधानान्तरभाष्यम्)

अथवा प्रतिषिद्धार्थोऽयमारम्भः। ओ षु यातं मरुतः। ओ षु यातं बृहती च शक्वरी। ओ चित्सखायं सख्या ववृत्याम् (ऋ. १०।१०॥१॥)

(च्च्यन्ते सूत्रप्रवृत्तिनिराकरणाधिकरणम्)

(१६५ आक्षेपवार्तिकम्॥१॥)

॥*॥ ओतश्चिप्रतिषेधः॥

(भाष्यम्)

ओदन्तो निपात इत्यत्र च्व्यन्तस्य प्रतिषेधो वक्तव्यः॥ अनदः अदः अभवत्=अदोऽभवत्, अतिरःतिरः अभवत्=तिरोऽभवत्॥

(आक्षेपबाधकभाष्यम्)

न वक्तव्यः। 'लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्य' इत्येवं न भविष्यति॥

(आक्षेपसाधकभाष्यम्)

एवमपि-अगौः गौः समपद्यत गोऽभवद्। अत्र प्राप्नोति॥

(समाधानभाष्यम्)

एवं तर्हि ''गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्ययः'' इति। तद्यथा- 'गौरनुबन्ध्योऽजोऽग्नीषोमीयः' इति न वाहीकोऽनुबध्यते।

(समाधानबाधकभाष्यम्)

कथं तर्हि वाहीके वृद्ध्यात्वे भवतः- गौस्तिष्ठति गामानयेति?॥

(समाधानसाधकभाष्यम्)

अर्थाश्रय एतदेवं भवति। यद्धि शब्दाश्रयम्, शब्दमात्रे तद्भवति। शब्दाश्रये च वृद्ध्यात्वे॥ ओत्१५।

(१५ प्रगृह्यसंज्ञादेशिसूत्रम् ॥१।१।५ आ०६)

ओ३म् ॐ॥१।१।१७॥

(अनिष्टापत्तिवारणाधिकरणम्)

(आक्षेपभाष्यम्)

इह कस्मान्न भवति-आहो इति, उताहो इति?॥

(आक्षेपबाधकभाष्यम्)

ओ३म् इत्युच्यते। न चात्रोञं पश्यामः।

(आक्षेपसाधकभाष्यम्)

ओमोऽयमन्येम सहैकादेश ओम्ग्रणेन गृह्यते॥

(आक्षेपबाधकभाष्यम्)

आचार्यप्रवृत्तिर्ज्ञापयति-'नोञ एकादेश ओञ्ग्रहणेन गृह्यते' इति। यदयम् ''ओद्'' इत्योदन्तस्य निपातस्य प्रगृह्यसंज्ञां शास्ति।

(आक्षेपसाधकभाष्यम्)

नैतदस्ति ज्ञापकम्। उक्तमेतत्-''प्रतिषिद्धार्थोऽयमारम्भः' इति॥ दोषः खल्वपि स्याद्, यद्युञ्रेकादेश ओञ्ग्रहणेन गृह्येत। जानु ओ अस्य रुजति, जानू अस्य रुजति, जान्वस्य रुजति,'' मय ञो वो वा'' इति वत्वं न स्यात्॥

(समाधानभाष्यम्)

एवं तर्ह्येकनिपाता इमे॥

अथ वा द्वावुकाराविमौ। एकोऽननुबन्धकः। अपरः सानुबन्धकः। तयोऽननुबन्धकस्तस्यैष एकादेशः।

(योगविभागाधिकरणम्)

(१६६[१] सिद्धान्तआक्षेपवार्तिकम्॥२॥)

॥*॥ उञ इति योगविभागः॥*॥

(भाष्यम्)

उञ इति योगविभागः कर्तव्यः। ''उञः'' शाकल्यस्याचार्यस्य मतेन प्रगृह्यसंज्ञा भवति। उइति विति॥ ततः ''ऊँ'' उञ ऊँ इत्ययमादेशो भवति शाकल्यस्याचार्यस्य मतेन दीर्घोऽनुनासिकः प्रगृह्यसंज्ञकश्च। ऊँ इति॥

(योगविभागवैयर्थ्यभाष्यम्)

किमर्थो योगविभागः?॥

(१६६[२] आक्षेपप्रयोजनवार्तिकयखण्डनम्॥१॥)

॥*॥ ऊँ वा शाकल्यस्य॥*॥

(भाष्यम्)

शाकल्यस्याचार्यस्य मतेन ऊँ विभाषा यथा स्यात्। ऊँ इति, उ इति। अन्येषामाचार्याणां मतेन-विति॥ उञ ऊँ ॥१७॥

(१३ प्रगृह्यसंज्ञासूत्रम्॥१।१।५॥ आ. ७॥)

ईदूतौ च सप्तमर्थे॥१।१।१८॥

(अर्थग्रहणप्रयोजननिरूपणाधिकरणम्)

(१६० आक्षेपवार्तिकम्॥१॥)

॥*॥ 'ईदूतौ सप्तमीत्येव'॥*॥

(भाष्यम्)

ईदूतौ सप्तमीत्येव सिद्धम्, नार्थोऽर्थग्रहणेन॥

(१३८ समाधानवार्तिकम्॥२॥)

॥*॥ लुप्तेऽर्थग्रहणाद्भवेत्॥

(भाष्यम्)

लुप्तायां सप्तम्यां प्रगृह्यसंज्ञा न प्राप्नोति॥

क्व?॥

सोमो गौरी अधिश्रितः(ऋ.९।१२।३)। इष्यते चात्रापि स्यादिति। तच्चान्तरेण यत्नं न सिध्यतीत्येवमर्थमर्थग्रहणात्॥

(समाधानबाधकभाष्यम्)

नात्र सप्तमी लुप्यते॥

किं तर्हि?॥

पूर्वसवर्णोऽत्र भवति।

(१६९ समाधानसाधकवार्तिकम्॥३॥)

॥*॥ 'पूर्वस्य चेत् सवर्णोऽसावाडाम्भावः प्रसज्यते'॥16.*॥

(भाष्यम्)

यदि पूर्वसवर्णः, आट् आम्भावश्च प्राप्नोति॥

(समाधानबाधकभाष्यम्)

एवं तर्हि आहायम्-ईदूतौ सप्तमीति। न चास्ति सप्तमी ईदूतौ, तत्र वचनाद्भविष्यति॥

(१७० समाधानवार्तिकम् ॥४॥)

॥*॥ 'वचनाद्यत्र दीर्घत्वम्॥*॥

नेदं वचनाल्लभ्यम्। अस्ति ह्यन्यदेतस्य वचने प्रयोजनम्॥

किम्? यत्र सप्तम्या दीर्घत्वमुच्यते-''दृतिं न शुष्कं सरसी शयानम्'' (ऋ.९।१२।३॥)इति॥

(१७१ समाधानबाधकवार्तिकम्॥५॥)

॥*॥ 'तत्रापि सरसी यदि'॥*॥

(भाष्यम्)

तत्रापि सिद्धम्।

कथम्?॥

यदि सरसीशब्दस्य प्रवृत्तिस्ति। अस्ति च लोके सरसीशब्दस्य प्रवृत्तिः।

कथम्?॥

दक्षिणापथे हि महान्ति सरांसि सरस्य इत्युच्यन्ते॥

(१७२ समाधानवार्तिकम्)

॥*॥ज्ञापकं स्यात् तदन्तत्वे॥*॥

(भाष्यम्)

एवं तर्हि ज्ञापयत्याधार्यो न प्रगृह्यसंज्ञायां प्रत्ययलक्षणं भवति इति॥

किमेतस्य ज्ञापने प्रयोजनम्?

कुमार्योरगाकुमार्यगारम्। वध्वोरगारवध्वगारम्। प्रत्ययग्रहणेन प्रगृह्यसंज्ञा न भवति।

(१७३ समाधानवार्तिकम्॥७॥)

॥*॥ मा वा पूर्वपदस्य भूत्' ॥*॥

(भाष्यम्)

अथवा पूर्वपदस्य मा भूदित्येवमर्थमर्थग्रहणम्। वाप्यामश्वो वाप्यश्वः, नद्यामातिर्नद्यातिः॥

(आक्षेपभाष्यम्)

अथ क्रियमाणेऽप्यर्थग्रहणे कस्मादेवात्र न भवति?॥

(समाधानभाष्यम्)

जहत्स्वार्था वृत्तिरति॥

(आक्षेपभाष्यम्)

अथाजहत्स्वार्थायां वृत्तौ दोष एव॥

(समाधानभाष्यम्)

अजहत्स्वार्थायां च न दोषः। समुदायार्थोऽभिधीयते॥

'ईदूतौ सप्तमीत्येवलुप्तेऽर्थग्रहणाद्भवेत्। पूर्वस्य चेत् सवर्णोऽसावाडाम्भावः प्रसज्येत'॥ 'वचनाद्यत्र दीर्घत्वं तत्रापि सरसी यदि।' ज्ञापकं स्यात् तदन्तत्वे मा वा पूर्वपदस्य भूत्'॥२॥ ईदूतौ च सप्तम्यर्थे॥१८॥

(इति प्रगृह्यसंज्ञाप्रकरणम्)

(१७ घुसंज्ञासूत्रम्॥१।१।५॥ आ. ८॥)

दा धा घ्वदाप्॥१।१।१९॥

(इष्टानुपत्तिनिराकरणाधिकरणम्)

(१७५ आक्षेपवार्तिकम्॥)

॥*॥ घुसंज्ञायां प्रकृतिग्रहणं शिदर्थम्॥*॥

(भाष्यम्)

घुसंज्ञाया प्रकृत्तिग्रहणं कर्त्तव्यम्। दाघाप्रकृतयो घुसंज्ञा भवन्तीति वक्तव्यम्। किं प्रयोजनम्?

आत्वभूतानामियं संज्ञा क्रियते। सा आत्वभूतानामेव स्यात्, अनात्वभूतानां न स्यात् । ननु च भूयिष्ठानि घुसंज्ञाकार्याणि आर्धधातुके, तत्र चैत आत्वभूता दृश्यन्ते॥

''शिदर्थम्'' शिदर्थं प्रकृतिग्रहणं कर्त्तव्यम्। शित्यात्वं प्रतिषिध्यते तदर्थम्। प्रणिदयते। प्रणिद्यति। प्रणिधयतीति।

(भाष्यम्)

भारद्वाजीयाः पठन्ति-

(भारद्वाजीयोक्तमाक्षेपवार्तिकम्)

॥*॥ घुसंज्ञायां प्रकृतिग्रहणं शिद्विकृतार्थम्॥*॥

(भाष्यम्)

घुसंज्ञायां प्रकृतिग्रहणं क्रियते।

किं प्रयोजनम्?।

शिदर्थं विकृतार्थं च। शित्युदाहृतम्॥ विकृतार्थं खल्वपि- प्रणिदाता प्रणिधाता।

किं पुनः कारणं न सिध्यति?।

'लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव' इति प्रतिपदं ये आत्वभूतास्तेषामेव स्याद्, लक्षणेन ये आत्वभूतास्तेषां न स्यात्।

(प्रत्याक्षेपभाष्यम्)

अथ क्रियमाणेऽपि प्रकृतिग्रहणे कथमिदं विज्ञायते- दाधाः प्रकृतय इति, आहोस्विद्दाधां प्रकृतय इति?॥ किं चातः?॥

यदि विज्ञायते-दाधाः प्रकृतय इति, स एव दोषः-आत्वभूतानामेव स्याद् अनात्वभूतानां न स्यात्। अथ विज्ञायते-दाधां प्रकृतय इति, अनात्वभूतानामेव स्यादात्वभूतानां न स्यात्।

(प्रत्याक्षेपसमाधानभाष्यम्)

एवं तर्हि, नैवं विज्ञायते-दाधाः प्रकृतय इति नापि दाधां प्रकृतय इति॥

कथं तर्हि?

दाधा घुसंज्ञा भवन्ति प्रकृतयश्चैषामिति॥

(आक्षेपोपसंहारभाष्यम्)

तत्तर्हि प्रकृतिग्रहणं कर्तव्यम्?।

(समाधानभाष्यम्)

कर्तव्यम्। इदं प्रकृतमर्थग्रहणमनुवर्तते॥

क्व प्रकृतम्?।

''ईदूतौ च सप्तम्यर्थे'' इति । ततो वक्ष्यामि ''दाधा ् ''अर्थ'' इति॥

(समाधानबाधकभाष्यम्)

नैवं शक्यम्। ददातिना समानार्थान रातिरासतिदासतिमंहतिप्रीणातिप्रभृतीनाहुः। तेषामपि घुसंज्ञा प्राप्नोति। तस्मान्नैवं शक्यम्। न चेदेवं, प्रकृतिग्रहणं कर्तव्यमेव॥

(समाधानसाधकभाष्यम्)

न कर्तव्यम्। शिदर्थेन तावन्नार्थः प्रकृतिग्रहणेन। अवश्यं तत्र मार्थं प्रकृतिग्रहणं कर्तव्यम्, प्रणिमयते प्रण्यमयतेत्येवमर्थम्। तत् पुरस्तादपक्रक्ष्यते घुप्रकृतौ माप्रकृतौ चेति॥

(आक्षेपभाष्यम्)

यदि प्रकृतिग्रहणं क्रियते। प्रनिमिनोति प्रनिमीनाति। अत्रापि प्राप्नोति।

(प्रतिबन्दीभाष्यम्)

अथाक्रियमाणेऽपि प्रकृतिग्रहणे इह कस्मान्न भवति-प्रनिमाता प्रनिमातुं प्रनिमातव्यमिति॥

(प्रतिबन्दीसमाधानभाष्यम्)

आकारान्तस्य ङितो ग्रहणं विज्ञायते॥

(समाधानभाष्यम्)

यथैव तर्हि अक्रियमाणे प्रकृतिग्रहणे आकारान्तस्य ङितो ग्रहणं विज्ञास्यते॥

(भारद्वाजीयप्रयोजननिराकरणभाष्यम्)

विकृतार्थेन चापि नार्थः। दोष एवैतस्याः परिभाषाया ''लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव'' इति-''गामादाग्रहणेष्वविशेषः'' इति॥

(यदागमन्यायधिकरणम्)

(१७५ आक्षेपवार्तिकम्॥२॥)

॥*॥ समानशब्दप्रतिषेधः॥*॥

(भाष्यम्)

समानशब्दानां प्रतिषेधो वक्तव्यः। प्रनिदारयति प्रनिधारयति। दाधा घुसंज्ञा भवन्तीति घुसंज्ञा प्राप्नोति॥

(१७६ समाधानवार्तिकम्॥३॥)

॥*॥ समानशब्दाप्रतिषेधोऽर्थवद्ग्रहणात्॥*॥

(भाष्यम्)

समानशब्दानामप्रतिषेधः, अनर्थकः प्रतिषेधोऽप्रतिषेधः॥

घुसंज्ञा कस्मान्न भवति?॥

अर्थवद्ग्रहणात्, अर्थवतोर्दाधोर्ग्रहणात्। न चैतावर्थवन्तौ।

(१७७ समाधानहेत्वन्तरवार्तिकम् ॥४॥)

॥*॥ अनुपसर्गाद्वा॥*॥

(भाष्यम्)

अथवा यत्क्रियायुक्ताः प्रादयस्तं प्रति गत्युपसर्गसंज्ञा भवन्ति। न चैतौ दाधौ प्रति क्रियायोगः।

(आक्षेपभाष्यम्)

यद्येवम् इहापि तर्हि न प्राप्नोति-प्रणिदापयति प्रणिधापयतीति। अत्रापि नैतौ दाधावर्थवन्तौ, नाप्येतौ दाधौ प्रति क्रियायोगः॥

(१७८ समाधानवार्तिकम्॥५॥)

॥*॥ न वार्थवतो ह्यागमस्तद्गुणीभूतस्तद्ग्रहणेन गृह्यते यथाऽन्यत्र॥*॥

(भाष्यम्)

न वा एष दोषः ।

किं कारणम्?॥

अर्थवत आगमस्तद्गुणीभूतोऽर्थवद्ग्रहणेन गृह्यते। यथान्यत्र। तद्यथा-अन्यत्रापि अर्थवत आगमोऽर्थवद्ग्रहणेन गृह्यते॥

क्वान्यत्र?।

लविता चिकीर्षितेति।

(आदेशवादिन आगमवादिनं प्रत्याक्षेपभाष्यम्)

युक्तं पुनर्यन्नित्येषु नाम शब्देष्वागमशासनं स्यात्। न। नित्येषु नाम शब्देषु कूटस्थैरविचालिभिवर्णैर्भवितव्यमनपायोपजनविकारिभिः। आगमश्च नामापूर्वः शब्दोपजनः?॥

(आगमवादिन आदेशवादिनं प्रत्याक्षेपभाष्यम्)

अथ युक्तं यन्नित्येषु शब्देष्वादेशाः स्युः॥

(आदेशवादिनः समाधानभाष्यम्)

बाढं युक्तम्। शब्दान्तरैरिह भवितव्यम्। तत्र शब्दान्तरे शब्दान्तरस्य प्रतिपत्तिर्युक्ता।

(सिद्धान्तोपसंहारभाष्यम्)

आदेशास्तर्हीमे भविष्यन्ति अनागमकानां सागमकाः।

तत् कथम्?।

'सर्वे सर्वपदादेशा दाक्षीपुत्रस्य पाणिनेः।

एकदेशविकारे हि नित्यत्वं नोपपद्यते'॥

(अनिष्टापत्तिनिराकरणाधिकरणम्)

(१७९ आक्षेपवार्तिकम्॥६॥)

॥*॥ दीङः प्रतिषेधः स्थाघ्वोरित्त्वे॥*॥

(भाष्यम्)

दीङः प्रतिषेधः स्थाघ्वोरित्त्वे वक्तव्यः॥ उपादास्तास्य स्वरः शिक्षकस्येति।

''मीनातिमिनोति'' इत्यात्त्वे कृते ''स्थाध्वोरिच्च'' इतीत्त्वं प्राप्नोति॥

(प्रत्याक्षेपभाष्यम्)

कुतः पुनरयं दोषो जायते-किं प्रकृतिग्रहणाद्, आहोस्विद्रूपग्रहणात्?॥

(प्रत्याक्षेपसमाधानभाष्यम्)

रुपग्रहणादित्याह॥

(प्रकृतिग्रहणदोषभाष्यम्)

इह खलु प्रकृतिग्रहणाद्दोषो जायते। उपदिदीषते। ''सनि मीमाघुरभलभ'' इति॥

(दोषनिराकरणभाष्यम्)

नैष दोषः। दाप्रकृतिरित्युच्यते। न चेयं दाप्रकृतिः। आकारान्तानामेजन्ताः प्रकृतयः, एजन्तानामपीकारान्ताः। न च प्रकृतेः प्रकृतिः प्रकृतिग्रहणेन गृह्यते॥

(आक्षेपोपंसहारभाष्यम्)

स तर्हि प्रतिषेधो वक्तव्यः॥

(समाधानभाष्यम्)

न वक्तव्यः॥

(आक्षेपभाष्यम्)

घुसंज्ञा कस्मान्न भवति?॥

(समाधानभाष्यम्)

''सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य'' इत्येवं न भविष्यति॥

(नानुबन्धकृतमनेजन्तत्वन्यायाधिकरणम्)

(१८० आक्षेपवार्तिकम्॥७॥)

॥*॥ दाप्प्रतिषेधे न दैप्यनेजन्तत्वात्॥*॥

(भाष्यम्)

दाप्प्रतिषेधो दैपि प्रतिषेधो न प्राप्नोति-अवदात्तं मुखम्॥

ननु चाऽऽत्वे कृते भविष्यति॥

तद्धयात्त्वं न प्राप्नोति॥

किं कारणम्?॥

अनेजन्तत्वात्॥

(१समाधानवार्तिकम्॥८॥)

॥*॥सिद्धमनुबन्धस्याऽनेकान्तत्वात्॥*॥

(भाष्यम्)

सिद्धमेतत्॥

कथम्?॥

अनुबन्धस्यानेकान्तत्वात्। अनेकान्ता अनुबन्धाः॥

(१८२ समाधानवार्तिकम्॥९॥)

॥*॥ पित्प्रतिषेधाद्वा॥*॥

(भाष्यम्)

अथ वा ''दाधा ध्वपित्'' इति वक्ष्यामि। तच्चाऽवश्यं वक्तव्यम्॥ अदाबिति ह्युच्यमाने इहापि प्रसज्येत प्रणिदापयतीति॥

(आक्षेपभाष्यम्)

सूत्रं तर्हि भिद्यते॥

(सिद्धान्तिभाष्यम्)

यथान्यासमेवास्तु॥

(आक्षेपस्मारणभाष्यम्)

ननु चोक्तम् ''*दाप्प्रतिषेधे न दैपि*'' इति॥

(परिहारस्मारणभाष्यम्)

परिहृतमेतत् ''*सिद्धमनुबन्धस्यानेकान्त्वात्* इति॥

(आक्षेपभाष्यम्)

अथैकान्तेषु दोष एव॥

(समाधानभाष्यम्)

एकान्तेष्वपि न दोषः। आत्त्वे कृते भविष्यति॥

(समाधानानुपपत्तिभाष्यम्)

ननु चोक्तम्-'तद्ध्यात्त्वं न प्राप्नोति, किं कारणम्। अनेजन्तत्वाद्-'इति ॥

(समाधानोपपत्तिभाष्यम्)

पकारलोपे कृते भविष्यति।

(आक्षेपभाष्यम्)

नह्यं तदा दाब् भवति॥

(समाधानभाष्यम्)

भूतपूर्वगत्या भविष्यति॥

(समाधानसाधकभाष्यम्)

एतच्चात्र युक्तम्-यत्सर्वेष्वेव सानुबन्धकग्रहणेषु भूतपूर्वगतिर्विज्ञायते॥ अनैमित्तिको ह्यनुबन्धलोपस्तावत्येव भवति॥

(समाधानान्तरभाष्यम्)

अथ वाऽचार्यप्रवृत्तिर्ज्ञापयति-'नानुबन्धकृतमनेजन्तत्वम्' इति॥ यदयम् ''ऽदीचां माङो व्यतीहारे'' इति मेङः सानुबन्धकस्याऽऽत्त्वभूतस्य ग्रहणं करोति॥

(समाधानान्तरभाष्यम्)

अथ वा दाबेवायम्। न दैबस्ति॥ कथम्-'अवदायति' इति?॥

श्यन्विकरणो भविष्यति॥ दाधा घ्वदाप्॥२९॥

(१८ अतिदेशसूत्रम्॥१।१।५ आ. ९॥)

आद्यन्तवदेकस्मिन्॥१।१।२०॥

(सूत्रप्रयोजनाधिकरणम्)

(आक्षेपभाष्यम्)

किमर्थमिदमुच्यते?॥

(१८३ समाधानवार्तिकम्॥१॥)

॥*॥ सत्यन्यस्मिन्नाद्यन्तवद्भावादेकस्मिन्नाद्यन्तवद्वचनम्॥*॥

(भाष्यम्)

सत्यन्यस्मिन् यस्मात् पूर्वं नास्ति परमस्ति स आदिरित्युच्यते। सत्यन्यस्मिन् यस्मात् परं नास्ति पूर्वमस्ति सोऽन्त इत्युच्यते। सत्यस्मिन्नाद्यन्तवद्भावादेतस्मात् कारणाद् एकस्मिन्नाद्यन्तापदिष्टानि कार्याणि न सिध्यन्ति। इष्यते च स्युरिति। तान्यन्तरेण यत्नं न न सिध्यन्ति इत्येकस्मिन्नाद्यन्तवद्वचनम्। एवमर्थमिदमुच्यते॥

(आक्षेपभाष्यम्)

अस्ति प्रयोजनमेतत्?॥

(समाधानभाष्यम्)

किं तर्हीति॥

(१८४ आक्षेपवार्तिकप्रथमखण्डम्॥२॥)

॥*॥ तत्र व्यपदेशिवद्वचनम्॥*॥

(भाष्यम्)

तत्र व्यपदेशिवद्भावो वक्तव्यः। व्यपदेशिवदेकस्मिन् कार्यं भवतीति वक्तव्यम्॥

(भाष्यम्)

किं प्रयोजनम्?॥

(१८४ प्रयोजनवार्तिकद्वितीयखण्डम्॥३॥)

॥*॥ एकाचो द्वे प्रथमार्थम्॥*॥

(भाष्यम्)

वक्ष्यति-'*एकाचो द्वे प्रथमस्येति बहुव्रीहिनिर्देशः * इति। तस्मिन् क्रियमाणे इहैव स्यात्-पपाच पपाठ; इयाय आर इत्यत्र न स्यात्। व्यपदेशिवदेकस्मिन् कार्यं भवतीत्यत्रापि सिद्धं भवति॥

(१८४ प्रयोजनवार्तिकतृतीयखण्डनम्॥४॥)

'षत्वे चाऽऽदेशसंप्रत्ययार्थम्॥*॥'

(भाष्यम्)

वक्ष्यति-'आदेशप्रत्ययोरित्यवयवषष्ठ्येषा-' इति। एतस्मिन् क्रियमाणे इहैव स्यात्-करिष्यति हरिष्यति, इह न स्याद् '[इन्द्रो मा] वक्ष्यत् (ऋ.१।१।१३५।४)' 'स देवान्यक्षत् (ऋ.३।४।३॥)' इति व्यपदेशिवदेकस्मिन् कार्यं भवतीत्यत्रापि सिद्धं भवति॥

(आक्षेपोपसंहारभाष्यम्)

स तर्हि व्यपदेशिवद्भावो वक्तव्यः?॥

(सिद्धान्तिसमाधानभाष्यम्)

न वक्तव्यः।

(१७५ समाधानवार्तिकम्॥५॥)

॥*॥ अवचनाल्लोकविज्ञानात् सिद्धम्॥*॥

(भाष्यम्)

अन्तरेणैव वचनं लोकविज्ञानात् सिद्धमेतत्॥

(एकदेशिदृष्टान्तभाष्यम्)

तद्यथा-लोके-'शालासमुदायो ग्रामः'- इत्युच्यते। भवति चैतदेकस्मिन्नपि-'एकशालो ग्रामः'-इति॥

(उक्तदृष्टान्तविघटनभाष्यम्)

विषम उपन्यासः। ग्रामशब्दोऽयं बह्वर्थः। अस्त्येव शालासमुदाये वर्तते। तद्यथा- 'ग्रामो दग्धः' इति॥

अस्ति वाटपरिक्षेपे वर्तते। तद्यथा-'ग्रामं प्रविष्टः'- इति॥

अस्ति च मनुष्येषु वर्तते। तद्यथा-'ग्रामो गतो ग्राम आगतः'-इति॥

अस्ति सारण्यके ससीमके सस्थण्डिलके वर्तते। तद्यथा-'ग्रामो लब्धः' इति। तद्यः सारण्यके सलीमकेसस्थण्डिलके वर्तते। तमभिसमीक्ष्यैत्प्रयुज्यते-'एकशालो ग्रामः' इति॥

(एकदेशिदृष्टान्तरभाष्यम्)

यथा तर्हि-'वर्णसमुदायः पदम्' 'पदसमुदाय ऋक्', 'ऋक्समुदायः सूक्तम्' इत्युच्यते। भवति चैतदेकस्मिन्नपि- 'एकवर्णं पदम्', 'एकपदा ऋक्', 'एकर्चंसूक्तम्' इति॥

(दृष्टान्तान्तरविघटनभाष्यम्)

अत्राप्यर्थेन युक्तो व्यपदेशः। पदं नामार्थः ऋङ् नामार्थः, सूक्तं नामार्थ इति॥

(सिद्धान्तिदृष्टान्तभाष्यम्)

यथा तर्हि-बहुषु पुत्रेष्वेतदुपपन्नं भवति-अयं मे ज्येष्ठोऽयं मे मध्यमोऽयं मे कनीयानिति। भवति चैतदेकस्मिन्नपि-'अयमेव मे ज्येष्ठोऽयमेव मे मध्यमोऽयमेव मे कनीयान्' इति॥

(सिद्धान्तिदृष्टान्तान्तरभाष्यम्)

तथाऽसूतायामसोष्यमाणायां च भवति-'प्रथमगर्भेण हता' इति॥

(सिद्धान्तिदृष्टान्तान्तरभाष्यम्)

तथाऽनेत्याऽनाजिगमिषुराह 'इदं मे प्रथममागमनम्' इति॥

(सूत्रप्रत्याख्यानभाष्यम्)

आद्यन्तवद्भावश्च शक्योऽवक्तुम्॥

कथम्?॥

(१८६ प्रत्याख्यानसाधकवार्तिकम्॥६॥)

॥*॥ अपूर्वानुत्तरलक्षणत्वादाद्यन्तयोः सिद्धमेकस्मिन्॥*॥

(भाष्यम्)

अपूर्वलक्षण आदिः, अनुत्तरलक्षणोऽन्तः। एतच्चैकस्मिन्नपि भवति। अपूर्वानुत्तरलक्षण-त्वादेतस्मात् कारणाद् एकस्मिन्नप्याद्यन्तापदिष्टानि कार्याणि भविष्यन्तीति नार्थ आद्यन्तवद्भावेन॥

(प्रत्याख्यानासंभवभाष्यम्)

गोनर्दीयस्त्वाह- सत्यमेतत् 'सति त्वन्यस्मिन्' इति॥

(सूत्रोदाहरणाधिकरणम्)

(प्रयोजनजिज्ञासाभाष्यम्)

कानि पुनरस्य योगस्य प्रयोजनमस्ति?।

(१८७ प्रयोजनवार्तिकम्॥७॥)

॥*॥ आदिवत्त्वे प्रयोजनं प्रत्ययञ्निदाद्युदात्तत्वे॥*॥

(भाष्यम्)

प्रत्ययस्यादिरुदात्तो भवतीति। इहैव स्यात्- कर्तव्यं तैत्तिरीयः। औपगवः कापटवः इत्यत्र न स्यात्॥

(भाष्यम्)

''ञ्नित्यादिर्नित्यम्'' इति इहैव स्याद्-अहिचुम्बकायनिः आग्निवेश्यः। गार्ग्यः कृतिरित्यत्र न स्यात्॥

(१८८ प्रयोजनवार्तिकम्॥८॥)

॥*॥ वलादेरार्धधातुकस्येट्॥*॥

(भाष्यम्)

वलादेरार्धधातुकस्येट् प्रयोजनम्॥ ''आर्धधातुकस्येड्वलादेः'' इतीहैव स्यात् करिष्यति हरिष्यति। 'जोषिषद् (ऋ. २।३५।१॥)' मन्दिषदित्यत्र न स्यात्॥

(१८९ प्रयोजनवार्तिकम्॥९॥)

॥*॥ यस्मिन्विधिस्तदादित्वे॥*॥

(भाष्यम्)

यस्मिन्विधिस्तदादित्वे प्रयोजनम्। वक्ष्यति- 'यस्मिन्विधिस्तदादाल्ग्रहणे ' इति। तस्मिन् क्रियमाणे ''अचि श्नुधातुभ्रुवां य्वोरियङुवङौ'' इहैव स्यात् श्रियः भ्रुवः, श्रियौ इत्यत्र न स्यात्।

(१९० प्रयोजनवार्तिकम्१०॥)

॥*॥ अजाद्यात्त्वे॥*॥

अजाद्यात्त्वे प्रयोजनम्।''आडजादीनाम्'' इहैव स्याद्-ऐक्षिष्ट, ऐहिष्ट। ऐष्ट,अध्यैष्टेत्यत्र न स्यात्॥

(अन्तवत्त्वप्रयोजननिरुपणाधिकरणम्)

(आक्षेपभाष्यम्)

अथान्तवत्त्वे कानि प्रयोजनानि?॥

(१९१ प्रयोजनवार्तिकम्॥११॥)

॥*॥ अन्तवद् द्विवचनान्तप्रगृह्यत्वे॥*॥

(भाष्यम्)

अन्तवद् द्विवचनान्तप्रगृह्यत्वे प्रयोजनम्। ''ईदूदेद् द्विवचनं प्रगृह्यम्'' इहैव स्यात्- पचेते इति पचेथे इति। खट्वे इति माले इतीत्यत्र न स्यात्।

(१९२ प्रयोजनवार्तिकम्॥१२॥

॥*॥ मिदचोऽन्त्यापरः॥*॥

(भाष्यम्)

''मिदचोऽन्त्यात्परः'' प्रयोजनम्। (''नपुंसकस्य झलचः'' इहैव स्यात्- कुण्डानि वनानि। तानि यानीत्यत्र न स्यात्।

(१९२ प्रयोजनवार्तिकम्)

॥*॥ अचोऽन्त्यादि टि॥*॥

(भाष्यम्)

''अचोऽन्त्यादि टि'' प्रयोजनम्। ''टित आत्मनेपदानां टेरे'' इहैव स्यात् कुर्वाते कुर्वाथे। कुरुते कुर्वे इत्यत्र न स्यात्॥

(१९४ प्रयोजनवार्तिकम्॥१४)

॥*॥ अलोऽन्त्यस्य॥*॥

(भाष्यम्)

''अलोऽन्त्यस्य'' प्रयोजनम्। ''अतो दीर्घो यञि सुपि च'' इहैव स्यात्- पटाभ्यां घटाभ्यामिति। आभ्यामित्यत्र न स्यात्॥

(१९५ प्रयोजनवार्तिकम् ॥१५॥)

॥*॥ येन विधिस्तदन्तत्वे॥*॥

(भाष्यम्)

येन विधिस्तदन्तत्वे प्रयोजनम्। ''अचो यद्'' इहैव स्यात्-चेयम् जेयम्। एयमध्येयमित्यत्र न स्यात्। ''आद्यन्तवदेकस्मिन्'' कार्यं भवतीत्यत्रापि सिद्धं भवति। आद्यन्तवदेकस्मिन्॥२०॥

(१९ घसंज्ञासूत्रम्॥१।१।५। ५ आ. १०॥)

तरप्तमपौ घः॥१।१।२१॥

(प्रकरणोत्कर्षप्रयोजनाधिरणम्)

(अनिष्टनिवारणाधिकरणम्)

(१९६ आक्षेपवार्तिकम्॥१॥)

॥*॥ घसंज्ञायां नदीतरेऽप्रतिषेधः॥*॥

(भाष्यम्)

घसंज्ञायां नदीतरे प्रतिषेधो वक्तव्यः। नद्यास्तरो नदीतरः॥

(१९७ समाधानवार्तिकप्रथमखण्डम्॥५॥

॥*॥ घसंज्ञायां नदीतरेऽप्रतिषेधः॥*॥

(भाष्यम्)

घसंज्ञाया नदीतरेऽप्रतिषेधः, अनर्थकः प्रतिषेधोऽप्रतिषेधः॥

(भाष्यम्)

घसंज्ञा कस्मान्न भवति?।

(१९७ समाधानहेतुवार्तिकद्वितीयखण्डम्॥२॥)

॥*॥तरब्ग्रहणं ह्यौपदेशिकम्॥*॥

(भाष्यम्)

औपदेशिकस्य तरपो ग्रहणम्। न चैष उपदेशे तरप्शब्दः॥

(आक्षेपभाष्यम्)

किं वक्तव्यमेतत्?॥

(समाधानभाष्यम्)

नहि॥

(आक्षेपभाष्यम्)

कथमनुच्यमानं गंस्यते?॥

(सिद्धान्तिसमाधानभाष्यम्)

इह हि व्याकरणे सर्वेष्वेव सानुबन्धकग्रहणेषु रुपमाश्रीयते-यत्रास्यैतद्रूपमिति। रुपनिर्ग्रहश्च शब्दस्य नान्तरेण लौकिकं प्रयोगम्। तस्मिंश्च लौकिके प्रयोगे सानुबन्धकानां प्रयोगो नास्तीति कृत्वा द्वितीयः प्रयोग उपास्यते॥

कोऽसौ?॥

उपदेशो नाम। न चैष उपदेशे तरप्शब्दः।

(घसंज्ञाभ्युपगमेऽपि दोषाभावप्रदर्शकभाष्यम्)

अथ वाऽस्त्वस्य घसंज्ञा को दोषः?॥

(दोषदर्शनभाष्यम्)

घादिषु नद्या ह्रस्वो भवतीति ह्रस्वत्वं प्रसज्येत॥

(समाधानभाष्यम्)

समानाधिकरणेषु घादिष्वित्येवं तत्॥

(आक्षेपभाष्यम्)

यदा तर्हि सैव नदी, स एव तरस्तदा प्राप्नोति॥

(समाधानभाष्यम्)

स्त्रीलिङ्गेषु घादिष्वित्येवं तत्॥ अवश्यं चैतदेवं विज्ञेयम्। समानाधिकरणेषु घादिष्वित्युच्यमाने इह प्रसज्येत- महिषी रूपमिव, ब्राह्मणी रूपमिवेति॥ तरसमपौ घः॥२१॥

(२० संख्यासंज्ञासूत्रम् ॥१।१।५ आ.११॥)

(बहुगणवतुडति संख्या॥१।१।२२॥)

(लोकप्रसिद्धसंख्यावाचिनां संख्यात्वसाधनाधिकरणम्)

(१९८ आक्षेपवार्तिकप्रथमखण्डम्॥१॥)

॥*॥ संख्यासंज्ञायां संख्याग्रहणं [संख्यासंप्रत्ययार्थम्]॥*॥

(भाष्यम्)

संख्यासंज्ञायां संख्याग्रहणं कर्तव्यम्। बहुगणवतुडतयः संख्यासंज्ञा भवन्ति, संख्या च संख्यासंज्ञा भवतीति वक्तव्यम्॥

किं प्रयोजनम्?॥

''संख्यासंप्रत्ययार्थम्''. एकादिकायाः संख्यायाः संख्याप्रदेशेषु संख्येत्येषु संप्रत्ययो यथा स्यात्॥

(आक्षेपबाधकभाष्यम्)

ननु चैकादिका संख्या लोके संख्येति प्रतीता। तेनास्याः संख्याप्रदेशेषु संख्यासंप्रत्ययो भविष्यति॥

(आक्षेपसाधकभाष्यम्)

एवमपि कर्तव्यम्॥

किं प्रयोजनम्?॥

(१९८ इतरथा ह्यसंप्रत्ययोऽकृत्रिमत्वाद्यथा लोके॥*॥)

(भाष्यम्)

अक्रियमाणे हि संख्याग्रहणे एकादिकायाः संख्यायाः संख्येत्येष संप्रत्ययो न स्यात्। किं प्रयोजनम्?॥

अकृत्रिमत्वात्। बह्वादीनां कृत्रिमा संज्ञा। ''कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसंप्रत्ययो भवति''॥ यथा लोके॥ तद्यथा-लोके-'गोपालकमानय' 'कटजकमानय' इति यस्यैषा संज्ञा भवति स आनीयते, न यो गाः पालयति, यो वा कटे जातः॥

(आक्षेपभाष्यम्)

यदि तर्हि कृत्रिमाऽकृत्रिमयोः कृत्रिमे कार्यसंप्रत्ययो भवति, ''नदीपौर्णमास्याग्रहायणीभ्यः'' इत्यत्रापि प्रसज्येत॥

(समाधानभाष्यम्)

पौर्णमास्याग्रहायणीग्रहणसामर्थ्यान्न भविष्यति॥

(आक्षेपभाष्यम्)

तद्विशेषेभ्यस्तर्हि प्राप्नोति।

(समाधानभाष्यम्)

एवं तर्हि आचार्यप्रवृत्तिर्ज्ञापयति-'न तद्विशेषेभ्यो भवति' इति। यदयं विपाट्शब्दं शरत्प्रभृतिषु पठति॥

(आक्षेपभाष्यम्)

इह तर्हि प्राप्नोति-'नदीभिश्च'' इति॥

(समाधानभाष्यम्)

बहुवचननिर्देशान्न भविष्यति॥

(आक्षेपभाष्यम्)

स्वरूपविधिस्तर्हि प्राप्नोति।

(समाधानभाष्यम्)

बहुवचननिर्देशादेव न भविष्यति॥

(उपसंहारभाष्यम्)

एवं च न चेदमप्रवृत्तं भवति-''कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसंप्रत्ययः'' इति। न च कश्चिद्दोषो भवति॥

(१९९ आक्षेपसाधकवार्तिकम्॥२॥)

॥*॥ उत्तरार्थं च॥*॥

(भाष्यम्)

उत्तरार्थं च संख्याग्रहणं कर्तव्यम्॥ ''ष्णान्ता षट्। षकारनकारान्तायाः संख्यायाः षट्संज्ञा यथा स्यात। इह मा भूत्- पामानो विप्रुष इति॥

(आक्षेपनिराकरणभाष्यम्)

इहार्थेन तावन्नार्थः संख्याग्रहणेन॥

(आक्षेपस्मारणभाष्यम्)

ननु चोक्तम्-*इतरथा ह्यसंप्रत्ययोऽकृत्रिमत्वाद्यथा लोके* इति?॥

(आक्षेपपरिहारभाष्यम्)

नैष दोषः। अर्थात्प्रकरणाद्वा लोके कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसंप्रत्ययो भवति। अर्थो वाऽस्यैवसंज्ञकेन भवति। प्रकृतं वा तत्र भवति- इदमेवंसंज्ञकेन कर्तव्यमिति।

आतश्चार्थात् प्रकरणाद्वा। अङ्ग हि भवान् ग्राम्यं पांशुलपादमप्रकरणज्ञमागतं ब्रवीतु-गोपालकमानय, कटजकमानयेति। उभयगतिस्तस्य भवति। साधीयो वा यष्टिहस्तं गमिष्यति।

(आक्षेपसाधकभाष्यम्)

यथैव तर्ह्यर्थात्प्रकरणाद्वा लोके कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसंप्रत्ययो भवति, एवमिहापि प्राप्नोति। जानाति ह्यसौ बह्वादीनामियं संज्ञा कृतेति।

(समाधानसाधकभाष्यम्)

न यथा लोके, तथा व्याकरणे। उभयगतिः पुनरिह भवति॥

(उभयगत्युदाहरणभाष्यम्)

अन्यत्रापि नावश्यमिहैव। तद्यथा ''कर्तुरीप्सिततमं कर्म'' इति कृत्रिमा कर्मसंज्ञा। कर्मप्रदेशेषु चोभयगतिर्भवति-''कर्मणि द्वितीया' इति कृत्रिमस्य ग्रहणात्, ''कर्तरि कर्मव्यतिहारे'' इत्यत्राकृत्रिमस्य॥

(उभयगत्युदाहरणभाष्यम्)

तथा ''साधकतमं करणम्'' इति कृत्रिमा करणसंज्ञा। करणप्रदेशेषु चोभयगतिर्भवति-''कर्तृकरणयोस्तृतीया'' इति कृत्रिमस्य ग्रहणम्, 'शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे'' इत्यत्राकृत्रिमस्य॥

(उभयगत्युदाहरणभाष्यम्)

तथा- 'आधारोऽधिकरणम्' इति कृत्रिमा अधिकरणसंज्ञा॥ आधिकरणप्रदेशेषु चोभयगतिर्भवति- ''सप्तम्यधिकरणे च'' इति कृत्रिमस्य ग्रहणम्, ''विप्रतिषिद्धं चानधिकरणवाचि'' इत्यत्राकृत्रिमस्य॥

(समाधानान्तरभाष्यम्)

अथ वा-नेदं संज्ञाकरणम्। तद्वदतिदेशोऽयम्-बहुगणवतुडतयः संख्यावद्भवन्तीति॥

(आक्षेपभाष्यम्)

स तर्हि वतिनिर्देशः कर्तव्यः॥

(समाधानभाष्यम्)

न कर्तव्यः॥

(आक्षेपसाधकभाष्यम्)

न ह्यन्तरेण वतिमतिदेशो गम्यते॥

(आक्षेपबाधकभाष्यम्)

अन्तरेणापि वतिमतिदेशो गम्यते। तद्यथा ''एष ब्रह्मदत्तः'' अब्रह्मदत्तं ब्रह्मदत्त इत्याह ते मन्यामहे ब्रह्मदत्तवदयं भवतीति। एवमिहाप्यसंख्यां संख्येत्याह, संख्यावदिति गम्यते।

(समाधानान्तरभाष्यम्)

अथवाऽऽचार्यप्रवृत्तिर्ज्ञापयति-'भवत्येकादिकायाः संख्यायाः संख्याप्रदेशेषु संप्रत्यय' इति। यदयं ''संख्याया अतिशदन्तायाः कन्'' इति तिशदन्तायाः प्रतिषेधं शास्ति॥

कथं कृत्वा ज्ञापकम्?॥

न हि कृत्रिमा त्यन्ता शदन्ता वा संख्याऽस्ति॥

(समाधानभाष्यम्)

ननु चेयमस्ति डतिः॥

(समाधानसाधकभाष्यम्)

यत्तर्हि शदन्तायाः प्रतिषेधं शास्ति॥

(संपूर्णसूत्रज्ञापकताभ्युपगमभाष्यम्)

यच्चापि त्यन्तायाः प्रतिषेधं शास्ति।

(आक्षेपस्मारणभाष्यम्)

ननु चोक्तम्*-'डत्यर्थमेतत् स्यात्' इति॥

(समाधानभाष्यम्)

''अर्थवद्ग्रहणे नानर्थकस्य'' इति अर्थवतस्तिशब्दस्य ग्रहणम्। न च डतेस्तिशब्दोऽर्थवान्।

(समाधानान्तरभाष्यम्)

अथ वा महतीयं संज्ञा क्रियते। संज्ञा च नाम यतो न लघीयः॥

कुत एतत्?॥

लध्वर्थं हि संज्ञाकरणम्॥ तत्र महत्याः संज्ञायाः करण एतत्प्रयोजनम्-अन्वर्थसंज्ञा यथा विज्ञायेत-संख्यायते अनया संख्येति। एकादिकया चापि संख्यायते॥

(द्वितीयप्रयोजनप्रत्याख्यानभाष्यम्)

उत्तरार्थेन चापि नार्थः संख्याग्रहणेन। इदं प्रकृतमुत्तरत्रानुवर्तते॥

(आक्षेपभाष्यम्)

इदं वै संज्ञार्थम्, उत्तरात्र च संज्ञिविशेषनार्थः॥ न चान्यार्थं प्रकृतमन्यार्थं भवति। न खल्वप्यन्यत्प्रकृतमनुवर्तनादन्यद्भवति। न हि गोधा सर्पन्ती सर्पणादहिर्भवति॥

(आक्षेपप्रथमयुक्तिसमाधानभाष्यम्)

यत्तावदुच्यते-न चान्यार्थं प्रकृतमन्यार्थं भवतीति। अन्यार्थमपि प्रकृतमन्यार्थं भवति। तद्यथा-शाल्यर्थं कुल्याः प्रणीयन्ते, ताभ्यश्च पानीयं पीयते, ऽपस्पृश्यते च, शालयश्च भाव्यन्ते॥

(आक्षेपद्वितीययुक्तिसमाधानभाष्यम्)

यदप्युच्यते-न खल्वप्यन्यत् प्रकृतमनुवर्तनादन्यद्भवति। नहि गोधा सर्पन्ती सर्पणादहिर्भवतीति। भवेद्-द्रव्येष्वेतदेवं स्यात्। शब्दस्तु खलु। येन येन विशेषणाभिसंबध्यते, तस्य तस्य विशेषको भवति।

(समाधानयुक्त्यन्तरभाष्यम्)

अथ वा- सापेक्षोऽयं [''ष्णान्ता'' इति] निर्देशः क्रियते। न चान्यत्किंचिदपेक्ष्यमस्ति। ते संख्यामेवापेक्षिष्यामहे॥

(२०० आक्षेपवार्तिकम्॥३॥)

॥*॥ अध्यर्धग्रहणं च समासकन्विध्यर्थम्॥*॥

(भाष्यम्)

अध्यर्धग्रहणं च कर्तव्यम्॥

किं प्रयोजनम्?॥

समासकन्वध्यर्थम्। समासविध्यर्थम्, कन्विध्यर्थं च॥ समासविध्यर्थं तावत्- अध्यर्धशूर्पम्॥ कन्विध्यर्थम्- अध्यर्धकम्।

(२०१ आक्षेपप्रयोजनवार्तिकम्)॥४॥

॥*॥ लुकि चाऽग्रहणम्॥*॥

(भाष्यम्)

लुकि चाध्यर्धग्रहणं न कर्तव्यं भवति-''अध्यर्धपूर्वद्विगोर्लुगसंज्ञायाम्'' इति। '' द्विगोः'' इत्येव सिद्धम्।

(२०२ आक्षेपवार्तिकम्॥५॥)

॥*॥ अर्धपूर्वपदश्च पूरणप्रत्ययान्तः॥*॥

(भाष्यम्)

अर्धपूर्वपदश्च पूरणप्रत्ययान्तः सङ्ख्यासंज्ञो भवतीति वक्तव्यम्॥

किं प्रयोजनम्?॥

समासकन्विध्यर्थमेव। समासविध्यर्थ कन्विध्यर्थं च। समासविध्यर्थं तावत्-अर्धपञ्चमशूर्पम्॥ कन्विध्यर्थम्-अर्धपञ्चमकम्॥

(२०३ आक्षेपवार्तिकम्॥६॥)

॥*॥ अधिकग्रहणं चालुकि समासोत्तरपदवृद्धयर्थम्॥*॥

अधिकग्रहणं चालुकि कर्तव्यम्॥

किं प्रयोजनम्?॥

समासोत्तरपदवृद्धयर्थम्। समासविध्यर्थमुत्तरपदवृद्ध्यर्थं च। समासविध्यर्थं तावत्-अधिकषाष्टिकः। अधिकसासतिकः॥ उत्तरपदवृद्ध्यर्थम्-अधिकषाष्टिकः॥

अलुकीति किमर्थम्?॥

अधिकषाष्टिकः। अधिकसासतिकः॥

(२०५ आक्षेपप्रयोजनवार्तिकम्॥७॥)

॥*॥ बहुव्रीहौ चाग्रहणम्॥*॥

(भाष्यम्)

बहुव्रीहौ चाधिकशब्दस्य ग्रहणं न कर्तव्यं भवति। ''संख्ययाऽव्ययासन्नादूराधि-कसंख्याः सख्येये'' इति। संख्येत्येव सिद्धम्॥

(२०५ प्रत्याख्यानवार्तिकप्रथमखण्डम्॥८॥)

॥*॥ बह्वादीनामग्रहणम्॥*॥

(भाष्यम्)

बह्वादीनां ग्रहणं शक्यमकर्तुम्॥

(आक्षेपभाष्यम्)

केनेदानीं संख्याप्रदेशेषु संख्यासंप्रत्ययो भविष्यति?॥

(३०३ प्रत्याख्यानसाधकवार्तिकद्वितीयखण्डम् ॥८॥)

॥*॥ ज्ञापकात्सिद्धम्॥*॥

(भाष्यम्)

ज्ञापकात् सिद्धमेतत्॥

ज्ञापकं किम्?॥

यदयं-''वतोरिड्वा'' इति संख्याया विहितस्य कनोवत्वन्तादिटं शास्ति॥

(आक्षेपभाष्यम्)

वतोरेव तज्ज्ञापकं स्यात्॥

(समाधानभाष्यम्)

नेत्याह। योगापेक्षं ज्ञापकम्॥ बहुगण॥२२॥

(१३ षट्संज्ञासूत्रम्॥१।१।५ आ. १२॥)

ष्णान्ता षट्॥१।१।२३॥

(अनिष्टापत्तीष्टानुपपत्तिनिराकरणाधिकरणम्)

(२०७ आक्षेपवार्तिकम्॥१॥)

॥*॥ षट्संज्ञायामुपदेशवचनं [शताद्यष्टनोर्नुम्नुडर्थम्]॥*॥

(भाष्यम्)

षट्संज्ञायामुपदेशग्रहणं कर्तव्यम्। उपदेशे षकारनकारान्ता संख्या षट्संज्ञा भवतीति वक्तव्यम्॥

किं प्रयोजनम्?॥

शताद्यष्टनोर्नुम्नुडर्थम्। शतानि सहस्राणि । नुमि कृते ''ष्णान्ता षट्'' इति षट् संज्ञा प्राप्नोति। उपदेशग्रहणान्न भवति। अष्टानामित्यत्राऽऽत्वे कृते षट्संज्ञा न प्राप्नोति। उपदेशग्रहणाद्भवति।

(प्रत्याख्यानभाष्यम्)

॥*॥ उक्तं वा॥*॥

किमुक्तम्?॥

इह तावच्छतानि सहस्राणीति-'सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य' इति॥

अष्टनोऽप्युक्तम्॥

किमुक्तम्?॥

अष्टनो दीर्घग्रहणं षट्संज्ञाज्ञापकमाकारान्तस्य नुडर्थम् इति॥

(एकदेशिसमाधानभाष्यम्)

अथवाऽऽकारोऽप्यत्र निर्दिश्यते-षकारान्ता नकारान्ता आकारान्ता च संख्या षट्संज्ञा भवतीति।

(समाधानबाधकभाष्यम्)

इहापि तर्हि प्राप्नोति-''सघमादो द्युम्न एकास्ताः'' एका इति॥

(समाधानसाधकभाष्यम्)

नैष दोषः। एकशब्दोऽयं बह्वर्थः। अस्त्येव संख्यापदम्-तद्यथा-एको द्वौ बहव इति॥ अस्त्यसहायवाची तद्यथा- एकाग्नयः, एकहलानि, एकाकिभिः क्षुद्रकैर्जितमिति। असहायैरित्यर्थः॥ अस्त्यन्यार्थे वर्तते। तद्यथा-'प्रजामेका रक्षत्यूर्जमेका' इति। अन्येत्यर्थः॥ 'सधमादो द्युम्न एकास्ताः' अन्या इत्यर्थः॥ तद्योऽन्यार्थे वर्तते प्रयोगः॥

(समाधानबाधकभाष्यम्)

इह तर्हि प्राप्नोति- 'द्वाभ्यामिष्टये विंशत्या च' इति॥

(सिद्धान्तिसमाधानान्तरभाष्यम्)

एवं तर्हि सप्तमे योगविभागः करिष्यते-''अष्टाभ्य औश्'' ततः ''षड्भ्यः'' षड्भ्यश्च यदुक्तमष्टाभ्योऽपि तद्भवति॥ ततो ''लुक्'' लुक् च भवति षड्भ्य इति॥

(समाधानान्तरभाष्यम्)

अथ वा- ऊपरिष्टाद् योगविभागः करिष्यते- ''अष्टन आ विभक्तौ''। ततो ''रायः'' रायश्च विभक्तावाकारादेशो भवति। ''हलि'' इत्युभयोः शेषः॥

(आक्षेपभाष्यम्)

यद्येवम्-प्रियाष्टौ प्रियाष्टा इति न सिध्यति, प्रियाष्टानौ प्रियाष्टान इति प्राप्नोति॥

(सिद्धान्तिसमाधानभाष्यम्)

यथालक्षणमप्रयुक्ते॥ ष्णान्ता षट्॥२३॥

(२२ षट्संज्ञासूत्रम् ॥१।१।५ आ. १३॥)

डति च॥१।१।२४॥

(प्रत्याख्यानभाष्यम्)

इदं डतिग्रहणं द्विः क्रियते- संख्यासंज्ञायां, षट्संज्ञायां च। एकं शक्यमकर्तुम्।

कथम्?॥

यदि तावत् संख्यासंज्ञायां क्रियते, षष्टसंज्ञायां न करिष्यते॥

कथम्?.

''ष्णान्ता षट्'' इत्यत्र डतीत्यनुवर्तिष्यते॥

(प्रत्याख्यानान्तरभाष्यम्)

अथ षट्संज्ञायां क्रियते संख्यासंज्ञायां न करिष्यते॥

[कथम्?]॥

''डति च'' इत्यत्र संख्यासंज्ञाऽप्यनुवर्तिष्यते॥ डति च॥२४॥

(२३ निष्ठासंज्ञासूत्रम्॥१।१।५आ. १४)

क्तक्तवतू निष्ठा॥१।१।२५॥

(अनिष्टापत्तिनिराकरणाधिकरणम्)

(२०७ आक्षेपवार्तिकम्॥१॥)

॥*॥निष्ठासंज्ञायां समानशब्द प्रतिषेधः॥*॥

(भाष्यम्)

निष्ठासंज्ञायां समानशब्दानां प्रतिषेधो वक्तव्यः। लोतो गर्त इति॥

(२०८ आक्षेपबाधकवार्तिकम्॥२॥)

॥*॥ निष्ठासंज्ञायां समानशब्दाप्रतिषेधः॥*॥

(भाष्यम्)

निष्ठासंज्ञायां समानशब्दानामप्रतिषेधः। अनर्थकः प्रतिषेधः॥

अप्रतिषेधः॥

(आक्षेपभाष्यम्)

निष्ठासंज्ञा कस्मान्न भवति?॥

(२०९ आक्षेपबाधकहेतुवार्ति)कम्॥३॥

॥*॥ अनुबन्धोऽन्यत्त्वकरः॥*॥

(भाष्यम्)

अनुबन्धः क्रियते सोऽन्यत्त्वं करिष्यति॥

(२१० आक्षेपबाधकहेतुनिराकरणवार्तिकम्॥४॥)

॥*॥ अनुबन्धोऽन्यत्त्वकर इति चेन्न लोपात्॥*॥

(भाष्यम्)

अनुबन्धोऽन्यत्त्वकर इति चेत्?।

तन्न।

किं कारणम्?॥

लोपात्*। लुप्यतेऽत्रानुबन्धः। लुप्ते चानुबन्धे नान्यत्त्वं भवति। तद्यथा-कतरद्देवदत्तस्य गृहम्?, 'अदो यत्रासौ काकः' इति। उत्पतिते काके नष्टं तद्गृहं भवति। एवमिहापि लुप्तेऽनुबन्धे नष्टः प्रत्ययो भवति॥

(आक्षेपबाधकसाधकभाष्यम्)

यद्यपि लुप्यते, जानाति त्वसौ-सानुबन्धकस्येयं संज्ञा कृतेति। तद्यथा-इतरत्रापि कतरद्देवदत्तस्य गृहम्? 'अदो यत्रासौ काकः'इति। उत्पतिते काके यद्यपि नष्टं तद्गृहं भवति, अन्ततस्तमुद्देशं जानातीति॥

(२११ आक्षेपवार्तिकम्॥५॥)

॥*॥ सिद्धविपर्यासश्च॥*॥

सिद्धश्च विपर्यासः। यद्यपि जानाति, संदेहस्तु तस्य भवति-अयं स तशब्दो लोतो गर्त इति, अयं स तशब्दो लूनो गीर्ण इति। तद्यथा इतरत्रापि 'कतरद्देवदत्तस्य गृहम्?॥' 'अदो यत्रासौ काकः' इति। उत्पतिते काके यद्यपि तमुद्देशं जानाति संदेहस्तस्य भवति-इदं तद्गृहमिदं तद्गृहमिति।

(आक्षेपनिराकरणभाष्यम्)

एवं तर्हि-

(२१२ समाधानवार्तिकभाष्यम्)

॥*॥ कारककालविशेषात् सिद्धम्॥*॥

(भाष्यम्)

कारककालविशेषावुपादेयौ। भूते यस्तशब्दः कर्मणि कर्तरि भावे चेति। तद्यथा इतरत्रापि य एष मनुष्यः प्रेक्षापूर्वकारी भवति सोऽध्रुवेण निमित्तेन ध्रुवं निमित्तमुपादत्ते-वेदिकां पुण्डरीकं वा॥

(आक्षेपभाष्यम्)

एवमपि प्राकीर्ष्टेत्यत्रापि प्राप्नोति॥

(२१३ समाधानवार्तिकम्॥७॥)

॥*॥ लुङि सिजादिदर्शनात्॥*॥

(भाष्यम्)

लुङि सिजादिदर्शनान्न भविष्यति॥

(आक्षेपभाष्यम्)

यत्र तर्हि सिजादयो न दृश्यन्ते-प्राभित्तेति।

(समाधानभाष्यम्)

दृश्यन्तेऽत्रापि सिजादयः॥

किं वक्तव्यमेतत्?॥

न हि॥

कथमनुच्यमानं गंस्यते?॥

यथैवायमनुपदिष्टान् कारककालविशेषानवगच्छति एवमेतदप्यवगन्तुमर्हति-यत्र सिजादयो नेति। क्तक्तवतू॥

(इति श्रीमद्भगवत्पतञ्जलिविरचिते महाभाष्ये प्रथमाध्याप्रथमपादे पञ्चममाह्निकम्॥)

अथ प्रथमाध्यास्य प्रथमपादे षष्ठमाह्निकम्।

(अथ सर्वनामसंज्ञाप्रकरणम्)

(२६ सर्वनामसंज्ञासूत्रम्॥१।१।६ आ. १)

सर्वादीनि सर्वनामानि॥१।१।२७॥

(तद्गुणाधिकरणम्)

(पूर्वपक्षिभाष्यम्)

‘सर्वादीनि ’इति कोऽयं समासः?

(समाधानभाष्यम्)

बहुव्रीहिरित्याह॥

(अनुयोगभाष्यम्)

कोऽस्य विग्रहः?

(समाधानभाष्यम्)

सर्वशब्द आदिर्येषां तानि-इमानीति॥

यद्येवं सर्वशब्दस्य सर्वनामसंज्ञा न प्राप्नोति।

किं कारणम्?॥

अन्यपदार्थत्वाद्बहुव्रीहिः।

बहुव्रीहिरयमन्यपदार्थे वर्तते, तेन यदन्यत्सर्वशब्दात्तस्य सर्वनामसंज्ञा प्राप्नोति। तद्यथा-‘ चित्रगुरानीयताम् इत्युक्ते यस्य ता गावो भवन्ति स आनीयते, न गावः॥

नैष दोषः, भवति हि बहुव्रीहौ तद्गुणसंविधज्ञानमपि। तद्यथा-'चित्रवाससमानय' 'लोहितोष्णीषा ऋत्विजः प्रचरन्ति' इति तद्गुण आनीयते, तद्गुणाश्च प्रचरन्ति॥

(सर्वनानपदसाधुत्वाधिकरणम्)

(आक्षेपभाष्यम्)

इह सर्वनामानीति 'पूर्वपदात्संज्ञायामगः' इति णत्वं प्राप्नोति, तस्य प्रतिषेधो वक्तव्यः॥

(२१४ समाधानवार्तिकम्॥१॥)

॥*॥ सर्वनामसंज्ञायां निपातनाण्णत्वाभावः॥

(भाष्यम्)

सर्वनामसंज्ञायां निपातनाण्णत्वं न भविष्यति॥

(आक्षेपभाष्यम्)

किमेतन्निपातनं नाम?॥

(प्रतिबन्दीभाष्यम्)

अथ कः प्रतिषेधो नाम?॥

(प्रतिबन्धुत्तरभाष्यम्)

अविशेषेण किंचिदुक्त्वा विशेषेण 'न' इत्युच्यते, तत्र व्यक्तमाचार्यस्याभिप्रायो गम्यते-'इदं न भवति' इति॥

(समाधानभाष्यम्)

निपातनमप्येवजातीयकमेव। अविशेषेण णत्वमुक्त्वा विशेषेण निपातनं क्रियते, तत्र व्यक्तमाचार्यस्याभिप्रायो गम्यते-'इदं न भवति' इति॥

(आक्षेपभाष्यम्)

ननु च-निपातनाच्चाणत्वं स्यात्, यथाप्राप्तं च णत्वम्॥

(प्रतिबन्दीभाष्यम्)

किमन्येऽप्येवं विधयो (भवन्ति)?॥

(प्रतिबन्ध्युत्तरभाष्यम्)

भवन्ति॥

(आक्षेपभाष्यम्)

इह-'इको यणचि' इति वचनाद् यण् स्यात्। यथाप्राप्तश्चेक् श्रूयेत॥

(समाधानभाष्यम्)

नैष दोषः। अस्त्यत्र विशेषः। षष्ठ्यात्र निर्देशः क्रियते। षष्ठी च पुनः स्थानिनं निवर्तयति॥

(आक्षेपभाष्यम्)

इह तर्हि 'कर्तरि शप्' 'दिवादिभ्यः श्यन्' इति वचनाच्च श्यन् स्यात्। यथाप्राप्तश्च शप् श्रूयेत॥

(समाधानभाष्यम्)

नैष दोषः। शबादेशाः श्यन्नादयः करिष्यन्ते॥

(आक्षेपभाष्यम्)

तत् तर्हि शपो ग्रहणं कर्तव्यम्?॥

(आक्षेपबाधकभाष्यम्)

न कर्तव्यम्। प्रकृतमनुवर्तते॥

क्व प्रकृतम्?॥

'कर्तरि शप्' इति॥

(आक्षेपसाधकभाष्यम्)

तद्वै प्रथमानिर्दिष्टम्। षष्ठीनिर्दिष्टेन चेहार्थः॥

(आक्षेपबाधकभाष्यम्)

दिवादिभ्य इत्येषा पञ्चमी शबिति प्रथमायाः षष्ठीं प्रकल्पयिष्यति 'तस्मादित्युत्तरस्य' इति॥

(आक्षेपसाधकभाष्यम्)

प्रत्ययविधिरयम्। न च प्रत्ययविधौ पञ्चम्यः प्रकल्पिका भवन्ति॥

(आक्षेपबाधकभाष्यम्)

नायं प्रत्ययविधिः। विहितः प्रत्ययः। प्रकृतश्चानुवर्तते॥

(आक्षेपभाष्यम्)

इह तर्हि-अव्ययसर्वनाम्नामकच् प्राक् टेः' इति वचनाच्चाकच् स्याद्, यथाप्राप्तश्च कः श्रूयेत॥

(समाधानभाष्यम्)

नैष दोषः, नाप्राप्ते हि केऽकजारभ्यते, स बाधको भविष्यति॥

(सिद्धान्तिसमाधानभाष्यम्)

निपातनमप्येवंजातीयकमेव। नाप्राप्ते णत्वे निपातनमारभ्यते, तद्बाधकं भविष्यति॥

(आक्षेपभाष्यम्)

यदि तर्हि निपातनाप्येवंजातीयकानि भवन्ति, समस्तते दोषो भवति।

इहान्ये वैयाकरणाः समस्तते विभाषा लोपमारभन्ते-'समो हिततततयोर्वा' इति। सततम्-संततम्, सहितम्- संहितमिति।

इह पुनर्भवान्निपातनाच्च लोपमिच्छाति 'अपरस्पराः क्रियासातत्ये' इति। यथाप्राप्तं चालोपम्-संततमिति। एतन्न सिध्यति॥

(सिद्धान्तिसमाधानभाष्यम्)

कर्तव्योऽत्र यत्नः। बाधकान्येव हि निपातनानि भवन्ति॥

(संज्ञोपसर्जनवारणाधिकरणम्)

(२१५ आक्षेपवार्तिकम्॥२॥)

॥*॥ संज्ञोपसर्जनप्रतिषेधः॥*॥

संज्ञोपसर्जनीभूतानां सर्वादीनां प्रतिषेधो वक्तव्यः। सर्वो नाम कश्चित्तस्मै सर्वाय देहि। अतिसर्वाय देहि॥

(आक्षेपभाष्यम्)

स कथं कर्तव्यः?॥

(२१६ समाधानवार्तिकम्॥३॥)

॥*॥ पाठात्पर्युदासः पठितानां संज्ञाकरण्॥*॥

(भाष्यम्)

पाठादेव पर्युदासः कर्तव्यः। शुद्धानां पठितानां संज्ञा कर्तव्या। सर्वादीनि सर्वनामसंज्ञानि भवन्ति, संज्ञोपसर्जनीभूतानि न सर्वादीनि॥

(आक्षेपभाष्यम्)

किमविशेषेण?॥

(समाधानभाष्यम्)

नेत्याह। विशेषेण च॥

(भाष्यम्)

किं प्रयोजनम्?॥

(२१७ प्रयोजनवार्तिकम्॥४॥)

॥*॥ सर्वाद्यानन्तर्यकार्यार्थम्॥*॥

(भाष्यम्)

सर्वादीनामानन्तर्येण यदुच्यते कार्यं तदपि संज्ञोपसर्जनीभूतानां मा भूदिति॥

(प्रश्नभाष्यम्)

किं प्रयोजनम् ?॥

(२१८ प्रयोजनवार्तिकम्॥५॥)

॥*॥ प्रयोजनं डतरादीनामद्ड्भावे॥*॥

(भाष्यम्)

डतरादीनामद्ड्भावे प्रयोजनम्। अतिक्रान्तमिदं ब्राह्मणकुलं कतरद्-अतिकतरं ब्राह्मणकुलमिति॥

(२१९ प्रयोजनवार्तिम्॥६॥)

॥*॥ त्यदादिविधौ च॥*॥

(भाष्यम्)

त्यदादिविधौ च प्रयोजनम्। अतिक्रान्तोऽयं ब्राह्मणस्तम्=अतितद् ब्राह्मण इति॥

(संज्ञाप्रतिषेधप्रत्याख्यानभाष्यम्)

संज्ञाप्रतिषेधस्तावन्न वक्तव्यः। उपरिष्टाद्योगविभागः करिष्यते-'पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायाम्।' ततः-'असंज्ञायाम्' इति। सर्वादीनीत्येवं यान्यनुक्रान्तानि, असंज्ञायां तानि द्रष्टव्यानि॥

(उपसर्जनप्रतिषेधप्रत्याख्यानभाष्यम्)

उपसर्जनप्रतिषेधश्च न कर्तव्यः। 'अनुपसर्जनात्' इत्येष योगः प्रत्याख्यायते। तमेवमभिसंभन्त्स्यामः-अनुपसर्जन अ अदिति॥

किमिदम्=अ अदिति?॥

अकारात्कारौ शिष्यमाणावनुपसर्जनस्य द्रष्टव्यौ॥

(आक्षेपभाष्यम्)

यद्येवम् अतियुष्मद् अत्यस्मद् इति न सिध्यति॥

(समाधानभाष्यम्)

प्रश्लिष्टानिर्देशोऽयम्-अनुपसर्जन अ अ अदिति। अकाराद् अकारात्कारौ शिष्यमाणावनुपसर्जनस्य द्रष्टव्यौ॥

(एकदेशिसमाधानान्तरभाष्यम्)

अथवा-अङ्गाधिकारे यदुच्यते, गृह्यमाणविभक्तेस्तद्भवति॥

(समाधानबाधकभाष्यम्)

यद्येवम्, परमपञ्च परमसप्त 'षड्भ्यो लुग्' इति लुग् न प्राप्नोति॥

(समाधानसाधकभाष्यम्)

नैष दोषः। षट्प्रधान एष समासः॥

(समाधानबाधकभाष्यम्)

इह तर्हि-प्रियसक्थ्ना ब्राह्मणेन, अनङ् न प्राप्नोति॥

(समाधानसाधकभाष्यम्)

सप्तमीनिदिष्टे यदुच्यते, प्रकृतविभक्तौ तद्भवति॥

(समाधानबाधकभाष्यम्)

यद्येवम्, अतितद् अतितदौ अतितद इति अत्वं प्राप्नोति॥ तच्चापि वक्तव्यम्॥

(समाधानसाधकभाष्यम्)

न वक्तव्यम्। इह तावद्-'अद्ड्डतरादिभ्यः पञ्चभ्यः' इति पञ्चमी, अङ्गस्येति षष्ठी, तत्राशक्यं वि(भिन्न) विभक्तित्वाद् डतरादिभ्य इति पञ्चम्याऽङ्गं विशेषयितुम्। तत्र किमन्यच्छक्यं विशेषयितुमन्यदतो विहितात्प्रत्ययाद्-डतरादिभ्यो यो विहित इति॥

(समाधानसाधकभाष्यपरिशिष्टम्)

इहेदानीम्- 'अस्थिदधिसक्थ्यक्ष्णामनडुदात्तः' इति, त्यदादीनामो भवतीति। अस्थ्यादीनामित्येषा षष्ठी, अङ्गस्येत्यपि। त्यदादीनामित्यपि षष्ठी, अङ्गस्येत्यपि। तत्र कामचारः गृह्यमाणेन वा विभक्तिं विशेषणयितुमङ्गेन वा। यावता कामचारः। इह तावद्

'अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः' इत्यङ्गेन विभक्तिं विशेषयिष्यामः, अस्थ्यादिभिरनङम् अङ्गस्य विभक्तावनङ् भवति, अस्थ्यादीनामिति॥ इहेदानीं त्यदादीनामो भवतीति, गृह्यमाणेन विभक्तिं विशेषयिष्यामः, अङ्गेनाकारम्- त्यदादीनां विभक्तावो भवति, अङ्गस्येति॥

(समाधानबाधकभाष्यम्)

यद्येवम्, ' अतिसः' अत्वं न प्राप्नोति॥

(समाधानसाधकभाष्यम्)

नैष दोषः, त्यदादिप्रधान एष समासः॥

(सिद्धान्तिभाष्यम्)

अथवा-नेदं संज्ञाकरणम्, पाठविशेषणमिदम्-सर्वेषां यानि नामानि तानि सर्वादीनि। संज्ञोपसर्जने च विशेषेऽवतिष्ठेते॥

(समाधानबाधकभाष्यम्)

यद्येवम्, संज्ञाश्रयं यत्कार्यं तन्न सिध्यति-'सर्वनाम्नः स्मै' 'आमि सर्वनाम्नः सुट्' इति।

(समाधानसाधकभाष्यम्)

अन्वर्थग्रहणं तत्र विज्ञास्यते-सर्वेषां यन्नाम तत्सर्वनाम। सर्वनाम्न उत्तरस्य ङेः स्मै भवति। सर्वनाम्न उत्तरस्यामः सुड् भवति॥

(समाधानबाधकभाष्यम्)

यद्येवम्, सकलं कृत्स्नं जगदित्यत्रापि प्राप्नोति। एतेषां चापि शब्दानामेकैकस्य स स विषयः तस्मिंस्तस्मिन्विषये यो यः शब्दो वर्तते, तस्य तस्य तस्मिंतस्मिन्वर्तमानस्य सर्वनामकार्यं प्राप्नोति॥

(समाधानसाधकभाष्यम्)

एवं तर्ह्युभयमनेन क्रियते-पाठश्चैव विशेष्यते, संज्ञा च॥

(आक्षेपभाष्यम्)

कथं पुनरेकेन यत्नेनोभयं लभ्यम्?॥

(समाधानभाष्यम्)

लभ्यमित्याह।

(कथम् ?)॥

एकशेषनिर्देशात्॥

एकदेशनिर्देशोऽयम्-सर्वादीनि च सर्वादीनि च सर्वादीनि। सर्वनामानि च सर्वनामानि च सर्वनामानि। सर्वादीनि सर्वनामसंज्ञानि भवन्ति। सर्वेषां यानि च नामानि तानि सर्वादीनि। संज्ञोपसर्जने च विशेषेऽवतिष्ठेते॥

(समाधानान्तरभाष्यम्)

अथवा- महतीयं संज्ञा क्रियते। संज्ञा च नाम यतो न लघीयः॥

कुत एतत्?॥

लध्वर्थं हि संज्ञाकरणम्॥ तत्र महत्याः संज्ञायाः करणे एतत्प्रयोजनम्-अन्वर्थसंज्ञा यथा विज्ञायेत- सर्वादीनि सर्वनामसंज्ञानि भवन्ति। सर्वेषां नामानीति चातः सर्वनामानि। संज्ञोपसर्जने च विशेषेऽवतिष्ठेते॥

(उभयशब्दपाठप्रयोजनाधिकरणम्)

(आक्षेपभाष्यम्)

अथोभस्य सर्वनामत्वे कोऽर्थः?॥

(२२० समाधानवार्तिकम्॥७॥)

॥*॥ उभस्य सर्वनामत्वेऽकजर्थः॥*॥

(भाष्यम्)

उभस्य सर्वनामत्वेऽकजर्थः पाठः क्रियते। उभकौ॥

(आक्षेपभाष्यम्)

किमुच्यतेऽकजर्थ इति। न पुनरन्यान्यपि सर्वनामकार्याणि ?॥

(२२१ समाधानहेतुवार्तिकम्॥८॥)

॥*॥ अन्याभावो द्विवचनटाब्विषयत्वात्॥*॥

अन्येषां सर्वनामकार्याणामभावः॥

किं कारणम्?॥

द्विवचनटाब्विषयत्वात्। उभशब्दोऽयं द्विवचनटाब्विषयः। अन्यानि च सर्वनामकार्याण्येकवचनबहुवचनेषूच्यन्ते॥

(आक्षेपभाष्यम्)

यदा पुनरयमुभशब्दो द्विवचनटाब्विषयः। क इदानीमस्यान्यत्र भवति?॥

(२२२ समाधानवार्तिकम्॥९॥)

॥*॥ उभयोऽन्यत्र॥*॥

(भाष्यम्)

उभयशब्दोऽस्यान्यत्र भवति। उभये देवमनुष्याः, उभयो मणिरिति।

(आक्षेपभाष्यम्)

किंच स्याद् यद्यत्राकज् न स्यात्?॥

(समाधानभाष्यम्)

कः प्रसज्येत॥

(आक्षेपभाष्यम्)

कश्चेदानीं काकचोविशेषः?॥

(समाधानभाष्यम्)

'उभशब्दोऽयं द्विवचनटाब्विषयः' इत्युक्तम्। तत्राकचि सत्यकचस्तन्मध्यपतितत्वाच्छक्यते एतद्वक्तुं-द्विवचनपरोऽयमिति। के पुनः सति नायं द्विवचनपरः स्यात्। तत्र द्विवचनपरता वक्तव्या॥

(आक्षेपभाष्यम्)

यथैव तर्हि के सति नायं द्विवचनपरः, एवमाप्यपि सति नायं द्विवचनंपरः स्यात्। तत्रापि द्विवचनपरता वक्तव्या॥

(२२३ समाधानवार्तिकम्॥१०॥)

॥*॥ अवचनादापि तत्परविज्ञानम्॥*॥

(भाष्यम्)

अन्तरेणापि वचनमापि द्विवचनपरोऽयं भविष्यति॥

(आक्षेपभाष्यम्)

किं वक्तव्यमेतत्?॥

(समाधानभाष्यम्)

न हि॥

(आक्षेपभाष्यम्)

कथमनुच्यमानं गंस्यते?॥

(समाधानभाष्यम्)

एकादेशे कृते द्विवचनपरोऽयमन्तादिवद्भावेन॥

(२२४ प्रत्याख्यानवार्तिकम्॥११॥)

॥*॥ अवचनादापि तत्परविज्ञानमिति चेत्केऽपि तुल्यम्॥*॥

(भाष्यम्)

अवचनादापि तत्परविज्ञानमिति चेत्केऽपि अन्तरेण वचनं द्विवचनपरो भविष्यति॥

कथम्?॥

'स्वार्थिकाः प्रत्ययाः प्रकृतितोऽविशिष्टा भवन्ति' इति प्रकृतिग्रहणेन स्वार्थिकानामपि ग्रहणं भवति॥

(भवच्छब्दस्य गणे पाठप्रयोजनाधिकरणम्)

(आक्षेपभाष्यम्)

अथ भवतः सर्वनामत्वे कानि प्रयोजनानि?॥

(२२५ समाधानवार्तिकम्॥१२॥)

॥*॥ भवतोऽकच्छेषात्वानि॥*॥

(भाष्यम्)

भवतोऽकच्छेषात्वानि प्रयोजनानि॥ अकच्भवकान्॥ शेषः स च भवांश्च भवन्तौ॥ आत्वम्भवादृगिति॥

(आक्षेपभाष्यम्)

किं पुनरिदं परिगणनम्, आहोस्विदुदाहरणमात्रम्?॥

(समाधानभाष्यम्)

उदाहरणमात्रमित्याह तृतीयादयोऽपि दृश्यन्ते। 'सर्वनाम्नस्तृतीया च'- भवता हेतुना, भवतो हेतोरिति। सर्वादीनि॥२३॥

(२५ सर्वनामसंज्ञासूत्रम्॥१।१।६ आ. २॥)

विभाषा दिक्समासे बहुव्रीहौ॥१।१।२७॥

(तत्तत्पदप्रयोजनाधिकरणम्)

(आक्षेपभाष्यम्)

दिग्ग्रहणं किमर्थम्?॥

(समाधानभाष्यम्)

'न बहुव्रीहौ' इति प्रतिषेधं वक्ष्यति। तत्र न ज्ञायते- 'क्व विभाषा, क्व प्रतिषेध' इति। दिग्ग्रहणे पुनः क्रियमाणे न दोषो भवति- 'दिगुपदिष्टे विभाषा, अन्यत्र प्रतिषेधः'॥

(आक्षेपभाष्यम्)

अथ समासग्रहणं किमर्थम्?॥

(समाधानभाष्यम्)

समास एव यो बहुव्रीहिस्तत्र यथा स्याद्। बहुव्रीहिद्भावेन यो बहुव्रीहिस्तत्र मा भूदिति। दक्षिणदक्षिणस्यै देहि॥

(आक्षेपभाष्यम्)

अथ बहुव्रीहिग्रहणं किमर्थम्?॥

(समाधानभाष्यम्)

द्वन्द्वे मा भूत्-दक्षिणोत्तरपूर्वाणामिति?॥

(समाधाननिराकरणभाष्यम्)

नैतदस्ति प्रयोजनम् 'द्वन्द्वे च' इति प्रतिषेधो भविष्यति.

(समाधानसाधकभाष्यम्)

नाप्राप्ते प्रतिषेधे इयं विभाषा आरभ्यते। सा यथैव 'न बहुव्रीहौ' इत्येतं प्रतिषेधं बाधते। एवं 'द्वन्द्वे च' इत्येतमपि बाधेत॥

(समाधानबाधकभाष्यम्)

न बाधते॥

किं कारणम्?॥

येन नाप्राप्ते तस्य बाधनं भवति। न चाप्राप्ते 'न बहुव्रीहौ' इत्येतस्मिन्नप्रतिषेधे इयं विभाषा आरभ्यते। 'द्वन्द्वे च' इत्येतस्मिन् पुनः प्राप्ते चाप्राप्ते च॥

(समाधानबाधकान्तरभाष्यम्)

अथवा 'पुरस्तादपवादाअनन्तरान्विधीन् बाधन्ते, नोत्तरान्' इत्येवमियं विभाषा 'न बहुव्रीहौ' इत्येतं प्रतिषेधं बाधिष्यते, 'द्वन्द्वे च' इत्येतं प्रतिषेधं न बाधिष्यते॥

(समाधानबाधकान्तरभाष्यम्)

अथवेदं तावदयं प्रष्टव्यः,- इह कस्मान्न भवति-या पूर्वा सोत्तरा अस्योन्मुग्धस्य सोयं पूर्वोत्तर ऊन्मुग्धः तस्मै पूर्वोत्तराय देहीति?॥ लक्षणप्रतिषेदोक्तयोः प्रतिपदोक्तस्यैवेति॥

(उपसंहारप्रत्याख्यानभाष्यम्)

यद्येवं नार्थो बहुव्रीहिग्रहणेन॥

(आक्षेपभाष्यम्)

द्वन्द्वे कस्मान्न भवति?॥

(समाधानभाष्यम्)

लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति॥

(प्रयोजनान्तरभाष्यम्)

उत्तरार्थं तर्हि बहुव्रीहिग्रहणं कर्तव्यम्॥

(बाधकभाष्यम्)

न कर्तव्यम्। क्रियते तत्रैव- 'न बहुव्रीहौ' इति॥

(साधकभाष्यम्)

द्वितीयं कर्तव्यम्। बहुव्रीहिरेव यो बहुव्रीहिस्तत्रैव यथा स्यात्। बहुव्रीहिवद्भावेन यो बहुव्रीहिस्तत्र मा भूत्-एकैकस्मै देहि॥

(बाधकभाष्यम्)

एतदपि नास्ति प्रयोजनम्। समास इति वर्तते। तेन बहुव्रीहि विशेषयिष्यामः- समासो यो बहुव्रीहिरिति॥

(एकदेशिभाष्यम्)

इदं तर्हि प्रयोजनम्- अवयवभूतस्याऽपि बहुव्रीहेः प्रतिषेधो यथा स्यात्, इह मा भूत्- वस्त्रमन्तरमेषां त इमे वस्त्रान्तराः वसनमन्तरमेषां त इमे वसनान्तराः वस्त्रान्तराश्च वसनान्तराश्च वस्त्रान्तरवसनान्तराः॥ विभाषादिक्समासे॥२७॥

(२६ सर्वनामसंज्ञानिषेधसूत्रम्॥१।१।६ आ. ३॥)

न बहुव्रीहौ॥१।१।२८॥

(सूत्रप्रयोजनाधिकरणम्)

(आक्षेपभाष्यम्)

किमुदाहरण्?॥

(समाधानभाष्यम्)

प्रियविश्वाय॥

(समाधानबाधकभाष्यम्)

नैतदस्ति प्रयोजनम्। सर्वाद्यन्तस्य बहुव्रीहेः प्रतिषेधेन भवितव्यम्। वक्ष्यति चैतत्-बहुव्रीहौ सर्वनामसंख्ययोरुपसंख्यानम् इति। तत्र विश्वप्रियायेति भवितव्यम्॥

(समाधानान्तरभाष्यम्)

इदं तर्हि-व्यन्याय त्र्यन्याय॥

(समाधानबाधकभाष्यम्)

ननु चात्रापि सर्वनाम्न एव पूर्वनिपातेन भवितव्यम्॥

(समाधानसाधकभाष्यम्)

नैष दोषः। वक्ष्यत्येतत्,-संख्यासर्वनाम्नोर्यो बहुव्रीहिः परत्वात्तत्र संख्यायाः पूर्वनिपातो भवतीति॥

(पूर्वोक्तसमाधानाभ्युपगमभाष्यम्)

इदं चाप्युदाहरणम्-प्रियविश्वाय॥

(बाधकस्मारणम्)

ननु चोक्तम्- विश्वप्रियायेति भवितव्यमिति॥

(बाधकनिराकरणभाष्यम्)

वक्ष्यत्येतत्- वा प्रियस्य इति।

(मन्तान्तरप्रदर्शनभाष्यम्)

न खल्वप्यवश्यं सर्वाद्यन्तस्यैव बहुव्रीहेः प्रतिषेधेन भवितव्यम्॥

किं तर्हि?॥

असर्वाद्यन्तस्यापि भवितव्यम्॥

किं प्रयोजनम्?॥

अकज् मा भूदिति॥

(आक्षेपभाष्यम्)

किंच स्याद् यद्यत्राकच् स्यात्?॥

(समाधानभाष्यम्)

को न स्यात्॥

(आक्षेपभाष्यम्)

कश्चेदानीं काकचोर्विशेषः?॥

(समाधानभाष्यम्)

व्यञ्जनान्तेषु विशेषः-अहकं पिता यस्य मकत्पितृकः त्वकं पिता यस्य त्वकत्पितृक इति प्राप्नोति॥ मत्कपितृकः त्वत्कपितृक इति चेष्यते॥

(आक्षेपभाष्यम्)

कथं पुनरिच्छताऽपि भवता बहिरङ्गेण प्रतिषेधेनान्तरङ्गो विधिः शक्यो बाधितुम्?॥

(समाधानभाष्यम्)

अन्तरङ्गानपि विधीन् बहिरङ्गो विधिर्बाधते गोमत्प्रिय इति यथा॥

(दृष्टान्तवैषम्येण समाधानबाधकभाष्यम्)

क्रियते तत्र यत्नः-'प्रत्ययोत्तरपदयोश्च' इति॥

(दृष्टान्तसाम्येन समाधानसाधकभाष्यम्)

ननु चेहापि क्रियते-'न बहुव्रीहौ' इति॥

(वैयर्थ्यपरिहारेण समाधानबाधकभाष्यम्)

अस्त्यन्यदेतस्य वचने प्रयोजनम्॥

किम्?॥

प्रियविश्वाय॥

(वैयर्थ्यस्थित्या समाधानसाघकभाष्यम्)

उपसर्जनप्रतिषेधेनाप्येतत्सिद्धम्॥

(मन्तारेण सामाधान्तरभाष्यम्)

अयं खल्वपि बहुव्रीहिरस्त्येव प्राथमकल्पिकः। यस्मिन्नैकपद्यमैकस्वर्यमेकविभक्तिकत्वं च। अस्ति तादर्थ्यात्ताच्छब्द्यम्-बहुव्रीह्यर्थानि पदानि बहुव्रीहिरिति। तद्यत्तादर्थ्याच्छब्द्यं तस्येदं ग्रहणम्॥

(प्रत्याख्यानभाष्यम्)

गोनर्दीयस्वाह-

'अकच्स्वरौ तु कर्तव्यौ प्रत्यङ्गं मुक्तसंशयौ।'

त्वकत्पितृको मकत्पितृक इत्येव भवितव्यमिति॥

(न्यूनतापरिहाराधिकरणम्)

(२२६ आक्षेपवार्तिकम्॥१॥)

॥*॥ प्रतिषेधे भूतपूर्वस्योपसंख्यानम्॥*॥

प्रतिषेधे भूतपूर्वस्योपसंख्यानं कर्तव्यम्। आढ्योभूतपूर्व आढ्यपूर्वः आढ्यपूर्वाय देहीति॥

(२२७ आक्षेपसमाधानवार्तिकम्॥२॥)

॥*॥ प्रतिषेधे भूतपूर्वस्योपसंख्यानानर्थक्यं पूर्वादीनां व्यवस्थायामिति वचनात्॥*॥

(भाष्यम्)

प्रतिषेधे भूतपूर्वस्योपसंख्यानमनर्थकम्॥

किं कारणम्?॥

पूर्वादीनां व्यवस्थायामितिवचनात्।

पूर्वादीनां व्यवस्थायां सर्वनामसंज्ञोच्यते। न चात्र व्यवस्था गम्यते॥ न बहुव्रीहौ॥२८॥

(२७ सर्वानामसंज्ञानिषेधसूत्रम्॥१।१।६ आ. ४॥)

तृतीयासमासे॥१।१।२९॥

(इष्टानुपपतिनिराकरणाधिकरणम्)

(आक्षेपभाष्यम्)

समास इति वर्तमाने पुनः समासग्रहणं किमर्थम्?॥

(समाधानभाष्यम्)

अयं तृतीयासमासोस्त्येव प्राथमकल्पिकः। यस्मिन्नैकपद्यमैकस्वर्यमेकविभक्तिकत्वं चेति। अस्ति च तादर्थ्यात्तात्च्छब्द्यम्-तृतीयासमासार्थानि पदानि तृतीयासमास इति। तद्यत्तार्थ्यात्तादच्छब्द्यं तस्येदं ग्रहणम्॥

(समाधानान्तरभाष्यम्)

अथवा समास इति वर्तमाने पुनः समासग्रहणस्यैतत्प्रयोजनम्- योगाङ्गं यथोपजायेत। सति च योगाङ्गे योगविभागः करिष्यते- 'तृतीया' तृतीयासमासे सर्वादीनि

सर्वनामसंज्ञानि न भवन्ति। मासपूर्वाय देहि, तृतीयायाः सर्वादीनि सर्वनामसंज्ञानि न भवन्ति। मासेन पूर्वाय देहि, संवत्सरेण पूर्वाय देहीति॥ तृतीया स- ॥२९॥

(२८ द्वन्दे सर्वनामसंज्ञाविकल्पसूत्रम्॥१।१।६ आ. ५॥)

विभाषा जसि॥१।१।३१॥

(अनिष्टापत्तिनिराकरणाधिकरणम्)

(भाष्यम्)

जसः कार्यं प्रति विभाषा॥ अकज्झि न भवति, ['द्वन्दे च' इति प्रतिषेधात्]॥ विभाषा जसि॥३१॥

(२९ जसि सर्वनामसंज्ञाविकल्पनसूत्रम् ॥१।१।६ आ. ६॥)

पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम्॥१।१।३३॥

(गणपाठ-सूत्रपाठयोः कालनिर्णयाधिकरणम्)

(२२८ आक्षेपवार्तिकम्॥१॥)

॥*॥ अवरादीनां च पुनः सूत्रपाठे ग्रहणानर्थक्यं गणे पठितत्वात्॥*॥

(भाष्यम्)

अवरादीनां च पुनः सूत्रपाठे ग्रहणमनर्थकम्।

किं कारणम्?॥

गणे पठित्वाद्।

गणे ह्येतानि पठ्यन्ते॥

(आक्षेपबाधकभाष्यम्)

कथं पुनर्ज्ञायते- स पूर्वः पाठः, अयं पुनः पाठ इति?॥

(आक्षेपसाधकभाष्यम्)

तानि हि पूर्वादीनि इमान्यवरादीनि॥

(आक्षेपबाधकभाष्यम्)

इमान्यपि पूर्वादीनि॥

(आक्षेपसाधकभाष्यम्)

एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति- 'स पूर्वः पाठः, अयं पुनः पाठः' इति। यदयं 'पूर्वादिभ्यो नवभ्यो वा' इति नवग्रहणं करोति। नवैव हि पूर्वादीनि॥

(समाधानभाष्यम्)

इदं तर्हि प्रयोजनम्- व्यवस्थायामसंज्ञायामिति वक्ष्यामीति॥

(समाधानबाधकभाष्यम्)

एतदपि नास्ति प्रयोजनम्। एवंविशिष्टान्येवैतानि गणे पठयन्ते॥

(समाधानभाष्यम्)

इदं तर्हि प्रयोजनम्- द्व्यादिपर्युदासेन पर्युदासो मा भूदिति॥

(समाधानबाधकभाष्यम्)

एतदपि नास्ति प्रयोजनम्। आचार्यप्रवृत्तिर्ज्ञापयति- नैषां द्व्यादिपर्युदासेन पर्युदासो भवतीति। यदयं 'पूर्वत्रासिद्धम्' इति निपातनं करोति॥ वार्तिककारश्च पठति*जश्भावादिति चेदुत्तरत्राभावादपवादप्रसङ्ग* इति॥

(समाधानभाष्यम्)

इदं तर्हि प्रयोजनम्-जसि विभाषां वक्ष्यामीति॥ पूर्वपरावरदक्षिणोत्तरापराधराणि॥३३॥

(३० सर्वनामसंज्ञाविकल्पनसूत्रम्॥१।१।६॥ आ. ७॥)

स्वमज्ञातिधनाख्यायाम्॥१।१।३४॥

(आख्याग्रहणप्रयोजनाधिकरणम्)

(आक्षेपभाष्यम्)

आख्याग्रहणं किमर्थम्?॥

(समाधानभाष्यम्)

ज्ञातिधनपर्यायवाची यः स्वशब्दस्तस्य यथा स्याद्। इह मा भूत्-स्वे पुत्राः स्वाः पुत्राः, स्वे गावः स्वा गावः॥ स्वमज्ञातिधनाख्यायाम्॥३५॥

(३१ सर्वनामसंज्ञाविकल्पनसूत्रम्॥१।१।६ आ. ८॥)

अन्तरं बहिर्योगोपसंव्यानयोः॥१।१।३५॥

(उपसंव्यानग्रहणप्रयोजनाधिकरणम्)

(२२९ प्रत्याख्यानाक्षेपवार्तिकम्॥१॥)

॥*॥ उपसंव्यानग्रहणमनर्थकं बहिर्योगेण कृतत्वात्॥*॥

(भाष्यम्)

उपसंव्यानग्रहणमनर्थकम्।

किं कारणम्?॥

‘बहिर्योगेण कृतत्वात्। बहिर्योग इत्येव सिद्धम्॥

(२३० प्रत्याख्यानबाधकवार्तिकम्॥२॥)

॥*॥ न वा शाटकयुगाद्यर्थम्॥*॥

(भाष्यम्)

न वाऽनर्थकम्।

किं कारणम्?।

'शाटकयुगाद्यर्थम्'। शाटकयुगाद्यर्थं तर्हीदं वक्तव्यम्। यत्रैतन्न ज्ञायते- किमन्तरीयं किमुत्तरीयमिति॥

(प्रत्याख्यानसाधकभाष्यम्)

अत्रापि य एष मनुष्यः प्रेक्षापूर्वकारी भवति। निर्ज्ञातं तस्य भवति- इदमन्तरीयमिदमुत्तरीयमिति॥

(अनिष्टापत्तिपरिहाराधिकरणम्)

(२३१ आक्षेपवार्तिकम्॥३॥)

॥*॥ अपुरि॥*॥

(भाष्यम्)

अपुरीति वक्तव्यम्। इह मा भूत्- अन्तरायां पुरि वसति॥

(इष्टानुपपत्तिनिराकरणाधिकरणम्)

(२३२ आक्षेपवार्तिकम्॥४॥)

*** वाप्रकरणे तीयस्य ङित्सूपसंख्यानम्***

(भाष्यम्)

वाप्रकरणे तीयस्य ङित्सूपसंख्यानं कर्तव्यम्। द्वितीयायै द्वितीयस्यै, तृतीयस्यै। 'विभाषा द्वितीयातृतीयाभ्याम्' इत्येतन्न वक्तव्यं भवति॥

(आक्षेपभाष्यम्)

किं पुनरत्र ज्यायः ?॥

(समाधानभाष्यम्)

उपसंख्यानमेवाऽत्र ज्यायः। इदमपि सिद्धं भवति-द्वितीयाय द्वितीयस्मै, तृतीयाय तृतीयस्मै॥ अन्तरं बहिर्योगोपसंव्यानयोः॥३५॥

(इति सर्वनामसंज्ञाप्रकरणम्)

(अथाव्ययसंज्ञाप्रकरणम्)

(३२ अव्ययसंज्ञासूत्रम् ॥१।१।६॥ आ. ९॥)

स्वरादिनिपातमव्ययम्॥१।१।३६॥

(स्वरादीनां चादिभ्यः पृथक्करणप्रयोजनाधिकरणम्)

(आक्षेपभाष्यम्)

किमर्थं पृथग् ग्रहणं स्वरद्दीनां क्रियते, न चादिष्वेव पठ्येरन्?॥

(समाधानभाष्यम्)

चादीनां वै असत्त्ववचनानां निपातसंज्ञा, स्वरादीनां पुनः सत्त्ववचनानामसत्त्ववचनानां च॥

(निपाताव्ययसंज्ञयोः पृथक्करणप्रयोजनाधिकरणम्)

(आक्षेपभाष्यम्)

अथ किमर्थमुभे संज्ञे, क्रियेते, न निपातसंज्ञैव स्यात्॥

(समाधानभाष्यम्)

नैवं शक्यम्। 'निपात एकाजनाङ्' इति प्रगृह्यसंज्ञोक्ता, सा स्वरादीनामप्येकाचां प्रसज्येत [-क्व इव क्वेव]॥

(आक्षेपभाष्यम्)

एवं तर्ह्यव्ययसंज्ञैवास्तु॥

(समाधानभाष्यम्)

तच्चाशक्यम्। वक्ष्यत्येतत्- अव्यये नञ्कुनिपातानाम् इति। तद्गरीयसा न्यासेन परिगणनं कर्तव्यं स्यात्। तस्मात् पृथग् ग्रहणं कर्तव्यम्। उभे च संज्ञे कर्तव्ये॥ स्वरादि निपात॰ ॥३६॥

(३३ अव्ययसंज्ञासूत्रम् ॥१।१।६ आ० १०॥)

तद्धितश्चासर्वविभक्तिः॥१।१।३७॥

(इष्टानुपपत्तिपरिहाराधिकरणम्)

(२३३ आक्षेपवार्तिकप्रथमखण्डम्॥)

॥*॥ असर्वविभक्तावविभक्तिनिमित्तस्योपसंख्यानम् ॥*॥

(भाष्यम्)

असर्वविभक्तावविभक्तिनिमित्तस्योपसंख्यानं कर्तव्यम्॥ विना नाना॥

(आक्षेपभाष्यम्)

किं पुनः कारणं न सिध्यति?॥

(२३३(२) आक्षेपहेतुवार्तिकद्वितीयखण्डम्॥२॥)

॥*॥ सर्वविभक्तिर्ह्यविशेषात्॥*॥

(भाष्यम्)

सर्वविभक्तिर्ह्येष भवति॥

किं कारणम्?॥

अविशेषेण विहितत्वात्॥

(२३४ आक्षेपवार्तिकम्॥३॥)

॥*॥ त्रलादीनां चोपसंख्यानम्॥*॥

(भाष्यम्)

त्रलादीनां चोपसंख्यानं कर्तव्यम्। तत्र यत्र ततः यतः॥

(आक्षेपबाधकभाष्यम्)

ननु च विशेषेणैते विधीयन्ते 'पञ्चम्यातसिल्' 'सप्तम्यास्त्रल्' इति।

(आक्षेपसाधकभाष्यम्)

वक्ष्यत्येतद्- 'इतराभ्योऽपि दृश्यन्ते' इति॥

(न्यासान्तरनिराकरणाधिकरणम्)

(न्यासान्तरभाष्यम्)

यदि पुनरविभक्तिश्शब्दोऽव्ययसंज्ञो भवतीत्युच्यते॥

(२३५ आक्षेपवार्तिकम्॥४॥)

॥*॥ अविभक्तावितरेतराऽऽश्रयत्वादप्रसिद्धिः॥*॥

(भाष्यम्)

अविभक्तावितरेतराश्रयत्वादप्रसिद्धिः संज्ञायाः।

का इतरेतराश्रयता?।

सत्यविभक्तित्वे संज्ञया भवितव्यं, संज्ञया चाऽविभक्तित्वं भाव्यते, तदेतदितरेतराश्रयं भवति। इतरेतराश्रयाणि च कार्याणि न प्रकल्पन्ते॥

(२३६ न्यासान्तरदूषकवार्तिकम् ॥५॥)

॥*॥ अलिङ्गमसंख्यमिति वा॥*॥

अथवाऽलिङ्गमसंख्यमव्ययसंज्ञं भवतीति वक्तव्यम्॥ एवमपीतरेतराश्रयमेव भवति॥

का इतरेतराश्रयता?।

सत्यलिङ्गासंख्यत्वे संज्ञया भवितव्यम्, संज्ञया चालिङ्गासंख्यत्वं भाव्यते, तदेतदितरेतराश्रयं भवति। इतरेतराश्रयाणि च कार्याणि न प्रकल्पन्ते॥

(दूषणपरिहारभाष्यम्)

नेदं वाचनिकम्-अलिङ्गता असंख्यता च।

किं तर्हि?॥

स्वाभाविकमेतत्। तद्यथा समानमीहमानानां चाधीयानानां च केचिदर्थैर्युज्यन्ते अपरे न। तत्र किमस्माभिः कर्तुं शक्यम्। स्वाभाविकमेतत्॥

(आक्षेपभाष्यम्)

तत्तर्हि वक्तव्यम्-अलिङ्गमसंख्यमिति॥

(समाधानभाष्यम्)

न वक्तव्यम्।

(२३७ समाधानहेतुवार्तिकम्॥५॥)

॥*॥ सिद्धं तु पाठात्॥*॥

(भाष्यम्)

पाठाद्वा सिद्धमेतत्॥

कथं पाठः कर्तव्यः?॥

तसिलादयः प्राक् पाशपः। शस्प्रभृतयः प्राक् समासान्तेभ्यः। मान्तः। तसिबती। कृत्वोऽर्थः। नानाञाविति।

(प्रथमन्यासाङ्गीकरणभाष्यम्)

अथवा पुनरस्तु- अविभक्तिश्शब्दोऽव्ययसंज्ञो भवतीत्येव॥

(आक्षेपस्मारणभाष्यम्)

ननु चोक्तम्- अविभक्तावितरेतराश्रयत्वादप्रसिद्धिरिति॥

(आक्षेपबाधकभाष्यम्)

नैष दोषः। इदं तावदयं प्रष्टव्यः- 'यद्यपि तावद्वैयाकरणा विभक्तिलोपमारभमाणा अविभक्तिकाञ्छब्दान्प्रयुञ्जते। ये त्वेते वैयाकरणेभ्योऽन्ये मनुष्याः कथं तेऽविभक्तिकाञ्छब्दान्प्रयुञ्जते'। ये त्वेते वैयाकरणभ्योऽन्ये मनुष्याः कघं तेऽविभक्तिकाञ्ह्बब्दाप्रयुञ्जते' इति ? अभिज्ञाश्च पुनर्लौकिका एकत्वादीनामर्थानाम्॥

अतश्चाभिज्ञाः। अन्येन हि वस्त्रनैकं गां क्रीणन्ति, अन्येन द्वौ, अन्येन त्रीन्। अभिज्ञाश्च न च प्रयुञ्जते। तदेतदेवं संदृश्यताम्-अर्थरूपमेवैतदेवंजातीयकं येनात्र विभक्तिर्न भवतीति॥

(उपपत्तिभाष्यम्)

तच्चाप्येतदेवमनुगम्यमानं दृश्यताम्-किंचिदव्ययं विभक्त्यर्थप्रधानं, किंचित् क्रियाप्रधानम्। उच्चैर्नीचैरिति विभक्त्यर्थप्रधानम्, हिरुक् पृथगिति क्रियाप्रधानम्। तद्धितश्चापि कश्चिद् विभक्त्यर्थप्रधानः, कश्चित् क्रियाप्रधानः। तत्र यत्रेति विभक्त्थप्रधानः, विनानानेति क्रियाप्रधानः। न चैतयोरर्थयोर्लिङ्गसंख्याभ्यां योगोऽति॥

(सूत्रसमर्थनभाष्यम्)

अथाऽप्यसर्वविभक्तिरित्युच्यते। एवमपि न दोषः।

कथम्?॥

इदं चाऽप्यद्यत्वे अतिबहु क्रियते-एकस्मिन्नेकवचनम्, द्वयोर्द्विबहुवचनम्, बहुषु बहुवचनमिति।

कथं तर्हि?॥

एकवचनमुत्सर्गः करिष्यते। तस्य द्विबह्वोरर्थयोर्द्विवचनबहुवचने बाधके भविष्यतः॥

(मतान्तरभाष्यम्)

न चाप्येवं विग्रहः करिष्यते- न सर्वा असर्वाः, असर्वा विभक्तयो यस्मादिति॥

कथं तर्हि?॥

न सर्वा असर्वा, असर्वा विभक्तिरस्मादिति॥ त्रिकं पुनर्विभक्तिसंज्ञम्॥

(लाघवभाष्यम्)

एवं गते कृत्यपि तुल्यमेतन्मान्तस्य कार्यं ग्रहणं न तत्र।

ततः परे चाभिमता न कार्यास्त्रयः कृदर्था ग्रहणेन योगाः॥१॥

(गौरवप्रदर्शकभाष्यम्)

'कृत्तद्धितानां ग्रहणं तु कार्यं

संख्याविशेषं ह्यभिनिश्चिता ये।'

तेषां प्रतिषेधो भवतीति वक्तव्यम्। इह मा भूत्- एको द्वौ बहव इति।

(उपसंहारभाष्यम्)

' तस्मात् स्वरादिग्रहणं च कार्यं

कृत्तद्धितानां ग्रहणं च पाठे॥२॥

(आक्षेपभाष्यम्)

पाठेनेयमव्ययसंज्ञा क्रियते। सेह न प्राप्नोति- परमोच्चैः परमनीचैरिति॥

(समाधानभाष्यम्)

तदन्तविधिना भविष्यति।

(आक्षेपभाष्यम्)

इहापि तर्हि प्राप्नोति- अत्युच्चैः अत्युच्चैसौ अत्युच्चैस इति॥

(आक्षेपबाधकभाष्यम्)

उपसर्जनस्य नेति प्रतिषेधो भविष्यति।

(आक्षेपभाष्यम्)

स तर्हि प्रतिषेधो वक्तव्यः॥

(आक्षेपभाष्यम्)

न वक्तव्यः! सर्वनामसंज्ञायां प्रकृतः प्रतिषेध इहानुवर्तिष्यते।

(आक्षेपसाधकभाष्यम्)

स वै तत्र प्रत्याख्यायते।

(समाधानभाष्यम्)

यथा स तत्र प्रत्याख्यायते। इहापि तथा शक्यः प्रत्याख्यातुम्॥

(अनुयोगभाष्यम्)

कथं च स तत्र प्रत्याख्यते?॥

(समाधानभाष्यम्)

महतीयं संज्ञा क्रियत इति॥ इयमपि च महती संज्ञा क्रियते। संज्ञा च नाम यतो न लघीयः॥

कुत एतत्?॥

लध्वर्थं हि संज्ञाकरणम्। तत्र महत्याः संज्ञायाः करण एतत्प्रयोजनम्- अन्वर्था संज्ञा यथा विज्ञायेत- न व्येतीत्यव्ययमिति॥

(अनुयोगभाष्यम्)

क्व पुनर्न व्येति?॥

(समाधानभाष्यम्)

स्त्रीपुन्नपुंसकानि सत्त्वगुणाः, एकत्वद्वित्वबहुत्वानि च। एतानर्थान् केचिद्वियन्ति केचिन्न वियन्ति। ये न वियन्ति तदव्ययम्॥

‘ सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु।

वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्॥१॥

तद्धितश्चासर्वविभक्तिः॥३७॥

(३४ अव्यसंज्ञासूत्रम्)

कृन्मेजन्तः॥१।१।३८॥

(मेजन्तपदे विशेषणताविचाराधिकरणम्)

(आक्षेपभाष्यम्)

कथंमिदं विज्ञायते- कृद्यो मान्त इति, आहोस्वित्- कृदन्तं यन् मान्तमिति॥

किं चात्?॥

यदि विज्ञायते- कृद्यो मान्त इति, ' कारयांचकार हारयांचकारे'त्यत्र न प्राप्नोति॥

अथ विज्ञायते-कृदन्तं यन्मान्तमिति, 'प्रतामौ प्रतामः' अत्रापि प्राप्नोति॥

(समाधानभाष्यम्)

यथेच्छसि तथास्तु। अस्तु तावत्-कृद्यो मान्त इति॥

(आक्षेपभाष्यम्)

कथं कारयांचकार हारयांचकारेति?॥

(प्रत्याक्षेपभाष्यम्)

किं पुनरत्राव्ययसंज्ञया प्रार्थ्यते?॥

(प्रत्याक्षेपसमाधानभाष्यम्)

'अव्ययात्' इति लुग् यथा स्यादिति॥

(समाधानबाधकभाष्यम्)

मा भूदेवम्। 'आमः' इत्येवं भविष्यति॥

(समाधानसाधकभाष्यम्)

न सिध्यति। लिग्रहणं तत्रानुवर्तते॥

(समाधानबाधकभाष्यम्)

लिग्रहणं [तत्र] निवर्तिष्यते॥

(समाधानबाधकभाष्यम्)

यदि निवर्तते, प्रत्ययमात्रस्य लुक् प्राप्नोति॥

(समाधानबाधकभाष्यम्)

इष्यते च प्रत्ययमात्रस्य। आतश्चेष्यते। एवं ह्याह-'कृञ्चानुप्रयुज्यते लिटि' इति। यदि च प्रत्ययमात्रस्य लुग्भवति तत एतदुपपन्नं भवति॥

(पक्षान्तरभाष्यम्)

अथवा पुनरस्तु-कृदन्तं यन्मान्तमिति।

(आक्षेपभाष्यम्)

कथं प्रतामौ- प्रताम इति?।

(समाधानभाष्यम्)

आचार्यप्रवृत्तिर्ज्ञापयति-'न प्रत्ययलक्षणेनाव्ययसंज्ञा भवति' इति। यदयं प्रशान्शब्दं स्वरादिषु पठति॥

(संनिपातपरिभाषाधिकरणम्)

(२३८ आक्षेपवार्तिकम्॥१॥)

॥*॥ कृन्मेजन्तश्चानिकारोकारप्रकृतिः॥*॥

(भाष्यम्)

कृन्मेजन्तश्चानिकारोकारप्रकृतिरिति वक्तव्यम्। इह मा भूत्- आधये आधेः, चिकीर्षवे चिकीर्षोरिति॥

(२३९ आक्षेपवार्तिकम्॥२॥)

॥*॥ अनन्यप्रकृतिरिति वा॥*॥

(भाष्यम्)

अथवा अनन्यप्रकृतिः कृदव्ययसंज्ञो भवतीति वक्तव्यः॥

(आक्षेपभाष्यम्)

किं पुनरत्र ज्यायः?॥

(समाधानभाष्यम्)

अनन्यप्रकृतिरिति वचनमेव ज्यायः॥ इदमपि सिद्धं भवति- कुम्भकारेभ्यो नगरकारेभ्य इति॥

(तृतीयाक्षेपभाष्यम्)

तर्तर्हि वक्तव्यम्?॥

(२४० सिद्धान्तिसमाधानवार्तिकम्॥३॥)

॥*॥ न वा संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्येति॥*॥

(भाष्यम्)

न वा वक्तव्यम्॥

किं कारणम्?॥

'संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्य' इत्येषा परिभाषा कर्तव्या॥

(आक्षेपभाष्यम्)

कः पुनरत्र विशेषः? एषा वा परिभाषा क्रियेत, अनन्यप्रकृतिरिति वोच्येत?॥

(समाधानभाष्यम्)

अवश्यमेषा परिभाषा कर्तव्या। बहून्येतस्याः परिभाषायाः प्रयोजनानि?॥

(प्रयोजनप्रश्नभाष्यम्)

कानि पुनस्तानि?॥

(२४१ प्रयोजनवार्तिकम्॥४॥)

॥*॥ प्रयोजनं ह्रस्वत्वं तुग्विधेर्ग्रामणिकुलम्॥*॥

(भाष्यम्)

[ह्रस्वत्वं तुग्विधेरनिमित्तम्। क्व। ग्रामणिकुलम्।]

ग्रामणिकुलं सेनानिकुलमित्यत्र ह्रस्वत्वे कृते ह्रस्वस्य पिति कृति तुक्' इति तुक् प्राप्नोति॥

'संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्य' इति न दोषो भवति॥

(प्रयोजननिराकरणभाष्यम्)

नैतदस्ति प्रयोजनम्। बहिरङ्गं ह्रस्वत्वम् अन्तरङ्गस्तुक्। 'असिद्धं बहिरङ्गमन्तरङ्गे'॥

(२४२ प्रयोजनवार्तिकम्॥५॥)

॥*॥ नलोपो वृत्रहभिः॥*॥

(भाष्यम्)

[नलोपस्तुग्विधेरनिमित्तम्। क्व। वृत्रहभिः।]

वृत्रहभिर्भ्रूणहभिरित्यत्र नलोपे कृते 'ह्रस्वस्य पिति कृति तुक्' प्राप्नोति।

'संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्य' इति न दोषो भवति॥

(२४३ प्रयोजनवार्तिकम्॥६॥)

॥*॥ उदुपधत्वमकित्त्वबस्य निकुचिते॥*॥

(भाष्यम्)

उदुपधत्वमकित्त्वस्यानिमित्तम्॥

क्व?॥

निकुचिते। निकुचितमित्यत्र नलोपे कृते 'उदुपधाद्भावादिकर्मणोरन्यतरस्याम्' इत्यकित्त्वं प्राप्नोति।

'संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्य' इति न दोषो भवति॥

(प्रयोजननिराकरणभाष्यम्)

एतदपि नास्ति प्रयोजनम्। अस्त्वत्राकित्त्वम्, 'न धातुलोप आर्धधातुके' इति प्रतिषेधो भविष्यति॥

(२४४ प्रयोजनवार्तिकम्॥७॥)

॥*॥ नाभावो यञि दीर्घत्वस्यामुना॥*॥

(भाष्यम्)

नाभावो यञि दीर्घत्वस्यानिमित्तम्॥

क्व?॥

अमुना। नाभावे कृते 'अतो दीर्घो यञि' 'सुपि च' इति दीर्घत्वं प्राप्नोति।

'संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्य' इति न दोषो भवति॥

(प्रयोजननिराकरणभाष्यम्)

एतदपि नास्ति प्रयोजनम्। वक्ष्यत्येतत्-'न मुटादेशे' इति॥

(२४५ प्रयोजनवार्तिकम्॥८॥)

॥*॥ आत्वं कित्त्वस्योपादास्त॥*॥

(भाष्यम्)

आत्वं कित्त्वस्यानिमित्तम्॥

क्व?॥

उपादास्तास्य स्वरः शिक्षकस्येति। आत्वे कृते 'स्थाध्वोरि च' इतीत्त्वं प्राप्नोति॥

'संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्य' इति न दोषो भवति॥

(प्रयोजननिराकरणभाष्यम्)

एतदपि नास्ति प्रयोजनम्। उक्तमेतत्- दीङः प्रतिषेधः स्थाघ्वोरित्त्वे इति॥

(२४६ प्रयोजनवार्तिकम्॥९॥)

॥*॥ तिसृचतसृत्वं ङीब्विधेः॥*॥

(भाष्यम्)

तिसृचतसृत्वं ङीब्विधेरनिमित्तम्।

क्व?॥

तिस्रस्तिष्ठन्तीति चतस्रस्तिष्ठन्तीति। तिसृचतसृभावे कृते 'ऋन्नेभ्यो ङीप्' इति प्राप्नोति।

'संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्य' इति न दोषो भवति॥

(प्रयोजननिराकरणभाष्यम्)

एतदपि नास्ति प्रयोजनम्। आचार्यप्रवृत्तिर्ज्ञापयति- न तिसृचतसृभावे कृते ङीब् भवतीति। यदयं 'न तिसृचतसृ' नामि दीर्घत्वस्य प्रतिषेधं शास्ति॥

(प्रयोजनभाष्यम्)

इमानि तर्हि प्रयोजनानि-'शतानि सहस्राणि' नुमि कृते 'ष्णान्ता षट्' इति षट्संज्ञा प्राप्नोति।

'संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्य' इति न दोषो भवति॥

(प्रयोजनभाष्यम्)

शकटौ पद्धतौ। अत्त्वे कृते 'अत' इति टाप् प्राप्नोति॥

'संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्य' इति न दोषो भवति॥

(प्रयोजनभाष्यम्)

इयेष उवोष। गुणे कृते 'इजादेश्च गुरूमतोऽनृच्छः' इत्याम् प्राप्नोति॥

'संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्य' इति न दोषो भवति॥

(२४७ दूषणवार्तिकम्॥१०॥)

॥*॥ तस्य दोषो वर्णाश्रयः प्रत्ययो वर्णविचालस्य॥*॥

(भाष्यम्)

तस्यैतस्य लक्षणस्य दोषो- वर्णाश्रयः प्रत्ययो वर्णविचालस्यानिमित्तं स्यात्॥

क्व?॥

'अत इञ्' दाक्षिः प्लाक्षिः॥

(दूषणबाधकभाष्यम्)

न प्रत्ययः संनिपातलक्षणः।

(दूषणसाधकभाष्यम्)

अङ्गसंज्ञा तर्ह्यनिमित्तं स्यात्॥

(२४८ दूषणवार्तिकम् ॥११॥)

आत्वं पुग्विधेः क्रायपति

(भाष्यम्)

॥*॥ आत्वं पुग्विधेरनिमित्तं स्यात्॥

क्व?॥

क्रापयतीति॥

(२५० दूषण वार्तिकम् १२)

॥*॥ पुग् ह्रस्वत्वस्यादीदपत्॥*॥

(भाष्यम्)

पुग् ह्रस्वत्वस्यानिमित्तं स्यात्।

क्व?॥

अदीदपदिति॥

(२५० दूषणवार्तिकम्॥१३॥)

॥*॥ त्यदाद्यकारष्टाब्विधेः ॥*॥

(भाष्यम्)

न्यदाद्यकारष्टाब्विधेरनित्तं स्यात्।

क्व?

या सेति।

(२५१ दूषणवार्तिकम् १४)

इड्विधिराकारलोपस्य ययिवान्

(भाष्यम्)

इड्विधिराकारलोपस्यानिमित्तं स्यात्।

क्व?

ययिवान् तस्थिवान्। इति

(२५२ दूषणवार्तिकम्॥१५॥)

॥*॥ मतुब्विभक्त्युदात्तत्वं पूर्वनिघातस्य॥*॥

(भाष्यम्)

मतुब्विभक्त्युदात्तत्वं पूर्वनिघातस्याऽनिमित्तं स्यात्॥

क्व?॥

अग्निमान् वायुमान् परमवाचा परमवाचे इति॥

(२५३ दूषणवार्तिकम्॥१६॥)

॥*॥ नदीह्रस्वत्वं संबुद्धिलोपस्य॥*॥

(भाष्यम्)

नदीह्रस्वत्वं संबुद्धिलोपस्यानिमित्तं स्यात्॥

क्व?॥

नदि कुमारि किशोरि ब्राह्मणि ब्रह्मबन्धु इति।

नदीह्रस्त्वे कृते 'एङ्ह्रस्वात्सम्बुद्धेः' इति संबुद्धिलोपो न प्राप्नोति॥

(दूषणबाधकभाष्यम्)

मा भूदेवम्। ङ्यन्तादित्येवं भविष्यति॥

(दूषणसाधकभाष्यम्)

न सिध्यति। दीर्घादित्युच्यते, ह्रस्वान्ताच्च न प्राप्नोति॥ इदमिह संप्रधार्यम्-ह्रस्वत्वं क्रियतां संबुद्धिलोप इति॥

किमत्र कर्तव्यम्?।

परत्वाद् ह्रस्वत्वम्॥

(दूषणबाधकभाष्यम्)

नित्यः सम्बुद्धिलोपः। कृते ह्रस्वत्वे प्राप्नोति, अकृतेऽपि॥

(दूषणसाधकभाष्यम्)

अनित्यः संबुद्धिलोपः। नहि कृते ह्रस्त्वे प्राप्नोति॥

किं कारणम् ?॥

सन्निपातलक्षणो विधिरनिमितं तद्विघातस्येति॥

(आक्षेपोपसंहारभाष्यम्)

एते दोषाः समा भूयांसो वा। तस्मान्नार्थोऽनया परिभाषया॥

(सिद्धान्तिसमाधानभाष्यम्)

नहि-दोषाः सन्तीति परिभाषा न कर्तव्या, लक्षणं वा न प्रणेयम्। नहि-भिक्षुकाः सन्तीति स्थाल्यो नाधिश्रीयन्ते। न च मृगाः सन्तीति यवा नोप्यन्ते॥ दोषाः खल्वपि साकल्येन परिगणिताः। प्रयोजनानामुदारहणमात्रम्॥

कुत एतत्?॥

नहि दोषाणां लक्षणमस्ति। तस्माद्यान्येतस्याः परिभाषायाः प्रयोजनानि तदर्थमेषा परिभाषा कर्तव्या, प्रतिविधेयं दोषेषु॥ कृन्मेजन्तः॥३८॥

(३५ अव्यसंज्ञासूत्रम्॥१।१।६॥ आ.१२॥)

अव्ययीभावश्च॥१।१।४०॥

अव्ययीभावस्याव्ययत्वे प्रयोजनं लुङ्मुखस्वरोपचाराः॥*॥

(भाष्यम्)

अव्ययीभावस्याव्ययत्वे प्रयोजनम्॥

किम्?॥

लुङ्मुखस्वरोपचाराः॥

लुक्-उपाग्नि प्रत्यग्नि। 'अव्ययात्' इति लुक् सिद्धो भवति॥

मुखस्वरः-उपाग्निमुखः प्रत्यग्निमुखः। 'नाव्ययदिक्शब्दगोमहत्स्थूलमुष्टिपृथुवत्सेभ्य' इत्येष प्रतिषेधः सिद्धो भवति॥

उपचारः-उपपयःकारः उपपयःकाम इति। 'अतःकृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य' इति प्रतिषेधः सिद्धो भवति॥

(आक्षेपभाष्यम्)

किं पुनरिदं परिगणनमाहोस्विदुदाहरणमात्रम्।

(समाधानभाष्यम्)

परिगणनमित्याह॥ अपि खल्वप्याहुः-'यदन्यदव्ययीभावस्याव्ययकृतं प्राप्नोति तस्य प्रतिषेधो वक्तव्यः' इति॥

(अनुयोगभाष्यम्)

किं पुनस्तत्?॥

(परिगणनाभावे दूषणभाष्यम्)

[पराङ्गवद्भावः।] पराङ्गवद्भावेऽव्ययप्रतिषेधोश्चोदित उच्चैरधीयान नीचैरधीयानेत्येवमर्थम्। सहृदापि प्राप्नोति- उपाग्न्यधीयान॥ प्रत्यग्न्यधीयान॥

(परिगणनाभावे दूषणभाष्यम्)

अकच्यव्ययग्रहणं क्रियते उच्चकैर्नीचकैरित्येवमर्थम्। तदिहापि प्राप्नोति-उपाग्निकं प्रत्यग्निकम्॥

(परिगणनाभावे दूषणभाष्यम्)

मुमि अव्ययप्रतिषेधश्चोद्यते-दोषामन्यमहर्दिवामन्या रात्रिरित्येवमर्थम्। स इहापि प्राप्नोति-उपकुम्भंमन्य उपमणिकंमन्य इति॥

(परिगणनाभावे दूषणभाष्यम्)

अस्य च्वौ अव्ययप्रतिषेधश्चोद्यते- दोषाभूतमहर्दिवाभूता रात्रिरित्येवमर्थम्। स इहापि प्राप्नोति- उपकुम्भीभूतम्, उपमणिकीभूतम्।

(प्रत्याख्यानभाष्यम्)

यदि परिगणनं क्रियते, नार्थोऽव्ययीभावस्याव्ययसंज्ञया॥

(आक्षेपभाष्यम्)

कथं यान्यव्ययीभावस्यास्याव्ययत्वे प्रयोजनानि?॥

(प्रत्याख्यानसाधक १ मप्रयोजननिरासभाष्यम्)

नैतानि सन्ति। यत्तावदुच्यते- लुगिति। आचार्यप्रवृत्तिर्ज्ञापयति-भवत्यव्ययी-भावाल्लुगिति। यदयम्-'नाव्ययीभावादतः' इति प्रतिषेधं शास्ति॥

(२ यप्रयोजननिरासभाष्यम्)

उपचार इति। अनुत्तरपदस्थस्येति वर्तते॥

(३ यप्रयोजननिरासभाष्यम्)

तत्र मुखस्वर एकः प्रयोजयति। न चैकं प्रयोजनं योगारम्भं प्रयोजयति। यद्येतावत्प्रयोजनं स्यात्तत्रैवायं ब्रूयात्-'नाव्ययादव्ययीभावाश्च' इति॥ अव्ययीभावश्च॥४०॥

(इत्यव्ययसंज्ञाप्रकरणम्)

(अथ सर्वनामस्थानसंज्ञाप्रकरणम्)

(३६ सर्वनामस्थानसंज्ञासूत्रम्॥१।१।६ आ० १३॥)

शि सर्वनामस्थानम्॥१।१।४१॥

(३७ सर्वनामस्थानसंज्ञासूत्रम्॥१।१।६ आ.१४॥)

सुडनपुंसकस्य॥१।१।४२॥

(जसः शेः संज्ञाप्रतिषेधनिराकरणाधिकरणम्)

(२५५ आक्षेपवार्तिकम्)

॥*॥ शि सर्वनामस्थानं सुडनपुंसकस्येति चेज्जसि शिप्रतिषेधः॥*॥

(भाष्यम्)

शि सर्वनामस्थानं सुडनपुंसकस्येति चेज्जसि शेः प्रतिषेधः प्राप्नोति। कुण्डानि तिष्ठन्ति वनानि तिष्ठन्ति॥

[॥*॥ असमर्थसमासश्च॥*॥]

(दूषणान्तरभाष्यम्)

असमर्थसमासश्चायं द्रष्टव्योऽपुंसकस्येति। न हि नञो नपुंसकेन सामर्थ्यम्॥

केन तर्हि?।

भवतिना – न भवति नपुंसकस्येति॥

(समाधानभाष्यम्)

यत्तावदुच्यते-*शि सर्वनामस्थानं सुडनपुंसकस्येति चेज्जसिशि प्रतिषेध*- इति॥

(२५६ समाधानवार्तिकम्॥३॥)

॥*॥ नाप्रतिषेधात् ॥*॥

(भाष्यम्)

नायं प्रसज्यप्रतिषेधो नपुंसकस्य नेति॥

किं तर्हि?

पर्युदासोऽयम्- यदन्यन्नपुंसकादिति।

नंपुसके न व्यापारः।

यदि केनचित् प्राप्नोति, तेन भविष्यति।

पूर्वेण च प्राप्नोति

(२५७ समाधानवार्तिकम्॥८॥)

॥*॥ अप्राप्तेर्वा॥*॥

(भाष्यम्)

अथवा- अनन्तरा या प्राप्तिः सा निषिध्यते॥

कुत एतत्?॥

अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति। पूर्वा प्राप्तिरप्रतिषिद्धा, तया भविष्यति॥

(आक्षेपभाष्यम्)

ननु चेयं प्राप्तिः पूर्वा प्राप्तिं बाधते॥

(समाधानभाष्यम्)

नोत्सहते प्रतिषिद्धा सती बाधितुम्।

(दूषणान्तरसमाधानभाष्यम्)

यदप्युच्यते- असमर्थसमाश्चायं द्रष्टव्यः इति॥ यद्यपि वक्तव्यः। अथवैतर्हि बहूनि प्रयोजनानि॥

कानि?॥

असूर्यपश्यानि मुखानि, अपुनर्गेयाः श्लोकाः, अश्राद्धभोजी ब्राह्मण इति॥ सुड॥४२॥

(इति सर्वनामसंज्ञासूत्रम्)

(३८ विभाषासंज्ञासूत्रम्॥१।१।६ आ. १५)

नवेति विभाषा॥१।१।४३॥

(अर्थसंज्ञास्थापनाधिकरणम्)

(१५८ आक्षेपवार्तिकम्॥)

॥*॥नवेतिविभाषायामर्थसंज्ञाकरणम्॥*॥

(भाष्यम्)

नवेतिविभाषायामर्थस्य संज्ञा कर्तव्या। नवाशब्दस्य योऽर्थतस्य संज्ञा भवतीति वक्तव्यम्॥

(भाष्यम्)

किं प्रयोजनम्?॥

(आक्षेपसाधकवार्तिकद्वितीयखण्डम्॥१॥)

॥*॥ शब्दसंज्ञायां ह्यर्थासंप्रत्ययो यथान्यत्र॥*॥

(भाष्यम्)

शब्दसंज्ञायां हि सत्यामर्थस्यासंप्रत्ययः स्याद्॥ यथान्यत्र । अन्यत्रापि हि शब्दसंज्ञायां शब्दस्यैव संप्रत्ययो भवति, नार्थस्य॥

क्वान्यत्र?॥

'दाधा ध्वदाप्' 'तरसमपौ घः' इति। घुग्रहणेषु घग्रहणेषु च शब्दस्य संप्रत्ययो भवति, नार्थस्य॥

(आक्षेपभाष्यम्)

तर्तर्हि वक्तव्यम्॥

(समाधानभाष्यम्)

न वक्तव्यम्॥

(२५९ समाधानवार्तिकम्॥२॥)

॥*॥ इतिकरणोऽर्थनिर्देशार्थः॥*॥

(भाष्यम्)

इतिकरणः क्रियते सोऽर्थनिर्देशार्थो भविष्यति॥

(आक्षेपभाष्यम्)

किं गतमेतदितिना, आहोस्विच्छब्दाधिक्यादर्थाधिक्यम्?॥

(समाधानभाष्यम्)

गतमित्याह॥

कुतः?॥

(२६० समाधानसाधकवार्तिकम्॥३॥)

॥*॥ लोकतः॥*॥

(भाष्यम्)

तद्यथा लोके 'गौरित्ययमाह' इति गोशब्दादितिकरणः प्रयुज्यमानो गोशब्दं स्वस्मात्पदार्थात्प्रच्यावयति। सोऽसौ स्वस्मात्पदार्थात्प्रच्युतो यासावर्थपदार्थकता तस्याः शब्दपदार्थकः संपद्यते॥ एवमिहापि नवाशब्दादितिकरणः प्रयुज्मानो नवाशब्दं

स्वस्मात्पदार्थात्प्रच्यावयति। सोऽसौ स्वस्मात्पदार्थात्प्रच्युतो यासौ शब्दपदार्थकता तस्या लौकिकमर्थं प्रत्याययति-नवेति यद्गम्यते नवेति येत्प्रतीयते-इति॥

(समानशब्दसंज्ञानिरसनाधिकरणम्)

(२६१ आक्षेपवार्तिकम्॥४॥)

॥*॥ समानशब्दप्रतिषेधः॥*॥

(भाष्यम्)

समानशब्दानां प्रतिषेधो वक्तव्यः। नवा कुण्डिका नवा घटिकेति॥

(आक्षेपभाष्यम्)

किंच स्यात्, यद्येतेषामपि विभाषा संज्ञा स्यात्?॥

(समाधानभाष्यम्)

'विभाषा दिक्समासे बहुव्रीहौ' दक्षिणपूर्वस्यां शालायाम्। अचिरकृतायां संप्रत्ययः स्यात्॥

(२६२ समाधानवार्तिकम्॥५॥)

॥*॥ न वा विधिपूर्वकत्वात् प्रतिषेधसंप्रत्ययो यथा लोके॥*॥

(भाष्यम्)

न वा एष दोषः॥?

किं कारणम्?॥

'विधिपूर्वकत्वात्।' विधाय किंचिन्न वेत्युच्यते, तेन प्रतिषेधवाचिनः संप्रत्ययो भवति। तद्था–लोके 'ग्रामो भवता गन्तव्यो न वा ' नेति गम्यते॥

(समाधानबाधकभाष्यम्)

अस्ति कारणम्- येन नवेति लोके प्रतिषेधवाचिनः संप्रत्ययो भवति।

किं कारणम्?

विलिङ्गं हि भवान् लोके निर्देशं करोति। अङ्ग हि समानलिङ्गो निर्देशः क्रियतां प्रत्यग्रवाचिनः संप्रत्ययो भविष्यति। तद्यथा- 'ग्रामो भवता गन्तव्यो नवः' प्रत्यग्र इति गम्यते।

(समाधानसाधकभाष्यम्)

एतच्चैव न जानीमः- क्वचिव्याकरणे समानलिङ्गो निर्देशः क्रियत इति॥

(समाधानसाधकशेषभाष्यम्)

अपि चात्र कामचारः प्रयोक्तुः शब्दानामभिसम्बन्धे। तद्यथा-'यवागूर्भवता भोक्तव्या न वा' यदा यवागूशब्दो भुजिना संबध्यते, भुजिर्नवाशब्देन , तदा प्रतिषेधवाचिनः संप्रत्ययो भवति- 'यवागूर्भवता भोक्तव्या न वा' नेति गम्यते॥ यदा तु नवाशब्दो यवागूशब्देनाभिसंबध्यते, न भुजिना, तदा प्रत्यग्रवाचिनः संप्रत्ययो भवति-यथा- 'यवागूर्नवा भवता भोक्तव्या' प्रत्यग्रेति गम्यते। न चेह वयं विभाषाग्रहणेन सर्वादीन्यभिसंबध्नीमः- दिक्समासे बहुव्रीहौ सर्वादीनि विभाषा भवन्तीति॥

किं तर्हि॥

भवतिरभिसंबध्यते- दिक्समासे बहुव्रीहौ सर्वादीनि भवन्ति विभाषेति॥

(विध्यनित्यत्वसाधनाधिकरणम्)

(२६३ आक्षेपवार्तिकम्॥६॥)

॥*॥ विध्यनित्यत्वमनुपपन्नं प्रतिषेधसंज्ञाकरणात्॥*॥

(भाष्यम्)

विधेरनित्यत्वं नोपपद्यते। शुशाव शुशुवतुः शुशुवुः। शिश्राय शिश्रियतुः शिश्रियुः॥

किं कारणम्॥

'प्रतिषेधसंज्ञाकरणात्' प्रतिषेधस्येयं संज्ञा क्रियते। तेन विभाषाप्रदेशेषु प्रतिषेधस्यैव संप्रत्ययः स्यात्॥

(२६४ समाधानवार्तिकम्॥७॥)

॥*॥ सिद्धं तु प्रसज्य प्रतिषेधात्॥*॥

(भाष्यम्)

सिद्धमेतत्॥

कथम्?।

'प्रसज्यप्रतिषेधात्' विधाय किंचिन्नवेत्युच्यते तेनोभयं भविष्यति॥

(१६५ आक्षेपवार्तिकम् ॥८॥)

॥*॥ विप्रतिषिद्धं तु ॥*॥

(भाष्यम्)

विप्रतिषिद्धं तु भवति। अत्र न विज्ञायते- केनाभिप्रायेण प्रसजयति, केन निवृत्ति करोतीति॥

(२६६ समाधानवार्तिकम्॥९॥)

॥*॥ न वा प्रसङ्गसामर्थ्यादन्यत्र प्रतिषेधविषयात्॥*॥

(भाष्यम्)

न वा एष दोषः॥

किं कारणम्?॥

'प्रसङ्गसामर्थ्यात्'। प्रसङ्गसामर्थ्याच्च विधिर्भविष्यति- अन्यत्र प्रतिषेधविषयात्॥ प्रतिषेधसामर्थ्याच्च प्रतिषेधो भविष्यति- अन्यत्र विधिविषयात्॥

(आक्षेपभाष्यम्)

तदेतत् क्व सिद्धं भवति- या अप्राप्ते विभाषा। या हि प्राप्ते विभाषा, कृतसामर्थस्तत्र पूर्वेणैव विधिरिति कृत्वा प्रतिषेधस्यैव संप्रत्ययः स्यात्॥

(समाधानभाष्यम्)

एतदपि सिद्धम्॥

कथम्?॥

विभाषेति महती संज्ञा क्रियते। संज्ञा च नाम यतो न लघीयः॥

कुत एतत?॥

लघ्वर्थं हि संज्ञाकरणम्। तत्र महत्याः संज्ञायाः करणे एतत्प्रयोजनम्- उभयोः संज्ञा यथा विज्ञायेत नेति च वेति च। तत्र या तावदप्राप्ते विभाषा, तत्र प्रतिषेधं नास्तीति कृत्वा वेत्यनेन विकल्पो भविष्यति। या हि प्राप्ते विभाषा, तत्रोभयमुपस्थितं भवति- नेति च वेति च। तत्र नेत्यनेन प्रतिषिद्धे वेत्यनेन विकल्पो भविष्यति॥

(भाष्यम्)

एवमपि-

(२६७ आक्षेपवार्तिकम्॥१०॥)

॥*॥ विधिप्रतिषेधयोर्युगपद्वचनानुपपत्तिः॥

(भाष्यम्)

विधिप्रतिषेधयोर्युगपद्वचनं नोपपद्यते। शुशाव शुशुवतुः शुशुवुः। शिश्वाय शिश्वियतुः शिश्वियुः।

(भाष्यम्)

किं कारणम्?॥

(२६८ आक्षेपसाधकवार्तिकम्॥११॥)

॥*॥ भवतीति चेन्न प्रतिषेधः॥*॥

(भाष्यम्)

भवतीति चेति प्रतिषेधो न प्राप्नोति॥

(२६९ आक्षेपवार्तिकम् ॥१२॥)

॥*॥ नेति चेन्न विधिः॥*॥

(भाष्यम्)

नेति चेद्विधिर्न सिध्यति॥

(२७० समाधानवार्तिकम्॥१३॥)

॥*॥ सिद्धं तु पूर्वस्योत्तरेण बाधितत्वात्॥*॥

(भाष्यम्)

सिद्धमेतत्॥

कथम्?॥

पूर्वविधिमुत्तरो विधिबार्धते। इतिकरणोऽर्थन्निर्देशार्थ इत्युक्तम्॥

(२७१ आक्षेपवार्तिकम्॥१४॥)

॥*॥ साध्वनुशासनेऽस्मिञ् शास्त्रे यस्य विभाषा तस्य साधुत्वम्॥*॥

साध्वनुशासनेऽस्मिञ् शास्त्रे यस्य विभाषा क्रियते सा विभाषाः साधुः स्यात्। समासश्चैव हि विभाषा क्रियते, तेन समासस्यैव विभाषा साधुत्वं स्यात्॥

(आक्षेपबाधकभाष्यम्)

अस्तु। यः साधुः, स प्रयोक्ष्यते । असाधुर्न प्रयोक्ष्यते॥

(आक्षेपसाधकभाष्यम्)

न चैव हि कदाचिद् राजपुरुष इत्येतस्यामवस्थायामसाधुत्वमिष्यते॥

(भाष्यम्)

अपि च-

(२७३ आक्षेपवार्तिकम्॥१५॥)

॥*॥ द्वेधाऽप्रतिपत्तिः॥*॥

(भाष्यम्)

द्वैधं शब्दानामप्रतिपत्तिः स्यात्। इच्छामश्च-पुनर्विभाषाप्रदेशेषु द्वैधं शब्दानां प्रतिपत्तिः स्यादिति, तच्च न सिध्यति। यस्य पुनः कार्याः शब्दाः, विभाषाऽसौ समासं निर्वर्तयति॥

(आक्षेपबाधकभाष्यम्)

यस्यापि नित्याः शब्दास्तस्याप्येष दोषो न भवति॥

कथम्?॥

न विभाषा ग्रहणेन साधुत्वमभिसंबध्यते॥

किं तर्हि॥

समाससंज्ञाऽभिसंबध्यते- समास इत्येषा संज्ञा विभाषा भवतीति॥ तद्यथा-मेध्यः पशुर्विभाषितः मेध्योऽनड्वान् विभाषितः-इति। नैतद्विचार्यते- अनड्वान्नानड्वानिति॥

किं तर्हि?॥

आलब्धव्यो नालब्धव्य इति॥

(२७३आक्षेपवार्तिकम्॥१६॥)

॥*॥ कार्येषु युगपदन्वाचययौगपद्यम्॥*॥

(भाष्यम्)

कार्येषु शब्देषु युगपदन्वाचयेन च यदुच्यते, तस्य युगपद्वचनता प्राप्नोति'तव्यत्तव्यानीयरः' ढक् च मणङ्कात् इति॥ यस्य पुनर्नित्याः शब्दाः, प्रयुक्तानामसौ साधुत्वमन्वाचष्टे॥

(आक्षेपबाधकभाष्यम्)

ननु च यस्यापि कार्यास्तस्याप्येष न दोषः॥

कथम्?॥

प्रत्ययः परो भवतीत्युच्यते। न चैकस्याः प्रकृतेरनेकस्य प्रत्ययस्य युगपत्परत्वेन संभवोऽस्ति॥

(आक्षेपभिप्रायभाष्यम्)

नापि ब्रूमः-प्रत्ययमाला प्राप्नोति॥

किं तर्हि?॥

कर्तव्यमिति प्रयोक्तव्ये युगपद्द्वितीयस्य तृतीयस्य च प्रयोगः प्राप्नोतीति॥

(आक्षेपाबाधकभाष्यम्)

नैष दोषः। अर्थगत्यर्थः शब्दप्रयोगः। अर्थ संप्रत्याययिष्यामीति शब्दः प्रयुज्यते। तत्रैकेनोक्तत्वात्तस्यार्थस्य द्वितीयस्य च तृतीयस्य च प्रयोगेण न भवितव्यम् 'उक्तार्थानामप्रयोगः' इति॥

(२७४आक्षेपवार्तिकम् ॥१७॥)

॥*॥ आचार्यदेशशीलने च तद्विषयता॥*॥

(भाष्यम्)

आचार्यशीलनेन देशशीलनेन च यदुच्यते, तस्य तद्विषयता प्राप्नोति। 'इको ह्रस्वोऽङयो गालवस्य' 'प्राचामवृद्धात् फिन् बहुलम्' इति गालवा एव ह्रस्वान्प्रयुञ्जीरन्, प्राक्षु चैव हि फिन् स्यात्। तद्यथा 'जमदग्निर्वा एतत्पञ्चममवदानमवाद्यत्। तस्मान्नाजामदग्न्यः पञ्चावत्तं जुहोति'॥ यस्य पुनर्नित्याः शब्दाः, गालवग्रहणं तस्य पूजार्थम्, देशग्रहणं च कीर्त्यर्थम्॥

(आक्षेपबाधकभाष्यम्)

ननु च- यस्यापि कार्याः शब्दाः, तस्यापि गालवग्रहणं पूजार्थं स्यात्, देशग्रहणं च कीर्त्यर्थम्॥

(२७५ आक्षेपवार्तिकम्॥१८॥)

॥*॥ तत्कीर्तने च द्वेधाऽप्रतिपत्तिः॥*॥

(भाष्यम्)

तत्कीर्तने च द्वैधं शब्दानामप्रतिपत्तिः स्यात्॥ इच्छामश्च पुनराचार्यग्रहणेषु देशग्रहेणु च द्वैधं शब्दानां प्रतिपत्तिः स्यादिति, तच्च न सिध्यति॥

(सूत्रप्रत्याख्यानम्)

(२७६ सिद्धान्तवार्तिकम्॥१९॥)

॥*॥ अशिष्यो वा विदितत्वात्॥*॥

(भाष्यम्)

अशिष्यो वा पुनरयं योगः॥

किं कारणम्?॥

'विदितत्वात्'। यदनेन योगेन प्रार्थ्यते तस्यार्थस्य विदितत्वात्॥ येऽपि ह्येतां संज्ञां नारभन्ते तेऽपि विभाषेत्युक्तेऽनित्यत्वमवगच्छन्ति॥ याज्ञिकाः खल्वपि संज्ञामनारभमाण विभाषेत्युक्तेऽनित्यत्वमगच्छन्ति। तद्यथा-'मेध्यः पशुविभाषितो मेध्योऽनड्वान्विभाषितः' इति। आलब्धव्यो नालब्धव्य इति गम्यते॥ आचार्यः खल्वपि संज्ञामारभमाणो भूयिष्ठमन्यैरपि शब्दैरेतमर्थ संप्रत्याययति-बहुलम्, अन्यतरस्याम्, उभयथा, वा, एकेषाम् इति॥

(अप्राप्तविभाषाप्रकरणम्)

(२७७ अधिकारवार्तिकम्॥२०॥)

॥*॥ अप्राप्ते त्रिसंशयाः॥ *॥

(भाष्यम्)

इत उत्तरं या विभाषा अनुक्रमिष्यामः, अप्राप्ते ता द्रष्टव्याः॥ त्रिसंशयास्तु भवन्ति-प्राप्ते, अप्राप्ते उभयत्र वेति॥

(२७८ अप्राप्तविभाषोदाहरणवार्तिकम्॥२१॥)

॥*॥ द्वन्द्वे च, विभाषा जसि॥*॥

(भाष्यम्)

प्राप्ते, अप्राप्ते, उभयत्र वेति संदेहः॥

(आक्षेपभाष्यम्)

कथं वा प्राप्ते?, कथं वाऽप्राप्ते?, कथं वोभयत्र?

(संदेहसाधकभाष्यम्)

उभयशब्दः सर्वादिषु पठ्यते। तयपश्चायजादेशैः क्रियते। तेन वा नित्ये प्राप्ते, अन्यत्र वाऽप्राप्ते, उभयत्र वेति॥

(सिद्धान्तभाष्यम्)

अप्राप्ते। अयच् प्रत्ययान्तरम्॥

(समाधानबाधकभाष्यम्)

यदि प्रत्ययान्तरम्, उभयीति ईकारो न प्राप्नोति॥

(समाधानसाधकभाष्यम्)

मा भूदेवम्, मात्रजित्येवं भविष्यति॥

कथम्?॥

मात्रजिति नेदं प्रत्ययग्रहणम्॥

किं तर्हि?॥

प्रत्ययाहारग्रहणम्॥

क्व संनिविष्टानां प्रत्याहारः?॥

मात्रशब्दात्प्रभृति आ अयचश्चकारात्॥

(समाधानबाधकभाष्यम्)

यदि प्रत्याहारग्रहणम्। 'कति तिष्ठन्ति।

'अत्रापि प्राप्नोति।

(समाधानसाधकभाष्यम्)

अत इति वर्तते॥

(समाधानबाधकभाष्यम्)

एवमपि-'तैलमात्रा घृतमात्रा' अत्रापि प्राप्नोति॥

(समाधानसाधकभाष्यम्)

सदृशस्याप्यसंनिविष्टस्य न भविष्यति प्रत्याहारेण ग्रहणम्॥

(२७९ उदाहरणवार्तिकम्॥२२॥)

॥*॥ ऊर्णोतेर्विभाषा॥*॥

(भाष्यम्)

प्राप्ते, अप्राप्ते, उभयत्र वेति संदेहः॥

(आक्षेपभाष्यम्)

कथं वा प्राप्ते? कथं वाऽप्राप्ते कथं वोभयत्र?।

(संदेहोपपादकभाष्यम्)

'असंयोगाल्लिट् कित्' इति वा नित्ये प्राप्ते, अन्यत्र वाऽप्राप्ते, उभयत्र वेति॥

(सिद्धान्तभाष्यम्)

[अप्राप्ते]

(संदेहबाधकभाष्यम्)

अन्यद्धि कित्त्वम्, अन्यद्धि ङित्वम्॥

(संदेहसाधकभाष्यम्)

एकं चेन्ङित्कितौ। यद्येकं ङित्कितौ, ततः संदेहः॥

(तृतीयाक्षेपभाष्यम्)

अथ हि नाना, नास्ति संदेहः॥

(समाधानभाष्यम्)

यद्यपि नाना, एवमपि संदेहः-प्रौर्णुवीति।

(संदेहोपपादभाष्यम्)

'सार्वधातुकमपित्' इति वा नित्ये प्राप्ते, अन्यत्र वाऽप्राप्ते, उभयत्र वेति॥

(सिद्धान्तभाष्यम्)

अप्राप्ते॥

(२८० उदाहरणवार्तिकम्॥२३॥)

॥*॥ विभाषोपयमने॥*॥

(भाष्यम्)

प्राप्ते, अप्राप्ते, उभयत्र वेति संदेहः॥

(संदेहाक्षेपभाष्यम्)

कथं वा प्राप्ते? कथं वा अप्राप्ते? कथं वोभयत्र?

(संदेहोपपादकभाष्यम्)

गन्धन इति वा नित्ये प्राप्ते, अन्यत्र वाऽप्राप्ते, उभयत्र वेति॥

(सिद्धान्तभाष्यम्)

अप्राप्ते। गन्धन इति निवृत्तम्॥

(२८१ उदाहरणवार्तिकम्॥२४॥)

॥*॥ अनुपसर्गाद्वा॥*॥

(भाष्यम्)

प्राप्ते, अप्राप्ते, उभयत्र वेति संदेहः।

(संदेहाक्षेपभाष्यम्)

कथं वा प्राप्ते? कथं वाऽप्राप्ते? कथं वोभयत्र?।

(संदेहोपपादकभाष्यम्)

'वृत्तिसर्गतायनेषु क्रमः' इति वा नित्ये प्राप्ते, अन्यत्र वाऽप्राप्ते, उभयत्र वेति॥

(सिद्धान्तभाष्यम्)

अप्राप्ते। वृत्त्यादिष्विति निवृत्तम्॥

(२८२ उदाहरणवार्तिकम् ॥२५॥)

॥*॥विभाषा वृक्षमृगादीनाम्॥*॥

(भाष्यम)

प्राप्ते, अप्राप्ते, ऽभयत्र वेति संदेहः॥

कथं वा प्राप्ते? कथं वाऽप्राप्ते? कथं वोभयत्र?॥

(संदेहोपपादकभाष्यम्)

'जातिरप्राणिनाम्' इति वा नित्ये प्राप्ते, अन्यत्र वाऽप्राप्ते, ऽभयत्र वेति॥

(सिद्धान्तभाष्यम्)

अप्राप्ते। 'जातिरप्राणिनाम्' इति निवृत्तम्॥

(२८३ ऽदाहरणवार्तिकम्॥२६॥)

॥*॥ऽषविदजागृभ्योऽन्यतरस्याम्॥*॥

(भाष्यम्)

प्राप्ते अप्राप्ते, ऽऽभयत्र वेति संदेह।

(संदेहाक्षेपभाष्यम्)

कथं वा प्राप्ते? कथं वाऽप्राप्ते? कथं वोभयत्र?

(संदेहोपपादकभाष्यम्)

प्रत्ययान्तादिति वा नित्ये प्राप्ते, ञन्यज वाऽप्राप्ते, ऽभयत्र वेति॥

(सिद्धान्तभाष्यम्)

अप्राप्ते। प्रत्ययान्ता धात्वन्तराणि॥

॥*॥ दीपादीनां विभाषा॥*॥

(भाष्यम्)

प्राप्ते, अप्राप्ते, उभयत्र वेति संदेहः॥

(संदेहाक्षेपभाष्यम्)

कथं वा प्राप्ते? कथं वाऽप्राप्ते? कथं वोभयत्र?॥

(संदेहोपपादकभाष्यम्)

'भावकर्मणोः' इति वा नित्ये प्राप्ते, अन्यत्र वाऽप्राप्ते, उभयत्र वेति॥

(सिद्धान्तभाष्यम्)

अप्राप्ते। कर्तरीति हि वर्तते॥

(आक्षेपभाष्यम्)

एवमपि संदेहः-न्याय्ये वा कर्तरि, कर्मकर्तरि वेति॥

(समाधानभाष्यम्)

नास्ति संदेहः। सकर्मकस्य कर्ता कर्मद्भवति॥ अकर्मकाश्च दीपादयः॥

(समाधानबाधकभाष्यम्)

अकर्मका अपि वै सोपसर्गाः सकर्मका भवन्ति॥

(समाधानसाधकभाष्यम्)

कर्मापदिष्टा विधयः कर्मस्थभावकानां कर्मस्थक्रियाणां वा भवन्ति। कर्तृस्थभाव्यकाश्च दीपादयः॥

(२८५ उदाहरणवार्तिकम्॥२८॥)

॥*॥ विभाषाग्रेप्रथमपूर्वेषु॥*॥

(भाष्यम्)

प्राप्ते, अप्राप्ते, उभयत्र वेति संदेहः॥

(संदेहाक्षेपभाष्यम्)

कथं वा प्राप्ते?॥ कथं वाऽप्राप्ते? कथं वोभयत्र ?॥

(संदेहोपपादकभाष्यम्)

'आभीक्ष्ण्ये' इति वा नित्ये प्राप्ते, अन्यत्र वाऽप्राप्ते, उभयत्र वेति॥

(सिद्धान्तभाष्यम्)

अप्राप्ते। 'आभीक्ष्ण्ये' इति निवृत्तम्॥

(२८६ उदाहरणवार्तिकम्॥२९॥)

॥*॥ तृन्नादीनां विभाषा॥*॥

(भाष्यम्)

प्राप्ते, अप्राप्ते, उभयत्र वेति संदेहः॥

(संदेहाक्षेपभाष्यम्)

कथं वा प्राप्ते? कथं वाऽप्राप्ते? कथं वोभयत्र?॥

(संदेहोपपादकभाष्यम्)

'आक्रोशे' इति वा नित्ये प्राप्ते, अन्यत्र वोभयत्र, उभयत्र वेति॥

(सिद्धान्तभाष्यम्)

अप्राप्ते। आक्रोशे' इति निवृत्तम्?॥

(२८७ उदाहरणवार्तिकम्॥३०॥)

॥*॥ एकहलादौ पूरयितव्येऽन्यतरस्याम्॥*॥

(भाष्यम्)

प्राप्ते, अप्राप्ते, ऽभयत्र वेति संदेहः॥

(संदेहाक्षेपभाष्यम्)

कथं वा प्राप्ते?॥ कथं वाऽप्राप्ते? कथं वोभयत्र?॥

(संदेहोपपादकभाष्यम्)

'ऽदकस्योदः संज्ञायाम्' इति वा नित्ये प्राप्ते, अन्यत्र वाऽप्राप्ते, ऽभयत्र वेति॥

(सिद्धान्तभाष्यम्)

अप्राप्ते। संज्ञायामिति निवृत्तम्॥

(२८८ ऽदाहरणवार्तिकम्॥३१॥)

॥*॥ श्वादेरिञि। पदान्तस्यान्यतरस्याम्॥*॥

(भाष्यम्)

प्राप्ते, अप्राप्ते, ऽभयत्र वेति संदेहः।

(संदेहाक्षेपभाष्यम्)

कथं वा प्राप्ते?॥ कथं वाऽप्राप्ते? कथं वोभयत्र?॥

(संदेहोपपादकभाष्यम्)

इञीति वा नित्ये प्राप्ते, अन्यत्र वाऽप्राप्ते, ऽभयत्र वेति॥

(सिद्धान्तभाष्यम्)

अप्राप्ते। इञीति निवृत्तम्॥

(२८९ उदाहरणवार्तिकम्॥३२॥)

॥*॥ सपूर्वायाः प्रथमाया विभाषा॥*॥

(भाष्यम्)

प्राप्ते, अप्राप्ते, उभयत्र वेति संदेहः॥

(संदेहाक्षेपभाष्यम्)

कथं वा प्राप्ते? कथं वाऽप्राप्ते? कथं वोभयत्र?॥

(संदेहोपपादकभाष्यम्)

चादिभिर्योग इति वा नित्ये प्राप्ते, अन्यत्र वाऽप्राप्ते, उभयत्र वेति॥

(सिद्धान्तभाष्यम्)

अप्राप्ते। चादिभिर्योग इति निवृत्तम्॥

(२९० उदाहरणवार्तिकम्॥३३॥)

॥*॥ ग्रो यङ्यचि विभाषा॥*॥

(भाष्यम्)

प्राप्ते, अप्राप्ते, उभयत्र वेति संदेहः॥

(संदेहाक्षेपभाष्यम्)

कथं वा प्राप्ते? कथं वाऽप्राप्ते?॥ कथं वोभयत्र?॥

(संदेहोपपादकभाष्यम्)

यङीति वा नित्ये प्राप्ते, अन्यत्र वाऽप्राप्ते, उभयत्र वेति॥

(सिद्धान्तभाष्यम्)

अप्राप्ते। यङीति निवृत्तम्॥

(प्राप्तविभाषाप्रकरणम्)

(२९१ अधिकारवार्तिकम्॥३४॥)

॥प्राप्ते च॥

(भाष्यम्)

इत ऊत्तरं या विभाषा अनुक्रमिष्यामः, प्राप्तेता द्रष्टव्याः। त्रिसंशयान्तु भवन्ति- प्राप्ते, अप्राप्ते, ऊभयत्र वेति॥

(२९२ ऊदाहरणवार्तिकम्॥३५॥)

॥विभाषा विप्रलापे॥

भाष्यम्

प्राप्ते, अप्राप्ते, ऊभयत्र वेति संदेह॥

(संदेहापेक्षपभाष्यम्)

कथं वा प्राप्ते? कथं वाऽप्राप्ते ? कथं वोभयत्र?

(संदेहोपपादकभाष्यम्)

'व्यक्तवायाम्' इति वा नित्ये प्राप्ते, अन्यत्र वाऽप्राप्ते, ऊभयत्र वेति।

(सिद्धान्तभाष्यम्)

प्राप्ते। व्यक्तवाचामिति हि वर्तते॥

(२९३ ऊदाहरणवार्तिकम्॥३६॥)

॥*॥ विभाषोपपदेन प्रतीयमाने॥*॥

(भाष्यम्)

प्राप्ते, अप्राप्ते, उभयत्र वेति संदेहः॥

(संदेहापक्षेपभाष्यम्)

कथं वा प्राप्ते? कथं वाऽप्राप्ते? कथं वोभयत्र?॥

(संदेहोपपादकभाष्यम्)

'स्वरितञितः' इति वा नित्ये प्राप्ते, अन्यत्र वाऽप्राप्ते, उभयत्र वेति॥

(सिद्धान्तभाष्यम्)

प्राप्ते। 'स्वरितञितः' इति हि वर्तते?॥

(२९४ उदाहरणवार्तिकम्॥३७॥)

॥*॥ तिरोऽन्तरर्धौ, विभाषा कृञि॥*॥

(भाष्यम्)

प्राप्ते, अप्राप्ते, उभयत्र वेति संदेहः॥

(संदेहाक्षेपभाष्यम्)

कथं वा प्राप्ते? कथं वाऽप्राप्ते,? कथं वोभयत्र?॥

(संदेहोपपादकभाष्यम्)

'अन्तर्धौ' इति वा नित्ये प्राप्ते, अन्यत्र वाऽप्राप्ते, उभयत्र वेति॥

(सिद्धान्तभाष्यम्)

प्राप्ते। 'अन्तर्धौ' इति हि वर्तते॥

(२९५ उदाहरणवार्तिकम्॥३८॥)

॥*॥ अधिरीश्वरे, विभाषा कृञि॥*॥

(भाष्यम्)

प्राप्ते, अप्राप्ते, उभयत्र वेति संदेहः।

(संदेहाक्षेपभाष्यम्)

कथं वा प्राप्ते? कथं वाऽप्राप्ते? कथं वोभयत्र?॥

(संदेहोपपादकभाष्यम्)

ईश्वर इति वा नित्ये प्राप्ते, अन्यत्र वाऽप्राप्ते, उभयत्र वेति॥

(सिद्धान्तभाष्यम्)

प्राप्ते। 'ईश्वरे' इति हि वर्तते॥

(२९६ उदाहरणवार्तिकम्॥३९॥)

॥*॥ दिवस्तदर्थस्य, विभाषोपसर्गे॥*॥

(भाष्यम्)

प्राप्ते, अप्राप्ते, उभयत्र वेति संदेहः॥

(संदेहाक्षेपभाष्यम्)

कथं वा प्राप्ते? कथं वाऽप्राप्ते? कथं वोभयत्र?॥

(संदेहोपपादकभाष्यम्)

तदर्थस्येति वा नित्ये प्राप्ते, अन्यत्र वाऽप्राप्ते, उभयत्र वेति॥

(सिद्धान्तभाष्यम्)

प्राप्ते। 'तदर्थस्य' इति हि वर्तते॥

(उभयत्रविभाषाप्रकरणम्)

(२९७ अधिकारवार्तिकम्॥४०॥)

॥*॥ उभयत्र च॥*॥

(भाष्यम्)

इत उत्तरं या विभाषा अनुक्रमिष्यामः, उभयत्र ता द्रष्टव्याः। त्रिसंशयास्तु भवन्ति- प्राप्ते, अप्राप्ते, उभयत्र वेति॥

(२९८ उदाहरणवार्तिकम् ॥४१॥)

॥*॥ हृकोरन्यतरस्याम्॥*॥

(भाष्यम्)

प्राप्ते, अप्राप्ते, उभयत्र वेति संदेहः॥

(संदेहाक्षेपभाष्यम्)

कथं वा प्राप्ते? कथं वाऽप्राप्ते? कथं वोभयत्र?।

(संदेहोपपादकभाष्यम्)

'गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ' इति वा नित्ये प्राप्ते, अन्यत्र वाऽप्राप्ते, उभयत्र वेति संदेहः॥

(सिद्धान्तभाष्यम्)

उभयत्र। प्राप्ते तावत्- अभ्यवहारयति सैन्धवान् अभ्यवहारयति सैन्धवैः। विकारयति सैन्धवान् विकारयति सैन्धवैः। अप्राप्ते-हरति भारं देवदत्तः, हारयति भारं देवदत्तम्,

हारयति भारं देवदत्तेन। करोति कटं देवदत्तः, कारयति कटं देवदत्तम्, कारयति कटं देवदत्तेन॥

(२९९ उदाहरणवार्तिकम्॥४२॥)

॥*॥ न यदि, विभाषा साकाङ्क्षे॥*॥

(भाष्यम्)

प्राप्ते, अप्राप्ते, उभयत्र वेति संदेहः॥

(संदेहाक्षेपभाष्यम्)

कथं वा प्राप्ते? कथं वाऽप्राप्ते? कथं वोभयत्र?।

(संदेहोपपादकभाष्यम्)

यदीति वा नित्य प्राप्ते, अन्यत्र वाऽप्राप्ते, उभयत्र वेति॥

(सिद्धान्तभाष्यम्)

उभयत्र। प्राप्ते तावत्- अभिजानासि देवदत्त यत्कश्मीरेषु वत्स्यामः यत्कश्मीरेष्ववसाम। यत्तत्रौदनं भोक्ष्यामहे यत्तत्रौदनमभुञ्ज्महि। अप्राप्ते- अभिजानासि देवदत्त कश्मीरान् गमिष्यामः कश्मीरानगच्छाम, तत्रौदनं भोक्ष्यामहे तत्रौदनमभुञ्ज्महि।

(३०० उदाहरणवार्तिकम्॥४३॥)

॥*॥ विभाषा श्वेः॥*॥

(भाष्यम्)

प्राप्ते, अप्राप्ते, उभयत्र वेति संदेहः॥

(संदेहाक्षेपभाष्यम्)

कथं वा प्राप्ते? कथं वाऽप्राप्ते? कथं वोभयत्र?।

(संदेहोपपादकभाष्यम्)

किंतीति वा नित्ये प्राप्ते, अन्यत्र वाऽप्राप्ते, उभयत्र वेति।

(सिद्धान्तभाष्यम्)

उभयत्र। प्राप्ते तावत्- शुशुवतुः शुशुवुः शिश्वियतुः शिश्वियुः। अप्राप्ते-शुशाव शुशविथ, शिश्वाय शिश्वयिथ॥

(३०१ उदाहरणवार्तिकम्॥४४॥)

॥*॥ विभाषा संघुषास्वनाम्॥*॥

(संघुषोदाहरणभाष्यम्)

संपूर्वाद्घुषेः-

प्राप्ते, अप्राप्ते, उभयत्र वेति संदेहः॥

(संदेहाक्षेपभाष्यम्)

कथं वा प्राप्ते? कथं वाऽप्राप्ते? कथं वोभयत्र?॥

(संदेहोपपादकभाष्यम्)

'घुषिरविशब्देन' इति वा नित्ये प्राप्ते, अन्यत्र वाऽप्राप्ते, उभयत्र वेति॥

(सिद्धान्तभाष्यम्)

उभयत्र। प्राप्ते तावत्-संघुष्टा रज्जुः संघुषिता रज्जुः। अप्राप्ते-संघुष्टं वाक्यमाह संघुषितं वाक्यमाह॥

(आस्वनोदाहरणभाष्यम्)

आङ्पूर्वात्स्वनेः-

प्राप्ते, अप्राप्ते, उभयत्र वेति संदेहः।

(संदेहाक्षेपभाष्यम्)

कथं वा प्राप्ते? कथं वाऽप्राप्ते? कथं वोभयत्र? ॥

(संदेहोपपादकभाष्यम्)

मनसीति वा नित्ये प्राप्ते, अन्यत्र वाऽप्राप्ते, उभयत्र वेति॥

(सिद्धान्तभाष्यम्)

उभयत्र। प्राप्ते तावत्- आस्वान्तं मन आस्वनितं मनः। अप्राप्ते- आस्वनितो देवदत्तः आस्वन्तो देवदत्त इति॥

इति व्याकरण-न्याय-वेदान्ताचार्य-लब्धस्वर्णपदक-पण्डित-श्रीरुद्रधरझाप्रणीते

महाभाष्यप्रदीपोद्द्योततत्वलोके प्रथमाध्यायस्य प्रथमपादे षष्ठमाह्निकम्॥

इति प्रथमाध्याये प्रथमपादे षष्ठमाह्निकम्॥

****

प्रथमाध्यायस्य प्रथमपादे सप्तममाह्निकम्॥

(३९ संप्रसारणसंज्ञासूत्रम्॥१।१।७ आ. १॥)

इग्यणः संप्रसारणम्॥१।१।४४॥

(उभयसंज्ञात्वस्थापनाधिकरणम्)

(आक्षेपभाष्यम्)

किमियं वाक्यस्य संप्रसारणसंज्ञा क्रियते-इग्यण इत्येतद्वाक्यं संप्रसारणसंज्ञं भवतीति। आहोस्विद्वर्णस्य इग्यो यणः स्थाने वर्णः स संप्रसारणसंज्ञो भवतीति।

(भाष्यम्)

कश्चात्र विशेषः?॥

(३०२ वाक्यसंज्ञापक्षदूषणवार्तिकम्॥१॥)

॥*॥ संप्रसारणसंज्ञायां वाक्यस्य संज्ञा चेद्वर्णविधिः॥*॥

(भाष्यम्)

संप्रसारणसंज्ञायां वाक्यस्य संज्ञा चेद्वर्णविधिर्न सिध्यति- संप्रसारणात्परः पूर्वो भवतीति, संप्रसारणस्य दीर्घो भवतीति। नहि वाक्यस्य संप्रसारणसंज्ञायामेष निर्देश उपपद्यते। नाप्येतयोः कार्ययोः संभवोऽस्ति।

(द्वितीयपक्षाभ्युपगमभाष्यम्)

अस्तु तर्हि वर्णस्य॥

(३०३ वर्णसंज्ञापक्षदूषणवार्तिकम्॥२॥)

॥*॥ वर्णसंज्ञा चेन्निर्वृतिः *॥२॥

(भाष्यम्)

वर्णस्य संज्ञा चेन्निर्वृत्तिर्न सिध्यति- 'ष्यङः' सम्प्रसारणम्' इति। स एव हि तावदिग् दुर्लभः, यस्य संज्ञा क्रियते॥ अथापि कथंचिल्लभ्येत, केनासौ यणः स्थाने स्यात्। अनेन ह्यसौ व्यवस्थाप्यते। तदेतदितरेतराश्रयं भवति। इतरेतराश्रयाणि च कार्याणि न प्रकल्पन्ते॥

(३०४ समाधानवार्तिकम्॥३॥)

॥*॥ विभक्तिविशेषनिर्देशस्तु ज्ञापक उभयसंज्ञात्वस्य*॥३॥

(भाष्यम्)

यदयं विभक्तिविशेषैनिर्देशं करोति-संप्रसारणात्परः पूर्वो भवतीति, संप्रसारणस्य दीर्घो भवतीति, ष्यङः संप्रसारणं भवतीति। तेन ज्ञायते-उभयोः संज्ञा भवतीति॥ यत्तावदाह- संप्रसारणात्परः पूर्वो भवतीति, संप्रसारणस्य दीर्घो भवतीति, तेन ज्ञायते- वर्णस्य भवतीति॥ यदप्याह- ष्यङः संप्रसारणमिति, तेन ज्ञायते- वाक्यस्य संज्ञा भवतीति॥

(प्रथमपक्षाभ्युपगमभाष्यम्)

अथ वा पुनरस्तु वाक्यस्यैव॥

(उक्ताक्षेपस्मारणभाष्यम्)

ननु चोक्तम्- *संप्रसारणसंज्ञायां वाक्यस्य संज्ञा चेद्वर्णविधिः* इति॥

(समाधानभाष्यम्)

नैष दोषः। यथा काकाज्जातः काकः, श्येनाज्जातः श्येनः। एवं संप्रसारणाज्जातं संप्रसारणम्। तस्मात्परः पूर्वो भवति, तस्य दीर्घो भवतीति॥

(समाधानान्तरभाष्यम्)

अथवा दृश्यन्ते हि- वाक्येषु वाक्यैकदेशान् प्रयुञ्जानाः, पदेषु च पदैकदेशान्। वाक्येषु तावद्वाक्यैकदेशान्-प्रविश, पिण्डीम्, प्रविश, तर्पणम् इति। पदेषु पदैकदेशान्-देवदत्तो दत्तः, सत्यभामा भामेति। एवमिहापि-संप्रसारणनिर्वृत्तात्संप्रसारणनिर्वृत्तस्येत्येतस्य वाक्यस्यार्थे संप्रसारणात्संप्रसारणस्येत्येष वाक्यैकदेशः प्रयुज्यते। तेन निर्वृत्तस्य विधिं विज्ञास्यामः-संप्रसारणनिर्वृत्तात्संप्रसारणनिर्वृत्तस्येति॥

(समाधानान्तरभाष्यम्)

अथवा आहायं-संप्रसारणात्परः पूर्वो भवतीति, संप्रसारणस्य दीर्घो भवतीति। न च वाक्यस्य संप्रसारणसंज्ञायां सत्यामेष निर्देश उपपन्नः, नाप्येतयोः कार्ययोः संभवोऽस्तीति तत्र वचनाद्भविष्यति॥

(द्वितीयपक्षाभ्युपगमभाष्यम्)

अथवा पुनरस्तु वर्णस्य॥

(उक्ताक्षेपस्मारणभाष्यम्)

ननु चोक्तम्-*वर्णसंज्ञा चेन्निर्वृत्तिः*इति॥

(समाधानभाष्यम्)

नैष दोषः। इतरेतराश्रयमात्रमेतच्चोदितम्। सर्वाणि चेतरेतराश्रयाण्येकत्वेन परिहृतानि-*सिद्धं तु नित्यशब्दत्वाद्*इति।

(समाधानबाधकभाष्यम्)

नेदं तुल्यमन्यैरितरेतराश्रयैः। न हि तत्र किंचिदुच्यते- अस्य स्थाने ये आकारैकारौकारा भाव्यन्ते ते वृद्धिसंज्ञा भवन्तीति। इह हि पुनरुच्यते-इग्यो यणः स्थाने वर्णः स सम्प्रसारणसंज्ञा भवतीति॥

(समाधानसाधकभाष्यम्)

एवं तर्हि भाविनीयं संज्ञा विज्ञास्यते। तद्यथा-कश्चित्कंचित् तन्तुवायमाह- 'अस्य सूत्रस्य शाटकं वय' इति। स पश्यति-'यदि शाटको न वातव्यः, अथ वातव्यो न शाटकः, शाटको वातव्यश्चेति विप्रतिषिद्धम्, भाविनी खल्वस्य संज्ञाऽभिप्रेता, स मन्ये वातव्यो- 'यस्मिन्नुते शाटक इत्येतद्भवति' इति। एवमिहापि- स यणः स्थाने भवति यस्याभिनिर्वृत्तस्य सम्प्रसारणमित्येषा संज्ञा भविष्यति।

(समाधानान्तरभाष्यम्)

अथवा-इजादियजादिप्रवृत्तिश्चैव हि लोके लक्ष्यते। यजाद्यपदेशात्तु इजादिनिवृत्तिः प्रसक्ता। प्रयुञ्जते च पुनर्लोका इष्टम् उप्तमिति। ते मन्यामहे-अस्य यणः स्थाने इममिकं प्रयुञ्जते इति। तत्र तस्यासाध्वभिमतस्य शास्त्रेण साधुत्वमन्वाख्यायते-किति साधुर्भवति, ङिति साधुर्भवतीति॥ इग्यणः सम्प्रसारणम्॥४४॥

(अथागमस्थितिदेशनिर्णयप्रकरणम्)

(४० परिभाषासूत्रम्॥१।१।७ आ. २॥)

आद्यन्तौ टकितौ॥१।१।४५॥

(अन्वयानुपपत्तिनिराकरणाधिकरणम्)

(आक्षेपभाष्यम्)

समासनिर्देशोऽयम्। तत्र न ज्ञायते॥ क आदिः कोऽन्त तद्यथा- 'अजाविधनौ देवदत्तयज्ञदत्तौ' इत्युक्ते तत्र न ज्ञायते- कस्याजा धनम्, कस्यावयः-इति॥

(समाधानभाष्यम्)

यद्यपि तावल्लोक एष दृष्टान्तः। दृष्टान्तस्यापि तु पुरुषारम्भो निवर्तको भवति॥

(आक्षेपभाष्यम्)

अस्ति वेह कश्चित्पुरुषारम्भः॥

(समाधानभाष्यम्)

अस्तीत्याह॥

कः?॥

संख्यातानुदेशो नाम॥

(टकितोरागमविषयत्वनिर्णयाधिकरणम्)

(आक्षेपभाष्यम्)

कौ पुनष्टकितावाद्यन्तौ भवतः?॥

(समाधानभाष्यम्)

आगमावित्याह॥

(आदेशवादिन आगमवादिनं प्रति आक्षेपभाष्यम्)

युक्तं पुनर्यन्नित्येषु नाम शब्देषु आगमशासनं स्यात्। न नित्येषु नाम शब्देषु कूटस्थैरविचालिभिर्वर्णैर्भवितव्यमनपायोपजनविकारिभिः। आगमश्च नामापूर्वः शब्दोपजनः॥

(आगमवादिन आदेशवादिनं प्रति आक्षेपभाष्यम्)

अथ युक्तं यन्नित्येषु शब्देष्वादेशाः स्युः॥

(आदेशवादिनः समाधानभाष्यम्)

बाढं युक्तम्। शब्दान्तरैरिह, भवितव्यम्। तत्र शब्दान्तराच्छब्दान्तरस्य प्रतिपत्तिर्युक्ता॥

(इष्टापत्तिभाष्यम्)

आदेशास्तर्हीमे भविष्यन्ति। अनागमकानां सागमकाः॥

(आक्षेपभाष्यम्)

तत्कथम्।

(एकदेशिसमाधानभाष्यम्)

संज्ञाधिकरोऽयम्। आद्यन्तौ चेह संकीर्त्येते टकारककारवितावुदाह्रियेते। तत्राद्यन्तयोष्टकारककारावितौ संज्ञे भविष्यतः। तत्र 'आर्धधातुकस्येड्वलादेः' इत्युपस्थितमिदं भवति- आदिरिति। तेनेकारादिरादेशो भविष्यति॥

(आक्षेपभाष्यम्)

एतावदिह सूत्रम् 'इट्' इति। कथं पुनरियता सूत्रेण इकारादिरादेशो लभ्यः॥

(समाधानभाष्यम्)

लभ्य इत्याह॥

कथम्?।

बहुव्रीहिनिर्देशात्। बहुव्रीहिनिर्देशोऽयम्- इकारः ट् आदिरस्येति॥

(आक्षेपभाष्यम्)

यद्यपि तावदत्रैतच्छक्यते वक्तुम् इह तु कथम्-'लुङलङ्लृङ्क्ष्वडुदात्तः' इति, यत्राशक्यमुदात्तग्रहणेनाकारो विशेषयितुम्॥

(प्रत्याक्षेपभाष्यम्)

तत्र को दोषः?॥

(प्रत्याक्षेपसमाधानभाष्यम्)

अङ्गस्योदात्तत्वं प्रसज्येत॥

(समाधानभाष्यम्)

नैष दोषः। त्रिपदोऽयं बहुव्रीहिः। तत्र वाक्य एवोदात्तग्रहणेनाकारो विशेष्यते-अकार उदात्त आदिरस्येति॥

(आक्षेपभाष्यम्)

यत्र तर्ह्यनुवृत्त्यैतद्भवति-'आडजादीनाम्' इति॥

(समाधानभाष्यम्)

वक्ष्यत्येतत्-*अजादीनामटा सिद्धम् इति॥

(सिद्धान्तिभाष्यम्)

अथवा-यत्तावदयं सामान्येनोपदेष्टुं शक्नोति, तत्तावदुपदिशति-प्रकृतिम्, ततो वलाद्यार्धधातुकम्, ततः पश्चादिकारम्। तेनायं विशेषेण शब्दान्तरं समुदायं प्रतिपद्यते। तद्यथा-खदिरबर्बुरयोः-खदिरबर्बुरौ गौरकाण्डौ सूक्ष्मपर्णौ। ततः पश्चादाह-कङ्कटवान् खदिर- इति। तेनाऽसौ विशेषेण द्वव्यान्तरं समुदायं प्रतिपद्यते॥

(समाधानान्तरभाष्यम्)

अथवा एतयानुपूर्व्याऽयं शब्दान्तरमुपदिशति प्रकृतिम्। ततो वलाद्यर्धधातुकम्। ततः पश्चादिकारं, यस्मिंस्तस्यागमबुद्धिर्भवति॥

(३०५आक्षेपवार्तिकम्॥१॥)

॥*॥ टकितोराद्यन्तविधाने प्रत्ययप्रतिषेधः॥*॥

(भाष्यम्)

टकितोराद्यन्तविधाने प्रत्ययस्य प्रतिषेधो वक्तव्यः॥ प्रत्यय आदिरन्तो वा मा भूदिति॥ 'चरेष्टः' 'आतोऽनुपसर्गे कः' इति॥

(३०६ समाधानवार्तिकम्॥२॥)

॥*॥ परवचनात्सिद्धम्॥*॥

(भाष्यम्)

परवचनात्प्रत्यय आदिरन्तो वा न भविष्यति॥

(३०७ समाधानबाधकैकदेशिवार्तिकम्॥३॥)

॥*॥ परवचनात्सिद्धमिति चेन्नापवादत्वात्॥*॥

(भाष्यम्)

परवचनात्सिद्धमिति चेत्। तन्न।

किं कारणम्?॥

'अपवादत्वात्'। अपवदोऽयं योगः॥ तद्यथा-'मिदचोन्त्यात्परः' इत्येष योगः स्थानेयोगत्वस्य प्रत्ययपरत्वस्य चापवादः॥

(समाधानसाधकदृष्टान्तवैषम्यभाष्यम्)

विषम उपन्यासः। युक्तं तत्र यदनवकाशं मित्करणं स्थानेयोगत्वं प्रत्ययपरत्वं च बाधते। इह तु पुनरुभयं सावकाशम्॥

टित्करणस्यावकाशः-'टितः' इति ईकरो यथा स्यात्। कित्करणस्यावकाशः- 'किति' इत्याकारलोपो यथा स्यात्।

(समाधानबाधकापवादत्वसाधकभाष्यम्)

प्रयोजनं नाम तद्वक्तव्यम्, यन्नियोगतः स्यात्। यदि चायं नियोगतः परः स्यात्तत एतत्प्रयोजनं स्यात्॥ कुतो न खल्वेतत्- टित्करणादयं परो भविष्यति न पुनरादिरिति, कित्करणाच्च परो भविष्यति न पुनरन्त इति?॥

(किदंशेऽपवादत्वबाधकभाष्यम्)

टितः खल्वप्येष परिहारः। यत्र नास्ति सम्भवः- यत्परश्च स्यादादिश्च। कितस्त्वपरिहारः। अस्ति हि सम्भवः- यत्परश्च स्यादन्तश्च॥

(आक्षेपभाष्यम्)

तत्र को दोषः?॥

(समाधानभाष्यम्)

'उपसर्गे घोः किः' आध्यो प्रध्योः। 'नोङ्धात्वोः' इति प्रतिषेधः प्रसज्येत॥

(टिदंशेऽप्यपवादत्वबाधकभाष्यम्)

टितश्चाप्यपरिहारः। स्यादेव ह्ययं टित्करणादादिः, न पुनः परः॥

(आक्षेपभाष्यम्)

क्व तर्हि इदानीमिदं स्यात्- टित ईकारो भवतीति?॥

(समाधानभाष्यम्)

य उभयवान्-'गापोष्टग्' इति॥

(३०८ सिद्धान्त्येकदेशिसमाधानवार्तिकम्॥४॥)

॥*॥ सिद्धं तु षष्ठयधिकारे वचनात्॥*॥

(भाष्यम्)

सिद्धमेतत्।

कथम्?।

षष्ठ्यधिकारेऽयं योगः कर्तव्य-'आद्यन्तौ टकितौ षष्ठीनिदिष्टस्य' इति॥

(३०९ सिद्धान्त्येकदेशिसमाधानान्तरवार्तिकम्॥५॥)

॥*॥ आद्यन्तयोर्वा षष्ठ्यर्थत्वात्तदभावेऽसंप्रत्ययः॥*॥

(भाष्यम्)

आद्यन्तयोर्वा षष्ठ्यर्थत्वात्तदभावे षष्ठ्या अभावे, असंप्रत्ययः स्यात्- आदिरन्तो वा न भविष्यति॥

(आक्षेपभाष्यम्)

युक्तं पुनर्यच्छब्दनिमित्तको नामार्थः स्यात्, नार्थनिमित्तकेन नाम शब्देन भवितव्यम्॥

(समाधानभाष्यम्)

अर्थनिमित्तक एव शब्दः॥

तत्कथम्?।

आद्यन्तौ षष्ठ्थौ। न चात्र षष्ठीं पश्यामः। ते मन्यामहे-आद्यन्तावेवात्र न स्तः॥ तयोरभावे षष्ठ्यपि न भवतीति॥ आद्यन्तौ टकितौ॥४५॥

(४१ परिभाषासूत्रम्॥१।१।७ आ. ३॥)

मिदचोऽन्त्यात्परः॥१।१।४६॥

(सूत्रबाध्यनिर्णयाधिकरणम्)

(आक्षेपभाष्यम्)

किमर्थमिदमुच्यते?॥

(३१० सिद्धान्तवार्तिकम्॥१॥)

॥*॥ मिदचोऽन्त्यात्पर इति स्थानपरप्रत्ययापवादः॥*॥

(भाष्यम्)

मिदचोऽन्त्यात्पर इत्युच्यते स्थानेयोगत्वस्य प्रत्ययपरत्वस्य चापवादः। स्थानेयोगत्वस्य तावत्- कुण्डानि वनानि पयांसि यशांसि। प्रत्ययपरत्वस्य- भिनत्ति छिनत्ति॥

(आक्षेपभाष्यम्)

भवेदिदं युक्तमुदाहरणम्-कुण्डानि वनानि, यत्र नास्ति संभवः-यदयमचोऽन्त्यात्परश्च स्यात्, स्थाने चेति। इदं त्वयुक्तम्- पयांसि यशांसीति, अस्ति हि सम्भवः-यदयमचोऽन्त्यात्परश्च स्यात्, स्थाने चेति॥

(समाधानभाष्यम्)

एतदपि युक्तम्॥

कथम्?॥

नैवेश्वर आज्ञापयति, नापि धर्मसूत्रकाराः पठन्ति-अपवादैरुत्सर्गा बाध्यन्तामिति॥

किं तर्हि?॥

लौकिकोऽयं दृष्टान्तः। लोके हि सत्यपि संभवे बाधनं भवति। तद्यथा-'दधि ब्राह्मणेभ्यो दीयतां तक्रं कौण्डिन्याय' इति, सत्यपि संभवे दधिदानस्य तक्रदानं निवर्तकं भवति। एवमिहापि सत्यपि संभवे अचामन्त्यात्परत्वं षष्ठीस्थानेयोगत्वं बाधिष्यते॥

(सूत्राप्रवृत्तिनिरूपणाधिकरणम्)

(३११ सिद्धान्ताक्षेपवार्तिकम्॥२॥)

॥*॥ अन्त्यात्पूर्वो मस्जेर्मिदनुषङ्गसंयोगादिलोपार्थम्॥*॥

(भाष्यम्)

अन्त्यात्पूर्वो मस्जेर्मिद्वक्तव्यः॥

किं प्रयोजनम्?॥

अनुषङ्गसंयोगादिलोपार्थम्। अनुषङ्गलोपार्थं संयोगादिलोपार्थं च। अनुषङ्गलोपार्थं तावत्- मग्नः मग्नवान्। संयोगादिलोपार्थम्-मङ्क्ता, मङ्क्तुम्, मङ्क्तव्यम्।

(३१२ आक्षेपवार्तिकम्॥३॥)

॥*॥ भर्जिमर्च्योश्च॥*॥

(भाष्यम्)

भर्जिमर्च्योश्चान्त्यात्पूर्वो मिद्वक्तव्यः। भरूजा मरीचय इति॥

(आक्षेपस्मारणभाष्यम्)

स तर्हि वक्तव्यः॥

(आक्षेपनिरासभाष्यम्)

न वक्तव्यः, निपातनात् सिद्धम्।

किं निपातनम्?॥

भरूजाशब्दोऽङ्गुल्यादिषु पठ्यते। मरीचिशब्दो बाह्वादिषु॥

(पूर्वान्ततत्वस्थापनाधिकरणम्)

किं पुनरयं पूर्वान्तः?, आहोस्वित् परादिः?, आहोस्विदभक्तः?॥

(प्रत्याक्षेपभाष्यम्)

कथं वायं पूर्वान्तः स्यात्?॥ कथं वा परादिः? कथं वाऽभक्तः?॥

(समाधानभाष्यम्)

यद्यन्त इति वर्तते ततः पूर्वान्तः। अथादिरिति वर्तते ततः परादिः। अथोभयं निवृत्तं ततोऽभक्तः॥

(भाष्यम्)

कश्चात्र विशेषः?।

(३१३ दूषणवार्तिकम्॥४॥)

॥*॥ अभक्ते दीर्घनलोपस्वरणत्वानुस्वारशीभावाः॥*॥

(भाष्यम्)

यद्यभक्तो दीर्घत्वं न प्राप्नोति। कुण्डानि वनानि। 'नोपधायाः, सर्वनामस्थाने चासम्बुद्धौ' इति दीर्घत्वं न प्राप्नोति॥ दीर्घ॥

(नलोपोदाहरणभाष्यम्)

नलोप- नलोपश्च न सिध्यति। 'अग्ने त्री ते वाजिना त्री षधस्था ता ता पिण्डानाम्' 'न लोपः प्रातिपदिकान्तस्य' इति नलोपो न प्राप्नोति॥ नलोप॥

(स्वरादाहरणभाष्यम्)

स्वर-स्वरश्च न सिध्यति। 'सर्वाणि ज्योतींषि' 'सर्वस्य सुपि' इत्याद्युदात्तत्वं न प्राप्नोति। स्वर॥

(णत्वोदारहणभाष्यम्)

णत्व- णत्वं च न सिध्यति। माषवापाणि व्रीहिवापाणि। पूर्वान्ते प्रातिपादिकान्तनकारस्येति सिद्धम्, परादौ विभक्तिनकारस्येति। अभक्ते नुमो ग्रहणं कर्तव्यम्॥

(उदाहरणनिरासभाष्यम्)

न कर्तव्यम्। क्रियते एतन्न्यास एव- 'प्रातिपदिकान्तनुम्विभक्तिषु च' इति। णत्व॥

(अनुस्वारोदाहरणभाष्यम्)

अनुस्वार-अनुस्वारश्च न सिध्यति। द्विषन्तपः परन्तपः। 'मनोऽनुस्वारो हलि' इत्यनुस्वारो न प्राप्नोति॥

(उदाहरणबाधकभाष्यम्)

मा भूदेवम्। 'नश्चापदान्तस्य झलि' इत्यनुस्वारो भविष्यति॥

(उदाहरणान्तरभाष्यम्)

यस्तर्हि न झल्परः-वहंलिहो गौः, अभ्रंलिहो वायुः॥ अनुस्वारः॥

(शीभावोदाहरणभाष्यम्)

शीभाव- शीभावश्च न सिध्यति। त्रपुणी जतुनी तम्बुरुणी। नपुंसकादुत्तरस्यौङः शीभावो भवतीति शीभावो न प्राप्नोति॥ शीभाव॥

(परादिपक्षाभ्युपगमभाष्यम्)

एवं तर्हि परादिः करिष्यते॥

(३१४ परादिपक्षे दूषणवार्तिकम्॥५॥)

॥*॥ परादौ गुणवृद्ध्यौत्वदीर्घनलोपानुस्वारशीभावेनकारप्रतिषेधाः॥*॥

(भाष्यम्)

यदि परादिर्गुणः प्रतिषेध्यः- त्रपुणे जतुने तुम्बुरुणे। 'घेर्ङिति' इति गुणः प्राप्नोति॥ गुण॥

(बृद्ध्युदारणभाष्यम्)

वृद्धि-वृद्धिः प्रतिषेध्या- अतिसखीनि ब्राह्मणकुलानि। 'सख्युरसम्बुद्धौ' इति णित्वे 'अचो ञ्णिति' इति वृद्धिः प्राप्नोति॥ वृद्धि॥

(औस्वोदाहरणभाष्यम्)

औत्वं-औत्वं च प्रतिषेध्यम्। त्रपुणि जुतनि तुम्बुरुणि। 'इदुद्भयामौदच्च घेः' इत्यौत्वं प्राप्नोति॥ औत्व॥

(दीर्घोदाहरणभाष्यम्)

दीर्घ-दीर्घत्वं च न सिध्यति। कुण्डानि वनानि। 'नोपधायाः, सर्वनामस्थाने चासम्बुद्धौ' इति दीर्घत्वं न प्राप्नोति॥

(उदाहरणनिरासभाष्यम्)

मा भूदेवम्। 'अतो दीर्घो यञि, सुपि च' इत्येवं भविष्यति॥

(उदाहरणान्तरभाष्यम्)

इह तर्हि-अस्थीनि दधीनि प्रियसखीनि ब्राह्मणकुलानि॥ दीर्घ॥

(नलोपोदाहरणभाष्यम्)

नलोप-नलोपश्च न सिध्यति। 'अग्ने त्री ते वाजिना त्री षधस्था ता ता पिण्डानाम्' 'न लोपः प्रातिपदिकान्तस्य' इति नलोपो न प्राप्नोति॥ नलोप।

(अनुस्वारोदाहरणभाष्यम्)

अनुस्वार-अनुस्वारश्च न सिद्धयति। द्विषन्तपः परन्तपः॥ 'मोऽनुस्वारो हलि' इत्यनुस्वारो न प्राप्नोति॥

(उदाहरणनिरासभाष्यम्)

मा भूदेवम्। 'नश्चापदान्तस्य झलि' इत्यनुस्वारो भविष्यति॥

(उदाहरणान्तरभाष्यम्)

यस्तर्हि न झल्परः-वहंलिहो गौः, अभ्रंलिहो वायुः॥ अनुस्वार॥

(उदाहरणभाष्यम्)

शीभावे नकारप्रतिषेध-शीभावे नकारस्य प्रतिषेधो वक्तव्यः। त्रपुणी जतुनी तुम्बरुणी। सनुम्कस्य शीभावः प्राप्नोति॥

(उदाहरणनिरासभाष्यम्)

नैष दोषः, 'निदिश्यमानस्यादेशा भवन्ति' इत्येवं न भविष्यति॥

(उदाहरणसाधकभाष्यम्)

यस्तर्हि निदिश्यते तस्य न प्राप्नोति॥

कस्मात्?

नुमा व्यवहित्वाद्॥

(पूर्वान्तपक्षाभ्युपगमभाष्यम्)

एवं तर्हि पूर्वान्तः करिष्यते।

(३१५ पूर्वान्तपक्षे दूषणवार्तिकम्॥६॥)

॥*॥ पूर्वान्ते नपुंसकोपसर्जनह्रस्वत्वं द्विगुस्वरश्च॥*॥

(भाष्यम्)

यदि पूर्वान्तः क्रियते, नपुंसकोपसर्जनह्रस्वत्वं द्विगुस्वरश्च न सिद्धयति॥

(उदाहरणभाष्यम्)

नपुंसकोपसर्जनह्रस्वत्वम्-आराशस्त्रिणी धानाशष्कुलिनी, निष्कौशाम्बिनी निर्वाराणसिनी॥

द्विगुस्वरः-पञ्चारत्निनी दशारत्निनी। नुमि कृते अनजन्तत्वादेते विधयो न प्राप्नुवन्ति॥

(३१६ दूषणबाधकवार्तिकम्॥७॥)

॥*॥ न वा बहिरङ्गलक्षणत्वात्॥*॥

(भाष्यम्)

न वा एष दोषः।

किं कारणम्?॥

‘बहिरङ्गलक्षणत्वात्’

बहिरङ्गो नुम्, अन्तरङ्गा एते विधयः॥

‘असिद्धं बहिरङ्गमन्तरङ्गे’॥

द्विगुस्वरे भूयान् परिहारः-संघातभक्तोऽसौ नोत्सहतेऽवयवस्येगन्ततां विहन्तुमिति कृत्वा द्विगुस्वरो भविष्यति॥ मिदचोऽन्त्यात्परः॥४३॥

(इत्यागमस्थितिदेशनिर्णयप्रकरणम्)

(अथादेशनियामकप्रकरणम्)

(४२ परिभाषासूत्रम्॥१।१।७ आ.४)

एच इग्घ्रस्वादेशे॥१।१।४७॥

(सूत्रारम्भप्रयोजनाधिकरणम्)

(आक्षेपभाष्यम्)

किमर्थमिदमुच्यते?

(३१७ प्रयोजनवार्तिकम् ॥१॥)

॥*॥ एच इग्वचनं सवर्णाकारनिवृत्त्यर्थम्॥*॥

(भाष्यम्)

एच इग्भवतीत्युच्यते-सवर्णनिवृत्त्यर्थमकारनिवृकत्यर्थं च॥ सवर्णनिवृत्यर्थं तावत्—एङो ह्रस्वादेशशासनेषु अर्ध एकारोऽर्ध ओकारो वा मा भूदिति॥ अकारनिवृत्यर्थं च-इमावैचौ समाहारवर्णौ मात्राऽवर्णस्य, मात्रेवर्णोवर्णयोः। तयोर्ह्रस्वशासनेषु कदाचिदवर्णः स्यात् कदाचिदिवर्णोवर्णौ। मा कदाचिदवर्ण भूदित्येवमर्थमिदमुच्यते॥

(भाष्यम्)

अस्ति प्रयोजनमेतत्॥

किं तर्हीति॥

(अनिष्टापत्तिनिराकरणाधिकरणम्)

(३१८ आक्षेपवार्तिकम्॥२॥)

॥*॥ दीर्घप्रसङ्गस्तु॥*॥

(भाष्यम्)

दीर्घास्त्विकः प्राप्नुवन्ति॥

किं कारणम्?।

स्थानेऽन्तरतमो भवतीति॥

(आक्षेपबाधकभाष्यम्)

ननु च ह्रस्वादेश इत्युच्यते, तेन दीर्घा न भविष्यन्ति॥

(आक्षेपसाधकभाष्यम्)

विषयार्थमेतत् स्यात्-एचो ह्रस्वप्रसङ्गे इग्भवतीति॥

(३१९ समाधानवार्तिकम्॥३॥)

॥*॥ दीर्घाप्रसङ्गस्तु निवर्तकत्वात्॥*॥

(भाष्यम्)

दीर्घाणां त्विकामप्रसङ्गः॥

किं कारणम्॥

'निवर्तकेत्वात्'। नानेनेको निर्वर्त्यन्ते।

किं तर्हि?॥

अनिको निवर्त्यन्ते॥ सिद्धा ह्यत्र ह्रस्वा इकश्चानिकश्च। तत्रानेनानिको निवर्त्यन्ते॥

(सूत्रप्रत्याख्यानाधिकरणम्)

(प्रथमप्रयोजनप्रत्याख्यानभाष्यम्)

सवर्णनिवृत्त्यर्थेन तावन्नार्थः।

(३२० प्रत्याख्यानसाधकवार्तिकम्॥४॥)

॥*॥ सिद्धमेङः सस्थानत्वात्॥*॥

(भाष्यम्)

सिद्धमेतत्॥

कथम्?॥

एङः 'सस्थानत्वाद्' इकारोकारौ भविष्यतः, अर्ध एकारोऽर्घ ओकारो वा न भविष्यति॥

(आक्षेपभाष्यम्)

ननु च एङः सस्थानतरावर्धैकाराद्धौकारौ॥

(समाधानभाष्यम्)

न तौ तः। यदि हि तौ स्यातां तावेवायमुपदिशेत्॥

(समाधानबाधकष्यम्)

ननु च भोश्छन्दोगानां सात्यमुग्रिराणायनीया अर्धमनेकारमर्धमोकारं चाधीयते- 'सुजाते एश्व' सूनृते, 'अध्वर्यो ओद्रिभिः सुतम्' 'शुक्रन्ते एन्यद्' 'यजतं ते एन्यत्' इति॥

(समाधानसाधकभाष्यम्)

पार्षदकृतिरेषा तत्रभवताम्। नैव लोके नान्यस्मिन् वेदे-अर्ध एकारः, अर्ध ओकारो वास्ति॥

(द्वितीयप्रयोजनप्रत्याख्यानभाष्यम्)

अकारनिवृत्त्यर्थेनापि नार्थः॥

(३२१ प्रत्याख्यानसाधकवार्तिकम्॥५॥)

॥*॥ ऐचोश्चोत्तरभूयस्त्वात्॥*॥

(भाष्यम्)

ऐचोश्चोत्तरभूयस्त्वादवर्णो न भविष्यति॥ भूयसी मात्रेवर्णोवर्णयोः, अल्पीयस्यवर्णस्य। भूयस एव ग्रहणानि भविष्यन्ति। तद्यथा-'ब्राह्मणग्राम आनीयताम्' इत्युच्यते। तत्र चावरतः पञ्चकारुकी भवति॥ एच इग्घ्रस्वादेशे॥४८॥

(४३ परिभाषासूत्रम्॥१।१।७ आ. १२५॥)

षष्ठी स्थानेयोगा॥१।१।४१॥

(स्थानेयोगशब्दार्थनिरूपणाधिकरणम्)

(आक्षेपभाष्यम्)

किमिदम्-स्थानेयोगेति?॥

(समाधानभाष्यम्)

स्थाने योगोऽस्याः सेयं स्थानेयोगा। सप्तम्यलोपो निपातनात्॥

तृतीयाया वा एत्वम्। स्थानेन योगोऽस्याः सेयं स्थानेयोगेति॥

(सूत्रप्रयोजनाधिकरणम्)

(आक्षेपभाष्यम्)

किमर्थं पुनरिदमुच्यते?॥

(३२२ समाधानवार्तिकम्॥१॥)

॥*॥ षष्ठ्याः स्थानेयोगवचनं नियमार्थम्॥*॥

(भाष्यम्)

नियमार्थोऽयमारम्भः। एकशतं षष्ठ्यर्थाः, यावन्तो वा सन्ति। ते सर्वे षष्ठ्यामुञ्चारितायां प्राप्नुवन्ति। इष्यते च- व्याकरणे या षष्ठी सा स्थानेयोगैव स्यादिति। तञ्चान्तरेण यत्नं न सिध्यतीति षष्ठ्याः स्थानेयोगवचनं नियमार्थम्। एवमर्थमिदमुच्यते॥

(भाष्यम्)

अस्ति प्रयोजनमेतत्॥

किं तर्हीति॥

(अनिष्टापत्तिनिराकरणाधिकरणम्)

(३२३ आक्षेपवार्तिकम्॥२॥)

॥*॥ अवयवषष्ठ्यादिष्वतिप्रसङ्ग शासो गोह इति॥*॥

(भाष्यम्)

अवयवषष्ठयादयस्तु न सिध्यन्ति॥

तत्र को दोषः?॥

'शास इदङ्हलोः' इति शासेश्चान्त्यस्य स्यादुपधामात्रस्य च। 'ऊदुपधाया गोहः' इति गोहेश्चान्त्यस्य स्यादुपधामात्रस्य च॥

(३२४ आक्षेपबाधकसमाधानवार्तिकम्॥३॥)

॥*॥ अवयवषष्ठ्यादीनां चाऽप्राप्तिर्योगस्याऽसंदिग्धत्वात्॥*॥

(भाष्यम्)

अवयवषष्ठ्यादीनां च नियमस्याप्राप्तिः॥

किं कारणम्?।

'योगस्यासंदिग्धत्वात्'। संदेहे नियमः। न चावयवषष्ठ्यादिषु संदेहः॥

(आक्षेपभाष्यम्)

किं वक्तव्यमेतत्?॥

(समाधानभाष्यम्)

नहि॥

कथमनुच्यमानं गंस्यते?।

लौकिकोऽयं दृष्टान्तः। तद्यथा लोके- कश्चित् कंचित् पृच्छति-ग्रामान्तरं गमिष्यामि पन्थानं मे भवानुपदिशत्विति। स तस्मायाचष्टे-अमुष्मिन्नवकाशे हस्तदक्षिणो ग्रहीतव्यः, अमुष्मिन्नकाशे हस्तवाम इति। यस्तत्र तिर्यक्पथो भवति, न तस्मिन् संदेह इति कृत्वा नासावुपदिश्यते। एवमिहापि संदेहे नियमः। न चावयवषष्ठ्यादिषु संदेहः॥

(समाधानान्तरभाष्यम्)

अथवा-स्थाने अयोगा स्थानेयोगा॥

किमिदमयोगेति?॥

अव्यक्तयोगा अयोगा॥

(समाधानान्तरभाष्यम्)

अथवा-योगवती योगा॥

का पुनर्योगवती?॥

यस्या बहवो योगाः॥

कुत एतत्?॥

भूम्नि हि मतुब् भवति॥

(३२५ आक्षेपबाधकवार्तिकम्॥४॥)

॥*॥ विशिष्टा वा षष्ठी स्थानेयोगा॥*॥

(भाष्यम्)

अथवा-किंचिल्लङ्गमासज्य वक्ष्यामि-इत्थंलिङ्गा षष्ठी स्थानेयोगा भवतीति॥ न च तल्लिङ्गमवयवषष्ठ्यादिषु करिष्यते॥

(आक्षेपभाष्यम्)

यद्येवं, 'शास इदङ्हलोः' 'शा हौ' शासिग्रहणं कर्तव्यम्-स्थानेयोगार्थं लिङ्गमासङ्क्षयामीति॥

(आक्षेपबाधकभाष्यम्)

न कर्तव्यम्। यदेवादः पुरस्तादवयवषष्ठ्यर्थं प्रकृतम्, एतदुत्तरत्रानुवृत्तं सत् स्थानेयोगार्थं भविष्यति॥

कथम्?॥

अधिकारो नाम त्रिप्रकारः॥

कश्चिदेकदेशस्थः सर्वं शास्त्रमभिज्वलयति, यथा प्रदीपः सुप्रज्वलितः सर्वं वेश्माभिज्वलयति॥

अपरोऽधिकारो यथा रज्ज्वा अयसा वा बद्धं काष्ठमनुकृष्यते तद्वदनुकृष्यते चकारेण॥

अपरोऽधिकारः प्रतियोगं तस्यानिर्देशार्थ इति योगे योगे ऽपतिष्ठते॥

तद्यदैष पक्षः-अधिकारः प्रतियोगं तस्यानिर्देशार्थ इति। तदा हि यदेवादः पुरस्तादवयवषष्ठ्यर्थम्, एतदुत्तरत्रानुवृत्तं सत् स्थानेयोगार्थं भविष्यति॥

(आक्षेपभाष्यम्)

संप्रत्ययमात्रमेतद्भवति। नह्यनुञ्चार्य शब्दं लिङ्गं शक्यमासङ्क्तुम्॥

(आक्षेपबाधकभाष्यम्)

एवं तर्ह्यादेशे तल्लिङ्गं करिष्यते, तत्प्रकृतिमास्कन्त्स्यति॥

(प्रत्याख्यानभाष्यम्)

यदि नियमः क्रियते, यत्रैका षष्ठी अनेकं च विशेष्यं तत्र न सिध्यति। अङ्गस्य हलः अणः संप्रसारणस्येति हलस्य विशेष्योऽणपि विशेष्यः, संप्रसारणमपि विशेष्यम्॥ असति पुनर्नियमे कामचारः-एकया षष्ठ्या अनेकं विशेषयितुम्। तद्यथा-देवदत्तस्य पुत्रः पाणिः कम्बल इति॥ तस्मान्नार्थो नियमेन॥

(उक्ताक्षेपस्मारणभाष्यम्)

ननु चोक्तम्-एकशतं षष्ठ्यर्थाः, यावन्तो वा सन्ति। ते सर्वे षष्ठयामुच्चारितायां प्राप्नुवन्तीति॥

(आक्षेपबाधकभाष्यम्)

नैष दोषः। यद्यपि लोके बहवोऽभिसंबन्धा आर्था यौना मौखाः स्रौवाश्चेति। शब्दस्य तु शब्देन कोऽन्योऽभिसंबन्धो भवितुर्मति-अन्यदतः स्थानात्॥

(आक्षेपसाधकभाष्यम्)

शब्दस्यापि शब्देनानन्तरादयोऽभिसंबन्धाः। अस्तेर्भूवतीति संदेहः- स्थाने अनन्तरे समीपे इति॥

(आक्षेपबाधकभाष्यम्)

संदेहमात्रमेतद्भवति। सर्वसंदेहेषु चेदमुपतिष्ठते-'व्याख्यानतो विशेषप्रतिपत्तिर्नहि संदेहादलक्षणम्' इति। स्थान इति व्याख्यास्यामः॥

(निर्दिश्यामानपरिभाषाधिकरणम्)

(आक्षेपभाष्यम्)

न तर्हीदानीमयं योगो वक्तव्यः॥

(समाधानभाष्यम्)

वक्तव्यश्च॥

किं प्रयोजनम्?।

षष्ठ्यन्तं स्थानेन यथा युज्येत यतः षष्ठ्युच्चारिता॥

किं कृतं भवति॥?

'निर्दिश्येमानस्यादेशा भवन्ति' इत्येषा परिभाषा न कर्तव्या भवति॥ षष्ठी स्थानेयोगा॥४९॥

(४४अन्तरतमपरिभाषासूत्रम्॥१।१।७॥ आ. ६॥)

स्थानेऽन्तरतमः॥१।१।५०॥

(सूत्रोदाहरणाधिकरणम्)

(आक्षेपभाष्यम्)

किमुदाहरणम्?॥

(समाधानभाष्यम्)

'इको यणचि' दध्यत्र मध्वत्र। तालुस्थानस्य तालुस्थानः, ओष्ठस्थानस्य ओष्ठस्थानो यथा स्यादिति॥

(समाधानबाधकभाष्यम्)

नैतदस्ति। संख्यातानुदेशेनाप्येतत्सिद्धम्॥

(उदाहरणप्रदर्शनकभाष्यम्)

इदं तर्हि-'तस्थस्थमिपां तांतंतामः' इति। एकार्थस्यैकार्थः व्यर्थस्य व्यर्थो, बह्वर्थस्य बह्वर्थो, यथा स्यादिति।

(उदाहरणबाधकभाष्यम्)

ननु च एतदपि संख्यातानुदेशेनैव सिद्धम्।

(उदाहरणान्तरभाष्यम्)

इदं तर्हि-'अकः सवर्णे दीर्घः' इति दण्डाग्रम्, क्षुपाग्रम्, दधीन्द्रः, मधूष्ट्रः। कण्ठस्थानयोः कण्ठस्थानस्तालुस्थानयोस्तालुस्थान ओष्ठस्थानयोरोष्ठस्थानो यथा स्यात्॥

(यत्रानेकविधपरिभाषासाधनाधिकरणम्)

(आक्षेपभाष्यम्)

अथ स्थान इति वर्तमाने पुनः स्थानग्रहणं किमर्थम्॥

(समाधानभाष्यम्)

यत्रानेकमान्तर्यं तत्र स्थानत एवान्तर्यं बलीयो यथा स्यात्॥

किं पुनस्तत्?॥

चेता स्तोता। प्रमाणतोऽकारो गुणः प्राप्नोति, स्थानत एकारोकारौ। पुनः स्थानग्रहणादेकारौकारौ भवतः॥

(तमग्रहणप्रयोजनाधिकरणम्)

(आक्षेपभाष्यम्)

अथ तमग्रहणं किमर्थम्?॥

(समाधानभाष्यम्)

'झयो होऽन्यतरस्याम्' इत्यत्र 'सोष्मणः सोष्माणः' इति द्वितीयाः प्रसक्ताः, 'नादवतो नादवन्त' इति तृतीयाः प्रसक्ताः॥ तमग्रहणाद्ये सोष्माणो नादवन्तश्च ते भवन्ति चतुर्थाः- वाग्घसति त्रिष्टुब्भसति॥

(सूत्रप्रयोजनाधिकरणम्)

(आक्षेपभाष्यम्)

किमर्थं पुनरिदमुच्यते?॥

(३२६ समाधानवार्तिकम्॥१॥)

॥*॥ स्थानिन एकत्वनिर्देशादनेकादेशनिर्देशाच्च सर्वप्रसङ्गस्तस्मात् स्थानेऽन्तरतमवचनं नियमार्थम्॥*॥

(भाष्यम्)

स्थान्येकत्वेन निर्दिश्यते- अक इति। अनेकश्च पुनरादेशः प्रतिनिर्दिश्यते- दीर्घ इति। ‘ स्थानिन एकत्वनिर्देशादनेकादेशनिर्देशाच्च’ ‘सर्वप्रसङ्गः’ सर्वे सर्वत्र प्राप्नुवन्ति। इष्यते चान्तरतमा एव स्युरिति। तच्चान्तरेण यत्नं न सिध्यति। तस्मात् स्थानेऽन्तरतमवचनं नियमार्थम्। एवमर्थमिदमुच्यते॥

(काकुभाष्यम्)

अस्ति प्रयोजनमेतत्॥

किं तर्हीति॥

(अथ प्रथमान्तपाठनिर्णयाधिकरणम्)

(आक्षेपभाष्यम्)

यथा पुनरियमन्तरतमनिवृत्तिः, सा किं प्रकृतितो भवति- स्थानिन्यन्तरतमे षष्ठीति। आहोस्वदादेशतः- स्थाने प्राप्यमाणानामन्तरतम आदेशो भवतीति॥

कुतः पुनरियं विचारणा?॥

उभयथा हि तुल्या संहिता ‘स्थानेऽन्तरतम ऊरण् रपरः’ इति॥

(भाष्यम्)

किं चात्?॥

(सप्तम्यन्तपाठदूषणभाष्यम्)

यदि प्रकृतितः, 'इको यणचि' इति यणां येऽन्तरतमा इकस्तत्र षष्ठी, यत्र षष्ठी तत्रादेशा भवन्तीतीहैव स्याद्-दध्यत्र मध्वत्र। कुमार्यर्थं ब्रह्मबन्ध्वर्थमित्यत्र न स्यात्॥ आदेशतः पुनरन्तरतमनिर्वृत्तौ सत्यां सर्वत्र षष्ठी। यत्र षष्ठी तत्रादेशा भवन्तीति सर्वत्र सिद्धं भवति॥

(सप्तम्यन्तपाठदूषणान्तरभाष्यम्)

तथा-'इको गुणवृद्धी' गुणवृद्ध्योर्ये अन्तरतमा इकस्तत्र षष्ठी, यत्र षष्ठी तत्रादेशा भवन्तीतीहैव स्याद्- नेता लविता नायको लावकः । चेता स्तोता चायकः स्तावक इत्यत्र न स्यात्। आदेशतः पुनरन्तरतमनिर्वृत्तौ सत्यां सर्वत्र षष्ठी। यत्र षष्ठी तत्रादेशा भवन्तीति सर्वत्र सिद्धं भवतीति॥

(सप्तम्यन्तपाठदूषणान्तरभाष्यम्)

तथा-ऋवर्णस्य गुणवृद्धिप्रसङ्गे-गुणवृद्ध्योर्यदन्तरतममृवर्णं तत्र षष्ठी। यत्र षष्ठी तत्रादेशा भवन्तीतीहैव स्यात्- कर्ता हर्ता आस्तारकः निपारक इति। आस्तरिता निपरिता कारको हारक इत्यत्र न स्यात्॥ आदेशतः पुनरन्तरतमनिर्वृत्तौ सत्यां सर्वत्र षष्ठी। यत्र षष्ठी तत्रादेशा भवन्तीति सर्वत्र सिद्धं भवतीति॥

(प्रथमान्तरपाठदूषणभाष्यम्)

अथादेशतोऽन्तरमनिर्वृत्तौ सत्यामयं दोषः-वान्तो यि प्रत्यये' स्थानिनिर्देशः कर्तव्यः-ओकारौकारयोरिति वक्तव्यम्, एकारैकारयोर्माभूदिति। प्रकृतितः पुनरन्तरतमनिर्वृत्तौ सत्यां वान्तादेशस्य एक्षु यान्तरतमा प्रकृततिस्तत्र षष्ठी। यत्र षष्ठी तत्रादेशा भवन्तीत्यान्तरेण स्थानिनिर्देशं सिद्धं भवति।

(दूषणोद्धारभाष्यम्)

आदेशतोऽप्यन्तरतमनिर्वृत्तौ सत्यां न दोषः॥

कथम्?॥

वान्तग्रहणं न करिष्यते- 'यि प्रत्यये' एचोऽयादयो भवन्तीत्येव॥

(आक्षेपभाष्यम्)

यदि न क्रियते, चेयं जेयमित्यत्रापि प्राप्नोति॥

(आक्षेपबाधकभाष्यम्)

'क्षय्यजय्यौ शक्यार्थे' इत्येतन्नियमार्थं भविष्यति- क्षिज्योरेवैच इति॥

(आक्षेपसाधकभाष्यम्)

तयोस्तर्हि शक्यार्थादन्यत्रापि प्राप्नोति- क्षेयं पापं जेयो वृषलः॥

(आक्षेपबाधकभाष्यम्)

उभयतो नियमो विज्ञास्यते- क्षिज्योरेवैचः, तयोश्च शक्यार्थ एवेति॥

(इष्टानुपपत्तिभाष्यम्)

इहापि तर्हि नियमान्न प्राप्नोति- लव्यं पव्यम्। अवश्यलाव्यम् अवश्यपाव्यमिति॥

(इष्टोपपत्तिभाष्यम्)

तुल्यजातीयस्य नियमः॥

कश्च तुल्यजातीयः?॥

यथाजातीयकः क्षिज्योरेच्॥

कथंजातीयकः क्षिज्योरेच्?॥

एकारः॥

(अनिष्टापत्तिभाष्यम्)

[एवमपि] रायमिच्छति रैयतीत्यत्र प्राप्नोति॥

(अनिष्टापत्तिवारणभाष्यम्)

रायिश्छान्दसः। दृष्टानुविधिश्छन्दसि भवति॥

(प्रथमान्तपाठे दूषणान्तरभाष्यम्)

'ऊदुपधाया गोहः' आदेशतोऽन्तरतमनिर्वृत्तौ सत्यामुपधाग्रहणं कर्तव्यम्॥ प्रकृतितः पुनन्तरतमनिर्वृत्तौ सत्यामूकारस्य गोहो याऽन्तरतमा प्रकृतिस्तत्र षष्ठी, यत्र षष्ठी तत्रादेशा भवन्तीत्यन्तरेणोपधाग्रहणं सिद्धं भवति॥

(दूषणोद्धारभाष्यम्)

आदेशतोऽप्यन्तरतमनिर्वृत्तौ सत्यां न दोषः॥ क्रियते एतन्न्यास एव॥

(प्रथमान्तपाठे दूषणान्तरभाष्यम्)

'रदाभ्यां निष्ठातो नः पूर्वस्य च दः' आदेशतोऽन्तरतमनिर्वृतौ सत्यां तकारग्रहणं कर्तव्यम्॥ प्रकृतितः पुनरन्तरनिवृत्तौ सत्यां नकारस्य निष्ठायां यान्तरतमा प्रकृतिस्तत्र षष्ठी, यत्र षष्ठी तत्रादेशा भवन्तीत्यन्तरेणापि तकारग्रहणं सिद्धं भवति॥

(दूषणपरिहारभाष्यम्)

आदेशतोऽप्यन्तरतमनिर्वृतौ सत्यां न दोषः। क्रियत एतन्न्यास एव॥

(इति प्रथमान्तपाठनिर्णयः)

(अथ स्वतन्त्रविधित्वनिराकरणम्)

(आक्षेपभाष्यम्)

किं पुनरिदं निर्वर्तकम्-अन्तरतमा अनेन निर्वर्त्यन्ते। आहोस्वित् प्रतिपादकम्- अन्येन निर्वृत्तानामनेन प्रतिपत्तिः?॥

(भाष्यम्)

कश्चात्र विशेष?॥

(३२७ प्रथमपक्षदूषणवार्तिकम्॥२॥)

॥*॥ स्थानेऽन्तरतमे निर्वर्तके सर्वस्थानिनिवृत्तिः॥*॥

(भाष्यम्)

स्थानेऽन्तरतमे निर्वर्तके निवृत्तिः प्राप्नोति। अस्यापि प्राप्नोति- दधि, मधु॥

(आक्षेपबाधकभाष्यम्)

अस्तु, न कश्चिदन्य आदेशः प्रतिनिर्दिश्यते। तत्रान्तर्यतो दधिशब्दस्य दधिशब्द एव, मधुशब्दस्य मधुशब्द एवादेशो भविष्यति॥

(आक्षेपसाधकभाष्यम्)

यदि चैवम्, क्वचिवैरुप्यं तत्र दोषः स्यात्- बिसं मुसलमिति। 'इण्कोरादेशप्रत्यययोः' इति षत्वं प्राप्नोति॥

(आक्षेपान्तरभाष्यम्)

अपि च- इष्टा व्यवस्था न प्रकल्प्येत। तद्यथा- तप्ते भ्राष्ट्रे तिलाः प्रक्षिप्ता मुहूर्तमपि नावतिष्ठन्ते। एवमिमे वर्णा मुहूर्तमपि नावतिष्ठेरन्॥

(द्वितीयपक्षाभ्युपगमभाष्यम्)

अस्तु तर्हि प्रतिपादकम्- अन्येन निर्वृत्तामानेन प्रतिपत्तिः॥

(३२८ आक्षेपवार्तिकम्॥३॥)

॥*॥ निर्वृत्तप्रतिपत्तौ निर्वृत्तिः॥*॥

(भाष्यम्)

निर्वृत्तप्रतिपत्तौ निर्वृत्तिर्न सिध्यति। सर्वे सर्वत्र प्राप्नुवन्ति॥

(आक्षेपतात्पर्यप्रश्नभाष्यम्)

किं तर्ह्युच्यते- निर्वृत्तिर्न सिध्यतीति?॥ न साधीयो निर्वृत्तिः सिद्धा भवति॥

(आक्षेपतात्पर्यवर्णनभाष्यम्)

न ब्रूमो- निर्वृत्तिर्न सिध्यतीति॥

किं तर्हि?।

इष्टा व्यवस्था न प्रकल्पेत। न सर्वे सर्वत्रेष्यन्ते॥

(प्रत्याक्षेपभाष्यम्)

इदमिदानीं किमर्थं स्यात्?॥

(३२९ प्रत्याक्षेपसमाधानवार्तिकम्॥४॥)

॥*॥ अनर्थकं च॥*॥

(भाष्यम्)

अनर्थकमेतत्स्यात्। यो हि भुक्तवन्तं ब्रूयात् 'मा भुक्थाः' इति किं तेन कृतं स्यात्॥

(आनर्थक्यपरिहारेण समाधानभाष्यम्)

॥*॥ उक्तं वा॥*॥

किमुक्तम्?॥

सिद्धं तु षष्ठ्यधिकारे वचनात् इति। षष्ठ्यधिकारेऽयं योगः कर्तव्यः, स्थानेऽतरतमः 'षष्ठीनिर्दिष्टस्य' इति ॥

(अनिष्टनिराकरणाधिकरण्)

(३३० आक्षेपवार्तिकम्॥५॥)

॥*॥ प्रत्यात्मवचनं च ॥*॥

(भाष्यम्)

प्रत्यात्ममिति च वक्तव्यम्॥

किं प्रयोजनम्?।

यो यस्यान्तरतमः स तस्य स्थाने यथा स्यात्, अन्यस्यान्तरतमोऽन्यस्य स्थाने मा भूदिति॥

(३३१ समाधानवार्तिकम्॥६॥)

॥*॥ प्रत्यात्मवचनमशिष्यं स्वभावसिद्धत्वात्॥*॥

प्रत्यात्मवचनमशिष्यम्॥

किं कारणम्?।

'स्वभावसिद्धत्वात्'। स्वभावत एतत्सिद्धम्। तद्यथा- समाजेषु समाशेषु समवायेषु चाऽऽस्यतामित्युक्ते न चोच्यते-प्रत्यात्ममिति, प्रत्यात्मं चासते॥

(सूत्रप्रत्याख्यानाधिकरणम्)

(३३२ प्रत्याख्यानवार्तिकम्॥७॥)

॥*॥ अन्तरतमवचनं च ॥*॥

(भाष्यम्)

अन्तरतमवचनं चाशिष्यम्-योगश्चाप्ययमशिष्यः॥

कुतः?।

'स्वभावसिद्धात्वदेव'। तद्यथा-समाजेषु समाशेषु समवायेषु चास्यतामित्युक्ते-नैव कृशाः कृशैः सहासते, न पाण्डवः पाण्डुभिः। येषामेव किंचिदर्थकृतमान्तर्यं तैरेव सहासते॥

तथा-गावो दिवसं चरितवत्यो-यो यस्याः प्रसवो भवति, तेन सह शेरते॥

तथा-यान्येतानि गोयुक्तकानि संघुष्टकानि भवन्ति, तान्यन्योन्यमपश्यन्ति शब्दं कुर्वन्ति॥

(दृष्टान्तबाधकभाष्यम्)

एवं तावच्चेतनावत्सु॥

(दृष्टान्तान्तरभाष्यम्)

अचेतनेष्वपि। तद्यथा-लोष्टः क्षिप्तो बाहुवेगं गत्वा नैव तिर्यग्गच्छति नोर्ध्वमारोहति। पृथिवीविकारः पृथिवीमेव गच्छत्यान्तर्यतः॥

तथा-या एता आन्तरिक्ष्यः सूक्ष्मा आपस्तासां विकारो धूमः। स धूम आकाशे निवाते नैव तिर्यग्गच्छति नार्वागवरोहति॥ अब्विकारोऽप एव गच्छत्यान्तर्यतः॥

तथा- ज्योतिषो विकारोऽर्चिराकाशदेशे निवाते सुप्रज्वलितं नैव तिर्यग्गच्छति नार्वागवरोहति। ज्योतिषो विकारो ज्योतिरेव गच्छत्यान्तर्यतः॥

(सूत्रसत्ताप्राप्तदूषणनिराकरणाधिकरणम्)

(३३३ दूषणवार्तिकम्॥८॥)

॥*॥ व्यञ्जनस्वरव्यतिक्रमे च तत्कालप्रसङ्गः॥*॥

(भाष्यम्)

व्यञ्जनव्यतिक्रमे स्वरव्यतिक्रमे च तत्कालता प्राप्नोति॥ व्यञ्जनव्यतिक्रमे- इष्टम् ऽसम्। आन्तर्यतोऽर्धमात्रिकस्य व्यञ्जनस्याऽर्धमात्रिक इक् प्राप्नोति॥

(दूषणबाधकभाष्यम्)

नैव लोके नैव वेदेऽर्धमात्रिक इगस्ति॥

कस्तर्हि?॥

मात्रिकः। योऽस्ति स भविष्यति॥

(दूषणान्तरभाष्यम्)

स्वरव्यतिक्रमे- दध्यत्र मध्वत्र कुमार्यर्थं ब्रह्मबन्ध्वर्थम्। आन्तर्यतो मात्रिकस्य द्विमात्रिकस्येको मात्रिको द्विमात्रिको यण् प्राप्नोति॥

(दूषणबाधकभाष्यम्)

नैव लोके नैव वेदे मात्रिको द्विमात्रिको वा यणस्ति॥

कस्तर्हि?॥

अर्धमात्रिकः। योऽस्ति स भविष्यति॥

(३३४ दूषणवार्तिकम्॥९॥)

॥*॥ अक्षु चानेकवर्णादेशेषु ॥*॥

(भाष्यम्)

अक्षु चानेकवर्णादेशेषु तत्कालता प्राप्नोति॥ 'इदम इश्'। आर्न्यतोऽर्धतृतीयमात्रिकस्येदमः स्थानेऽर्धतृतीयमात्रमिवर्णं प्राप्नोति॥

(दूषणबाधकभाष्यम्)

नैष दोषः। 'भाव्यमानेन सवर्णानां ग्रहणं न' इत्येवं न भविष्यति॥

(३३५ दूषणवार्तिकम्॥१०॥)

॥*॥ गुणवृद्ध्येज्भावेषु च॥*॥

(भाष्यम्)

गुणवृद्धयोरेज्भावेषु च तत्कालता प्राप्नोति॥ खट्वा+इन्द्रः खट्वेन्द्रः। खट्वा+उदकम् खट्वोदकम्। खट्वा+ईषा खट्वेषा। खट्वा+ऊढा खट्वोढा। खट्वा+एलका खट्वैलका। खट्वा+ओदनः खट्वौदनः। खट्वा+ऐतिकायनः खट्वैतिकायनः। खट्वा+औपगवः खट्वौपगवः। इति। आन्तर्यस्त्रिमात्रचतुर्मात्राणां स्थानिनां त्रिमात्रचतुर्मात्रा आदेशाः प्राप्नुवन्ति॥

(दूषणबाधकभाष्यम्)

नैष दोषः। तपरे गुणवृद्धी।

(दूषणसाधकभाष्यम्)

ननु च तः परो यस्मात्सोऽयं तपरः॥

(दूषणबाधकभाष्यम्)

नेत्याह। तादपि परस्तपर इति॥

(आक्षेपभाष्यम्)

यदि तादपि परस्तपरः, 'ऋदोरप्' इतीहैव स्यात्-यवः स्तवः। लवः पव इत्यत्र न स्यात्।

(आक्षेपबाधकभाष्यम्)

नैष तकारः॥

कस्तर्हि?॥

दकारः॥

(आक्षेपसाधकभाष्यम्)

किं दकारे प्रयोजनम्?॥

(प्रतिबन्दीभूतं समाधानभाष्यम्)

अथ किं तकारे?॥ यद्यसंदेहार्थस्तकारः, दकारोऽपि। अथ मुखसुखार्थस्तकारः, दकारोऽपि॥

(दूषणवार्तिकशेषभाष्यम्)

एज्भावे-कुर्वाते कुर्वाथे। आन्तर्यतोऽर्धतृतीयमात्रस्य टिसंज्ञकस्यार्धतृतीयमात्र एच् प्राप्नोति॥

(दूषणोद्धारभाष्यम्)

नैव लोके न च वेदेऽर्धतृतीयमात्र एजस्ति॥

(३३६ आक्षेपवार्तिकम्॥११॥)

॥*॥ ऋवर्णस्य गुणवृद्धिप्रसङ्गे सर्वप्रसङ्गोऽविशेषात्॥*॥

(भाष्यम्)

ऋवर्णस्य गुणवृद्धिप्रसङ्गे सर्वप्रसङ्गः सर्वगुणवृद्धिप्रसङ्गः, सर्वे गुणवृद्धिसंज्ञका ऋवर्णस्य स्थाने प्राप्नुवन्ति॥

किं कारणम्?॥

अविशेषात्॥ नहि कश्चिद्विशेष उपादीयते- एवंजातीयको गुणवृद्धिसंज्ञक ऋवर्णस्य स्थाने भवतीति॥ अनुपादीयमाने विशेषे सर्वप्रसङ्गः॥

(३३७ समाधानवार्तिकम्॥१२॥)

॥*॥ न वा ऋवर्णस्य स्थाने रपरप्रसङ्गादवर्णस्यान्तर्यम्॥*॥

(भाष्यम्)

न वा एष दोषः॥

किं कारणम्?।

ऋवर्णस्य स्थाने रपरप्रसङ्गात्। उः स्थाने अण् प्रसज्यमान एव रपरो भवतीत्युच्यते। तत्र ऋवर्णस्यान्तर्यतो रेफवतो रेफवानकार एवान्तरतमो भवति॥

(३३८ आक्षेपवार्तिकम्॥१३॥)

॥*॥ सर्वादेशप्रसङ्गस्त्वनेकाल्त्वात्॥*॥

(भाष्यम्)

सर्वादेशस्तु गुणवृद्धिसंज्ञक ऋवर्णस्य प्राप्नोति॥

किं कारणम्?॥

अनेकाल्त्वात्। 'अनेकाल्शित्सर्वस्य' इति॥

(३३९ समाधानवार्तिकम्॥१४॥)

॥*॥ न वाऽनेकाल्त्वस्य तदाश्रयत्वादृवर्णादेशस्याविघातः॥*॥

(भाष्यम्)

न वा एष दोषः॥

किं कारणम्?॥

'अनेकाल्त्वस्य तदाश्रयत्वात्'। यदायमुः स्थाने, तदायमनेकाल्, अनेकाल्त्वस्य तदाश्रयत्वादृवर्णादेशस्य विघातो न भविष्यति॥

(समाधानान्तरभाष्यम्)

अथवाऽनान्तर्यमेवैतयोरान्तर्यम्। एकस्यान्तरतमा प्रकृतिर्नास्ति, अपरस्यान्तरतम आदेशो नास्ति, एतदेवैतयोरान्तर्यम्॥

(३४० समाधानान्तरवार्तिकम्॥१५॥)

॥*॥ संप्रयोगो वा नष्टाश्वदग्धरथवत्॥*॥

(भाष्यम्)

अथवा नष्टाश्वदग्धरथवत्सह संप्रयोगो भवति। तद्यथा- 'तवाश्वो नष्टो ममापि रथो दग्धः, ऽभौ संप्रयुज्यावहै' इति। एवमिहापि-'तवाप्यन्तरतमा प्रकृतिर्नास्ति, ममाप्यन्तरतम आदेशो नास्ति, अस्तु नौ संप्रयोगः' इति॥

(समाधानबाधकभाष्यम्)

विषम उपन्यासः॥ चेतनावत्सु आर्थात्प्रकरणाद्वा लोके संप्रयोगो भवति। वर्णाश्च पुनरचेतनाः तत्र किंकृतः संप्रयोगः?॥

(समाधानसाधकभाष्यम्)

यद्यपि वर्णा अचेतनाः। यस्त्वसौ प्रयुङ्क्ते स चेतनावान्॥

(एकादेशे दूषणनिराकरणाधिकरणम्)

(३४१ आक्षेपवार्तिकम्॥१६॥)

॥*॥ एजवर्णयोरादेशेऽवर्णं स्थानिनोऽवर्णप्रधानत्वात्॥*॥

(भाष्यम्)

एजवर्णयोरादेशेऽवर्णं प्राप्नोति। खट्वैलका मालौपगवः॥

किं कारणम्?॥

स्थानिनोऽवर्णप्रधानत्वात्, स्थानी ह्यत्रावर्णप्रधानः॥

(३४२ समाधानवार्तिकम्॥१७॥)

॥*॥ सिद्धं तूभयान्तर्यात्॥*॥

(भाष्यम्)

सिद्धमेतत्॥

कथम्?॥

उभयोर्योऽन्तरतमस्तेन भवितव्यम्। न चावर्णमुभयोरन्तरतमम्॥ स्थानेऽतरतमः॥५०॥

(४५ परिभाषासूत्रम् ॥१।१।७॥ आ. ७॥)

उरण् रपरः॥ १।१।५१॥

(सूत्रस्य रपरत्वमात्रविधायकत्वाधिकरणम्)

(आक्षेपभाष्यम्)

किमिदमुरण्रपरवचनमन्यनिवृत्त्यर्थम्- 'उः स्थाने अणेव भवति रपरश्च' इति। आहोस्विद्रपरत्वमात्रमनेन विधीयते-'उः स्थाने अण् च अनण् च। अण् रपरः' इति?॥

(भाष्यम्)

कश्चात्र विशेषः?॥

(३४३ आक्षेपवार्तिकम्॥१८॥)

॥*॥ उरण्रपरवचनमन्यनिवृत्त्यर्थं चेदुदात्तादिषु दोषः॥*॥

(भाष्यम्)

उरण् रपरवचनमन्यनिवृत्त्यर्थं चेदुदात्तादिषु दोषो भवति॥

के पुनरुदात्तादयः?॥

उदात्तानुदात्तस्वरितानुनासिकाः। कृतिः हृतिः, कृतं हृतम्, प्रकृतं प्रहृतम्, नॄँ पाहि॥

(द्वितीयपक्षाभ्युपगमभाष्यम्)

अस्तु तर्ह्युः स्थाने अण् चानण् च, अण् रपर इति॥

(३४४ द्वितीयपक्षदूषणवार्तिकम्॥१९॥)

॥*॥ य उः स्थानेऽण् स रपर इति चेद् गुणवृद्ध्योरवर्णस्याप्रतिपत्तिः॥*॥

य उः स्थानेऽण् स रपर इति चेद् गुणवृद्ध्योरवर्णस्याप्रतिपत्तिः। कर्ता हर्ता वार्षगण्यः॥

(द्वितीयपक्षदूषणशेषाक्षेपभाष्यम्)

किं हि साधीयः- ऋवर्णस्यासवर्णे यदवर्णः स्यात्, न पुनरेङैचौ?॥

(द्वितीयपक्षवादिभाष्यम्)

पूर्वस्मिन्नपि पक्षे एष दोषः। किं हि साधीयस्तत्रापि ऋवर्णस्यासवर्णे यदवर्णः स्यात्, न पुनरिवर्णोवर्णौ॥

(प्रथमपक्षवादिभाष्यम्)

अथ मतमेतत्-ठः स्थाने अणश्चानणश्च प्रसङ्गे अणेव भवति रपरश्चेति। सिद्धा पूर्वस्मिन् पक्षेऽवर्णस्य प्रतिपत्तिः॥

(आक्षेपभाष्यम्)

यत्तु तदुक्तम्- 'ठदात्तादिषु दोषः' इति, स इह दोषो जायते, न जायते॥

(समाधानभाष्यम्)

जायते स दोषः॥

कथम्?॥

ठदात्त इत्यनेनाणोऽपि प्रतिनिर्दिश्यन्ते, अनणोऽपि॥

(समाधानबाधकभाष्यम्)

यद्यपि- अणोऽपि प्रतिनिर्दिश्यन्ते। न तु प्राप्नुवन्ति॥

किं कारणम्?।

स्थानेऽन्तरतमो भवतीति॥

(समाधानसाधकभाष्यम्)

कुतो नु खल्वेतत्- द्वयोः परिभाषयोः सावकाशयोः समवस्थितयोः 'स्थानेऽन्तरतम' इति 'ऽरण् रपरः' इति च, 'स्थानेऽन्तरतम' इत्यनया परिभाषया व्यवस्था भविष्यति, न पुनरः 'ऽरण् रपरः' इति?॥

अतः किम्?॥

अत एष दोषो जायते-'ऽदात्तादिषु दोषः' इति॥

(आक्षेपभाष्यम्)

ये चाप्येते ऋवर्णस्य स्थाने प्रतिपदमादेशा ऽच्यन्ते, तेषु रपरत्वं न प्राप्नोति-'ऋत इद्धातोः' 'ऽदोष्ठ्यपूर्वस्य' इति।

(३४५ समाधानवार्तिकम्॥३॥)

॥*॥ सिद्धं तु प्रसङ्गे रपरत्वात्॥*

(भाष्यम्)

सिद्धमेतत्॥

कथम्?॥

'प्रसङ्गे रपरत्वात्'। ऽः स्थाने अण् प्रसज्यमान एव रपरो भवति॥

(आक्षेपभाष्यम्)

किं वक्तव्यमेतत्?।

(समाधानभाष्यम्)

नहि॥

कथमनुच्यमानं गंस्यते?।

स्थान इति वर्तते। स्थानशब्दश्च प्रसङ्गवाची॥

(आक्षेपभाष्यम्)

यद्येवमादेशोऽविशेषितो भवति॥

(समाधानभाष्यम्)

आदेशश्च विशेषितः॥

कथम्?॥

द्वितीयं स्थानग्रहणं प्रकृतमनुवर्तते. तत्रैवमभिसंबन्धः करिष्यते- 'ऽः स्थाने अण् स्थान इति। ऽः प्रसङ्गे अण् प्रसज्यमान एव रपरो भवति॥

(अण्ग्रहणप्रयोजनाधिकरणम्)

(आक्षेपभाष्यम्)

अथाण्ग्रहणं किमर्थम्, न ऊ रपरो भवतीत्येवोच्येत?॥

(प्रत्याक्षेपभाष्यम्)

ऊ रपर इतीत्युच्यमाने क इदानीं रपरः स्यात्॥?

(प्रत्याक्षेपभाष्यम्)

य ऽः स्थाने भवति॥

कश्च ऽः स्थाने भवति?॥

आदेशः॥

(३४३ आक्षेपबाधकवार्तिकम्॥४॥)

॥*॥ आदेशो रपर इति चेद्रीरिविधिषु रपरप्रतिषेधः॥*॥

(भाष्यम्)

आदेशो रपर इति चेद्रीरिविधिषु रपरत्वस्य प्रतिषेधो वक्तव्यः॥

के पुना रीरिविधयः?॥

अकङ्लोपाऽऽनङनङ्रीङ्रिङादेशाः॥

अकङ-सौधातकिः अकङ्॥

लोप-पैतृष्वसेयः। लोप॥

आनङ्-होतापोतारौ। आनङ्।

अनङ्-कर्ता हर्ता। अनङ्।

रीङ्-मात्रीयति पित्रीयति। रीङ्॥

रिङ्-क्रियते ह्रियते। रिङ्॥

(३४७ आक्षेपबाधकवार्तिकम्॥९॥)

॥*॥ उदात्तादिषु च॥*॥

(भाष्यम्)

उदात्तादिषु च॥

किम्?॥

रपरत्वस्य प्रतिषेधो वक्तव्यः॥ कृतिः हृतिः।

कृतं हृतम्। प्रकृतम् प्रहृतम्। नृः पाहि॥ तस्मादण्ग्रहणं कर्तव्यम्॥

(एकदेशे रपरत्वसाधकाधिकरणम्)

(३४८ आक्षेपवार्तिकम्॥६॥)

॥*॥ एकादेशस्योपसंख्यानम्॥*॥

(भाष्यम्)

एकादेशस्योपसंख्यानं कर्तव्यम्॥ खट्वश्र्यः मालश्र्यः ॥

किं पुनः कारणं न सिद्ध्यति?॥

ठः स्थाने अण् प्रसज्यमान एव रपरो भवतीत्युच्यते। न चायमुरेव स्थानेऽण् शिष्यते॥

किं तर्हि?।

ठश्चान्यस्य च॥

(३४९ समाधानवार्तिकम्॥७॥)

॥*॥ अवयवग्रहणात्सिद्धम्॥*॥

(भाष्यम्)

यदत्र ऋवर्णं तदाश्रयं रपरत्वं भविष्यति॥ तद्यथा-'माषा न भोक्तव्याः' इत्युक्ते मिश्रा अपि न भुज्यन्ते॥

(३५० समाधाननिरासवार्तिकम्॥८॥)

॥*॥ अवयवग्रहणात्सिद्धमिति चेदादेशे रान्तप्रतिषेधः॥*॥

(भाष्यम्)

अवयवग्रहणात्सिद्धमिति चेदादेशे रान्तस्य प्रतिषेधो वक्तव्यः॥ होतापोतारौ। यथैव-ठश्चान्यस्य च स्थानेऽण् रपरो भवतीति, एवं य ठः स्थानेऽण् चानण् च सोऽपि रपरः स्यात्॥

(व्याख्यान्तरे दूषणभाष्यम्)

यदि पुनः- ऋवर्णान्तस्य स्थानिनो रपरत्वमुच्येत, खट्वर्श्यः मालर्श्यः॥

नैवं शक्यम्। इह न प्रसज्येत- कर्ता हर्ता, किरति गिरति। ऋवर्णान्तस्येत्युच्यते, न चैतदृवर्णान्तम्॥

(दूषणबाधकभाष्यम्)

ननु चैतदपि व्यपदेशिवद्भावेन ऋवर्णान्तम्॥

(दूषणसाधकभाष्यम्)

अर्थवता व्यपदेशिवद्भावः। न चैषोऽर्थवान् तस्मान्नैवं शक्यम्॥ न चेदेवम्, उपसंख्यानं कर्तव्यम्॥ इह च रपरत्वस्य प्रतिषेधो वक्तव्यः-मातुः पितुरिति॥

(समाधानभाष्यम्)

उभयं न वक्तव्यम् ॥

कथम् ?॥

इह यो द्वयोः षष्ठीनिर्दिष्टयोः प्रसङ्गे भवति ,लभतेऽसावन्यतरतो व्यपदेशम्। तद्यथा-देवदत्तस्य पुत्रः देवदत्तायाः पुत्र इति॥

(आक्षेपभाष्यम्)

कथं मातुः पितुरिति

(आक्षेपसाधकभाष्यम्)

का रूपसिद्धिः?

(आक्षेपबाधकभाष्यम्)

अस्त्वत्र रपरत्वम्॥

(आक्षेपबाधकभाष्यम्)

'रात्सस्य 'इति सकारस्य लोपः। रेफस्य विसर्जनायः॥

(आक्षेपसाधकभाष्यम्)

नैवं श्क्यम्। इह हि -मातुः करोति पितुः करोतीति' ,अप्रत्ययविसर्जनीयस्य 'इति षत्वं प्राप्नोति॥

(आक्षेपबाधकभाष्यम्)

अप्रत्ययविसर्जनीयस्येत्युच्यते। प्रत्ययविसर्जनीयश्चायम् ॥

(आक्षेपसाधकभाष्यम्)

लुप्यतेऽत्र प्रत्ययोः 'रात्सस्य 'इति।

(समाधानवार्तिकशेषभाष्यम्)

एवं तर्हि-

(३५१ समाधानवार्तिकम् ॥९)

॥*॥ भ्रातुष्पुत्रग्रहणं ज्ञापकमेकादेश-

॥ निमित्तात् षत्वप्रतिषेधस्य ॥*॥

(भाष्यम्)

यदयं कस्कादिषु भ्रातुष्पुत्रशब्दं पठति तज्ज्ञापयत्याचार्यः-नैकादेशनिमित्तात् षत्वं भवतीति॥

(पूर्वान्तत्वसाधनाधिकरणम्)

(आक्षेपभाष्यम्)

किं पुनरयं पूर्वान्तः ,आहोस्वित्परादिः ,आहोस्विदभक्तः ?॥

(प्रत्याक्षेपभाष्यम्)

कथं वाऽयं पूर्वान्तः स्यात् ?कथं वा परादिः ?कथं वा अभक्तः?॥

(प्रत्याक्षेपसमाधानभाष्यम्)

यद्यन्त इति वर्तते ,ततः पूर्वान्तः। अथादिरिति वर्तते ,ततः परादिः। अथोभयं निवृत्तम् , ततोऽभक्तः॥

(भाष्यम्)

कश्चात्र विशेषः?॥

अभक्तपक्षे दूषणवार्तिकम्

॥*॥अभक्ते दीर्घलत्वयगभ्यस्तस्वरहलादिशेषविसर्जनीयप्रतिषेधः प्रत्ययाव्यवस्था च ॥*॥

(भाष्यम्)

यद्यभक्तः दीर्घत्वं न प्राप्नोति। गीः पूः। रेफवकारान्तस्य धातोरिति दीर्घत्वं न प्राप्नोति॥

(दूषणानुपपत्तिभाष्यम्)

किं पुनः कारणं रेफवकाराभ्यां धातुर्विशेष्यते ,न पुनः पदं विशेष्येत-रेफवकारान्तस्य पदस्येति?।

(दूषणोपपत्तिभाष्यम्)

नैवं शक्यम्। इहापि प्रसज्येत-अग्निः, वायुरीति॥

(दूषणानुपपत्तिभाष्यम्)

एवं तर्हि रेफवकाराभ्यां पदं विशेषयिष्यामः, धातुनेकम्-रेफवकारान्तस्य पदस्येको धातोरिति॥

(दूषणोपपत्तिभाष्यम्)

एवमपि-प्रियं ग्रामणि कुलमस्य प्रियग्रामणिः प्रियसेनानिः अत्रापि प्राप्नोति। तस्माद्धातुरेव विशेष्यते। धातौ च विशेष्यमाणे इह दीर्घत्वं न प्राप्नोति गीः पूः॥ दीर्घ॥

(लत्वोदाहरणभाष्यम्)

लत्व-लत्वं च न सिध्यति। निजेगिल्यते। 'ग्रो यङि 'इति लत्वं न प्राप्नोति॥

(दोषबाधकभाष्यम्)

नैष दोषः। ग्र इत्यनन्तरयोगैषा षष्ठी।

(दोषसाधकभाष्यम्)

एवमपि स्वर्जेगिल्यत इत्यत्रापि प्राप्नोति॥

(दोषबाधकभाष्यम्)

एवं तर्हि यङा आनन्तर्यं विशेषयिष्यामः॥ अथवा ग्र इति पञ्चमी। लत्व॥

(यक्स्वरोदाहरणभाष्यम्)

यक्स्वर-यक्स्वरश्च न सिध्यति। गीर्यते स्वयमेव ,पूर्यते स्वयमेव। 'अचः कर्तृयकि ' इत्येष स्वरो न प्राप्नोति ,रेफेण व्यवहितत्वात्॥

(दोषोद्धारभाष्यम्)

नैष दोषः। 'स्वरविधौ व्यञ्जनमविद्यमानवद्भवति 'इति नास्ति व्यवधानम्॥ यक्स्वर॥

(अभ्यस्तस्वरोदाहरणभाष्यम्)

अभ्यस्तस्वर-अभ्यस्तस्वरश्च न सिध्यति। मा हि स्म ते पिपरुः। मा हि स्म ते बिभरुः। 'अभ्यस्तानामादिरुदात्तो भवति अजादौ लसार्वधातुके 'इत्येष स्वरो न प्राप्नोति ,रेफेण व्यवहितत्वात्॥

(दोषोद्धारभाष्यम्)

नैष दोषः। 'स्वरविधौ व्यञ्जनमविद्यमानवद्भवति 'इति नास्ति व्यवधानम्॥अभ्यस्तस्वर॥

(हलादिःशेषोदाहरणभाष्यम्)

हलादिशेष-हलादिशेषश्च न सिध्यति। ववृते ववृधे। अभ्यासस्येति हलादिशेषो न प्राप्नोति। हलादिशेष॥

(विसर्जनीयप्रतिषेधोदाहरणभाष्यम्)

विसर्जनीयः (प्रतिषेध)-विसर्जनीयस्य प्रतिषेधो वक्तव्यः। नार्कुटो नार्पत्यः। 'खरवसानयोर्विसर्जनीयः'इति विसर्जनीयः प्राप्नोति॥ विसर्जनीय)-प्रतिषेध(॥

(प्रत्ययाव्यवस्थोदाहरणभाष्यम्)

प्रत्ययाव्यवस्था च। प्रत्यये व्यवस्था न प्रकल्प्ये-किरतः गिरतः। रेफोऽप्यभक्तः, प्रत्ययोऽपि। तत्र व्यवस्था न प्रकल्पते॥

(पूर्वान्तपक्षाभ्युपगमभाष्यम्)

एवं तर्हि पूर्वान्तः करिष्यते।

(३८३ पूर्वान्तपक्षे दूषणाक्षेपवार्तिकम्)

॥*॥ पूर्वान्ते र्ववधारणं विसर्जनीयप्रतिषेधो यक्स्वरश्च॥*॥

यदि पूर्वान्तः, रोरवधारणं कर्तव्यम्'-रोः सुपि 'रोरेव सुपि नान्यस्य। सर्पिष्षु धनुष्षु। इह मा भूत्- गीर्षु पूर्षु॥

(इतरपक्षेऽपिलाघवाभावभाष्यम्)

परादावपि सत्यवधारणं कर्तव्यम्-चतुर्ष्वित्येवमर्थम्॥ (वर्वधारणम्)

(विसर्जनीयप्रतिषेधोदाहरणभाष्यम्)

विसर्जनीयप्रतिषेधः-विसर्जनीयस्य च प्रतिषेधो वक्तव्यः। नार्कुटः। नार्पत्यः। 'खरवसानयोर्विसर्जनीय 'इति विसर्जनीयः प्राप्नोति॥

(इतरपक्षेऽपि लाधवाभावभाष्यम्)

परादावपि विसर्जनीयस्य प्रतिषेधो वक्तव्यः ,नार्कल्पिरित्येवमर्थम् कल्पिपदसंघातभक्तोऽसौ नोत्सहतेऽवयवस्य पदान्ततां विहन्तुमिति विसर्जनीयः प्राप्नोति॥

(विसर्जनीयप्रतिषेधः)

(यक्स्वरोदाहरणभाष्यम्)

यक्स्वरः-यक्स्वरश्च न सिध्यति। गीर्यते स्वयमेव ,पूर्यते स्वयमेव 'अचः कर्तृयकि ' इत्येष स्वरो न प्राप्नोति॥

(दूषणबाधकभाष्यम्)

नैष दोषः। उपदेश इति वर्तते॥ (यक्स्वरः)॥

(परादिपक्षाभ्युपगमभाष्यम्)

अथवा- पुनरस्तु परादिः

॥*॥ ३८४ परादिपक्षेदूषणक्षेपवार्तिकम्॥*॥

॥*॥परादावकारलोपौत्वपुकप्रतिषेधश्चङ्युपधाह्रस्वत्वमिटो

व्यवस्थऽभ्यासलोपोऽभ्यासस्ततादिस्वरोदीर्धत्वं च॥*॥

(भाष्यम्)

यदि परादिः। अक्कारलोपः प्रतिषेध्यः कर्ता हर्ता। अतो लोप आर्धधातुके इत्यकारलोपः प्राप्नोति॥

(दूषणबाधकभाष्यम्)

नैष दोषः, उपदेश इति वर्तते,

(दूषणसाधकभाष्यम्)

यद्युपदेश इति वर्तते, धिनुतः कृणुतः अत्र लोपो न प्राप्नोति॥

(दूषणबाधकभाष्यम्)

नोपदेशग्रहणेन प्रकृतिरभिसम्बध्यते किं तर्हि?

आर्धधातुकमभिसंबध्यते-आर्धधातुकोपदेशे यदकारान्तमिति॥ अकारलोप॥

(औत्वोदाहरणभाष्यम्)

औत्व-औत्वं च प्रतिषेध्यम्। चकार जहार। 'आत औ णलः 'इत्यौत्वं प्राप्नोति॥

(दोषोद्धारभाष्यम्)

नैषः दोषः। 'निर्दिश्यमानस्यादेशा भवन्ति 'इत्येवं न भविष्यति॥

(आक्षेपभाष्यम्)

यस्तर्हि निर्दिश्यते तस्य कस्मान्न भवति?॥

(समाधानभाष्यम्)

रेफेण व्यवहितत्वात् ॥ औत्व॥

(उदाहरणभाष्यम्)

पुक्प्रतिषेधः-पुक् च प्रतिषेध्यः। कारयति, हारयति। 'आतां पुक् 'इति पुक् प्राप्नोति॥ पुक्प्रतिषेध॥

(उदाहरणभाष्यम्)

चङ्युपधाह्रस्वत्वम्-चङ्युपधाह्रस्वत्वं च न सिध्यति। अचीकरत्, अजीहरत्। 'णौ चङ्युपधाया ह्रस्वः'' इति ह्रस्वत्वं न प्राप्नोति।

(उदाहरणभाष्यम्)

इटो व्यवस्था। इटश्च व्यवस्था न कल्पते। आस्तरिता, निपरिता .इडपि परादिः रेफोऽपि। तत्र व्यवस्था न प्रकल्पते॥ इटो व्यवस्था॥

(उदाहरणभाष्यम्)

अभ्यासलोपः-अभ्यासलोपश्च वक्तव्यः। ववृते ववृघे। 'अभ्यासस्य इति हलादिशेषो न प्राप्नोति॥ अभ्यासलोप॥

(उदाहरणभाष्यम्)

अभ्यस्तस्वरः-अभ्यस्तस्वरश्च न सिध्यति- मा हि स्म ते पिपरुः मा हि स्म ते बिभरुः। 'अभ्यस्तानामादिरुदात्तो भवत्यजादौ लसार्वधातुके 'इत्येष स्वरो न प्राप्नोति॥ अभ्यस्तस्वर॥

)उदाहरणभाष्यम्(

तादिस्वरः-तादिस्वरश्च न सिध्यति। प्रकर्ता ,प्रकर्तुम्। 'तादौ च निति कृत्यतौ ' इत्येष(६/२/५०) स्वरो न प्राप्नोति॥

(दूषणबाधकभाष्यम्)

नैष दोषः। उक्तमेतत्-*कृदुपदेशे वा तार्थमिडर्थम्*इति॥

(उदाहरणभाष्यम्)

दीर्घः- दीर्घत्वं च, न सिध्यति। गीः, पूः। 'रेफवकारान्तस्य धातोः 'इति दीर्घत्वं न प्राप्नोति॥ दीर्घ॥ उरण् रपरः ॥५१॥ (४७ परिभाषासूत्रम्॥१/१/७ आः८)

अलोऽन्त्यस्य ॥१।१।५२॥

(अल्ग्रहणविशेषणताविचाराधिकरणम्)

(आक्षेपभाष्यम्)

किमिदमल्ग्रहणमन्त्यविशेषणम् ,आहोस्विद्-आदेशविशेषणम् ?॥

(भाष्यम्)

किं चातः?॥

(अन्त्यविशेषणत्वे दूषणभाष्यम्)

यद्यन्त्यविशेषणम् ,आदेशोऽविशेषितो भवति॥

तत्र को दोषः?।

अनेकालप्यादेशोऽन्त्यस्य प्रसज्येत॥

(आदेशविशेषणपक्षे लाघवभाष्यम्)

यदि पुनः‘ अलन्त्यस्य ’इत्युच्यते, तत्रायमप्यर्थः‘-अनेकाल्शित्सर्वस्य ’इत्येतन्न वक्तव्यं भवति। इदं नियमार्थं भविष्यति-अलेवान्त्यस्य भवति,नान्य इति॥

(आदेशविशेषणत्वपक्षे **आक्षेपभाष्यम्)**

एवमप्यन्त्योऽविशेषितो भवति॥

तत्र को दोषः?॥

वाक्यस्यापि पदस्याप्यन्त्यस्य प्रसज्येत॥

(अन्त्यविशेषणत्वेऽपि गौरवनिरासभाष्यम्)

यदि खल्वप्येषोऽभिप्रायः-तन्न क्रियेतेति ,अन्त्यविशेषणेऽपि सति तन्न करिष्यते॥

कथम्?॥

‘ङिच्च, अलोऽन्त्यस्य ’इत्येतन्नियमार्थं भविष्यति-ङिदेवानेकालन्त्यस्य भवति ,नान्य इति॥

(स्थानषष्ठीविषयत्वस्थापनाधिकरणम्)

(आक्षेपभाष्यम्)

किमर्थं पुनरिदमुच्यते?।

(३८५ समाधानवार्तिकप्रथमखण्डम्)

अलोऽन्त्यस्येति स्थाने विज्ञातस्यानुसंहारः॥*॥

(भाष्यम्)

अलोऽन्त्यस्येत्युच्यते स्थाने विज्ञातस्यानुसंहारः क्रियते स्थाने प्रसक्तस्येति॥

(समाधानसाधकवार्तिकद्वितीयखण्डम्)

इतरथा ह्यनिष्टप्रसङ्गः॥*॥

(भाष्यम्)

इतरथा ह्यनिष्टं प्रसज्येत। टित्किन्मितोऽप्यन्त्यस्य स्युः॥

(दूषणाप्राप्तिसंभावनाभाष्यम्)

यदि पुनरयं योगशेषो विज्ञायेत॥

(समाधानसाधकभाष्यवार्तिकम्)

॥*॥ योगशेषे च ॥*॥

(भाष्यम्)

योगशेषे च

किम्?

अनिष्टं प्रसज्येत टित्किन्मितोऽप्यन्त्यस्य स्युः। तस्मात्सुष्ठूच्यते*-अलोऽन्त्यस्येति स्थाने विज्ञातस्यानुसंहारः इतरथा ह्यनिष्टप्रसङ्ग *इति॥ अलोऽन्त्यस्य ॥५२॥

(४७ परिभाषासूत्रम् ॥ १/१/७ आ. ९)

ङिच्च॥१।१।५३॥

(तातङि सर्वादेशत्वसाधनाधिकरणम्)

(आक्षेपभाष्यम्)

तातङ्अन्त्यस्य स्थाने कस्मान्न भवति‘ ?ङिच्चालोऽन्त्यस्य ’इति प्राप्नोति॥

(३५७ समाधानवार्तिकम्॥१॥)

तातङि ङित्करणस्य सावकाशत्वाद्विप्रतिषेधात्सर्वादेशः॥*॥

(भाष्यम्)

तातङि ङित्करणं सावकाशम्॥

कोऽवकाशः?।

गुणवृद्धिप्रतिषेधार्थो ङकारः। तातङि ङित्करणस्य सावकाशत्वाद्विप्रतिषेधात्सर्वादेशो भविष्यति॥

(समाधानबाधकभाष्यम्)

प्रयोजनं नाम तद् वक्तव्यं ,यन्नियोगतः स्यात्।

यदि चायं नियोगतः सर्वादेशः स्यात् ,तत एतत्प्रयोजनं स्यात्। कुतो नु खल्वेतत् ङित्करणादयं सर्वादेशो भविष्यति ,न पुनरन्त्यस्य स्यादिति॥

(समाधानसाधकभाष्यम्)

एवं तर्ह्येतदेव ज्ञापयति-न तातङन्त्यस्य स्थाने भवतीति। यदेतं ङितं करोति। इतरथा हि लोट एरुप्रकरण एव ब्रूयात्‘ -तिह्योस्तादाशिष्यन्यतरस्याम् ’इति॥ ङिच्च॥५३॥

आदेः परस्य॥१।१।५४॥

(परिभाषासूत्रम् ।१९।१।७।आ.१०॥)

(आदिनियमतः सर्वादेशबलीयस्त्वाधिकरणम्)

(३५८ सिद्धान्तवार्तिकम् ॥१॥)

॥*॥ अलोऽन्त्यस्यादेः परस्यानेकाल्शित्सर्वस्येत्यपवादविप्रतिषेधात्सर्वादेशः ॥*॥

(भाष्यम्)

'अलोऽन्त्यस्य 'इत्युत्सर्गः॥ तस्य 'आदेः परस्य' 'अनेकाल् शित्सर्वस्य 'इत्यपवादौ। अपवादविप्रतिषेधात् सर्वादेशो भविष्यति। 'आदेः परस्य 'इत्यस्यावकाशः- 'द्व्यन्तरुपसर्गेभ्योऽप ईत् 'द्वीपम् ,अन्तरीपम् ,समीपम्। 'अनेकाल् शित् सर्वस्य ' इत्यस्याऽवकाशः'-अस्तेर्भूः 'भविता ,भवितुम्। इहोभयं प्राप्नोति- 'अतो भिस ऐस्'। 'अनेकाल् शित् सर्वस्य 'इत्येतद्भवति विप्रतिषेधेन॥

'शित्सर्वस्य 'इत्यस्यावकाशः'-इदम इश् 'इतः ,इह। 'आदेः परस्य 'इत्यस्यावकाशः -स एव। इहोभयं प्राप्नोति अष्टाभ्य औश्। '-शित्सर्वस्य 'इत्येतद्भवति विप्रतिषेधन॥ आदेः परस्य॥५४॥

अनेकाल्शित्सर्वस्य॥१।१।५५॥

(शिद्ग्रहणप्रयोजनप्रत्याख्यानाधिकरणम्)

(आक्षेपभाष्यम्)

शित्सर्वस्येति किमुदाहरणम्?।

(प्रयोजनभाष्यम्)

'इदम इश् 'इतः ,इह॥

(प्रयोजनबाधकभाष्यम्)

नैतदस्ति प्रयोजनम्॥ शित्करणादेवात्र सर्वादेशो भविष्यति॥

(प्रयोजनान्तरभाष्यम्)

इदं तर्हि'-अष्टाभ्य औश्'॥

(प्रयोजनबाधकस्मारणभाष्यम्)

ननु चात्रापि शित्करणादेव सर्वादेशो भविष्यति॥

(प्रयोजनान्तरभाष्यम्)

इदं तर्हि'-जसः शी' 'जश्शसोः शिः'॥

(प्रयोजनबाधकस्मारणभाष्यम्)

ननु चात्रापि शित्करणादेव सर्वादेशो भविष्यति॥

(प्रयोजनसाधकभाष्यम्)

अस्त्यन्यच्छित्करणे प्रयोजनम्॥

किम्?॥

विशेषणार्थः शकारः॥

क्व विशेषणार्थेनार्थः?॥

'शि सर्वनामस्थानम्' 'विभाषा ङिश्योः 'इति॥

('नानुबन्धकृतमनेकाल्त्वम् 'इति परिभाषासाधनाधिकरणम्)

(वचनवैयर्थ्योपपादनभायष्म्)

शित्सर्वस्येति शक्यमकर्तुम्॥

कथम्?।

अन्त्यस्यायं स्थाने भवन्न प्रत्ययः स्यात्। असत्यां प्रत्ययसंज्ञायामित्संज्ञा न स्यात्। असत्यामित्संज्ञायां लोपो न स्यात्। असति लोपे अनेकाल्। यदा अनेकाल् ,तदा

सर्वादेशः। यदा सर्वादेशः ,तदा प्रत्ययः। यदा प्रत्ययः ,तदेत्संज्ञा। यदेत्संज्ञा ,तदा लोपः॥

(नानुबन्धकृतमनेकाल्त्वपरिभाषाज्ञापनभाष्यम्)

एवं तर्हि सिद्धे सति यच्छित्सर्वस्येत्याह, तज्ज्ञापयत्याचार्यः-अस्त्येषा परिभाषा-'नानुबन्धकृतमनेकाल्त्वं भवति-'इति॥

किमेतस्य ज्ञापने प्रयोजनम्?।

*तत्रासरूपसर्वादेशदाप्प्रतिषेधेषु पृथक्त्वनिर्देशोऽनाकारान्तत्वाद्*इत्युक्तम्, तन्न वक्तव्यं भवति॥ अनेकाल्॥५५॥

इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरण महाभाष्ये प्रथमस्याध्यायस्य प्रथमेपादे सप्तममाह्निकम्॥७॥

प्रथमाध्यायस्य प्रथमपादे अष्टमाह्निकम्॥

(अतिदेशप्रकरणम्)

(अतिदेशसूत्रम्१/१/८ आ१)

(स्थानिवदादेशोऽनिनल्विधौ ॥१।१।५७ आ. १)

(पदकृत्यनिर्वचनाधिकरणम्)

(आक्षेपभाष्यम्)

वत्करणं किमर्थम्?॥

(समाधानभाष्यम्)

'स्थान्यादेशोऽनल्विधौ' इतीयत्युच्यमाने संज्ञाऽधिकारोऽयम्, तत्र स्थानी आदेशस्य संज्ञा स्यात्॥

तत्र को दोषः?।

'आडो यमहनः' आत्मने पदं भवतीति वधेरेव स्याद् हन्तेर्न स्यात्॥ वत्करणे पुनः क्रियमाणे न दोषो भवति। स्थानिकार्यमादेशे अतिदिश्यते 'गुरुवद् गुरुपुत्रे' इति यथा॥

(आक्षेपभाष्यम्)

अथादेशग्रहणं किमर्थम्?॥

(प्रत्याक्षेपभाष्यम्)

'स्थानिवदनल्विधौ' इतीयत्युच्यमाने क इदानीं स्थानिवत्स्यात्?॥

यः स्थाने भवति॥

कश्च स्थाने भवति?॥

आदेशः॥

(समाधानभाष्यम्)

इदं तर्हि प्रयोजनम्-आदेशमात्रं स्थानिवद्यथा स्यात्॥ एकदेशविकृतस्योपसंख्यानं चोदयिष्यति, तन्न वक्तव्यं भवति॥

(आक्षेपभाष्यम्)

अथ विधिग्रहणं किमर्थम्?॥

(विधिग्रहणप्रयोजनभाष्यम्)

सर्वविभक्त्यन्तः समासो यथा विज्ञायेत- अलः परस्य विधिः-अल्विधिः। अलो विधिः-अल्विधिः। अलि विधिः- अल्विधिः। अला विधिः-अल्विधिरिति॥

(विधिग्रहणप्रयोजननिरासभाष्यम्)

नैतदस्ति प्रयोजनम्। प्रातिपदिकनिर्देशोऽयम्॥ प्रातिपदिकनिर्देशाश्चार्थतन्त्रा भवन्ति, न कांचित्प्राधान्येन विभक्तिमाश्रयन्ति तत्र प्रातिपदिकार्थे निर्दिष्टे यां यां विभक्तिमाश्रयितुं बुद्धिरुपजायते सा सा आश्रयितव्या॥

(विधिग्रहणप्रयोजनान्तरभाष्यम्)

इदं तर्हि प्रयोजनम्-उत्तरपदलोपो यथा विज्ञायेत-अलमाश्रयते अलाश्रयः, अलाश्रयो विधिः अल्विधिरिति। यत्र प्राधान्येनालाश्रीयते, तत्रैव प्रतिषेधः स्यात्॥ यत्र विशेषणत्वेनालाश्रीयते तत्र प्रतिषेधो न स्यात्।

किं प्रयोजनम् ?॥

प्रदीव्य प्रसीव्येति वलादिलक्षण इण् मा भूदिति॥

(सूत्रारम्भप्रयोजननिराकरणाधिकरणम्)

(आक्षेपभाष्यम्)

किमर्थं पुनरिदमुच्यते?॥

(३५९ समाधानवार्तिकम्॥१॥)

॥*॥ स्थान्यादेशपृथक्त्वादादेशे स्थानिवदनुदेशो गुरुवद् गुरुपुत्र इति यथा॥*॥

(भाष्यम्)

अन्यः स्थानी, अन्य आदेशः॥ स्थान्यादेशपृथक्त्वादेतस्मात्कारणात् स्थानिकार्यमादेशे न प्राप्नोति॥

तत्र को दोषः?॥

'आङो यमहनः' आत्मनेपदं भवतीति हन्तेरेव स्याद्, वधेर्न स्याद्। इष्यते च-वधेरपि स्यादिति। तच्चान्तरेण यत्नं न सिद्धयति, तस्मात्स्थानिवदनुदेशः। एवमर्थमिदमुच्यते॥ 'गुरुवद् गुरुपुत्र इति यथा।' तद्यथा-'गुरुवद् गुरुपुत्रे वर्तितव्यम्' इति गुरौ यत्कार्यं तद् गुरुपुत्रेऽतिदिश्यते। एवमिहापि स्थानिकार्यमादेशेऽतिदिश्यते॥

(सूत्रारम्भप्रयोजनबाधकभाष्यम्)

नैतदस्ति प्रयोजनम्। लोकत एतत् सिद्धम्। तद्यथा- लोके यो यस्य प्रसङ्गे भवति, लभतेऽसौ तत्कार्याणि। तद्यथा-उपाध्यायस्य शिष्यो याज्यकुलानि गत्वा अग्रासनादीनि लभते॥

(सूत्रारम्भप्रयोजनसाधकभाष्यम्)

यद्यपि तावल्लोक एष दृष्टान्तः। दृष्टान्तस्यापि तु पुरुषारम्भो निवर्तको भवति॥

(आक्षेपभाष्यम्)

अस्ति वेह कश्चित्पुरुषारम्भः?

(समाधानभाष्यम्)

अस्तीत्याह॥

कः?

स्वरूपविधिर्नाम। हन्तेरात्मनेपदमुच्यमानं हन्तेरेव स्यात्, वधेर्न स्यात्॥

(सूत्रारम्भप्रयोजननिराकरणभाष्यम्)

एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति- स्थानिवदादेशो भवतीति। यदयं 'युष्मदस्मदोरनादेशे' इत्यादेशे प्रतिषेधं शास्ति॥

कथं कृत्वा ज्ञापकम्?।

युष्मदस्मदोर्विभक्तौ कार्यमुच्यमानं कः प्रसङ्गो यदादेशेऽपि स्यात्॥ पश्यति त्वाचार्यः-स्थानिवदादेशो भवतीति। अत आदेशे प्रतिषेधं शास्ति।

(सूत्रारम्भप्रयोजनभाष्यम्)

इदं तर्हि प्रयोजनम्-अनल्विधाविति प्रतिषेधं वक्ष्यामीति। इह मा भूत्-द्यौः पन्थाः स इति॥

(सूत्रारम्भप्रयोजननिराकरणभाष्यम्)

एतदपि नास्ति प्रयोजनम्। आचार्यप्रवृत्तिर्ज्ञापयति-अल्विधौ स्थानिवद्भावो न भवतीति, यदयम्-'अदो जग्धिर्ल्यप्ति किति' इति 'तिकिति' इत्येव सिद्धे ल्यब्ग्रहणं करोति। तस्मान्नार्थोनेन योगेन॥

(सूत्रसत्त्वेऽनल्विधिग्रहणवैयर्थ्यनिराकरणाधिकरणम्)

(आक्षेपवार्तिकशेषभाष्यम्)

आरभ्यमाणेऽप्येतस्मिन् योगे-

(३६० (१) वैयर्थ्याक्षेपवार्तिकप्रथमखण्डम्॥१॥)

॥*॥ अल्विधौ प्रतिषेधेऽविशेषेणेऽप्राप्तिस्तस्यादर्शनात्॥*॥

(भाष्यम्)

अल्विधौ प्रतिषेधेऽसत्यपि, विशेषणे समाश्रीयमाणे असति तस्मिन् विशेषणे अप्राप्तिर्विधेः। प्रदीव्य, प्रसीव्य॥

किं कारणम्?॥

तस्यादर्शनात्। वलादेरित्युच्यते। न चात्र वलादिं, पश्यामः॥

(वार्तिकावतरणभाष्यम्)

ननु चैवमर्थ एवायं यत्नः क्रियते-अन्यस्य कार्यमुच्यमानमन्यस्य यथा स्यादिति॥

(वैयर्थ्यसाधकभाष्यम्)

सत्यम् । एवमर्थः न तु प्राप्नोति॥

किं कारणम्?।

(३६० (२) वैयर्थ्याक्षेपसाधकवार्तिकद्वितीयखण्डम्॥२॥)

॥*॥ सामान्यातिदेशे हि विशेषानतिदेशः॥*॥

(भाष्यम्)

सामान्ये ह्यतिदिश्यमाने विशेषो नातिदिष्टो भवति। तद्यथा-'ब्राह्मणवदस्मिन् क्षत्रिये वर्तितव्यम्' इति सामान्यं यद् ब्राह्मणकार्यं, तत् क्षत्रियेऽतिदिश्यते। यद्विशिष्टं माठरे कौण्डिन्ये वा, न तदतिदिश्यते। एवमिहापि यत्सामान्यं प्रत्ययकार्यं तदतिदिश्यते, यद्विशिष्टं वलादेरिति न तदतिदिश्यते॥

(वैयर्थ्यबाधकसिद्धान्तिभाष्यम्)

यद्येवम्-अग्रहीत्, 'इट ईटि' इति सिचो लोपो न प्राप्नोति॥ अनल्विधाविति पुनरुच्यमाने इहापि प्रतिषेधो भविष्यति- प्रदीव्य प्रसीव्येति, विशिष्टं ह्येषोऽलमाश्रयते वलं नाम। इह च प्रतिषेधो न भविष्यति-अग्रहीदिति, विशिष्टं ह्येषोऽनलमाश्रयते इटं नाम॥

(आक्षेपवार्तिकादिशेषभाष्यम्)

यदि तर्हि सामान्यमप्यतिदिश्यते, विशेषश्च॥

(३६१ (१) आक्षेपसाधकवार्तिकप्रथमखण्डम्)

॥*॥ सत्याश्रये विधिरिष्टः॥*॥

(भाष्यम्)

सति च वलादित्वे इटा भवितव्यम्। अरुदिताम्। अरुदितम्। अरुदित॥

(उक्ताशयानभिज्ञभाष्यम्)

किमतो यत्सति भवितव्यम्?॥

(३६१ (२) आक्षेपवार्तिकद्वितीयखण्डम्॥)

॥*॥ प्रतिषेधस्तु प्राप्नोत्यल्विधित्वात्॥*॥

(भाष्यम्)

प्रतिषेधस्तु प्राप्नोति॥

किं कारणम्?॥

अल्विधित्वात्। अल्विधिरयं भवति। तत्रानल्विधाविति प्रतिषेधः प्राप्नोति॥

(३६२ सिद्धान्तिसमाधानवार्तिकम्॥४॥)

॥*॥ न वानुदेशिकस्य प्रतिषेधादितरेण भावः॥*॥

(भाष्यम्)

न वा एष दोषः॥

किं कारणम्?॥

आनुदेशिकस्य प्रतिषेधात्। अस्त्वत्रानुदेशिकस्य वलादित्वस्य प्रतिषेधः। स्वाश्रयमत्र वलादित्वं भविष्यति। नैतद्विवदामहे वलादिर्न वलादिरिति॥

किं तर्हि।

स्थानिवद्भावात् सार्वधातुकत्वमेषितव्यम्॥

(आक्षेपोपसंहारभाष्यम्)

तत्रानल्विधाविति प्रतिषेधः प्राप्नोति॥

(स्थान्यलाश्रयविधौ प्रतिषेधसाधनाधिकरणम्)

(आक्षेपभाष्यम्)

किं पुनरादेशिन्यल्याश्रीयमाणे प्रतिषेधो भवत्याहोस्विदविशेषेण आदेशे, आदेशिनि च?॥

कश्चात्र विशेषः?॥

(३६३ प्रथमपक्षाक्षेपवार्तिकम्॥५॥)

॥*॥ आदेश्यल्विधिप्रतिषेधे कुरुवधपिबां गुणवृद्धिप्रतिषेधः॥*॥

(भाष्यम्)

आदेश्यल्विधिप्रतिषेधे कुरुवधपिबां गुणवृद्ध्योः प्रतिषेधो वक्तव्यः॥

कुर्वित्यत्र स्थानिवद्भावादङ्गसंज्ञा, स्वाश्रयं च लघूपधत्वम् , तत्र लघूपधगुणः प्राप्नोति॥

वधक इत्यत्र स्थानिवद्भावादङ्गसंज्ञा स्वाश्रयं चादुपधत्वम्, तत्र वृद्धिः प्राप्नोति॥

पिबेत्यत्र स्थानिवद्भावादङ्गसंज्ञा, स्वाश्रयं चादुपधत्वम्, तत्र [लघूपध] गुणः प्राप्नोति॥

(द्वितीयपक्षाङ्गीकारभाष्यम्)

अस्तु तर्ह्यविशेषेण- आदेश आदेशिनि च॥

(३६४ द्वितीयपक्षाक्षेपवार्तिकम्॥६॥)

॥*॥ आदेश्यादेश इति चेत्सुप्तिङ्कृदतिदिष्टेषूपसंख्यानम्॥*॥

(भाष्यम्)

आदेश्यादेश इति चेत्सुप्तिङ्कृदतिदिष्टेषूपसंख्यानं कर्तव्यम्॥

सुप्-वृक्षाय प्लक्षाय, स्थानिवद्भावात्सुप्संज्ञा, स्वाश्रयं च यञादित्वं, तत्र प्रतिषेधः प्राप्नोति। सुप्॥

तिङ्- अरुदिताम्, अरुदितम्, अरुदित। स्थानिवद्भावात्सार्वधातुकसंज्ञा, स्वाश्रयं च वलादित्वं। तत्र प्रतिषेधः प्राप्नोति॥ तिङ्॥

कृदतिदिष्ट-भुवनं, सुवनं, धुवनम्। स्थानिवद्भावात्प्रत्ययसंज्ञा, स्वाश्रयं चाजादित्वं, तत्र प्रतिषेधः प्राप्नोति॥

(तटस्थाक्षेपभाष्यम्)

किं पुनरत्र ज्यायः?॥

(समाधानभाष्यम्)

आदेशिन्यल्याश्रीयमाणे प्रतिषेध इत्येतदेव ज्यायः॥

कुत एतत्?॥

तथा ह्ययं विशिष्टं स्थानिकार्यमादेशेऽतिदिशति-'गुरुवद् गुरुपुत्रे' इति यथा। तद्यथा-'गुरुवदस्मिन्गुरुपुत्रे वर्तितव्यमन्यत्रोच्छिष्टभोजनात्पादोपसंग्रहणाच्च' इति॥ यदि च गुरुपुत्रोऽपि गुरुर्भवति। तदपि कर्तव्यं भवति॥

(प्रथमपक्षाभ्युपगमभाष्यम्)

अस्तु तर्ह्यादेशिन्यल्याश्रीयमाणे प्रतिषेधः॥

(उक्ताक्षेपस्मारणभाष्यम्)

ननु चोक्तम्- *आदेश्यल्विधिप्रतिषेधे कुरुवधपिबां गुणवृद्धिप्रतिषेधः* इति॥

(आक्षेपनिराकरणभाष्यम्)

नैष दोषः। 'करोतौ तपरनिर्देशात् सिद्धम्'। पिबिरदन्तः। वधक इति नायं ण्वुल्॥ अन्योऽयमकशब्दः किदौणादिकः, रुचक इति यथा॥

(एकदेशविकृतन्यायाधिकरणम्)

(३६५ आक्षेपवार्तिकम्॥७॥)

॥*॥ एकदेशविकृतस्योपसंख्यानम्॥*॥

(भाष्यम्)

एकदेशविकृतस्योपसंख्यानं कर्तव्यम्॥

किं प्रयोजनम्?॥

पचतु, पचन्तु। तिङ्ग्रहणेन ग्रहणं यथा स्यात्॥

(३६६ समाधानवार्तिकम्॥८॥)

॥*॥ एकदेशविकृतस्यानन्यत्वात्सिद्धम्॥*॥

(भाष्यम्)

'एकदेशविकृतमनन्यवद्भवति' इति तिङ्ग्रहणेन ग्रहणं भविष्यति। तद्यथा- श्वा कर्णे पुच्छे वा छिन्ने श्वैव भवति, नाश्वो न गर्दभ इति॥

(३६७ एकदेश्याक्षेपसाधकवार्तिकम्॥९॥)

॥*॥ अनित्यविज्ञानं तु तस्मादुपसंख्यानम्॥*॥

(भाष्यम्)

अनित्यविज्ञानं तु भवति॥ नित्याः शब्दाः। नित्येषु नाम शब्देषु कूटस्थैरविचालिभिर्वर्णै-र्भवितव्यमनपायोपजनविकारिभिः। तत्र स एवायं, विकृतश्च इत्येतन्नित्येषु शब्देषु नोपपद्यते। तस्मादुपसंख्यानं कर्तव्यम्॥

(ऋष्यन्तरसंवादभाष्यम्)

भारद्वाजीयाः पठन्ति-

(भारद्वाजीयवार्तिकम्)

॥*॥ एकदेशविकृतेषूपसंख्यानम्॥*॥

(भाष्यम्)

एकदेशविकृतेषूपसंख्यानं कर्तव्यम्?॥

पचतु, पचन्तु। तिङ्ग्रहणेन ग्रहणं यथा स्यात्॥

किं च कारणं न स्यात्?।

(भारद्वाजीयवार्तिकम्)

॥*अनादेशत्वाद्॥*॥

(भाष्यम्)

आदेशः स्थानिवदित्युच्यते। न चेमे आदेशाः॥

(भारद्वाजीयवार्तिकम्)

॥*॥ रुपान्यत्वाच्च॥*॥

(भाष्यम्)

अन्यत्खल्वपि रूपं पचतीति, अन्यत्पचत्विति॥

(आक्षेपनिराकरणभाष्यम्)

इमेऽप्यादेशाः॥

कथम्?॥

आदिश्यते यः स आदेशः। इमे चाप्यादिश्यन्ते॥

(आक्षेपसाधकभाष्यम्॥१०॥)

॥*॥ आदेशः स्थानिवदिति चेन्नानाश्रितत्वात्॥*॥

(भाष्यम्)

आदेशः स्थानिवदिति चेत्। तन्न॥

किं कारणम्?।

अनाश्रितत्वात्। योऽत्रादेशो नासावाश्रीयते। यश्चाश्रीयते नासावादेशः॥

(आक्षेपबाधकभाष्यम्)

नैतन्मन्तव्यम्-'समुदाये आश्रीयमाणेऽवयवो नाश्रीयते' इति। अभ्यन्तरो हि समुदायेऽयवः॥

तद्यथा – वृक्षः प्रचलन् सहावयवैः प्रचलति॥

(३६९ आक्षेपवार्तिकम्॥११॥)

॥*॥ आश्रय इति चेदल्विधिप्रसङ्ग॥*॥

(भाष्यम्)

आश्रय इति चेदल्विधिरयं भवति। तत्रानल्विधाविति प्रतिषेधः प्राप्नोति॥

(आक्षेपबाधकभाष्यम्)

नैष दोषः। नैवं सति कश्चिदनल्विधिः स्याद्। उच्यते चेदमनल्विधाविति। तत्र प्रकर्षगति-र्विज्ञास्यते- साधीयो योऽल्विधिरिति॥

कश्च साधीयः?।

यत्र प्राधान्येनालाश्रीयते। यत्र नान्तरीयकोऽलाश्रीयते नासावल्विधिरिति॥

(सिद्धान्तिसमाधानभाष्यम्)

अथवोक्तमादेशग्रहणस्य प्रयोजनम्-आदेशमात्रं स्थानिवद्यथा स्यादिति॥

(शब्दनित्यत्वेऽप्यनुपपत्तिपरिहाराधिकरणम्)

(३७० आक्षेपवार्तिकम्॥१२)

॥*॥ अनुपपन्नं स्थान्यादेशत्वं नित्यत्वात्॥*॥

(भाष्यम्)

स्थानी आदेश इत्येतन्नित्येषु शब्देषु नोपद्यते॥

किं कारणम्?।

'नित्यत्वात्'। स्थानी हि नाम- यो भूत्वा न भवति। आदशो हि नाम- योऽभूत्वा भवति। एतच्च नित्येषु शब्देषु नोपपद्यते- यत्सतो नाम विनाशः स्यात्, असतो वा प्रादुर्भाव इति॥

(३७१ समाधानवार्तिकम्॥१३॥)

॥*॥ सिद्धं तु यथा लौकिकवैदिकेष्वभूतपूर्वेऽपि स्थानशब्दप्रयोगात्॥*॥

(भाष्यम्)

सिद्धमेतत्।

कथम्?।

यथा लौकिकवैदिकेषु कृतान्तेषु अभूतपूर्वेऽपि स्थानशब्दप्रयोगो वर्तते। लोके तावद्- 'उपाध्यायस्य स्थाने शिष्यः' इत्युच्यते, न च तत्र उपाध्यायो भूतपूर्वोऽपि भवति॥ वेदेऽपि- 'सोमस्य स्थाने पूतीकतृणान्यभिषुणुयाद्' इत्युच्यते। न च तत्र सोमो भूतपूर्वो भवति॥

(३७२ समाधानान्तरवार्तिकम्॥१४॥)

॥*॥ कार्यविपरिणामाद्वा सिद्धम्॥*॥

(भाष्यम्)

अथवा कार्यविपरिणामात्सिद्धमेतत्॥

किमिदं कार्यविपरिणामादिति?॥

कार्या, बुद्धिः- सा विपरिणम्यते॥

(प्रयोगासिद्धिभाष्यम्)

ननु च कार्याविपरिणामादिति भवितव्यम्॥

(प्रयोगसाधकभाष्यम्)

सन्ति चैव ह्यौत्तरपदिकानि ह्रस्वत्वानि॥

(प्रयोगसाधकयुक्त्यन्तरभाष्यम्)

अपि च 'बुद्धिः संप्रत्ययः इत्यनर्थान्तरम्। कार्या-बुद्धिः, कार्यः-संप्रत्ययः। कार्यस्य-संप्रत्ययस्य विपरिणामः। कार्यविपरिणमादिति॥

(समाधानान्तरबाधकभाष्यम्)

परिहारान्तरमेवेदं मत्वा पठितम्॥

(उपपत्तिप्रश्नभाष्यम्)

कथं चेदं परिहारान्तरं स्याद्?॥

(समाधानान्तरबाधकभाष्यम्)

यदि भूतपूर्वे स्थानशब्दो वर्तते॥

(समाधानान्तरसाधकभाष्यम्)

भूतपूर्वे चापि स्थानशब्दो वर्तते॥

कथम्?॥

बुद्ध्या। तद्यथा कश्चित्कस्मैचिदुपदिशति-'प्राचीनं ग्रामादाम्राः' इति। तस्य सर्वत्राम्रबुद्धिः प्रसक्ता। ततः पश्चादाह-'ये क्षीरिणोऽवरोहवन्तः पृथुपर्णास्ते न्यग्रोधाः' इति। स तत्राम्रबुद्ध्या न्यग्रोधबुद्धिं प्रतिपद्यते। स ततः पश्यति-बुद्ध्या आम्राँश्चापकृष्यमाणान्, न्यग्रोधांश्चोपधीयमानान्। नित्या एव च स्वस्मिन्विषये आम्राः, नित्याश्च न्यग्रोधाः। बुद्धिस्त्वस्य विपरिणम्यते॥ एवमिहाप्यस्तिरस्मायविशेषेणोपदिष्टः, तस्य सर्वत्रास्तिबुद्धिः प्रसक्ता। सः 'अस्तेर्भूः' इत्यनेनास्ति-बुद्ध्या भवतिबुद्धिं प्रतिपद्यते। स ततः पश्यति-बुद्ध्या अस्ति चापकृष्यमाणं, भवति चोपधीयमानम्, नित्य एव च स्वस्मिन्विषयेऽस्तिर्नित्यो भवतिश्च। बुद्धिस्त्वस्य विपरिणम्यते॥

(उत्सर्गकार्यनिराकरणाधिकरणम्)

(३७३ आक्षेपवार्तिकम्॥१५॥)

॥*॥ अपवादप्रसङ्गस्तु स्थानिवत्त्वात्॥*॥

(भाष्यम्)

अपवादे उत्सर्गकृतं प्राप्नोति॥ 'कर्मण्यण्' 'आतोऽनुपसर्गे कः' इति केऽपि अणि कृतं प्राप्नोति॥

किं कारणम्?॥

स्थानिवत्त्वात्॥

(आक्षेपबाधकभाष्यम्)

॥*॥ उक्तं वा ॥*॥

(भाष्यम्)

किमुक्तम्?।

*विषयेण तु नानालिङ्गकरणात् सिद्धम्*इति॥

(भाष्यम्)

(३७४ समाधानवार्तिकम् ॥१७॥)

॥*॥ सिद्धं तु षष्ठीनिर्दिष्टस्य स्थानिवद्वचनात्॥*॥

(भाष्यम्)

सिद्धमेतत्॥

कथम्?

षष्ठीनिर्दिष्टस्यादेशः स्थानिवदिति वक्तव्यम्॥

(आक्षेपभाष्यम्)

तत्तर्हि षष्ठीनिर्दिष्टग्रहणं कर्तव्यम्॥

(समाधानभाष्यम्)

न कर्तव्यम्। प्रकृतमनुवर्तते॥

क्व प्रकृतम्?।

'षष्ठी स्थानेयोगा' इति॥

अथवा – आचार्यप्रवृत्तिर्ज्ञापयति नापवादे उत्सर्गकृतं भवतीति। यदयं श्यन्नादीन् कांश्चिच्छितः करोति- श्यन्, श्नम्, श्ना. शः, श्नुरिति॥

(स्थानिवत्त्वप्राप्तदूषणनिराकरणाधिकरणम्)

(३७५ आक्षेपवार्तिकम्॥१८॥)

॥*॥ तस्य दोषस्तयादेश उभयप्रतिषेधः॥*॥

(भाष्यम्)

तस्यैतस्य लक्षणस्य दोषः- तयादेश उभयप्रतिषेधो वक्तव्यः। उभये देवमनुष्याः। तयपो ग्रहणेन ग्रहणाद् जसि विभाषा प्राप्नोति॥

(आक्षेपनिराकरणसिद्धान्तिभाष्यम्)

नैष दोषः। अयच् प्रत्ययान्तरम्॥

(आक्षेपनिराकरणसिद्धान्तिभाष्यम्)

यदि प्रत्ययान्तरम्, उभयीति ईकारो न प्राप्नोति॥

(आक्षेपबाधकभाष्यम्)

मा भूदेवम्। मात्रच इत्येवं भविष्यति॥

कथम्?॥

मात्रजिति नेदं प्रत्ययग्रहणम्॥

किं तर्हि॥

प्रत्याहारग्रहणम्॥

क्व सन्निविष्टानां प्रत्याहारः?॥

मात्रशब्दात्प्रभृति आ अयचश्चकारात्॥

(आक्षेपसाधकभाष्यम्)

यदि प्रत्याहारग्रहणम्, 'कति तिष्ठन्ति' अत्रापि प्राप्नोति॥

(आक्षेपबाधकभाष्यम्)

एवमपि 'तैलमात्रा-घृतमात्रा' अत्रापि प्राप्नोति॥

अति इति वर्तते॥

(आक्षेपबाधकभाष्यम्)

सदृशस्याप्संनिविष्टस्य न भवति प्रत्याहारग्रहणेन ग्रहणम्॥

(३७६ आक्षेपवार्तिकम्॥१९॥)

॥*॥ जात्याख्यायां वचनादेशे स्थानिवद्भावप्रतिषेधः॥*॥

(भाष्यम्)

जात्याख्यायां वचनादेशे स्थानिवद्भावस्य प्रतिषेधो वक्तव्यः। व्रीहिभ्य आगत इत्यत्र 'घेर्डिति' इति गुणः प्राप्नोति॥

(आक्षेपनिरासभाष्यम्)

नैष दोषः। उक्तमेतत्- *अर्थातिदेशात्सिद्धम्* इति॥

(३७७ आक्षेपवार्तिकम्॥२०)

॥*॥ ङ्याब्ग्रहणेऽदीर्घः॥*॥

(भाष्यम्)

ङ्याब्ग्रहणेऽदीर्घ आदेशो न स्थानिवदिति वक्तव्यम्॥

किं प्रयोजनम्॥

निष्कौशाम्बिः। अतिखट्वः। ङयाब्ग्रहणेन ग्रहणात्सुलोपो मा भूदिति॥

(आक्षेपबाधकभाष्यम्)

ननु च दीर्घादित्युच्यते॥

(आक्षेपसाधकलाघवभाष्यम्)

तन्न वक्तव्यं भवति॥

(तटस्थाक्षेपभाष्यम्)

किं पुनरत्र ज्यायः?॥

(तटस्थाक्षेपसमाधानभाष्यम्)

स्थानिवद्भावप्रतिषेध एव ज्यायान्। इदमपि सिद्धं भवति- अतिखट्वाय, अतिमालाय। 'याडापः' इति याड् न भवति॥

(आक्षेपभाष्यम्)

अथेदानीमसत्यपि स्थानिवद्भावे दीर्घत्वे कृते पिच्चासौ भूतपूर्व इति कृत्वा 'याडापः' इति याड् कस्मान्न भवति?॥

(समाधानभाष्यम्)

लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति।

(आक्षेपभाष्यम्)

ननु चेदानीं सत्यपि स्थानिवद्भावे एतया परिभाषया शक्यमिहोपस्थातुम्॥

(समाधानभाष्यम्)

नेत्याह। न तर्हीदानीं क्वचिदपि स्थानिवद्भावः स्यात्॥

(तृतीयाक्षेपभाष्यम्)

तत्तर्हि वक्तव्यम्॥

(समाधानभाष्यम्)

न वक्तव्यम्॥

प्रश्लिष्टनिर्देशात्सिद्धम्॥ प्रश्लिष्टनिर्देशोऽयम्-ङी ई ईकारान्तात्, आ आप् आकारान्तादिति॥

(३७८ आक्षेपवार्तिकम्॥२१॥)

॥*॥ आहिभुवोरीट्प्रतिषेधः॥*॥

(भाष्यम्)

आहिभुवोरीट्प्रतिषेधो वक्तव्यः। आत्थ, अभूत्। अस्तिब्रूग्रहणे ग्रहणादीट् प्राप्नोति॥

(आह्यंशे आक्षेपनिराकरणभाष्यम्)

आहेस्तावन्न वक्तव्यः। आचार्यप्रवृत्तिर्ज्ञापयति-नाहेरीड् भवतीति। यदयम्-'आहस्थः' इति झलादिप्रकरणे थत्वं शास्ति॥

(ज्ञापकबाधकभाष्यम्)

नैतदस्ति ज्ञापकम्। अस्ति ह्यन्यदेतस्य वचने प्रयोजनम्॥

किम्?॥

भूतपूर्वगतिर्यथा विज्ञायेत-झलादिर्यो भूतपूर्व इति॥

(ज्ञापकसमाधानभाष्यम्)

यद्येवं थवचनमनर्थकं स्यात्। आथिमेवायमुच्चारयेत्-'ब्रुवः पञ्चानामादित आथो ब्रुवः' इति॥

(भ्वंशेऽप्याक्षेपनिराकरणभाष्यम्)

भवतेश्चापि न वक्तव्यः। 'अस्तिस् सिचोऽपृक्ते' इति द्विसकारको निर्देशः । अस्तेः सकारन्तादिति॥

(३७९ आक्षेपवार्तिकम्॥२२॥)

॥*॥ वध्यादेशे वृद्धितत्त्वप्रतिषेधः॥*॥

(भाष्यम्)

वध्यादेशे वृद्धितत्त्वयोः प्रतिषेधो वक्तव्यः। वधकं पुष्करमिति। स्थानिवद्भावाद् वृद्वितत्त्वे प्राप्नुतः॥

(आक्षेपनिराकरणभाष्यम्)

नैष दोषः। उक्तमेतत्-'नायं ण्वुल्, किन्तु अन्योऽयमकशब्दः किदौणादिको रुचक इति यथा'

(३८० आक्षेपवार्तिकम् ॥२३॥)

॥*॥ इड्विधिश्च॥*॥

इड्विधेयः। आवधिषीष्ट। 'एकाच उपदेशेऽनुदात्तात्' इतीट्प्रतिषेधः प्राप्नोति॥

(आक्षेपनिराकरणभाष्यम्)

नैष दोषः। आद्युदात्तनिपातनं करिष्यते। स निपातनस्वरः प्रकृतिस्वरस्य बाधको भविष्यति।

(प्रत्याक्षेपभाष्यम्)

एवमप्युपदेशिवद्भावो वक्तव्यः। यथैव हि निपातनस्वरः प्रकृतिस्वरं बाधते, एवं प्रत्ययस्वरमपि बाधेतआवधिषीष्टेति॥

(आक्षेपपरिहारभाष्यम्)

नैष दोषः। आर्धधातुकीयाः सामान्येन भवन्ति, अनवस्थितेषु प्रत्ययेषु। तत्रार्धधातुकसामान्ये वधिभावे कृते, सति शिष्टत्वात् प्रत्ययस्वरो भविष्यति॥

(३८१ आक्षेपवार्तिकम्॥ २४॥)

॥*॥ आकारान्तान्नुषुक्प्रतिषेधः॥*॥

(भाष्यम्)

आकारान्तान्नुषुकोः प्रतिषेधो वक्तव्यः। विलापयति। भापयते। लीभीग्रहणेन ग्रहणान्नुषुकौ प्राप्नुतः॥

(आक्षेपपरिहारभाष्यम्)

(नैषः दोषः) लीभियोः प्रश्लिष्टनिर्देशात्सिद्धम्॥ लीभियोः प्रश्लिष्टनिर्देशोऽयम्-ली ई ईकारान्तस्य भी ई ईकारान्तस्य चेति॥

(३८२ आक्षेपवार्तिकम्॥ २५॥)

॥*॥ लोडादेशे शाभावजभावधित्वहिलोपैत्त्वप्रतिषेधः॥*॥

(भाष्यम्)

एषां लोडादेशे प्रतिषेधो वक्तव्यः॥ शिष्टात् हतात्। भिन्तात्। कुरुतात्। स्तात्। लोडादेशे कृते शाभावे जभावो धित्वं हिलोप एत्त्वमित्येते विधयः प्राप्नुवन्ति॥

(आक्षेपपरिहारभाष्यम्)

नैष दोषः। इदमिह संप्रधार्यम्- लोडादेशः क्रियताम्, एते विधय इति। किमत्र कर्तव्यम्?॥

परत्वल्लोडादेशः॥

(आक्षेपभाष्यम्)

अथेदानीं लोडादेशे कृते पुनःप्रसङ्गविज्ञानात् कस्मादेते विधयो न भवन्ति?॥

(आक्षेपबाधकभाष्यम्)

'सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेव' इति कृत्वा॥

(३८३ आक्षेपवार्तिकम्॥२३॥)

॥*॥ त्रयादेशे स्रन्तप्रतिषेधः॥*॥

(भाष्यम्)

त्रयादेशे स्रन्तस्य प्रतिषेधो वक्तव्यः। 'तिसृणाम्' तिसृभावे कृते 'त्रेस्त्रयः' इति त्रयादेशः प्राप्नोति॥

(आक्षेपनिराकरणभाष्यम्)

नैष दोषः। इदमिह संप्रधार्यम्-तिसृभावः क्रियताम्, त्रयादेश इति। किमत्र कर्तव्यम्?॥ परत्वात्तिसृभावः॥

(आक्षेपभाष्यम्)

अथेदानीं तिसृभावे कृते पुनःप्रसङ्गविज्ञानात् त्रयादेशः कस्मान्न भवति?॥

(समाधानभाष्यम्)

सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति ॥

(३८४ आक्षेपवार्तिकम्॥२७॥)

॥*॥ आम्विधौ च॥*॥

(भाष्यम्)

आम्विधौ च स्रन्तस्य प्रतिषेधो वक्तव्यः। 'चतस्रस्तिष्ठन्ति', चतसृभावे कृते 'चतुरमनडुहोरामुदात्तः' इत्याम् प्राप्नोति॥

(आक्षेपभाष्यम्)

नैष दोषः। इदमिह संप्रधार्यम्- चतसृभावः क्रियताम्, 'चतुरमनडुहोरामुदात्तः' इत्यामिति। किमत्र कर्तव्यम्?॥ परत्वाच्चतसृभावः॥

(आक्षेपभाष्यम्)

अथेदानीं चतसृभावे कृते पुनःप्रसङ्गविज्ञानाद् आम् कस्मान्न भवति?॥

(समाधानभाष्यम्)

सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति॥

(३८५ आक्षेपवार्तिकम्॥२८॥)

॥*॥ स्वरे वस्वादेशे॥*॥

(भाष्यम्)

स्वरे च वस्वादेशे प्रतिषेधो वक्तव्यः॥ विदुषः पश्य॥ 'शतुरनुमो नद्यजादी' अन्तोदात्तादित्येष स्वरः प्राप्नोति॥

(आक्षेपनिराकरणभाष्यम्)

नैष दोषः। 'अनुमः' इति प्रतिषेधो भविष्यति॥

(अनुपपत्तिभाष्यम्)

अनुम इत्युच्यते, न चात्र नुमं पश्यामः॥

(अनुपपत्तिपरिहारभाष्यम्)

अनुम इति नेदमागमग्रहणम्॥

किं तर्हि?॥

प्रत्याहारग्रहणम्?॥

क्व सन्निविष्टानां प्रत्याहारः?॥

ऽकारात्प्रभृत्या नुमो मकारात्॥

(अनिष्टापत्तिभाष्यम्)

यदि प्रत्याहारग्रहणं 'लुनता पुनता' अत्रापि प्राप्नोति॥

(अनिष्टापत्तिवारणभाष्यम्)

अनुम्ग्रहणेन शत्रन्तं विशेष्यते॥

किं तर्हि?॥

शतैव विशेष्यते शता योऽनुम्क इति॥ अवश्यं चैतदेवं विज्ञेयम्। आगमग्रहणे हि सतीह प्रसज्येत-मुञ्चता मुञ्चत इति॥

(३८६ आक्षेपवार्तिकम्॥२९॥)

॥*॥ गोः पूर्वणित्त्वात्त्वस्वरेषु॥*॥

(भाष्यम्)

गोः पूर्वणित्त्वात्वस्वरेषु प्रतिषेधो वक्तव्यः। चित्रग्वग्रं शबलग्वग्रम्। 'सर्वत्र विभाषा गोः' इति विभाषा पूर्वत्वं प्राप्नोति॥

(दूषणप्रथमाक्षेपनिराकरणभाष्यम्)

नैष दोषः। एङ इति वर्तते। तत्रानल्विधाविति प्रतिषेधो भविष्यति॥

(समाधाननिरासभाष्यम्)

एवमपि 'हे चित्रगो अग्रम्' अत्र प्राप्नोति॥

(द्वितीयतृतीयाक्षेपभाष्यम्)

णित्त्वम्-चित्रगुः चित्रगू चित्रगवः। 'गोतो णित्' इति णित्त्वं प्राप्नोति॥

आत्वम्। चित्रगुं पश्य, शबलगुं पश्य। 'आ गोतः-' इत्यात्वं प्राप्नोति॥

(द्वितीयतृतीयाक्षेपवारणभाष्यम्)

नैष दोषः तपरकरणात्सिद्धम्। तपरकरणसामर्थ्यात् णित्त्वात्वे न भविष्यतः)॥

(आक्षेपभाष्यम्)

स्वर-बहुगुमान्। 'न गोश्वन्सावर्वर्ण-' इति प्रतिषेधः प्राप्नोति॥

(३८७ आक्षेपवार्तिकम्॥३०॥)

॥*॥ करोतिपिबत्योः प्रतिषेधः॥*॥

(भाष्यम्)

करोतिपिबत्योः प्रतिषेधो वक्तव्यः। कुरु पिबेति। स्थानिवद्भावाल्लघूपधगुणः प्राप्नोति॥

(आक्षेपनिराकरणभाष्यम्)

॥*॥ उक्तं वा॥*॥

किमुक्तम्?।

'करोतौ तपरकरणनिर्देशात्सिद्धम्'॥ ''पिबिरदन्तः'' इति॥

स्थानिवदादेशोऽनल्विधौ॥५६॥

(५१ अतिदेशसूत्रम्॥१।१।८ आ.२॥)

अचः परस्मिन् पूर्वविधौ॥१।१।५७॥

(पदकृत्यनिर्वचनाधिकरणम्)

(अच्पदप्रयोजनाधिकरणम्)

(आक्षेपभाष्यम्)

अच इति किमर्थम्?॥

(प्रयोजनदर्शनभाष्यम्)

प्रश्नो, विश्नः। घूत्वा, स्यूत्वा। अक्राष्टाम्। आगत्य॥

प्रश्नो विश्न इत्यत्र छकारस्य शकारः परनिमित्तकः, तस्य स्थानिवद्भावात् ''छे च'' इति तुक् प्राप्नोति। अच इति वचनान्न भवति॥

(दोषवारणभाष्यम्)

नैतदस्ति प्रयोजनम्। क्रियमाणेऽपि वाऽज्ग्रहणेऽवश्यमत्र तुगभावे यत्नः कर्तव्यः। अन्तरङ्गत्वाद्धि तुक् प्राप्नोति॥

(द्वितायप्रयोजनोपपादनभाष्यम्)

इदं तर्हि प्रयोजनम्-ग्लूत्वा, स्यूत्वा। वकारस्य ऊठ् परिनिमित्तकः। तस्य स्थानिवद्भावादचीति यणादेशो न प्राप्नोति। अच इति वचनाद्भवति॥

(दोषवारणभाष्यम्)

एतदपि नास्ति प्रयोजनम्। स्वाश्रयमत्राच्त्वं भविष्यति॥

अथाव- योऽत्रादेशो नासावाश्रीयते, यश्चाश्रीयते नासावादेशः॥

(तृतीयप्रयोजनोपपादनभाष्यम्)

इदं तर्हि प्रयोजनम्-अक्राष्टाम्। सिचो लोपः परनिमित्तकः। तस्य स्थानिवद्भावात् 'षढोः कः सि' इति कत्वं प्राप्नोति। अच इति वचनान्न भवति॥

(दूषणनिराकरणभाष्यम्)

एतदपि नास्ति प्रयोजनम्। वक्ष्यत्येतत्-*पूर्वत्रासिद्धे न स्थानिवदिति*॥

(अखण्डितप्रयोजनभाष्यम्)

इदं तर्हि प्रयोजनम्-आगत्य, अभिगत्य। अनुनासिकलोपः परनिमित्तकः, तस्य स्थानिवद्भावाद्ध्रस्वस्येति तुङ् न प्राप्नोति॥ अच इत वचनाद्भवति॥

(परस्मिन्नित्येतत्प्रयोजनाधिकरणम्)

(आक्षेपभाष्यम्)

अथ परस्मिन्निति किमर्थम्?॥

(प्रयोजनभाष्यम्)

युवजानिः वधूजानिः **। द्विपदिका वैयाघ्रपद्यः। आदीध्ये॥**

(प्रथमप्रयोजनोपपादनभाष्यम्)

युवजानिः, वधूजानिरिति 'जायाया निङ्' अपरनिमित्तकः। तस्य स्थानिवद्भावाद् 'वलि' इति यलोपो न प्राप्नोति। परस्मिन्निति वचनाद्भवति॥

(प्रथमप्रयोजननिराकरणभाष्यम्)

नैतदस्ति प्रयोजनम्। स्वाश्रयमत्र वल्त्वं भविष्यति॥

अथवा-योऽत्रादेशो नासावाश्रीयते। यश्चाश्रीयते नासावादेशः॥

(द्वितीयप्रयोजनोपपादनभाष्यम्)

इदं तर्हि प्रयोजनम्-द्विपदिका, त्रिपदिका। पादस्य लोपोऽपरनिमित्तकः, तस्य स्थानिवद्भावात्पद्भावो न प्राप्नोति॥ परस्मिन्निति वचनाद्भवति॥

(द्वितीयप्रयोजननिराकरणभाष्यम्)

एतदपि नास्ति प्रयोजनम्। पुनर्लोपवचनसामर्थ्यात् स्थानिवद्भावो न भविष्यति॥

(तृतीयप्रयोजनोपपादनभाष्यम्)

इदं तर्हि प्रयोजनम्-वैयाघ्रपद्यः॥

(प्रयोजनबाधकाक्षेपभाष्यम्)

ननु चात्रापि पुनर्वचनसामर्थ्यादेव न भविष्यति॥

(प्रयोजनसाधकभाष्यम्)

अस्ति ह्यन्यत्पुनर्लोपवचने प्रयोजनम्॥

किम्?॥

यत्र भसंज्ञा न–व्याघ्रपात् श्येनपादिति॥

(चतुर्थप्रयोजनोपपादनभाष्यम्)

इदं चाप्युदाहरणम्-आदीध्ये आवेव्ये। इकारस्यैकारोनपरनिमित्तकः। तस्य स्थानिवद्भावाद् 'यीवर्णयोर्दीधीवेव्योः' इति लोपः प्राप्नोति। परस्मिन्निति वचनान्न भवति॥

(इति परस्मिन्नित्येतत्प्रयोजननिरूपणम्।)

(पूर्वविधिग्रहणप्रयोजनाधिकरणम्)

(आक्षेपभाष्यम्)

अथ पूर्वविधाविति किमर्थम्?॥

(समाधानभाष्यम्)

हे गौः। बाभ्रवीयाः। नैधेयः॥

(प्रथमप्रयोजनोपपादनभाष्यम्)

हे गौरित्यौकारः परनिमित्तकः। तस्य स्थानिवद्भावाद् 'एङह्रस्वात्संबुद्धेः' इति लोपः प्राप्नोति। पूर्वविधाविति वचनान्न भवति॥

(प्रयोजननिराकरणभाष्यम्)

नैतदस्ति प्रयोजनम्। आचार्यप्रवृत्तिर्ज्ञापयति-'न संबुद्धिलोपे स्थानिवद्भावो भवति' इति। यदयम् 'एङ्ह्रस्वात्संबुद्धेः' इत्येङ्ग्रहणं करोति॥

(प्रयोजनसाधकभाष्यम्)

नैतदस्ति ज्ञापकम्। गोऽर्थमेतत् स्यात्॥

(प्रयोजनबाधकज्ञापकशयान्तरभाष्यम्)

यत्तर्हि प्रत्याहारग्रहणं करोति। इतरथा हि 'ओह्रस्वाद्' इत्येव ब्रूयाद्॥

(द्वितीयप्रयोजनोपपादनभाष्यम्)

इदं तर्हि प्रयोजनम्-बाभ्रवीयाः, माधवीयाः। वान्तादेशः परनिमित्तकः, तस्य स्थानिवद्भावाद् 'हलस्तद्धितस्य' इति यलोपो न प्राप्नोति। पूर्वविधाविति वचनाद्भवति॥

(प्रयोजननिराकरणभाष्यम्)

एतदपि नास्ति प्रयोजनम्। स्वाश्रयमत्र हल्त्वं भविष्यति॥

अथवा-योऽत्रादेशो नासावाश्रीयते, यश्चाश्रीयते नाऽसावादेशः॥

(तृतीयप्रयोजनोपपादनभाष्यम्)

इदं तर्हि प्रयोजनम्-नैधेयः। आकारलोपः परनिमित्तकः, तस्य स्थानिवद्भावाद् द्वयज्लक्षणो ढग् न प्राप्नोति। पूर्वविधाविति वचनाद्भवति॥

(इति पूर्वविधिग्रहणप्रयोजननिरूपणम्)

(अथ विधिग्रहणप्रयोजननिरूपणम्)

(आक्षेपभाष्यम्)

अथ विधिग्रहणं किमर्थम्?॥

(समाधानभाष्यम्)

सर्वविभक्त्यन्तः समासो यथा विज्ञायेत-पूर्वस्य विधिः पूर्वविधिः, पूर्वस्माद्विधिः पूर्वविधिरिति॥

(अथ पञ्चमीसमासप्रयोजननिरूपणम्)

(आक्षेपभाष्यम्)

कानि पुनः पूर्वस्माद्विधौ स्थानिवत्त्वस्य प्रयोजनानि?॥

(प्रयोजनोद्देशभाष्यम्)

बेभिदिता, चेच्छिदिता। माथितिकः। अपीपचन्॥

(प्रथमप्रयोजनोपपादनभाष्यम्)

बेभिदिता चेच्छिदितेति। अकारलोपे कृते यलोपे च एकाज्लक्षण इट्प्रतिषेधः प्राप्नोति॥ स्थानिवद्भावान्न भवति॥

(द्वितीयप्रयोजनोपपादनभाष्यम्)

माथितिक इत्यकारलोपे कृते 'तान्तात्कः' इति कादेशः प्राप्नोति॥ स्थानिवद्भावान्न भवति॥

(तृतीयप्रयोजनोपपादनभाष्यम्)

अपीपचन्नित्येकादेशे कृते 'अभ्यस्ताज्झेर्जुस् भवति' इति जुस्भावः प्राप्नोति। स्थानिवद्भावान्न भवति॥

(उक्ताप्रयोजननिराकरणभाष्यम्)

नैतानि सन्ति प्रयोजनानि। प्रातिपदिकनिर्देशोऽयम्। प्रातिपदिकनिर्देशास्त्वर्थतन्त्रा भवन्ति, न काञ्चित्प्राधान्येन विभक्तिमाश्रयन्ति। तत्र प्रातिपदिकार्थे निर्दिष्टे यां यां विभक्तिमाश्रयितुं बुद्धिरुपाजयते, सा साऽऽश्रयितव्या॥

(विधिग्रहणप्रयोजनान्तरभाष्यम्)

इदं तर्हि प्रयोजनम्- विधिमात्रे स्थानिवद्भावो यथा स्यात्॥ अनाश्रीयमाणायामपि प्रकृतौ। वाय्वोरध्वर्य्वोः, '' लोपो व्योर्वलि'' इति यलोपो मा भूदिति॥

(भाष्यम्)

अस्ति प्रयोजनमेतत्॥

किं तर्हीति॥

(स्वविधौ स्थानिवद्भावनिरूपणम्)

(३३८ आक्षेपबाधकं भाष्यवार्तिकम्॥१॥)

॥*॥ अपरविधाविति तु वक्तवयम्॥*॥

(भाष्यम्)

किं प्रयोजनम्?॥

स्वविधावपि स्थानिवद्भावो यथा स्यात्॥

(आक्षेपभाष्यम्)

कानि पुनः स्वविधौ स्थानिवद्भावस्य प्रयोजनानि?॥

(प्रयोजनोद्देशभाष्यम्)

आयन्, आसन्। घिन्वन्ति, कृण्वन्ति। दध्यत्र, मध्वत्र। चक्रतुः, चक्रुः॥

(प्रथमप्रयोजनोपपादनभाष्यम्)

इह तावदायन्नासन्निति। इणस्त्योर्यण्लोपयोः कृतयोरनजादित्वाद् 'आडजादीनाम्' इत्याट् न प्राप्नोति। स्थानिवद्भावाद् भवति॥

(द्वितीयप्रयोजनोपपादनभाष्यम्)

धिन्वन्ति कृण्वन्तीति। यणादेशे कृते वलादिलक्षण इट् प्राप्नोति। स्थानिवद्भावान्न भवति॥

(तृतीयप्रयोजनोपपादनभाष्यम्)

दध्यत्र मध्वत्रेति। यणादेशे कृते संयोगान्तलोपः प्राप्नोति॥ स्थानिवद्भावान्न भवति॥

(चतुर्थप्रयोजनोपपादनभाष्यम्)

चक्रतुः चक्रुः। यणादेशे कृते अनच्कत्वात् द्विर्वचनं न प्राप्नोति। स्थानिवद्भावाद् भवति॥

(अनिष्टापत्तिभाष्यम्)

यदि तर्हि स्वविधावपि स्थानिवद्भावो भवति। 'द्वाभ्याम्, देयम्, लवनम्' अत्रापि प्राप्नोति॥

द्वाभ्यामित्यत्रात्वस्य स्थानिवद्भावाद् दीर्घत्वं न प्राप्नोति॥

देयमितीत्त्वस्य स्थानिवद्भावाद् गुणो न प्राप्नोति। लवनमित्यत्र गुणस्य स्थानिवद्भावादवादेशो न प्राप्नोति॥

(अनिष्टापत्तिवारणभाष्यम्)

नैष दोषः। स्वाश्रया एते विधयो भविष्यन्ति॥

(आक्षेपभाष्यम्)

तत्तर्हि वक्तव्यम्-अपरविधाविति॥

(समाधानभाष्यम्)

न वक्तव्यम्। पूर्वविधावित्येव सिद्धम्॥

कथम्?॥

न पूर्वग्रहणेनादेशोऽभिसंबध्यते- 'अजादेशः परनिमित्तकः पूर्वस्य विधिं प्रति स्थानिवद् भवति।

कुतः पूर्वस्य? आदेशात्' इति॥

किं तर्हि?॥

निमित्तमभिसंबध्यते-'अजादेशः परनिमित्तकः पूर्वस्य विधिं प्रति स्थानिवद् भवति। कुतः पूर्वस्य? निमित्तात्' इति॥

(आक्षेपभाष्यम्)

अथ निमित्तेऽभिसंबध्यमाने यत्तदस्य योगस्य मूर्द्धाभिषिक्तमुदाहरणं तदपि संगृहीतं भवति॥

किं पुनस्तत्?॥

पट्व्या मृद्व्येति॥

(समाधानभाष्यम्)

बाढं संगृहीतम्॥

(समाधानबाधकभाष्यम्)

ननु च ईकारयणा व्यवहितत्वान्नासौ निमित्तात् पूर्वो भवति॥

(समाधानसाधकभाष्यम्)

व्यवहितेऽपि पूर्वशब्दो वर्तते। तद्यथा- पूर्वं मथुरायाः पाटलिपुत्रमिति॥

(पक्षान्ताराभ्युपगमभाष्यम्)

अथवा पुनरस्त्वादेश एवाभिसंबध्यते.

(आक्षेपभाष्यम्)

कथं यानि स्वविधौ स्थानिवद्भावस्य प्रयोजनानि?।

(इत्येकदेशिभाष्यम्)

(अथ सिद्धान्तिभाष्यम्)

नैतानि सन्ति। इह तावदायन् आसन्, धिन्वन्ति कृण्वन्तीति। अयं विधिशब्दोऽस्त्येव कर्मसाधनो विधीयते विधिरिति। अस्ति च भावसाधनः-विधानं विधिरिति। तत्र कर्मसाधनस्य विधिशब्दस्योपादाने न सर्वमिष्टं संगृहीतमिति कृत्वा भावसाधनस्य विधिशब्दस्योपादानं विज्ञास्यते-पूर्वस्य विधानं प्रतिपूर्वस्य भावं प्रतिपूर्वः स्यादिति स्थानिवद्भवतीति॥ एवमाट् भविष्यति, इट् च न भविष्यति॥

(सिद्धान्तिशेषभाष्यम्)

दध्यत्र चक्रतुचक्रुरिति-परिहारं वक्ष्यति॥

(सूत्रप्रयोजनाधिकरणम्)

(आक्षेपभाष्यम्)

कानि पुनरस्य योगस्य प्रयोजनानि?॥

(प्रयोजनश्लोकभाष्यम्)

॥*॥ स्तोष्याम्यहं पादिकमौदवाहिं ततः श्वोभूते शातनीं पातनीं च।

नेतारावागच्छतं धारणिं रावणिं च ततः पश्चात्स्रंस्यते ध्वंस्यते च॥१॥*॥

(उपपादानभाष्यम्)

इह तावत्-पादिकमौदवाहिं शातनीं पातनीं धारणिं रावणिमिति। अकारलोपे कृते- पद्भाव ऊठ् अल्लोपः टिलोप इत्येते विधयः प्राप्नुवन्ति। स्थानिवद्भावान्न भवन्ति॥

स्रंस्यते ध्वंस्यते। णिलोपे कृते ''अनिदितां हल उपाधायाः क्ङिति'' इति नलोपः प्राप्नोति। स्थानिवद्भावान्न भवति।

(प्रयोजननिराकरणभाष्यम्)

नैतानि सन्ति प्रयोजनानि। 'असिद्धवदत्राभात्' इत्यनेनाप्येतानि सिद्धानि॥

(प्रयोजनान्तरभाष्यम्)

इदं तर्हि प्रयोजनम्-याज्यते वाप्यते। णिलोपे कृते'- यजादीनां किति' संप्रसारणं प्राप्नोति॥ स्थानिवद्भावान्न भवति॥

(प्रयोजननिराकरणभाष्यम्)

एतदपि नास्ति प्रयोजनम्। यजादिभिरत्र कितं विशेषयिष्यामः-यजादिनां यः किदिति।

कश्च यजादीनां कित्?।

यजादिभ्यो यो विहित इति। न चाऽयं यजादिभ्यो विहितः॥

(मूर्धाभिषिक्तप्रयोजनान्तरभाष्यम्)

इदं तर्हि प्रयोजनम्- पट्व्या मृद्व्येति। परस्य यणादेशे कृते पूर्वस्य न प्राप्नोति, ईकारयणा व्यवहितत्वात्। स्थानिवद्भावाद्भवति॥

(आक्षेपभाष्यम्)

किं पुनः कारणं परस्य तावद्भवति, न पुनः पूर्वस्य?।

(आक्षेपनिराकरणभाष्यम्)

नित्यत्वात्। नित्यः परयणादेशः। कृतेऽपि पूर्वयणादेशे प्राप्नोति, अकृतेऽपि प्राप्नोति। नित्यत्वात्परयणादेशे कृते पूर्वस्य न प्राप्नोति। स्थानिवद्भावाद्भवति॥

(असिद्धपरिभाषया सूत्रप्रयोजननिराकरणभाष्यम्)

एतदपि नास्ति प्रयोजनम्। 'असिद्धं बहिरङ्गलक्षणमन्तरङ्गलक्षणे' इति। असिद्धत्वाद्बहिरङ्गलक्षणस्य परयणादेशस्यान्तरङ्गलक्षणः पूर्वयणादेशो भविष्यति। अवश्यं चैषा परिभाषा आश्रयितव्या स्वरार्थम्। कर्त्र्या हर्त्र्येति 'उदात्तयणो हल्पूर्वात्' इत्येष स्वरो यथा स्यात्॥

(सूत्रप्रयोजनवादिभाष्यम्)

अनेनापि सिद्धः स्वरः॥

कथम्?।

(सिद्ध्युपायश्लोकवार्तिकम्)

॥*॥ आरभ्यमाणे नित्योऽसौ॥*॥

(व्याख्याभाष्यम्)

आरभ्यमाणे त्वस्मिन् योगे नित्यः पूर्वयणादेशः। कृतेऽपि परयणादेशे प्राप्नोति, अकृतेऽपि॥

(प्रयोजनानिराकर्तृभाष्यम्)

परयणादेशोऽपि नित्यः। कृतेऽपि पूर्वयणादेशे प्राप्नोति, अकृतेऽपि॥

(सिद्ध्युपायबाधकश्लोकवार्तिकम्)

॥*॥ परश्चासौ व्यवस्थया॥*॥

(व्याख्याभाष्यम्)

व्यवस्थया चासौ परः॥

(सिद्ध्युपायबाधकश्लोकवार्तिकम्)

॥*॥ युगपत्संभवो नास्ति॥*॥

(व्याख्याभाष्यम्)

न चास्ति यौगपद्येन संभवः॥

(सिद्ध्युपायसाधकश्लोकवार्तिकम्)

॥*॥ बहिरङ्गेण सिध्यति॥*॥

(भाष्यम्)

'असिद्धं बहिरङ्गलक्षणमन्तरङ्गलक्षणे' इत्यनेन सिध्यति॥

(सूत्रप्रयोजनवादिभाष्यम्)

एवं तर्हि योऽत्रोदात्तयण् तदाश्रयः स्वरो भविष्यति॥

(इष्टानुपपत्तिभाष्यम्)

ईकारयणा व्यवहितत्वान्न प्राप्नोति॥

(इष्टोपपत्तिभाष्यम्)

''स्वरविधौ व्यञ्जनमविद्यमानवद्भवति' इति नास्ति व्यवधानम्॥

(असिद्धपरिभाषावादिभाष्यम्)

सा तर्हि एषा परिभाषा कर्तव्या॥

(स्थानिवद्भाववादिभाष्यम्)

ननु चेयमपि कर्तव्या-''असिद्धं बहिरङ्गलक्षणमन्तरङ्गलक्षणे'' इति॥

(असिद्धपरिभाषावादिभाष्यम्)

बहुप्रयोजनैषा परिभाषा। अवश्यमेषा कर्तव्या॥

(असिद्धपरिभाषावादिनो लाघवभाष्यम्)

सा चाप्येषा लोकतः सिद्धा।

कथम्?॥

प्रत्यङ्गवर्ती लोको लक्ष्यते। तद्यथा-पुरुषोऽयं प्रातरुत्थाय यान्यस्य प्रतिशरीरं कार्याणि तानि तावत्करोति, ततः सुहृदाम्, ततः संबन्धिनाम्॥ प्रातिपदिकं चाप्युपदिष्टं सामान्यभूतेऽर्थे वर्तते। सामान्ये वर्तमानस्य व्यक्तिरुपजायते॥ व्यक्तस्य सतो लिङ्गसंख्याभ्यामन्वितस्य बाह्येनार्थेन योगो भवति॥ ययैव चाऽऽनुपूर्व्याऽर्थानां प्रादुर्भावतयैव शब्दानामपि। तद्वत्कार्यैरपि भवितव्यम्॥

(सूत्रारम्भवादिभाष्यम्)

इमानि तर्हि प्रयोजनानि-पटयति अवधीत् बहुखट्वकः॥

(प्रयोजनोपपादकभाष्यम्)

पटयति लघयतीति णिचि टिलोपे कृते 'अत उपधायाः' इति वृद्धिः प्राप्नोति॥ स्थानिवद्भावान्न भवति॥

(द्वितीयप्रयोजनोपपादनभाष्यम्)

अवधीदित्यकारलोपे कृते '' अतो हलादेर्लघोः'' इति वृद्धिः प्राप्नोति॥ स्थानिवद्भावान्न भवति॥

(तृतीयप्रयोजनोपपादनभाष्यम्)

बहुखट्वक इति ''आपोऽन्यतरस्याम्'' इति ह्रस्वत्वे कृते ''ह्रस्वान्तेऽन्त्यात्पूर्वम्'' इत्येष स्वरः प्राप्नोति॥ स्थानिवद्भावान्न भवति॥

(स्थानिवद्भावप्राप्तानिष्टनिराकरणम्)

(आक्षेपभाष्यम्)

इह वैयाकरणः सौवश्च इति य्वोः स्थानिवद्भावादायावौ प्राप्नुतस्तयोः प्रतिषेधो वक्तव्यः॥

(३८९ समाधानवार्तिकम्॥२॥)

॥*॥ अचः पूर्वविज्ञानादैचोः सिद्धम्॥*॥

(भाष्यम्)

योऽनादिष्टादचः पूर्वस्तस्य विधिं प्रति स्थानिवद्भावः। आदिष्टाच्चैषोऽचः पूर्वः॥

किं वक्तव्यमेतत्?॥

न हि ।

कथमनुच्यमानं गंस्यते?॥

अच इति पञ्चमी। अचः पूर्वस्य॥

(आक्षेपभाष्यम्)

यद्येवमादेशोऽविशेषितो भवति॥

(आक्षेपबाधकभाष्यम्)

आदेशश्च विशेषितः॥

कथम्?॥

न ब्रूमः यत् षष्ठीनिर्दिष्टमज्ग्रहणं तत्पञ्चमीनिर्दिष्टं कर्तव्यम्-इति॥

किं तर्ह्यन्यत्कर्तव्यम्?॥

अन्यच्च न कर्तव्यम्। यदेवादः षष्ठीनिर्दिष्टमज्ग्रहणम्, तस्य दिक्शब्दैर्योगे पञ्चमी भवति- अजादेशः परनिमित्तकः पूर्वस्य विधिं प्रति स्थानिवद्भवति। कुतः पूर्वस्य?॥अच इति॥ तद्यथा- आदेशः प्रथमानिर्दिष्टः, तस्य दिवछब्दैर्योगे पञ्चमी भवति- अजादेशः परनिमित्तकः पूर्वस्य विधिं प्रति स्थानिबद्भवति। कुतः पूर्वस्य? आदेशादिति।

(भावाभावातिदेशसाधनम्)

(३९० आक्षेपवार्तिकम्॥३॥)

॥*॥ तत्रादेशलक्षणप्रतिषेधः॥*॥

(भाष्यम्)

तत्रादेशलक्षणं कार्यं प्राप्नोति, तस्य प्रतिषेधो वक्तव्यः। वाय्वोः। अध्वर्य्वोः। ''लोपो व्योर्वलि'' इतिलोपः प्राप्नोति॥

(३९१ समाधानवार्तिकम्॥४॥)

॥*॥ असिद्धवचनात्सिद्धम्॥*॥

(भाष्यम्)

अजादेशः परनिमित्तकः पूर्वस्य विधिं प्रत्यसिद्धो भवतीति वक्तव्यम्॥

(३९२ समाधानबाधकाक्षेपवार्तिकम्॥५॥)

॥*॥ असिद्धवचनात्सिद्धमिति चेदुत्सर्गलक्षणानामनुदेशः॥*॥

(भाष्यम्)

असिद्धवचनात्सिद्धमिति चेदुत्सर्गलक्षणानामनुदेशः कर्तव्यः। पट्व्या मृदव्येति॥

(समाधानसाधकभाष्यम्)

ननु चैतदप्यसिद्धवचनात्सिद्धम्॥

(समाधानबाधकाक्षेपवार्तिकम्)

॥*॥ असिद्धवचनात्सिद्धमिति चेन्नान्यस्यासिद्धवचनादन्यस्य भावः॥*॥

असिद्धवचनात्सिद्धमिति चेत्। तन्न॥

किं कारणम्?॥

नान्यस्यासिद्धवचनादन्यस्य भावः। न ह्यन्यस्यासिद्धत्वादन्यस्य प्रादुर्भावो भवति॥ तद्यथा-नहि देवदत्तस्य हन्तरि हते देवदत्तस्य प्रादुर्भावो भवति॥

(३९४ आक्षेपोपंसहारवार्तिकम्॥७॥)

॥*॥ तस्मात्स्थानिवद्वचनम् च॥*॥

(भाष्यम्)

तस्मात्स्थानिवद्भावो वक्तव्यः। असिद्धत्वं च। पट्व्या मृद्व्येत्यत्र स्थानिवद्भावो वाय्वोरवक्तव्यः। ध्वर्य्वोरित्यसिद्धत्वम्॥

(परिहारवार्तिकस्मारकभाष्यम्)

॥*॥ उक्तं वा॥*॥

किमुक्तम्?

स्थानिवद्वचनानर्थक्यं शास्त्राऽसिद्धत्वात् इति॥

(समाधानबाधकभाष्यम्)

विषम उपन्यासः। युक्तं तत्र यदेकादेशास्त्रं तुक्शास्त्रे असिद्धं स्यात्, अन्यदन्यस्मिन्। इह पुनरयुक्तम्। कथं हि तदेव नाम तस्मिन्नसिद्धं स्यात्?॥

(समाधानसाधकभाष्यम्)

तदेव चापि तस्मिन्नसिद्धं भवति॥ वक्ष्यति ह्याचार्यः*चिणो लुकि तग्रहणानर्थक्यं संघातस्याप्रत्ययत्वात्तलोपस्य चासिद्धत्वात्* इति। चिणो लुक् चिणो लुक्येवासिद्धो भवति॥

(३९५ समाधानश्लोकवार्तिकम्॥८॥)

॥*॥ काममतिदिश्यतां वा सच्चासच्चापि नेह भारोऽस्ति। कल्प्यो हि वाक्यशेषो वाक्यं वक्तर्यधीनं हि॥*॥

(भाष्यम्)

अथवा वतिनिर्देशोऽयम्। कामचारश्च वतिनिर्देशे वाक्यशेषं समर्थयितुम्। तद्यथा- 'उशीनरवन्मद्रेषु यवाः' सन्ति, न सन्तीति॥ 'मातृवदस्याः कलाः' सन्ति, न सन्तीति॥ एवमिहापि-स्थानिवद्भवति, स्थानिवन्न भवतीति वाक्यशेषं समर्थयिष्यामहे। इह तावत्पट्व्या मृद्व्येति यथा स्थानिनि यणादेशो भवति, एवमादेशेऽपि भवतीति। इहेदानीं वाय्वोरध्वर्य्वोरिति यथा स्थानिनि यलोपो न भवति, एवमादेशेऽपि न भवतीति॥

(पूर्वशब्दार्थनिर्णयाधिकरणम्)

(आक्षेपभाष्यम्)

किं पुनरनन्तरस्य विधिं प्रति स्थानिवद्भावः, आहोस्वित्पूर्वमात्रस्य?॥

(भाष्यम्)

कश्चात्र विशेषः?॥

(३९५ अनन्तरग्रहणदूषणवार्तिकम्॥९॥)

॥*॥ अनन्तरस्येति चेदेकाननुदात्तद्विगुस्वरगतिनिघातेषूपंख्यानम्॥*॥

(भाष्यम्)

अनन्तरस्येति चेदेकाननुदात्तद्विगुस्वरगतिनिघातेषूपसंख्यानं कर्तव्यम्॥

एकाननुदात्त-लुनीह्यत्र पुनीह्यत्र इति। ''अनुदात्तं पदमेकवर्जम्'' इत्येष स्वरो न प्राप्नोति॥

(उदाहरणभाष्यम्)

द्विगुस्वर-पञ्चारत्न्यः दशारत्न्यः। ''इगन्तकाल-'' इत्येष स्वरो न प्राप्नोति॥

(उदाहरणभाष्यम्)

गतिनिघात-यत्प्रलुनीह्यत्र। यत्प्रपुनीह्यत्र॥

''तिङि चोदात्तवति'' इत्येष स्वरो न प्राप्नोति॥

(द्वितीयपक्षाङ्गीकारभाष्यम्)

अस्तु तर्हि पूर्वमात्रस्य॥

(३९६ पूर्वमात्रग्रहणदूषणवार्तिकम्॥१०॥)

॥*॥ पूर्वमात्रस्येति चेदुपधाह्रस्वत्वम्॥*॥

(भाष्यम्)

पूर्वमात्रस्येति चेदुपधाह्रस्वत्वं वक्तव्यम्। वादितवन्तं प्रयोजितवान्-अवीवदद्वीणां परिवादकेन॥

किं पुनः कारणं न सिध्यति ?॥

योऽसौ णौ णिर्लुप्यते तस्य स्थानिवद्भावाद् ह्रस्वत्वं न प्राप्नोति॥

(३९७ दूषणान्तरवार्तिकम्॥११॥)

॥*॥ गुरुसंज्ञा च॥*॥

(भाष्यम्)

गुरुसंज्ञा च न सिद्धयति। श्लेष्मा३घ्न। पित्रा३घ्न। दा३ध्यश्च। मा३ध्वश्च। ''हलोऽन्तराः संयोगः'' इति संयोगसंज्ञा, ''संयोगे गुरु'' इति गुरुसंज्ञा, ''गुरोरनृतः'' इति प्लुतो न प्राप्नोति॥

(पूर्वमात्रवादिभाष्यम्)

ननु च यस्याप्यनन्तरस्य विधिं प्रति स्थानिवद्भावः, तस्याप्यनन्तरलक्षणो विधिः संयोगसंज्ञा विधेया॥

(३९८ समाधानवार्तिकम्॥१२॥)

॥*॥ न वा संयोगस्यापूर्वविधित्वात्॥*॥

(भाष्यम्)

न वा एष दोषः॥

किं कारणम्?।

संयोगस्यापूर्वविधित्वात्। न पूर्वविधिः संयोगः॥

किं तर्हि?॥

पूर्वपरविधिः संयोगः॥

(एकादेशे स्थानिवद्भावसाधनम्)

(३९९ आक्षेपवार्तिकप्रथमखण्डम्)

॥*॥एकादेशस्योपसंख्यानम्॥*॥

(भाष्यम्)

एकादेशस्योपसंख्यानं कर्तव्यम्। श्रायसौ, गौमतौ, चातुरौ, आनडुहौ, पादे, ऽदवाहे। एकादेशे कृते नुमामौ पद्भाव ऊडित्येते विधयः प्राप्नुवन्ति॥

(प्रत्याक्षेपभाष्यम्)

किं पुनः कारणं न सिध्यन्ति?॥

(प्रत्याक्षेपबाधकवार्तिकम्)

॥*॥ ऽभयनिमित्तत्वात्॥*॥

(भाष्यम्)

अजादेशः परनिमित्तक इत्युच्यते। ऽभयनिमित्तश्चायम्॥

(प्रत्याक्षेपबाधकवार्तिकतृतीयखण्डम्॥१३॥)

॥*॥ ऽभयादेशत्वाच्च॥*॥

(भाष्यम्)

अच आदेश इत्युच्यते। अचोश्चायमादेशः॥

(आक्षेपसाधकप्रथमहेतुनिरासभाष्यम्)

नैष दोषः॥ यत्तावदुच्यते-*ऽभयनिमित्तत्वाद्* इति॥ इह यस्य ग्रामे नगरे वा अनेकं कार्यं भवति, शक्नोत्यसौ ततोऽन्यतरतो व्यपदेष्टुम्। तद्यथा-'गुरुनिमित्तं वसामः' इति, 'अध्ययननिमित्तं वसामः' इति॥

(आक्षेपसाधकद्वितीयहेतुनिरासभाष्यम्)

यदप्युच्यते-*ऽभयादेशत्वाच्च*इति। इह यो द्वयोः षष्ठीनिर्दिष्टयोः प्रसङ्गे भवति, लभतेऽसावन्यतरतो व्यपदेशम्। तद्यथा-देवदत्तस्य पुत्रः, देवदत्तायाः पुत्र इति॥

(अथ हलच्समुदायादेशस्थानिवत्त्वाभावनिर्णयः)

(आक्षेपभाष्यम्)

अथ हलचोरादेशः स्थानिवद् भवति, ऽताहो न।

(भाष्यम्)

कश्चात्र विशेषः?॥

(४०० समुदायादेशस्थानिवत्त्वे दूषणवार्तिकम्॥१४॥)

॥*॥ हलचोरादेशः स्थानिवदिति चेद्विंशतेस्तिलोप एकादेशः॥*॥

(भाष्यम्)

हलचोरादेशः स्थानिवदिति चेद्विंशतेस्तिलोपे एकादेशो वक्तव्यः। विंशकम्। विंशं शतम्॥

(४०१ दूषणान्तरवार्तिकम् ॥१५॥)

॥*॥ स्थूलादीनां यणादिलोपेऽवादेशः॥*॥

(भाष्यम्)

स्थूलादीनां यणादिलोपे अवादेशो वक्तव्यः। स्थवीयान्, दवीयान्॥

(४०२ दूषणान्तरवार्तिकम्॥१३॥)

॥*॥ केकयमित्रय्वोरियादेश एत्वम्॥*॥

(भाष्यम्)

केकयमित्रय्वोरियादेशे एत्वं न सिध्यति। कैकेयः। मैत्रेयः। अचीत्येत्वं न सिध्यति॥

(४०३ दूषणान्तरवार्तिकम्॥१७॥)

॥*॥ उत्तरपदलोपे च॥*॥

(भाष्यम्)

उत्तरलोपे च दोषो भवति॥ दध्युपसिक्ताः सक्तवो दधिसक्तवः। अचीति यणादेशः प्राप्नोति।

(४०४ आक्षेपवार्तिकम्॥१८॥)

॥*॥ यङ्लोपे यणियङ्डुवङः॥*॥

(भाष्यम्)

यङ्लोपे यणियङ्डुवङो न सिध्यन्ति। चेच्यः, नेन्यः, चेक्षियः, चेक्रियः, लोलुवः, पोपुवः। अचीति, यणियङ्डुवङो न सिध्यन्ति॥

(पक्षान्तराश्रयणभाष्यम्)

अस्तु तर्हि न स्थानिवत्॥

(४०५ आक्षेपवार्तिकम्॥१९॥)

॥*॥ अस्थानिवत्त्वे यङ्लोपे गुणवृद्धिप्रतिषेधः॥*॥

(भाष्यम्)

अस्थानिवत्त्वे यङ्लोपे गुणवृद्ध्योः प्रतिषेधो वक्तव्यः। लोलुपः, पोपुवः सरीसृपः मरीमृज इति॥

(आक्षेपबाधकभाष्यम्)

नैष दोषः॥ ''न धातुलोप आर्धधातुके'' इति प्रतिषेधो भविष्यति॥

(अथ स्थान्याश्रयणानाश्रयाधिकरणम्)

(आक्षेपभाष्यम्)

किं पुनराश्रीयमाणायां प्रकृतौ स्थानिवद्भवति, आहोस्विदविशेषेण?।

(भाष्यम्)

कश्चात्र विशेषः?॥

(४०६ द्वितीयपक्षे दूषणवार्तिकम्॥२०॥)

॥*॥ अविशेषेण स्थानिवदिति चेल्लोपयणादेशे गुरुविधिः॥*॥

(भाष्यम्)

अविशेषेण स्थानिवदिति चेल्लोपयणादेशयोर्गुरुविधिर्न सिध्यति। श्लेष्मा३घ्न। पित्ता३ध्न। दा३ध्यध्न। मा३ध्वश्च। 'हलोऽनन्तराः संयोगः' इति संयोगसंज्ञा, ''संयोगे गुरु'' इति गुरुसंज्ञा 'गुरोः' इति प्लुतो न प्राप्नोति॥

(४०७ दूषणान्तरवार्तिकम्॥२१॥)

॥*॥ द्विर्वचनादयश्च प्रतिषेधे॥*॥

(भाष्यम्)

द्विर्वचनादयश्च प्रतिषेधे वक्तव्याः। 'द्विर्वचनवरेयलोप' इति॥

(४०८ दूषणान्तरवार्तिकम्॥२२॥)

॥*॥ क्सलोपे लुग्वचनम्॥*॥

(भाष्यम्)

क्सलोपे लुग्वक्तव्यः। अदुग्ध, अदुग्धाः। 'लुग्वा दुहदिहलिहगुहामात्मनेपदे दन्त्ये' इति॥

(४०९ दूषणान्तरवार्तिकम् ॥२३॥)

॥*॥ हन्तेर्घत्वम्॥*॥

हन्तेर्घत्वं वक्तव्यम्। घ्नन्ति घ्नन्तु अघ्नन्॥

(प्रथमपक्षाश्रयणभाष्यम्)

अस्तु तर्ह्याश्रीयमाणायां प्रकृताविति॥

(५१० प्रथमपक्षे दूषणवार्तिकम्॥२४॥)

॥*॥ ग्रहणेषु स्थानिवदिति चेज्जगध्यादिष्वादेशप्रतिषेधः॥*॥

ग्रहणेषु स्थानिवदिति चेज्जगध्यादिषु आदेशस्य प्रतिषेधो वक्तव्यः॥ निराद्य, समाद्य। 'अदो जग्धिर्ल्यप् ति किति' इति अदो जग्धिभावः प्राप्नोति॥

(४११ दूषणान्तरवार्तिकभाष्यम्)

॥*॥ यणादेशे युलोपेत्वानुनासिकात्वप्रतिषेधः॥*॥

(भाष्यम्)

यणादेशे युलोपेत्वानुनासिकात्वानां प्रतिषेधो वक्तव्यः॥

यलोपो-वाय्वोः। अध्वर्य्वोः। 'लोपो व्योर्वलि' इति यलोपः प्राप्नोति॥

ऽलोप-अकुर्वि आशाम्-अकुर्य्याशाम्। 'नित्यं करोतेः' 'ये च' इत्युकारलोपः प्राप्नोति॥

ईत्व-अलुनि आशाम्-अलुन्याशाम्। 'ई हल्यघोः' इतीत्वं प्राप्नोति॥

अनुनासिकात्व। अजज्ञि आशाम्-अजज्ञ्याशाम्। ''ये विभाषा' इत्यनुनासिकात्वं प्राप्नोति॥

(४१२ आक्षेपवार्तिकम्॥ २३॥)

॥*॥ रायात्वप्रतिषेधश्च॥*॥

(भाष्यम्)

रायात्वस्य च प्रतिषेधो वक्तव्यः। रायि आशाम्-राय्याशाम्। 'रायो हलि' इत्यात्वं प्राप्नोति॥

(४१३ आक्षेपवार्तिकम्॥२७॥)

॥*॥ दीर्घे यलोपप्रतिषेधः॥*॥

(भाष्यम्)

दीर्घे यलोपस्य प्रतिषेधो वक्तव्यः। सौर्ये नाम हिमवतः शृङ्गे, तद्वान् सौर्यी हिमवानिति। सौ इन्नाश्रये दीर्घेत्वे कृते ईति यलोपः प्राप्नोति॥

(४१४ आक्षेपवार्तिकम्॥२८॥)

॥*॥ अतो दीर्घे यलोपवचनम्॥*॥

(भाष्यम्)

अतो दीर्घे कृते यलोपो वक्तव्यः। गार्गाभ्यां, वात्साभ्याम्। दीर्घे कृते 'आपत्यस्य च तद्धितेऽनाति' इति प्रतिषेधः प्राप्नोति॥

(आक्षेपबाधकभाष्यम्)

नैष दोषः। आश्रीयते तत्र प्रकृतिस्तद्वित इति॥

(सर्वाक्षेपपरिहारभाष्यम्)

सर्वेषामेष परिहारः। उक्तं विधिग्रहणस्य प्रयोजनम्-विधिमात्रे स्थानिवद्यथा स्यादनाश्रीयमाणायाम् प्रकृताविति॥

(द्वितीयपक्षाभ्युपगमभाष्यम्)

अथवा पुनरस्त्वविशेषेण स्थानिवदिति॥

(आक्षेपस्मारणभाष्यम्)

ननु चोक्तम् * अविशेषेण स्थानिवदिति चेल्लोपयणादेशे गुरुविधिर्द्विर्वचनादयश्च क्सलोपे प्रतिषेधे लुग्वचनम्* हन्तेर्घत्वम्* इति॥

(आक्षेपनिराकरणभाष्यम्)

नैष दोषः। यत्तावदुच्यते* अविशेषेण स्थानिवदिति चेल्लोपयणादेशे गुरुविधिः*इति। उक्तमेतत्* न वा संयोगस्यापूर्वविधित्वात्* इति॥

यदप्युच्यते* द्विर्वचनादयश्च प्रतिषेधे वक्तव्याः इति उच्यन्ते न्यास एव॥

क्सलोपे लुग्वचनम् इति। क्रियते न्यास एव॥

हन्तेर्घत्वम् इति*। सप्तमे परिहारं वक्ष्यति॥ अचः परस्मिन्पूर्वविधौ॥५७॥

(५२ स्थानिवद्भावनिषेधसूत्रम्॥१।१।८ आ. ३॥)

न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु॥१।१।५८॥

(अथ पदान्तपदार्थनिरूपणाधिकरणम्)

(आक्षेपभाष्यम्)

पदान्तविधिं प्रति न स्थानिवदित्युच्यते। तत्र वेतस्वानिति रुः प्राप्नोति॥

(समाधानभाष्यम्)

नैष दोषः। भसंज्ञाऽत्र बाधिका भविष्यति- ''तसौ मत्वर्थे'' इति॥

(पूर्वपक्ष्याक्षेपसाधकभाष्यम्)

अकारान्तमेतद्भसंज्ञां प्रति। पदसंज्ञां प्रति सकारान्तम्॥

(सिद्धान्त्येकदेशिसमाधानभाष्यम्)

ननु चैवं विज्ञायते-यः संप्रति पदान्त इति॥

(पूर्वपक्ष्याक्षेपसाधकभाष्यम्)

कर्मसाधनस्य विधिशब्दस्योपादाने एतदेवं स्यात्॥

(सिद्धान्तेकदेशिभाष्यम्)

अयं च विधिशब्दोऽस्त्येव कर्मसाधनः-विधीयते विधिरिति॥

(पूर्वपक्ष्याक्षेपसाधकभाष्यम्)

अस्ति च भावसाधनः-विधानं विधिरिति। तत्र भावसाधनस्य विधिशब्दस्योपादाने एष दोषो भवति॥ इह च- ब्रह्मबन्ध्वा, ब्रह्मबन्ध्वै। धकारस्य जश्त्वं प्राप्नोति॥

(सिद्धान्त्येकदेशिप्रश्नभाष्यम्)

अस्ति पुनः किंचिद्भावसाधनस्य विधिशब्दस्योपादाने सतीष्टं संगृहीतम्, आहोस्विद्दोषान्तमेवेति॥?॥

(पूर्वपक्षिप्रतिवाक्यभाष्यम्)

अस्तीत्याह॥ इह कानि सन्ति, यानि सन्ति॥ कौ स्तः, यौ स्त इति॥ योऽसौ पदान्तो यकारो वकारो वा श्रूयेत, स न श्रूयते॥

षडिकश्चाऽपि सिद्धो भवति॥

(सिद्धान्त्येकदेशिन आक्षेपभाष्यम्)

वाचिकस्तु न सिध्यति॥

(तटस्थभाष्यम्)

अस्तु तर्हि कर्मसाधनः॥

(सिद्धान्त्येकदेशिभाष्यम्)

यदि कर्मसाधनः, षडिको न सिध्यति॥

(तटस्थभाष्यम्)

अस्तु तर्हि भावसाधनः॥

(सिद्धान्त्येकदेशिभाष्यम्)

वाचिको न सिध्यति॥

(तटस्थभाष्यम्)

वाचिकषडिकौ न संवदेते॥

(सिद्धान्तिभाष्यम्)

कर्तव्योऽत्र यत्नः॥

(आक्षेपभाष्यम्)

कथं ब्रह्मबन्ध्वा-ब्रह्मबन्ध्वै?॥

(समाधानभाष्यम्)

उभयत आश्रयणे नान्तादिवदिति॥

(आक्षेपभाष्यम्)

कथं वेतस्वान्॥

(समाधानभाष्यम्)

नैवं विज्ञायते- पदस्यान्तः पदान्तः, पदान्तस्य विधिः पदान्तविधिः, पदान्तविधिं प्रतीति॥

कथं तर्हि?॥

पदे अन्तः पदान्तः, पदान्तस्य विधिः पदान्तविधिः पदान्तविधिं प्रतीति॥

(समाधानान्तरभाष्यम्)

अथवा- यथैवान्यान्यपि पदकार्याण्युपप्लवन्ते- रुत्वं जश्त्वं च। एवमिदमपि पदकार्यमुपप्लोष्यते॥

किम्?॥

भसंज्ञा नाम॥

(वरे यलोपपदार्थनिरूपणाधिकरणम्)

(आक्षेपभाष्यम्)

परे यलोपविधिं प्रति न स्थानिवद्भवतीत्युच्यते। तत्र ते' अप्सु यायावरः प्रवपेत पिण्डान्' अवर्णालोपपविधिं प्रति स्थानिवत्स्यात्॥

(समाधानभाष्यम्)

नैष दोषः। नैवं विज्ञायते- वरे यलोपविधिं प्रति न स्थानिवदिति॥

कथं तर्हि?॥

वरे अयलोपविधिं प्रतीति॥

किमिदमयलोपविधिं प्रतीति?॥

अवर्णलोपविधिं प्रति, यलोपविधिं च प्रतीति॥

(समाधानान्तरभाष्यम्)

अथवा योगविभागः करिष्यते- 'वरे लुसं न स्थानिवत्'। ततो 'यलोपविधिं प्रति न स्थानिवद्' इति।

(आक्षेपभाष्यम्)

यलोपे किमुदाहरणम्?॥

(समाधानभाष्यम्)

कण्डूयतेरप्रत्ययः –कण्डूरिति॥

(समाधानबाधकभाष्यम्)

नैतदस्ति। क्वौ लुसं न स्थानिवत्॥

(समाधानान्तरभाष्यम्)

प्रयोजनम्- सौरी बलाका॥

(बाधकभाष्यम्)

नैतदस्ति। उपधात्वविधिं प्रति न स्थानिवत्॥

(समाधानान्तरभाष्यम्)

इदं तर्हि प्रयोजनम्- आदित्यः॥

(बाधकभाष्यम्)

नैतदस्ति। पूर्वत्रासिद्धे न स्थानिवत्॥

(प्रयोजनभाष्यम्)

इदं तर्हि- कण्डूतिः, वल्गूतिः।

(बाधकभाष्यम्)

नैतदस्ति प्रयोजनम्। कण्डूया, वल्गूया इति भवितव्यम्॥

(समाधानान्तरभाष्यम्)

इदं तर्हि- कण्डूयतेः क्तिच्। ब्राह्मणकण्डूतिः, क्षत्रियकण्डूतिः॥

(४१५ नियमाक्षेपवार्तिकम्॥१॥)

॥प्रतिषेधे स्वरदीर्घयलोपेषु लोपाजादेशो न स्थानिवत्॥

(आक्षेपभाष्यम्)

॥*॥ प्रतिषेधे स्वरदीर्घयलोपविधिषु लोपाजादेशो न स्थानिवद्भवतीति वक्तव्यम्॥

(स्वरोदाहरणोपपादनभाष्यम्)

स्वर-आकर्षिकः। जिहीर्षकः॥ यो ह्यन्य आदेशः स्थानिवदेवासौ भवति- पञ्चारत्न्यो दशारत्न्यः॥ स्वर॥

(दीर्घोदाहरणोपपादनभाष्यम्)

दीर्घ-प्रतिदीत्राप्रतिदीत्रे। यो ह्यन्य आदेशः, स्थानिवदेवासौ भवति-किर्योः। गिर्योः। दीर्घ॥

(यलोपोदाहरणोपपादनभाष्यम्)

यलोप-ब्राह्मणकण्डूतिः, क्षत्रियकण्डूतिः॥ यो ह्यन्य आदेशः, स्थानिवदेवासौ भवति वाय्वोरध्वर्य्वोरिति॥ यलोप॥

(आक्षेपभाष्यम्)

तत्तर्हि वक्तव्यम्॥

(समाधानभाष्यम्)

न वक्तव्यम्। इह हि लोपोऽपि प्रकृतः, आदेशोऽपि। विधिग्रहणमपि प्रकृतमनुवर्तते, दीर्घादयोऽपि प्रतिनिर्दिश्यन्ते। केवलं तत्राभिसम्बन्धमात्रं कर्तव्यम्-स्वरदीर्घयलोपविधिषु लोपाजादेशो न स्थानिवदिति॥

(आक्षेपभाष्यम्)

आनुपूर्व्येण सन्निविष्टानां यथेष्टं संबन्धः शक्यते कर्तुम्। न चैतान्यानुपूर्व्येण सन्निविष्टानि॥

(समाधानभाष्यम्)

अनानुपूर्व्येणापि सन्निविष्टानां यथेष्टमभिसंबन्धो भवति॥ तद्यथा-अनड्वाहमुदहारि या त्वं हरसि शिरसा कुम्भं, भगिनि साचीनमभिधावन्तमद्राक्षीरिति। तस्य यथेष्टमभिसंबन्धो भवति-ऽदहारि भगिनि या त्वं कुम्भं हरसि शिरसा अनड्वाहं साचीनमभिधावन्तमद्राक्षीरिति॥

(४१६ न्यूनताक्षेपवार्तिकम्॥२॥)

॥*॥ क्विलुगुपधात्वचङ्परनिर्ह्रासकुत्वेषूपसंख्यानम्॥*॥

क्विलुगुपधात्वचड्परनिर्ह्रासकुत्वेषूपसंख्यानं कर्तव्यम्॥

(क्विग्रहणोदाहरणप्रकरणम्)

(आक्षेपभाष्यम्)

क्वौ किमुदाहरणम्?।

(समाधानभाष्यम्)

कण्डूयतेरप्रत्ययः-कण्डूरिति॥

(समाधानबाधकभाष्यम्)

नैतदस्ति। यलोपविधिं प्रति न स्थानिवत्॥

(समाधानान्तरभाष्यम्)

इदं तर्हि-पिपठिषतेरप्रत्ययः। पिपठीः॥

(बाधकभाष्यम्)

नैतदस्ति। दीर्घविधिं प्रति न स्थानिवत्॥

(समाधानान्तरभाष्यम्)

इदं तर्हि-लावयतेर्लौः। पावयतेः पौः॥

(बाधकभाष्यम्)

नैतदस्ति। अकृत्वा वृद्ध्यावादेशौ णिलोपः। प्रत्ययलक्षणेन वृद्धिर्भविष्यति॥

(समाधानान्तरभाष्यम्)

इदं तर्हि-लवमाचष्टे लवयति। लवयतेरप्रत्यये लौः पौः। स्थानिवद्भावात् णेरुठ् न प्राप्नोति॥ क्वौ लुसं न स्थानिवदिति भवति॥

(समाधानबाधकभाष्यम्)

एवमपि न सिध्यति।

कथम्?॥

क्वौ णिलोपः णावकारलोपः. तस्य स्थानिवद्भावादूठ् न प्राप्नोति॥

(समाधानबाधकभाष्यम्)

नैष दोषः। नैवं विज्ञायते- क्वौ लुसं न स्थानिवदिति॥

कथं तर्हि क्वौ विधिं प्रति न स्थानिवदिति॥

(इति क्विग्रहणोदाहरणनिरूपणम्)

(अथ लुग्ग्रहणोदाहरणाधिकरणम्)

(आक्षेपभाष्यम्)

लुकि किमुदाहरणम्?॥

(समाधानभाष्यम्)

बिम्बं, बदरम्॥

(समाधानबाधकभाष्यम्)

नैतदस्ति। पुंवद्भावेनाप्येतत्सिद्धम्॥

(समाधानान्तरभाष्यम्)

इदं तर्हि-आमलकम्॥

(समाधानबाधकभाष्यम्)

नैतदस्ति। वक्ष्यत्येतत्-*फले लुग्वचनानर्थक्यं प्रकृत्यन्तरत्वाद्* इति।

(समाधानान्तरभाष्यम्)

इदं तर्हि- पञ्चभिः पट्वीभि क्रीतः पञ्चपटुः, दशपटुरिति॥

(समाधानबाधकभाष्यम्)

ननु चैतदपि पुवंद्भावेनैव सिद्धम्॥

कथं पुंवद्भावः॥

भस्याढे तद्धिते पुंवद्भवतीति॥

(समाधानसाधकभाष्यम्)

भस्येत्युच्यते। यजादौ च भसंज्ञा भवति॥

न चात्र यजादिं पश्यामः॥

(समाधानबाधकभाष्यम्)

प्रत्ययलक्षणेन यजादिः॥

(समाधानसाधकभाष्यम्)

वर्णाश्रये नास्ति प्रत्ययलक्षणम्॥

(समाधानबाधकभाष्यम्)

एवं तर्हि-'ठक्छसोश्च' इत्येवं भविष्यति॥

(समाधानसाधकभाष्यम्)

ठक्छसोश्चेत्युच्यते। न चात्र ठक्छसौ पश्यामः॥

(बाधकभाष्यम्)

प्रत्ययलक्षणेन॥

(समाधानसाधकभाष्यम्)

'न लुमता तस्मिन्' इति प्रत्ययलक्षणस्य प्रतिषेधः॥

न खल्वप्यवश्यं ठगेव क्रीतप्रत्ययः, क्रीताद्यर्था एव वा तद्धिताः॥

किं तर्हि?॥

अन्येऽपि तद्धिता ये लुकं प्रयोजयन्ति। पञ्चेन्द्राण्यो देवता अस्येति पञ्चेन्द्रः, दशेन्द्रः पञ्चाग्निः, दशाग्निः॥

(इति लुग्ग्रहणोदाहरणनिरूपणम्)

(अथोपधात्वोदाहरणनिरूपणम्)

(आक्षेपभाष्यम्)

उपधात्वे किमुदाहरणम्?।

(समाधानभाष्यम्)

पिपठिषतेरप्रत्ययः-पिपठीरिति॥

(समाधानबाधकभाष्यम्)

नैतदस्ति दीर्घविधिं प्रति न स्थानिवत्॥

(समाधानान्तरभाष्यम्)

इदं तर्हि-सौरी बलाका॥

(समाधानबाधकभाष्यम्)

नैतदस्ति। यलोपविधिं प्रति न स्थानिवत्॥

(समाधानान्तरभाष्यम्)

इदं तर्हि-पारिखीयः॥

(इत्युपधात्वोदाहरणनिरूपणम्)

(अथ चङ्परनिर्ह्रासोदाहरणनिरूपणम्)

॥चङ्परिनिर्ह्रासे चोपसंख्यानं कर्तव्यम्॥ वादितवन्तं प्रयोजितवान् अवीवदद्वीणां परिवादकेन॥

किं पुनः कारणं न सिध्यति?॥

योऽसौ णौ णिर्लुप्यते तस्य स्थानिवद्भावाद्ध्रस्वत्वं न प्राप्नोति॥

(बाधकभाष्यम्)

ननु चैतदप्युपधात्वविधिं प्रति न स्थानिवदित्येव सिद्धम्॥

(साधकभाष्यम्)

विशेषत एतद्वक्तव्यम्॥

क्व?।

प्रत्ययविधाविति। इह मा भूत्-पटयति लघयतीति॥

(इति चङ्परनिर्ह्रासोदाहरणनिरूपणम्)

(अथ कुत्वोदाहरणनिरूपणम्)

कुत्वे चोपसंख्यानं कर्तव्यम्। अर्चयतेरर्कः, मर्चयतेर्मर्कः॥

(उपसंख्यानबाधकभाष्यम्)

नैतद् घञन्तम्। औणादिक एष कशब्दस्तस्मिन्नाष्टमिकं कुत्वम्॥

(उपसंख्यानसाधकभाष्यम्)

एतदपि णिचा व्यवहितत्वान्न प्राप्नोति॥

(४१७ आक्षेपवार्तिकम्॥३॥)

॥*॥ पूर्वत्रासिद्धे च॥*॥

(भाष्यम्)

पूर्वत्रासिद्धे च न स्थानिवदिति वक्तव्यम् ॥

(भाष्यम्)

किं प्रयोजनम्?।

(४१८ प्रयोजनवार्तिकम्॥४॥)

॥*॥ प्रयोजनं क्सलोपः सलोपे॥*॥

(भाष्यम्)

क्सलोप सलोपे प्रयोजनम्। अदुग्ध, अगुग्धाः। 'लुग्वा दुहदिहलिहगुहामात्मनेपदे दन्त्ये' इति लुग्ग्रहणं न कर्तव्यं भवति॥

(४१९ प्रयोजनवार्तिकम्॥)

॥*॥ दध आकारलोप आदिचतुर्थत्वे प्रयोजनम्॥*॥

(भाष्यम्)

॥*॥दध आकारलोपे आदिचतुर्थत्वे प्रयोजनम्॥*॥

धत्से धद्ध्वे धद्ध्वमिति। 'दधस्तथोश्च' इति चकारो न कर्तव्यो भवति॥

(४२० प्रयोजनवार्तिकम्॥६॥)

॥*॥ हलो यमां यमि लोपे प्रयोजनम्॥*॥

(भाष्यम्)

हलो यमां यमि लोपे प्रयोजनम्। आदित्यः। 'हलो यमां यमि लोपः' सिद्धो भवति॥

(४२१ प्रयोजनवार्तिकम्॥७॥)

॥*॥ अल्लोपणिलोपौ संयोगान्तलोपप्रभृतिषु॥*॥

(भाष्यम्)

अल्लोपणिलोपौ संयोगान्तलोपप्रभृतिषु प्रयोजनम्॥ पापच्यतेः पापक्तिः । यायज्यतेर्यायष्टिः। पाचयतेः पाक्तिः। याजयतेर्याष्टिः॥

(४२२ प्रयोजनवार्तिकम्॥८॥)

॥*॥ द्विर्वचनादीनि च॥*॥

द्विर्वचनादीनि च न पठितव्यानि भवन्ति। पूर्वत्रासिद्धेनैव सिद्धानि भवन्ति॥

किमविशेषेण?॥

नेत्याह?॥

(शेषवार्तिकखण्डम्॥८॥)

॥*॥ वरेयलोपस्वरवर्जम्॥*॥

(भाष्यम्)

वरेयलोपं स्वरं च वर्जयित्वा॥

(४२३ प्रतिप्रसववार्तिकम्॥९॥)

॥*॥ तस्य दोषः संयोगादिलोपलत्वणत्वेषु॥*॥

(भाष्यम्)

तस्यैतस्य लक्षणस्य दोषः संयोगादिलोपलत्वणत्वेषु॥

(उदाहरणभाष्यम्)

संयोगादिलोपे-काक्यर्थम् वास्यर्थम्। 'स्कोः संयोगाद्योरन्ते च' इति लोपः प्राप्नोति॥

(उदारहणभाष्यम्)

लत्वम्-निगार्यते निगाल्यते। 'अचि विभाषा' इति लत्वं न प्राप्नोति॥

(उदाहरणभाष्यम्)

णत्व- माषवपनी व्रीहिवपनी। 'प्रातिपदिकान्तस्य' इति णत्वं प्राप्नोति। न पदान्तद्विर्वचन०॥

(५३ अतिदेशसूत्रम्॥१।१।१।८ आ.४॥)

द्विर्वचनेऽचि॥१।१।५१॥

(इष्टानुपपत्तिपरिहाराधिकरणम्)

(४२४ (१) आक्षेपसाधकवार्तिकप्रथमखण्डम्॥)

॥*॥ आदेशे स्थानिवदनुदेशात्तद्वतो द्विर्वचनम्॥*॥

(भाष्यम्)

आदेशे स्थानिवदनुदेशात्। तद्वतः।

किंवतः?॥

आदेशवतः। द्विर्वचनं प्राप्नोति॥

(प्रत्याक्षेपभाष्यम्)

तत्र को दोषः?॥

(४२४ (२) आक्षेपवार्तिकद्वितीयखण्डम्॥१॥)

॥*॥ तत्राभ्यासरूपम्॥*॥

(भाष्यम्)

तत्राभ्यासरूपं न सिद्ध्यति। चक्रतुश्चक्रुरिति॥

(४२५ समाधानवार्तिकम्॥२॥)

॥*॥ अज्ग्रहणं तु ज्ञापकं रूपस्थानिवद्भावस्य॥*॥

(भाष्यम्)

यदयमज्ग्रहणं करोति तज् ज्ञापयत्याचार्यः-रूपं स्थानिवद्भवतीति॥

कथं कृत्वा ज्ञापकम्?॥

अज्ग्रहणस्यैतत्प्रयोजनम्-इह मा भूत्-जेघ्रीयते, देध्मीयते। यदि च रूपं स्थानिवद्भवति, ततोऽज्ग्रहणमर्थद्भवति। अथ हि कार्यम्, नाऽर्थोज्ग्रहणेन। भवत्येवाऽत्र द्विर्वचनम्॥

(४२६ समाधानबाधकाक्षेपवार्तिकम्॥३॥)

॥*॥ तत्र गाङप्रतिषेधः॥*॥

(भाष्यम्)

तत्र गाङः प्रतिषेधो वक्तव्यः। अधिजगे। इवर्णाभ्यासता प्राप्नोति॥

(समाधानसाधकभाष्यम्)

न वक्तव्यः। 'गाङ्ङिल्लटि' इति द्विलकारको निर्देशः। लिटि लकारदाविति॥

(४२७ आक्षेपान्तरवार्तिकम्॥४॥)

(भाष्यम्)

॥*॥ कृत्येजन्तदिवादिनामधातुष्वभ्यासरूपम्॥*॥

कृत्येजन्तदिवादिनामधातुष्वभ्यासरूपं न सिद्ध्यति॥

कृति-अचिकीर्तत्- कृति॥

एजन्त-जग्ले, मम्ले-एजन्त॥

दिवादि-दुद्यूषति, सुस्यूषति-दिवादि॥

नामधातु-भवनमिच्छति भवनीयति, भवनीयतेः सन् बिभवनीयिषति॥

(पक्षान्तरेण समाधानभाष्यम्)

एवं तर्हि प्रत्यय इति वक्ष्यामि॥

४२८ द्वितीयपक्षदूषणवार्तिकम्

॥*॥ प्रत्यय इति चेत् कृत्येजन्तनामधातुष्वभ्यासरूपम्॥*॥

(भाष्यम्)

प्रत्यय इति चेत् कृत्येजन्तनामधातुष्वभ्यासरूपं न सिद्ध्यति। दिवादय एके परिह्रताः॥

(तृतीयपक्षाङ्गीकारे समाधानभाष्यम्)

एवं तर्हि- द्विर्वचननिमित्ते अच्यजादेशः स्थानिवद्-इति वक्ष्यामि॥

(तृतीयपक्षे दूषणभाष्यम्)

स तर्हि निमित्तशब्द उपादेयः। न ह्यन्तरेण निमित्तशब्दं निमित्तार्थो गम्यते॥

(समाधानभाष्यम्)

अन्तरेणापि निमित्तशब्दं निमित्तार्थो गम्यते। तद्यथा-'दधित्रपुसं प्रत्यक्षो ज्वरः' ज्वरनिमित्तमिति गम्यते॥ 'नड्वलोदकं पादरोगः' पादरोगनिमित्तमिति गम्यते। ''आयुर्घृतम्' आयुषो निमित्तमिति गम्यते॥

(समाधानान्तरभाष्यम्)

अथवा अकारो मत्वर्थीयः। द्विर्वचनमस्मिन्नस्ति सोऽयं द्विर्वचनः, द्विर्वचने इति॥

(आक्षेपभाष्यम्)

एवमपि न ज्ञायते-कियन्तमसौ कालं स्थानिवद्भवतीति॥

(समाधानभाष्यम्)

यः पुनराह 'द्विर्वचने कर्तव्ये' इति, कृते तस्य द्विर्वचने स्थानिवन्न भविष्यति॥

(आदेशपनिषेधरूपचतुर्थपक्षाभ्युपगमभाष्यम्)

एवं तर्हि- प्रतिषेधः प्रकृतः सोऽनुवर्तिष्यते॥

क्व प्रकृतः?॥

'न पदान्तद्विर्वचन-' इति॥ द्विर्वचननिमित्ते अचि आदेशो न भवतीति॥

(आक्षेपभाष्यम्)

एवमपि न ज्ञायते-कियन्तमसौ कालमादेशो न भवतीति॥

(समाधानभाष्यम्)

यः पुनराह-द्विर्वचने कर्तव्य इति, कृते तस्य द्विर्वचने अजादेशो भविष्यति॥

(पञ्चमपक्षाभ्युपगमभाष्यम्)

एवं तर्हि-उभयमनेन क्रियते- प्रत्ययश्च विशेष्यते, द्विर्वचनं च॥

(आक्षेपभाष्यम्)

कथं पुनरेकेन यत्नेनोभयं लभ्यम्?॥

(समाधानभाष्यम्)

लभ्यमित्याह॥

कथम्?॥

एकशेषनिर्देशात्॥ एकशेषनिर्देशोऽयम्-द्विर्वचनं च द्विर्वचनश्च द्विर्वचनम्। द्विर्वचने कर्तव्ये, द्विर्वचनेऽचि प्रत्यय इति॥

(४२९ पञ्चमपक्षे दूषणवार्तिकम्॥६॥)

॥*॥ द्विर्वचननिमित्तेऽचि स्थानिवदिति चेण्णौ स्थानिवद्वचनम्॥*॥

(भाष्यम्)

द्विर्वचननिमित्तेऽचि स्थानिवदिति चेण्णौ स्थानिवद्भावो वक्तव्यः॥ अवनुनावयिषति, अवचुक्षावयिषति॥

(समाधानभाष्यम्)

न वक्तव्यः॥

(समासाधकवार्तिकम्)

॥*॥ओः पुयण्ज्यपरे वचनं ज्ञापकं णौ स्थानिवद्भावस्य॥*॥

(भाष्यम्)

यदयम्-''ओः पुयण्ज्यपरे'' इत्याह, तज् ज्ञापयत्याचार्यो-भवति णौ स्थानिवद्भाव इति॥

(आक्षेपभाष्यम्)

यद्येतज् ज्ञाप्यते-अचिकीर्तत् अत्रापि प्राप्नोति॥

(समाधानभाष्यम्)

तुल्यजातीयस्य ज्ञापकम्॥

(आक्षेपभाष्यम्)

कश्च तुल्यजातीयः?।

(समाधानभाष्यम्)

यथाजातीयकाः पुयण्जयः॥

(आक्षेपभाष्यम्)

कथं जातीयकाश्चैते?

(समाधानभाष्यम्)

अवर्णपराः॥

(आक्षेपभाष्यम्)

कथं जग्ले मम्ले?॥

(समाधानभाष्यम्)

अनैमित्तिकमात्त्वम्, शिति तु प्रतिषेधः॥

(सूत्रप्रयोजननिरूपणाधिकरणम्)

(आक्षेपभाष्यम्)

कानि पुनरस्य योगस्य प्रयोजनानि?॥

(समाधानभाष्यम्)

पपतुः, पपुः। तस्थतुस्तस्थुः॥ जग्मतुर्जग्मुः॥ आटिटत् आशिशत्। चक्रतुश्चक्रुरिति। आल्लोपोपधालोपणिलोपयणादेशेषु कृतेष्वनच्कत्वाद् द्विर्वचनं न प्राप्नोति॥ स्थानिवद्भावाद्भवति॥

(समाधानबाधकभाष्यम्)

नैतानि सन्ति प्रयोजनानि। पूर्वविप्रतिषेधेनाप्येतानि सिद्धानि॥

कथम्?।

वक्ष्यति ह्याचार्यः-*द्विर्वचनं यणयवायावादेशाल्लोपोपधालोपणिलोपकिकिनोरुत्वेभ्यः*इति॥

(समाधानसाधकभाष्यम्)

स पूर्वप्रतिषेधो न पठितव्यो भवति॥

(आक्षेपभाष्यम्)

किं पुनरत्र ज्यायः?॥

(समाधानभाष्यम्)

स्थानिवद्भाव एव ज्यायान्। पूर्वप्रतिषेधे हि सतीदं वक्तव्यं स्यात्-*ओदौदादेशस्य उद्भवति चुटुतुशरादेरभ्यासस्य* इति॥

(उत्त्ववादिन आक्षेपभाष्यम्)

ननु च त्वयापीत्त्वं वक्तव्यम्॥

(इत्त्ववादिनो लाघवभाष्यम्)

परार्थं मम भविष्यति-'सन्यतः' इद्भवतीति॥

(उत्त्ववादिनो गौरवपरिहारभाष्यम्)

ममापि तर्ह्युत्त्वं परार्थं भविष्यति-'उत्परस्यातः, ति च' इति।

(इत्त्ववादिभाष्यम्)

इत्त्वमपि त्वया वक्तव्यम्। यत्समानाश्रयं तदर्थम्-उत्पिपविषते संयियविषतीत्येवमर्थम्। तस्मात्स्थानिवदित्येष एव पक्षो ज्यायान्। द्विर्ववचनेऽचि॥

इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये प्रथमस्याध्यायस्य प्रथमे पादेऽष्टममाह्निकम्॥

प्रथमाध्यायस्य प्रथमपादे नवममाह्निकम्॥

(५४ लोपसंज्ञासूत्रम्॥१।१।९॥ आ. १ मं सू.॥)

अदर्शनं लोपः॥१।१।६०॥

(अनिष्टापत्तिनिराकरणाधिकरणम्)

(४३१ आक्षेपवार्तिकम्॥१॥)

[॥*॥ लोपसंज्ञायामर्थसंज्ञाकरणम्॥*॥]

(भाष्यम्)

[*लोपसंज्ञायाम्*] अर्थस्य संज्ञा कर्तव्या। शब्दस्य माभूदिति॥

(४३२ आक्षेपवार्तिकम्॥२॥)

[॥*॥ इतरेतराश्रयं च॥*॥]

(भाष्यम्)

इतरेतराश्रयं च भवति॥

का इतरेतराश्रयता?॥

सतोऽदर्शनस्य संज्ञया भवितव्यम्, संज्ञया चादर्शनं भाव्यते, तदेतदितरेतराश्रयं भवति। इतरेतराश्रयाणि च कार्याणि न प्रकल्पन्ते॥

(समाधानभाष्यम्)

॥*॥ लोपसंज्ञायामर्थसतोरुक्तम्॥*॥

किमुक्तम्?॥

अर्थस्य तावदुक्तम्* इतिकरणोऽर्थनिर्देशार्थः* इति॥

सतोऽप्युक्तम्-*सिद्धं तु नित्यशब्दत्वाद्* इति। नित्याः शब्दाः। नित्येषु शब्देषु सतोऽदर्शनस्य संज्ञा क्रियते, न संज्ञयाऽदर्शनं भाव्यते॥

॥*॥४३३(१) सर्व प्रसङ्गस्तु सर्वस्यान्यत्रादृष्टत्वात्॥*॥

(भाष्यम्)

सर्वप्रसङ्गस्तु भवति। सर्वस्यादर्शनस्य लोपसंज्ञा प्राप्नोति॥

किं कारणम्?॥

सर्वस्यान्यत्रादृष्टत्वात्। सर्वो हि शब्दो यो यस्य प्रयोगविषयः, स ततोऽन्यत्र न दृश्यते। त्रपु जतु इत्यत्राणोऽदर्शनम्। तत्र 'अदर्शनं लोपः' इति लोपसंज्ञा प्राप्नोति॥

(भाष्यम्)

तत्र को दोष॥

(४३३(२) आक्षेपवार्तिकम्॥४॥)

॥*॥ तत्र प्रत्ययलक्षणप्रतिषेधः॥*॥

(भाष्यम्)

तत्र प्रत्ययलक्षणं कार्यं प्राप्नोति, तस्य प्रतिषेधो वक्तव्यः। 'अचो ञ्णिति' इति वृद्धिः प्राप्नोति॥

(आक्षेपबाधकभाष्यम्)

नैष दोषः। ञ्णित्यङ्गस्याचो वृद्धिरुच्यते। यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गं भवति। यस्माच्चात्र प्रत्ययविधिः, न तत् प्रत्यये परतः। यच्च प्रत्यये परतः, न तस्मात्प्रत्ययविधिः॥

(आक्षेपसाधकभाष्यम्)

क्विपस्तर्ह्यदर्शनम्। तत्र 'अदर्शनं लोपः इति लोपसंज्ञा प्राप्नोति॥

तत्र को दोषः?॥

'तत्र प्रत्ययलक्षणप्रतिषेधः'॥ तत्र प्रत्ययलक्षणं कार्यं प्राप्नोति, तस्य प्रतिषेधो वक्तव्यः। 'ह्रस्वस्य पिति कृति तुग्' भवति इति तुक् प्राप्नोति॥

(४३४ समाधानवार्तिकम्॥५॥)

॥*॥ सिद्धं तु प्रसक्तादर्शनस्य लोपसंज्ञात्वात्॥*॥

(भाष्यम्)

सिद्धमेतत्॥

कथम्?।

प्रसक्तादर्शनं लोपसंज्ञं भवतीति वक्तव्यम्॥

(आक्षेपभाष्यम्)

यदि प्रसक्तादर्शनं लोपसंज्ञं भवतीत्युच्यते, ग्रामणीः सेनानीः-अत्र वृद्धिः प्राप्नोति॥

(समाधानभाष्यम्)

प्रसक्तादर्शनं लोपसंज्ञं भवति षष्ठीनिर्दिष्टस्य॥

(प्रसक्तादर्शनवादिन आक्षेपभाष्यम्)

यदि षष्ठीनिर्दिष्टस्येत्युच्यते 'चाहलोप एवेत्यवधारणम्' 'चादिलोपे विभाषा' अत्र लोपसंज्ञा न प्राप्नोति॥

(षष्ठीनिर्दिष्टवादिन आक्षेपभाष्यम्)

अथ प्रसक्तादर्शनं लोपसंज्ञं भवतीत्युच्यमाने कथमेवैतत् सिद्ध्यति?।

(प्रसक्तादर्शनवादिनः समाधानभाष्यम्)

को हि शब्दस्य प्रसङ्गः? यत्र गम्यते चार्थो, न च प्रयुज्यते॥

(उपसंहारभाष्यम्)

अस्तु तर्हि प्रसक्तादर्शनं लोपसंज्ञं भवतीत्येव॥

(आक्षेपस्मारणभाष्यम्)

कथं ग्रामणीः सेनानीः?।

(समाधानभाष्यम्)

योऽत्राऽणः प्रसङ्गः क्विपाऽसौ बाध्यते। अदर्शनं लोपः॥६०॥

(५५-लुक्श्लुलुप्संज्ञासूत्रम्॥१।१।९ आ. २ यं सू.॥)

प्रत्ययस्य लुक्श्लुलुपः॥१।१।६१॥

(प्रत्ययपदप्रयोजनाधिकरणम्)

(आक्षेपभाष्यम्)

प्रत्ययग्रहणं किमर्थम्?॥

(४३५ समाधानवार्तिकम्॥१॥)

॥*॥ लुमति प्रत्ययग्रहणमप्रत्ययसंज्ञाप्रतिषेधार्थम्॥*॥

(भाष्यम्)

लुमति प्रत्ययग्रहणं क्रियते, अप्रत्ययस्यैताः संज्ञा मा भूवन्निति॥

(भाष्यम्)

किं प्रयोजनम्?॥

(४३६ प्रयोजनवार्तिकम्॥२॥)

॥*॥ प्रयोजनं तद्धितलुकि कंसीयपरशव्ययोर्लुकि च गोप्रकृतिनिवृत्त्यर्थम्॥*॥

(भाष्यम्)

तद्धितलुकि गोनिवृत्त्यर्थम्। कंसीयपरशव्ययोश्च लुकि प्रकृतिनिवृत्त्यर्थम् । 'लुक्तद्धितलुकि' इति गोरपि लुक् प्राप्नोति, प्रत्ययग्रहणान्न भवति। 'कंसीयपरशव्ययोर्यञञौ लुक् च' इति प्रकृतेरपि लुक् प्राप्नोति, प्रत्ययग्रहणान्न भवति॥

(प्रत्याख्यानभाष्यम्)

गोनिवृत्त्यर्थेन तावन्नार्थ।

(४३७ प्रत्याख्यानसाधकवार्तिकम्॥३॥)

॥*॥ योगविभागात् सिद्धम्॥*॥

(भाष्यम्)

योगविभागः करिष्यते-'गोरुपसर्जनस्य' गोऽन्तस्य प्रातिपदिकस्योपसर्जनस्य ह्रस्वो भवति॥ ततः 'स्त्रियाः' स्त्रीप्रत्ययान्तस्य प्रातिपदिकस्योपर्जसनस्य ह्रस्वो भवति॥ ततो 'लुक्तद्धितलुकि' इति। स्त्रिया इति वर्तते। गोरिति निवृत्तम्॥

(४३८ प्रत्याख्यानसाधकवार्तिकम्॥४॥)

॥*॥ कंसीयपरशव्ययोर्विशिष्टनिर्देशात् सिद्धम्॥*॥

(भाष्यम्)

कंसीयपरशव्ययोर्विशिष्टनिर्देशः कर्तव्यः। कंसीययपरशव्ययोर्यञञौ भवतश्छयतोश्च लुग्भवतीति॥

(विशिष्टनिर्देशावश्यकताभाष्यम्)

स चावश्यं विशिष्टनिर्देशः कर्तव्यः। क्रियमाणेऽपि वै प्रत्ययग्रहणे उकारसकारयोर्मा भूदिति। 'कमेः सः' कंसः , परान् शृणातीति परशुरिति॥

(विशिष्टनिर्देशावश्यकताबाधकभाष्यम्)

नैष दोषः। उणादयोऽव्युत्पन्नानि प्रातिपदिकानि॥

(उपसंहारभाष्यम्)

स एषोऽनन्यार्थो विशिष्टनिर्देशः कर्तव्यः, प्रत्ययग्रहणं वा कर्तव्यम्॥

(४३९ प्रत्याख्यानवार्तिकम्॥५॥)

॥*॥ उक्तं वा॥*॥

किमुक्तम्?॥

*** ङ्याप्प्रातिपदिकग्रहणमङ्गभपदसंज्ञार्थं यच्छयोश्च लुगर्थम्* इति॥**

(४४० (१) प्रयोजनवार्तिकप्रथमखण्डम्)

॥*॥ षष्ठीनिर्देशार्थं तु ॥*॥

(भाष्यम्)

षष्ठीनिर्देशार्थं तर्हि प्रत्ययग्रहणं कर्तव्यम्। षष्ठीनिर्देशो यथा प्रकल्पेत॥

(४४० (२) प्रयोजनसाधकं वार्तिकद्वितीयखण्डम्॥६॥)

॥*॥ अनिर्देशे हि षष्ठ्यर्थाप्रसिद्धिः॥*॥

अक्रियमाणे हि प्रत्ययग्रहणे षष्ठ्यर्थस्याप्रसिद्धिः स्यात्॥

कस्य?।

स्थानेयोगत्वस्य॥

(प्रत्याख्यानसाधकमाक्षेपभाष्यम्)

क्व पुनरिह षष्ठीनिर्देशार्थेनार्थः प्रत्ययग्रहणेन। यावता सर्वत्रैव षष्ठ्युच्चार्यते-अणिञोः, तद्राजस्य, यञञोः, शप इति?।

(समाधानभाष्यम्)

इह न काचित्-षष्ठी-'जनपदे लुब्' इति॥

(समाधानबाधकभाष्यम्)

अत्रापि प्रकृतं प्रत्ययग्रहणनुवर्तते॥

क्व प्रकृतम्?।

'प्रत्ययः, परश्च' इति॥

(समाधानसाधकभाष्यम्)

तद्वै प्रथमानिर्दिष्टम्। षष्ठीनिर्दिष्टेन चेहार्थः॥

(समाधानबाधकभाष्यम्)

'ङ्याप्प्रातिपदिकाद्' इत्येषा पञ्चमी प्रत्यय इति प्रथमायाः षष्ठीं प्रकल्पयिष्यति 'तस्मादित्युत्तरस्य' इति॥

(समाधानसाधकभाष्यम्)

प्रत्ययविधिरयम्। न च प्रत्ययविधौ पञ्चम्यः प्रकल्पिका भवन्ति॥

(समाधानबाधकभाष्यम्)

नायं प्रत्ययविधिः। विहितः प्रत्ययः प्रकृतश्चानुवर्तते॥

(४४१ प्रयोजनवार्तिकम्॥७॥)

॥*॥ सर्वादेशार्थं वा वचनप्रामाण्यात्॥*॥

(भाष्यम्)

सर्वादेशार्थं तर्हि प्रत्ययग्रहणं कर्तव्यम्। लुक्श्लुलुपः सर्वादेशा यथा स्युः॥

अथ क्रियमाणेऽपि प्रत्ययग्रहणे कथमिव लुक्श्लुलुपः सर्वादेशा लभ्याः?॥

वचनप्रामाण्यात्। प्रत्ययग्रहणसामर्थ्यात्॥

(प्रयोजननिराकरणभाष्यम्)

एतदपि नास्ति प्रयोजनम्। आचार्यप्रवृत्तिर्ज्ञापयति-लुक्श्लुलुपः सर्वादेशा भवन्तीति। यदयं-'लुग्वा दुहदिहलिहगुहामात्मनेपदे दन्त्ये' इति लोपे प्रकृते लुकं शास्ति॥

(४४२ प्रयोजनवार्तिकम्॥८॥)

॥*॥ उक्तरार्थं तु ॥*॥

(भाष्यम्)

उक्तरार्थ तर्हि प्रत्ययग्रहणं कर्तव्यम्॥

(प्रयोजनबाधकभाष्यम्)

क्रियते तत्रैव-'प्रत्ययलोपे प्रत्ययलक्षणम्' इति॥

(प्रयोजनसाधकभाष्यम्)

द्वितीयं कर्तव्यम्। कृत्स्नप्रत्ययलोपे प्रत्ययलक्षणं यथा स्यात्, एकदेशलोपे मा भूदिति-' आघ्रीत' 'संरायस्पोषेण ग्मीय' इति। प्रत्ययस्य०॥६१॥

(५६ प्रत्ययलक्षणातिदेशसूत्रम्॥१।१।१।९ आ.३ यं सू.॥)

प्रत्ययलोपे प्रत्ययलक्षणम्॥१।१।१।६२॥

(प्रथमप्रत्ययग्रहणप्रयोजनाधिकरणम्)

(आक्षेपभाष्यम्)

प्रत्ययग्रहणं किमर्थम्?॥

(समाधानभाष्यम्)

'लोपे प्रत्ययलक्षणम्' इतीयत्युच्यमाने-सौरथी वैहतीति गुरूपोत्तमलक्षणः ष्यङ् प्रसज्येत।

(समाधाननिराकरणभाष्यम्)

नैष दोषः। नैवं विज्ञायते-लोपे प्रत्ययलक्षणेन भवति-प्रत्ययस्य प्रादुर्भाव इति॥

कथं तर्हि?॥

प्रत्ययो लक्षणेन यस्य कार्यस्य तल्लुप्तेऽपि भवति॥

(प्रयोजनान्तरभाष्यम्)

इदं तर्हि प्रयोजनम्-सति प्रत्यये यत्प्राप्नोति तत्प्रत्ययलक्षणं यथा स्यात्, लोपोत्तरकालं यत्प्राप्नोति तत्प्रत्ययलक्षणं मा भूदिति॥

किं प्रयोजनम्?॥

ग्रामणिकुलं, सेनानिकुलमित्यत्रौत्तरपदिके ह्रस्वत्वे कृते 'ह्रस्वस्य पिति कृति तुक्' इति तुक् प्राप्नोति, स मा भूदिति॥

(प्रयोजननिराकरणभाष्यम्)

यदि तर्हि-यत्सति प्रत्यये प्राप्नोति, तत्प्रत्ययलक्षणेन भवति। लोपोत्तरकालं यत् प्राप्नोति, तन्न भवति। जगत् जनगदित्यत्र तुग् न प्राप्नोति, लोपोत्तरकालं ह्यत्र तुगागमः। तस्मान्नार्थ एवमर्थेन प्रत्ययग्रहणेन॥

(आक्षेपभाष्यम्)

कस्मान्न भवति-ग्रामणिकुलं, सेनानिकुलम्?॥

(समाधानभाष्यम्)

बहिरङ्गं ह्रस्वत्वम्, अन्तरङ्गस्तुक्। 'असिद्धं बहिरङ्गमन्तरङ्गे'॥

(प्रयोजनान्तरभाष्यम्)

इदं तर्हि प्रयोजनम् कृत्स्नप्रत्ययलोपे प्रत्ययलक्षणं यथा स्यात्, एकदेशलोपे मा भूदिति। 'आघ्नीत' 'सं रायस्पोषेणग्मीय' इति।

(आक्षेपभाष्यम्)

पूर्वस्मिन्नपि योगे प्रत्ययग्रहणस्यैतत्प्रयोजनमुक्तम्॥

(समाधानभाष्यम्)

अन्यतरच्छक्यमकर्तुम्॥

(द्वितीयप्रत्ययग्रहणप्रयोजनाधिकरणम्)

(आक्षेपभाष्यम्)

अथ द्वितीयं प्रत्ययग्रहणं किमर्थम्?॥

(समाधानभाष्यम्)

प्रत्ययलक्षणं यथा स्यात्, वर्णलक्षणं मा भूदिति॥ गवे हितं गोहितम्, रायः कुलं रैकुलमिति॥

(युक्तिकथनाधिकरणम्)

(आक्षेपभाष्यम्)

किमर्थम् पुनरिदमुच्यते?।

(४४३ समाधानवार्तिकम्॥१॥)

॥*॥ प्रत्ययलोपे प्रत्ययलक्षणवचनं सदन्वाख्यानाच्छास्त्रस्य॥*॥

(भाष्यम्)

'प्रत्ययलोपे प्रत्ययलक्षणम्' इत्युच्यते। सदन्वाख्यानाच्छास्त्रस्य। सच्छास्त्रेणान्वाख्यायते, सतो वा शास्त्रमन्वाख्यापकं भवति। सदन्वाख्यानाच्छास्त्रस्य 'ठगिदचां सर्वनामस्थानेऽधातोः' इतीहैव स्यात्-गोमन्तौ, यवमन्तौ। गोमान्, यवमानित्यत्र न स्यात्। इष्यते च स्यादिति। तच्चान्तरेण यत्नं न सिध्यतीत्यतः प्रत्ययलोपे प्रत्ययलक्षणवचनम्। इत्येवमर्थमिदमुच्यते।

(आक्षेपभाष्यम्)

अस्ति प्रयोजनमेतत्॥

(समाधानभाष्यम्)

किं तर्हीति॥

(लुकि प्रत्ययलक्षणसाधनाधिकरणम्)

(४४४ (१) आक्षेपवार्तिकप्रथमखण्डम्)

॥*॥ लुक्युपसंख्यानम्॥*॥

(भाष्यम्)

लुक्युपसंख्यानं कर्तव्यम्। पञ्च, सप्त॥

(प्रत्याक्षेपभाष्यम्)

किं पुनः कारणं न सिध्यति?।

(४४४ (२) आक्षेपसाधकवार्तिकद्वितीयप्रथमखण्डम्॥२॥)

॥*॥ लोपे हि विधानम्॥*॥

(भाष्यम्)

लोपे हि प्रत्ययलक्षणं विधीयते। तेन लुकि न प्राप्नोति॥

(४४५ समाधानवार्तिकम्॥३॥)

॥*॥ न वाऽदर्शनस्य लोपसंज्ञित्वात्॥*॥

(भाष्यम्)

न वा कर्तव्यम्॥

किं कारणम्?॥

अदर्शनस्य लोपसंज्ञित्वात्। अदर्शनं लोपसंज्ञं भवतीत्युच्यते। लुमत्संज्ञाश्चाप्यदर्शनस्य क्रियन्ते। तेन लुक्यपि भविष्यति॥

(सांकर्यपरिहाराधिकरणम्)

(संगतिभाष्यम्)

यद्येवम्-

(४४६(१) सांकर्याक्षेपवार्तिकखण्डम्॥)

॥*॥ प्रत्ययादर्शनं तु लुमत्संज्ञम्॥*॥

(भाष्यम्)

प्रत्ययादर्शनं तु लुमत्संज्ञमपि प्राप्नोति॥

(आक्षेपभाष्यम्)

तत्र को दोषः?॥

(४४६ (२) दोषदर्शनवार्तिकद्वितीयखण्डम् ॥४॥)

॥*॥ तत्र लुकि श्नुविधिः प्रतिषेध्यः॥*॥

(भाष्यम्)

तत्र लुकि श्नुविधिः प्राप्नोति, स प्रतिषेध्यः॥ अस्ति हन्ति 'श्नौ' इति द्विर्वचनं प्राप्नोति॥

(४४७ सांकर्यवारणवार्तिकम्॥५॥)

॥*॥ न वा पृथक्संज्ञाकरणात्॥*॥

(भाष्यम्)

न वा एष दोषः॥

किं कारणम्?॥

पृथक्संज्ञाकरणात्। पृथक्संज्ञाकरणसामर्थ्यात्लुकि श्नुविर्धि भविष्यति॥

(लोपसंज्ञाया व्यापकत्वोपसंहारभाष्यम्)

तस्माददर्शनसामान्यात्लोपसंज्ञा लुमत्संज्ञा अवगाहते॥

(सांकर्यसाधकभाष्यम्)

यथैव तर्हि-अदर्शनसामान्याल्लोपसंज्ञा लुमत्संज्ञा अवगाहते, एवं लुमत्संज्ञा अपि लोपसंज्ञामवगाहेरन्॥

तत्र को दोषः?॥

अगोमती गोमती सम्पन्ना-गोमतीभूता 'लुक् तद्धितलुकि' इति ङीपो लुक् प्रसज्येत॥

(सांकर्यबाधकभाष्यम्)

ननु चात्रापि* न वा पृथक्संज्ञाकरणाद्* इत्येव सिद्धम्॥

(आक्षेपभाष्यम्)

यथैव तर्हि-पृथक्संज्ञाकरणसामर्थ्याद् लुमत्संज्ञा लोपसंज्ञा नावगाहन्ते, एवं लोपसंज्ञाऽपि लुमत्संज्ञा नावगाहेत। तत्र स एव दोषो-लुक्युपसंख्यानमिति॥

(समाधानभाष्यम्)

अस्त्यन्यल्लोपसंज्ञायाः पृथक्संज्ञाकरणे प्रयोजनम्॥

किम्?॥

लुमत्संज्ञासु यदुच्यते तल्लोपमात्रे मा भूदिति॥

(४४८ समाधानान्तरवार्तिकम्॥६॥)

॥*॥ लुमति प्रतिषेधाद्वा॥*॥

(भाष्यम्)

अथवा यदयं-'न लुमताङ्गस्य' इति प्रत्ययलक्षणप्रतिषेधं शास्ति, तज्ज्ञापयत्याचार्यो-भवति लुकि प्रत्ययलक्षणमिति॥

(इष्टानुपपत्तिपरिहाराधिकरणम्)

(४४९ आक्षेपवार्तिकम्॥७॥)

॥*॥ सतो निमित्ता भावात्पदसंज्ञाऽभावः॥*॥

(भाष्यम्)

सन् प्रत्ययो येषां कार्याणामनिमित्तं राज्ञः पुरुष इति, स लुप्तोऽप्यनिमित्तं स्याद्-राजपुरुष इति॥

(समाधानभाष्यम्)

अस्तु तस्या अनिमित्तम्-या स्वादौ पदमिति पदसंज्ञा। या तु 'सुबन्तं पदम्' इति पदसंज्ञा सा भविष्यति॥

(आक्षेपसाधकभाष्यम्)

सत्येतत् प्रत्यय आसीत्-अनया भविष्यत्यनया न भविष्यतीति। लुप्त इदानीं प्रत्यये यावत एवावधेः स्वादौ पदमिति पदसंज्ञा तावत एव सुबन्तं पदमिति॥ अस्ति च प्रत्ययलक्षणेन यजादिपरतेति कृत्वा भसंज्ञा प्राप्नोति॥

(४५० आक्षेपान्तरवार्तिकम्॥८॥)

॥*॥ तुग्दीर्घत्वयोश्च विप्रतिषेधानुपपत्तिरेकयोगलक्षणत्वात् परिवीरिति॥*॥

(भाष्यम्)

तुग्दीर्घत्वयोश्च विप्रतिषेधो नोपपद्यते॥

क्व ?।

परिवीरिति॥

किं कारणम्?॥

एकयोगलक्षणत्वात्। एकयोगलक्षणे हि तुग्दीर्घत्वे॥ इह–लुप्ते प्रत्यये सर्वाणि प्रत्ययाश्रयाणि कार्याणि पर्यवपन्नानि। तान्येतेन प्रत्युत्थाप्यन्ते। अनेनैव तुग्, अनेनैव च दीर्घत्वमिति तदेकयोगलक्षणं भवति। एकयोगलक्षणणानि च न प्रकल्पन्ते॥

४५१ न्यासान्तरेण समाधानवार्तिकम्

॥सिद्धं तु स्थानिसंज्ञानुदेषादान्यभाव्यस्य॥

(भाष्यम्)

सिद्धमेतत्॥

कथम्?॥

स्थानिसंज्ञाऽन्यभूतस्य भवतीति वक्तव्यम्।

किं कृतं भवति?॥

सत्तामात्रमनेन क्रियते। यथाप्राप्ते तुग्दीर्घत्वे भविष्यतः॥

(आक्षेपभाष्यम्)

तद्वक्तव्यं भवति॥

(न्यासान्तरसाधकसमाधानभाष्यम्)

यद्यप्येतदुच्यते, अथवैतर्हि स्थानिवद्भावो नारभ्यते। 'स्थानिसंज्ञाऽन्यभूतस्यानल्विधौ' इति वक्ष्यामि॥

(आक्षेपभाष्यम्)

यद्येवम् ''आडो यमहनः'' आत्मनेपदं भवतीति हन्तेरेव स्यात्, वधेर्न स्यात्॥ न हि काचिद्धन्तेः संज्ञाऽस्ति या वधेरतिदिश्येत॥

(समाधानभाष्यम्)

हन्तेरपि संज्ञाऽस्ति॥

का?॥

हन्तिरेव॥

कथम्?॥

'स्वं रुपं शब्दस्याशब्दसंज्ञा' इति वचनात्स्वं रूपं शब्दस्य संज्ञा भवतीति हन्तेरपि हन्तिः संज्ञा भविष्यति॥

(४५२ न्यासान्तरप्रयोजनान्तरवार्तिकम्॥१०॥)

॥*॥ भसंज्ञाङीप्ष्फगोरात्वेषु च सिद्धम्॥*॥

(भाष्यम्)

भसंज्ञाङीप्ष्फगोरात्वेषु च सिद्धं भवति॥

(उदाहरणोपपादनभाष्यम्)

भसंज्ञा- राज्ञः पुरुषः-राजपुरुषः। प्रत्ययलक्षणेन 'यचि भम्' इति भसंज्ञा प्राप्नोति॥ 'स्थानिसंज्ञाऽन्यभूतस्यानल्विधौ' इति वचनान्न भवति॥ भसंज्ञा॥

(उदाहरणोपपादनभाष्यम्)

ङीप्-चित्रायां जाता-चित्रा। प्रत्ययलक्षणेनाणन्तादितीकारः प्राप्नोति॥ 'स्थानिसंज्ञाऽन्यभूतस्यानल्विधौ' इति वचनान्न भवति॥ ङीप्॥

(उदाहरणोपपादनभाष्यम्)

ष्फ-वतण्डी। प्रत्ययलक्षणेन 'यञन्ताद्' इति ष्फः प्राप्नोति॥ 'स्थानिसंज्ञाऽन्यभूतस्यानल्विधौ' इति वचनान्न भवति॥ ॥ष्फ॥

(उदाहरणोपपादनभाष्यम्)

गोरात्वम्-गामिच्छति-गव्यति। प्रत्ययलक्षणेनामि 'औतोऽम्शसोः' इत्यात्वं प्राप्नोति॥ 'स्थानिसंज्ञाऽन्यभूतस्यानल्विधौ' इति वचनान्न भवति॥ गोरात्वम्

(४५३ न्यासान्तरदूषणावार्तिकम्॥११॥)

॥*॥ तस्य दोषो ङौनकारलोपेत्त्वेम्विधयः॥*॥

(भाष्यम्)

तस्यैतस्य लक्षणस्य दोषः॥

(उदाहरणोपपादनभाष्यम्)

ङौ नकारलोपः आर्द्रे चर्मन् , लोहिते चर्मन्। प्रत्ययलक्षणेन 'यचि भम्' इति भसंज्ञा सिद्धा भवति॥ 'स्थानिसंज्ञाऽन्यभूतस्यानल्विधौ' इति वचनान्न प्राप्नोति॥

(उदाहरणोपपादनभाष्यम्)

इत्वम्-आशीः। प्रत्ययलक्षणेन हलीतीत्त्वं सिद्धं भवति। 'स्थानिसंज्ञाऽन्यभूतस्यानल्विधौ' इति वचनान्न प्राप्नोति॥

(उदाहरणोपपादनभाष्यम्)

इम्-अतृणेट्। प्रत्ययलक्षणेन हलीति इम् सिद्धो भवति। 'स्थानिसंज्ञाऽन्यभूतस्यानल्विधौ' इति वचनान्न प्राप्नोति॥

(तटस्थभाष्यम्)

सूत्रं च भिद्यते॥

(सिद्धान्तिभाष्यम्)

यथान्यासमेवास्तु॥

(आक्षेपस्मारणभाष्यम्)

ननु चोक्तम्-*सतो निमित्ताभावात्पदसंज्ञाऽभावः* तुग्दीर्घत्वयोश्च विप्रतिषेधानुपपत्तिरेकयोगलक्षणत्वात्परिवीः * इति॥

(प्रथमदूषणपरिहारभाष्यम्)

नैष दोषः। वक्ष्यत्यत्र परिहारम्॥

(द्वितीयदूषणपरिहारभाष्यम्)

इहापि परिवीरिति-शास्त्रपरविप्रतिषेधेन परत्वाद्दीर्घत्वं भविष्यति॥

सूत्रप्रयोजनम्

(आक्षेपभाष्यम्)

कानि पुनरस्य योगस्य प्रयोजनानि?।

(४५४ यथान्याससूत्रे प्रयोजनवार्तिकम्॥१२॥)

॥*॥ प्रयोजनमपृक्तशिलोपे नुममामौ गुणवृद्धी दीर्घत्वेमडाट्श्नम्विधयः॥*॥

(भाष्यम्)

अपृक्तलोपे शिलोपे च कृते नुम् अमामौ गुणवृद्धी दीर्घत्वमिम् अडाटौ श्नम्विधिरिति प्रयोजनानि॥

(उदाहरणोपपादनभाष्यम्)

नुम्-अग्ने त्री ते वाजिना त्री षधस्था ता ता पिण्डानाम्॥

अमामौ-हे अनड्वन् अनड्वान्॥

गुणः-अधोक्, अलेट्॥

वृद्धिः-न्यमार्ट्॥

दीर्घत्वम्-अग्ने त्री ते वाजिना त्री षधस्था, ता ता पिण्डानाम्॥

इम्-अतृणेट्॥

अडाटौ-अधोक् अलेट् ऐयः औनः॥

श्नम्विधिः-अभिनोऽत्र, अच्छिनोऽत्र॥

अपृक्तशिलोपयोः कृतयोरेते विधयो न प्राप्नुवन्ति। प्रत्ययलक्षणेन भवन्ति॥

(प्रत्याख्यानभाष्यम्)

नैतानि सन्ति प्रयोजनानि। स्थानिवद्भावेनाप्येतानि सिद्धानि॥

(सूत्रावश्यकताभाष्यम्)

न सिध्यन्ति। आदेशः स्थानिवदित्युच्यते। न च लोप आदेशः॥

(प्रत्याख्यानसाधकभाष्यम्)

लोपोऽप्यादेशः?॥

कथम्?॥

आदिश्यते यः स आदेशः, लोपोऽप्यादिश्यते॥

(लोपेऽप्यादेशत्वसाधकभाष्यम्)

दोषः खल्वपि स्याद्, यदि लोपो नादेशः स्यात्॥ इह 'अचः परस्मिन् पूर्वविधौ' इत्येतस्य योगस्य भूयिष्ठानि लोप उदाहरणानि, तानि न स्युः॥

(सूत्रारम्भावश्यकताभाष्यम्)

यत्र तर्हि स्थानिवद्भावो नास्ति, तदर्थमयं योगो वक्तव्यः॥

क्व च स्थानिवद्भावो नास्ति?॥

योऽल्विधिः॥

(आक्षेपभाष्यम्)

किं प्रयोजनम्?॥

(४५५ प्रयोजनभाष्यम्॥१३॥)

॥*॥ प्रयोजनं डौनकारलोपेत्त्वेम्विधयः॥*॥

(भाष्यम्)

डौनकार लोपेत्त्वेम्विधयः प्रयोजयन्ति॥

डौनकारलोपस्तावत्- 'आर्द्रे चर्मन्, 'लोहिते चर्मन्। स्थानिवद्भावः। अनल्विधौ' इति वचनान्न प्राप्नोति। प्रत्ययलक्षणेन तु यचीति भसंज्ञा सिद्धा भवति।

इत्त्वम्- आशीः। स्थानिवद्भावः ''अनल्विधौ'' इति वचनान्न प्राप्नोति। प्रत्ययलक्षणेन तु हलीतीत्त्वं सिद्धं भवति॥

इम् – अतृणेट। स्थानिवद्भावः 'अनल्विधौ' इति वचनान्न प्राप्नोति। प्रत्ययलक्षणेन तु हलीतीम् सिद्धो भवति।

(४५६ सूत्रारम्भदूषणवार्तिकम्॥१४॥)

॥*॥ भसंज्ञाङीष्ष्फगोरात्वेषु च दोषः॥*॥

भसंज्ञाङीष्ष्फगोरात्वेषु च दोषो भवति॥

भसंज्ञा- राज्ञः पुरुषो राजपुरुषः। प्रत्ययलक्षणेन तु यचीति भसंज्ञायां न लोपः प्रातिपदिकान्तस्य' इति न लोपो न प्राप्नोति। स्थानिवद्भावस्त्वनल्विधाविति वचनान्न प्राप्नोति।

ङीप्- चित्रायां जाता चित्रा प्रत्ययलक्षणेनत्वणन्तादितीकारः प्राप्नोति। स्थनिवद्भावस्त्वनल्विधाविति वचनान्न प्राप्नोति॥

ष्फ- वतण्डी। प्रत्ययलक्षणेन तु यञन्तादकारान्तादिति ष्फः प्राप्नोति। स्थानिवद्भावस्त्वनल्विधाविति वचनान्न प्राप्नोति।

गोरात्वम्- गामिच्छति गव्यति। प्रत्ययलक्षणेन 'औतोम्शसोः' इत्यात्वं प्राप्नोति स्थानिवद् भावस्त्वनाल्विधाविति वचनान्न प्राप्नोति॥

(सूत्रारम्भवादिभाष्यम्)

भसंज्ञायां तावन्न दोषः। आचार्यप्रवृत्तिर्ज्ञापयति-

न प्रत्ययलक्षणेन भसंज्ञा भवतीति। यदयम्-'न ङिसंम्बुद्ध्योः' इति ङौ प्रतिषेधं शास्ति॥

ङीप्यपि, नैवं विज्ञायते-अणन्तादकारान्तादिति।

कथं तर्हि?॥

अण्योऽकार इति॥

ष्फेऽपि। नैवं विज्ञायते-यञन्तादकारान्तादिति॥

कथं तर्हि?।

यञ् योऽकार इति॥

गोरात्वेऽपि। नैवं विज्ञायते-अमि अचीति।

कथं तर्हि?।

अच्यमीति॥

(प्रत्याख्यानभाष्यम्)

प्रयोजनान्यपि तर्हि नैतानि सन्ति॥

(दूषणोद्धारभाष्यम्)

यत्तावदुच्यते-ङौ नकारलोप इति॥ क्रियत एतन्न्यास एव-'न ङिसंबुद्ध्योः' इति॥

(दूषणोद्धारभाष्यम्)

इत्वमपि। वक्ष्यत्येतत्* शास इत्वे आशासः क्वौ* इति॥

(दूषणोद्धारभाष्यम्)

इम्विधिरपि। हलीति निवृत्तम्॥

(आक्षेपभाष्यम्)

यदि हलीति निवृत्तं, तृणह्यानि अत्रापि प्राप्नोति॥

(समाधानभाष्यम्)

एवं तर्हि-'अचि न' इत्यनुवर्तिष्यते॥

(तटस्थाक्षेपभाष्यम्)

न तर्हीदानीमयं योगो वक्तव्यः॥

(सिद्धान्तिसमाधानभाष्यम्)

वक्तव्यश्च॥

किं प्रयोजनम्?।

प्रत्ययं गृहीत्वा यदुच्यते तत्प्रत्ययलक्षणेन यथा स्यात्। शब्दं गृहीत्वा यदुच्यते तत्प्रत्ययलक्षणेन मा भूदिति॥

किं प्रयोजनम्?॥

शोभना दृषदोऽस्य ब्राह्मणस्य सुदृषद् ब्राह्मणः, 'सोर्मनसी अलोमोषसी' इत्येष स्वरो मा भूदिति॥ प्रत्ययलोपे प्रत्ययलक्षणम्॥६२॥

(५७ प्रत्ययलक्षणनिषेधसूत्रम्॥१।१।९॥ आ. १ ४ सू.)

न लुमताङ्गस्य॥१।१।६३॥

(न्यूनतापरिहाराधिकरणम्)

(४५७(१) आक्षेपवार्तिकम्॥)

॥*॥ लुमति प्रतिषेधे एकपदस्वरस्योपसंख्यानम्॥*॥

(भाष्यम्)

लुमति प्रतिषेध एकपदस्वरस्योपसंख्यानं कर्तव्यम्। एकपदस्वरे च लुमता लुप्ते प्रत्ययलक्षणं न भवतीति।

(प्रत्याक्षेपभाष्यम्)

किमविशेषेण?।

(प्रत्याक्षेपसमाधानभाष्यम्)

नेत्याह॥

(४५७(२) आक्षेपशेषवार्तिकद्वितीयखण्डम्॥१॥)

॥*॥ सर्वामन्त्रितसिज्लुक्स्वरवर्जम्॥*॥

(भाष्यम्)

सर्वस्वरमामन्त्रितस्वरं सिज्लुक्स्वरं च वर्जयित्वा॥

(उदाहरणोपपादनभाष्यम्)

सर्वस्वर! सर्वस्तोमः! 'सर्वस्य सुपि' इत्याद्युदात्तत्वं यथा स्यात्॥

(उदाहरणोपपादनभाष्यम्)

आमन्त्रितस्वर-सर्पिरागच्छ, सस्याऽऽगच्छत 'आमन्त्रितस्य च' इत्याद्युत्तत्वं यथा स्यात्॥

(उदाहरणोपपादनभाष्यम्)

सिज्लुक्स्वर! मा हि दाताम्, मा हि धाताम्! ' आदिः सिचोऽन्यतरस्याम्' इत्येष स्वरो यथा स्यात्॥

(भाष्यम्)

किं प्रयोजनम्?॥

(४५८ प्रयोजनवार्तिकम्.२॥)

॥*॥ प्रयोजनं त्रिनिकिल्लुकि स्वराः॥*॥

(भाष्यम्)

त्रिनिकित्स्वरा लुकि प्रयोजयन्ति। गर्गा वत्सा विदा उर्वाः, उष्ट्रग्रीवा वामरज्जुः। 'न्निति' इत्याद्युदात्तत्वं मा भूदिति॥ इह चात्रयः-'कितः' इत्यन्तोदात्तत्वं मा भूदिति॥

(४५९ प्रयोजनान्तरवार्तिकम्॥३॥)

॥*॥ पथिमथोः सर्वनामस्थाने लुकि॥*॥

(भाष्यम्)

पथिमथोः सर्वनामस्थाने लुकि प्रयोजनम्॥ पथिप्रियो मथिप्रियः, 'पथिमथोः सर्वनामस्थाने' इत्येष स्वरो मा भूदिति॥

(४६० आक्षेपवार्तिकम्॥४॥)

॥*॥ अह्नो रविधौ॥*॥

(भाष्यम्)

अह्नो रविधाने लुमता लुप्ते प्रत्ययलक्षणं न भवतीति वक्तव्यम्॥ अहर्ददाति, अहर्भुङ्क्ते, 'रोऽसुपि' इति प्रत्ययलक्षणेन प्रतिषेधो मा भूदिति॥

(४६१ आक्षेपवार्तिकम्॥५॥)

॥*॥ उत्तरपदत्वे चापदादिविधौ॥*॥

(भाष्यम्)

उत्तरपदत्वे चापदादिविधौ लुमता लुप्ते प्रत्ययलक्षणं न भवतीति वक्तव्यम्। परमवाचा, परमवाचे, परमगोदुहा, परमगोदुहे, परमश्वलिहा, परमश्वलिहे। पदस्येति प्रत्ययलक्षणेन कुत्वादीनि मा भूवन्निति॥

अपदादिविधाविति किमर्थम्?॥

दधिसेचौ दधिसेचः, 'सात्पदाद्योः' इति प्रतिषेधो यथा स्यात्॥

(आक्षेपभाष्यम्)

यद्यपदादिविधावित्युच्यते, उत्तरपदाधिकारो न प्रकल्पेत॥

तत्र को दोषः?॥

'कर्णो वर्णलक्षणात्' इत्येवमादिविधिर्न सिध्यति॥

(आक्षेपबाधकन्यासान्तरभाष्यम्)

यदि पुनः * नलोपादिविधौ प्लुत्यन्ते* लुमता लुप्ते प्रत्ययलक्षणं न भवतीत्युच्येत॥

(न्यासान्तरनिराकरणभाष्यम्)

नैवं शक्यम्। इह हि-राजुकुमार्यौ राजकुमार्य इति शाकलं प्रसज्येत॥

(न्यासान्तरसाधकभाष्यम्)

नैष दोषः। यदेतत्-*सिति शाकलं न* इति, एतत्-*प्रत्यये शाकलं न* इति वक्ष्यामि।

(आक्षेपभाष्यम्)

यदि 'प्रत्यये शाकलं न' इत्युच्यते, 'दधि अधुना- मधु अधुना' अत्राऽपि न प्रसज्येत॥

(निराकरणभाष्यम्)

प्रत्यये शाकलं न भवति॥

कतरस्मिन्?॥

यस्माद्यः प्रत्ययो विहित इति॥

(आक्षेपभाष्यम्)

इह तर्हि-परमदिवा, परमदिवे। 'दिव उत्' इत्युत्त्वं प्राप्नोति॥

(विशेषानभ्युपगमभाष्यम्)

अस्तु तर्ह्यविशेषेण॥

(आक्षेपस्मारणभाष्यम्)

ननु चोक्तम्-उत्तरपदाधिकारो न प्रकल्पेतेति॥

(परिहारभाष्यम्)

वचनादुत्तरपदाधिकारो भविष्यति॥

(आक्षेपभाष्यम्)

तर्त्तर्हि वक्तव्यम् ॥

(समाधानभाष्यम्)

न वक्तव्यम्। अनुवृत्तिः करिष्यते। इदमस्ति-''यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम्''। 'सुप्तिङन्तं पदम्' यस्मात्सुप्तिङ्विधिस्तदादि सुबन्तं तिङन्तं च॥ 'नः क्ये' नान्तं क्ये पदसंज्ञं भवति, यस्मात् क्यविधिस्तदादि सुबन्तं च॥ 'सिति च' सिति पूर्वं पदसंज्ञं भवति, यस्मात्सिद्विधिस्तदादि सुबन्तं च॥ 'स्वादिष्वसर्वमानस्थाने' स्वादिष्वसर्वनामस्थाने पूर्वं पदसंज्ञं भवति, यस्मात्स्वादिविधिस्तदादि सुबन्तं च॥

'यचि भम्' यजादिप्रत्यये पूर्व भं भवति, यस्मायजादिविधिस्तदादि सुबन्तं च॥

(आक्षेपभाष्यम्)

इह तर्हि-परमवाक्। 'असर्वनामस्थाने' इति प्रतिषेधः प्राप्नोति॥

(समाधानभाष्यम्)

अस्तु तस्याः प्रतिषेधः-या स्वादौ पदमिति पदसंज्ञा। या तु सुबन्तं पदमिति पदसंज्ञा सा भविष्यति॥

(आक्षेपभाष्यम्)

सत्येत्प्रत्यय आसीत्-अनया भविष्यत्यनया न भविष्यतीति॥ लुप्त इदानीं प्रत्यये यावत एवावधेः स्वादौ पदमिति पदसंज्ञा, तावत एवावधेः सुबन्तं पदमिति। अस्ति च प्रत्ययलक्षणेन सर्वनामस्थानपरतेति कृत्वा 'प्रतिषेधाश्च बलीयांसो भवन्ति' इति प्रतिषेधः प्राप्नोति॥

(समाधानवार्तिकम्)

॥*॥ नाप्रतिषेधात्॥*॥

(भाष्यम्)

नायं प्रसज्यप्रतिषेधः-सर्वनामस्थाने नेति॥

किं तर्हि?॥

पर्युदासोऽयम्-यदन्यत्सर्वनामस्थानादिति। सर्वनामस्थाने अव्यापारः। यदि केनचित्प्राप्नोति तेन भविष्यति। पूर्वेण च प्राप्नोति॥

(समाधानान्तरवार्तिकम्)

॥*॥ अप्राप्तेर्वा॥*॥

(भाष्यम्)

अथवा-अनन्तरा या प्राप्तिः सा प्रतिषिध्यते॥

कुत एतत्?।

अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति। पूर्वा प्राप्तिरप्रतिषिद्धा तया भविष्यति॥

(आक्षेपभाष्यम्)

ननु चेयं प्राप्तिः पूर्वां प्राप्तिं बाधते॥

(समाधानभाष्यम्)

नोत्सहते प्रतिषिद्धा सती बाधितुम्॥

(आक्षेपभाष्यम्)

यद्येवं, परमवाचौ परमवाच इति 'सुप्तिङन्तं पदम्' इति पदसंज्ञा प्राप्नोति॥

(समाधानभाष्यम्)

एवं तर्हि योगविभागः करिष्यते-'स्वादिषु' पूर्वं पदसंज्ञं भवति। ततः-'सर्वनामस्थाने अयचि' पूर्वं पदसंज्ञं भवति॥ ततो-'भम्' भसंज्ञं भवति यजादावसर्वनामस्थान इति॥

(आक्षेपभाष्यम्)

यदि तर्हि-सावपि पदं भवति, एचः प्लुतविकारे पदान्तग्रहणं चोदयिष्यति, इह मा भूत्- भद्रं करोषि गौरिति। तस्मिन् क्रियमाणेऽपि प्राप्नोति॥

(समाधानभाष्यम्)

वाक्यपदयोरन्त्यस्येत्येवं तत्॥

(आक्षेपभाष्यम्)

इह तर्हि-दधिसेचौ-दधिसेचः इति 'सात्पदाद्योः' इति पदादिलक्षणः षत्वप्रतिषेधो न प्राप्नोति॥

(समाधानभाष्यम्)

मा भूदेवम्-पदस्यादिः पदादिः, पदादेर्नेति॥

कथं तर्हि?॥

पदादादिः पदादिः, पदादेर्नेत्येवं भविष्यति॥

(आक्षेपभाष्यम्)

नैवं शक्यम्। इहापि प्रसज्येत-ऋक्षु-वाक्षु-त्वक्षु-कुमारीषु किशोरीष्विति॥

(समाधानभाष्यम्)

सात्प्रतिषेधो ज्ञापकः-स्वादिषु पदत्वेन येषां पदसंज्ञा, न तेभ्यः प्रतिषेधो भवतीति॥

(आक्षेपभाष्यम्)

इह तर्हि- 'बहुसेचौ, बहुसेचः' बहुजयं प्रत्ययः॥ अत्र पदादादिः पदादिः, पदादेर्नेत्युच्यमानेऽपि न सिध्यति॥

(वार्तिकन्यासान्तरेण समाधानभाष्यम्)

एवं तर्हि-

(वार्तिकन्यासभाष्यम्)

॥*॥ उत्तरपदत्वे च पदादिविधौ॥*॥

(भाष्यम्)

लुमता लुप्ते 'प्रत्ययलक्षणं भवति' इति वक्ष्यामि। तन्नियमार्थं भविष्यति- पदादिविधावेव, न पदान्तविधाविति॥

(आक्षेपभाष्यम्)

कथं-बहुसेचौ बहुसेचः इति?

(४६२ समाधानवार्तिकम्॥६॥)

॥*॥ बहुच्पूर्वस्य च॥*॥

(भाष्यम्)

बहुच्पूर्वस्य च पदादिविधावेव, न पदान्तविधाविति॥

(४६३ आक्षेपवार्तिकम्॥७॥)

॥*॥ द्वन्द्वेऽन्त्यस्य॥*॥

(भाष्यम्)

द्वन्द्वेऽन्त्यस्य लुमता लुप्ते प्रत्ययलक्षणं न भवतीति वक्तव्यम्॥ वाक् च स्रक् च त्वक् च वाक्स्रक्त्वचम्।

(आक्षेपभाष्यम्)

इहाभूवन्निति प्रत्ययलक्षणेन जुस्भावः प्राप्नोति॥

(४६४ समाधानवार्तिकम्॥८॥)

॥*॥ सिचि जुसोऽप्रसङ्ग आकारप्रकरणात्॥*॥

(भाष्यम्)

सिचि सिञ्निमित्तस्य जुसोऽप्रसङ्गः॥

किं कारणम्?॥

'आकारप्रकरणात्'। 'आतः' इत्येतन्नियमार्थं भविष्यति-आत एव च सिज्लुगन्तात्, नान्यस्मात्सिज्लुगन्तादिति॥

(आक्षेपभाष्यम्)

इह-इति युष्मत्पुत्रो ददाति, इत्यस्मत्पुत्रो ददातीत्यत्र प्रत्ययलक्षणेन युष्मदस्मदोः 'षष्ठीचतुर्थीद्वितीयास्थयोर्वान्नावौ' इति वान्नादयः प्राप्नुवन्ति।

(४६५ समाधानवार्तिकम्॥९॥)

॥*॥ युष्मदस्मदोः स्थग्रहणात्॥*॥

(भाष्यम्)

स्थग्रहणं तत्र क्रियते, तच्छ्रूयमाणविभक्तिविशेषणं विज्ञास्यते॥

(समाधानबाधकभाष्यम्)

अस्त्यन्यत्स्थग्रहणस्य प्रयोजनम्॥

किम्?॥

सविभक्तिकस्य वान्नावादयो यथा स्युरिति॥

(समाधानसाधकभाष्यम्)

नैतदस्ति प्रयोजनम्। पदस्येति वर्तते। विभक्त्यन्तं च पदम्। तत्राऽन्तरेणापि स्थग्रहणं सविभक्तिकस्यैव भविष्यति॥

(समाधानबाधकभाष्यम्)

भवेत्सिद्धम्-यत्र विभक्त्यन्तं पदम्। यत्र तु खलु विभक्तौ पदं तत्र न सिध्यति-ग्रामो वां दीयते, जनपदो वां दीयते, ग्रामो नौ दीयते, जनपदो नौ दीयते॥

(समाधानसाधकभाष्यम्)

सर्वग्रहणमपि प्रकृतमनुवर्तते। तेन सविभक्तिकस्यैव भविष्यति॥

(आक्षेपभाष्यम्)

इह- चक्षुष्कामं याजयांचकारेति 'तिङ्ङतिङ्' इति तस्य च निघातस्तस्माच्चानिघातः प्राप्नोति॥

(४६६ समाधानवार्तिकम्॥१०॥)

॥*॥ आमि लिलोपात्तस्य चानिघातस्तस्माच्च निघातः॥*॥

(भाष्यम्)

आमि लिलोपात्तस्य चानिघातः, तस्माच्च निघातः सिद्धो भविष्यति॥

(अङ्गपदवाच्यार्थनिरूपणाधिकरणम्)

(४६७ आक्षेपवार्तिकम्॥११॥)

॥*॥ अङ्गाधिकार इटो विधिप्रतिषेधौ॥*॥

(भाष्यम्)

अङ्गाधिकारे इटो विधिप्रतिषेधौ न सिध्यतः॥ जिगमिष, संविवृत्स। अङ्गस्येतीटो विधिप्रतिषेधौ न प्राप्नुतः॥

(४६८ आक्षेपवार्तिकम्॥१२॥)

॥*॥ क्रमेर्दीर्घत्वं च॥*॥

(प्रश्नभाष्यम्)

किं च?॥

(एकदेशिसमाधानभाष्यम्)

इटश्च विधिप्रतिषेधौ।

(सिद्धान्तिभाष्यम्)

नेत्याह। अदेशेऽयं चः पठितः। क्रमेश्च दीर्घत्वम्। उत्क्राम संक्रामेति॥

(अङ्गाधिकारपरत्वदूषणोपसंहारभाष्यम्)

इह किंचिदङ्गाधिकारे लुमता लुप्ते प्रत्ययलक्षणे भवति, किंचिच्चान्यत्र न भवति॥

(न्यासान्तरेण दूषणोद्धाराधिकरणम्)

यदि पुनः-

(४६९ न्यासान्तरसाधकभाष्यम्)

॥*॥ न लुमता तस्मिन्॥*॥

इत्युच्येत॥

(आक्षेपभाष्यम्)

अथ न 'न लुमता तस्मिन्' इत्युच्यमाने किं सिद्धमेतद्भवति-इटो विधिप्रतिषेधौ, क्रमेर्दीर्घत्वं च॥

(समाधानभाष्यम्)

बाढं सिद्धम्। न इटो विधिप्रतिषेधौ परस्मैपदेष्वित्युच्यते॥

कथं तर्हि?॥

सकारादाविति। तद्विशेषणं परस्मैपदग्रहणम्।

न खल्वपि क्रमेर्दीर्घत्वं परस्मैपदेष्वित्युच्यते॥

कथं तर्हि?॥

शितीति। तद्विशेषणं परस्मैपदग्रहणम्॥

(४७० आक्षेपवार्तिकम्॥१४॥)

॥*॥ न लुमता तस्मिन्निति चेद्धनिणिङादेशास्तलोपे॥*॥

(भाष्यम्)

न लुमता तस्मिन्निति चेद्धनिणिङादेशास्तलोपे न सिध्यन्ति॥ अवधि भवता दस्युः। अगायि भवता ग्रामः। अध्यगायि भवताऽनुवाकः। तलोपे कृते लुङीति हनिणिङादेशा न प्राप्नुवन्ति॥

(समाधानभाष्यम्)

नैष दोषः। न लुङीति हनिणिङादेशा उच्यन्ते॥

किं तर्हि?॥

आर्धधातुक इति। तद्विशेषणं लुङ्ग्रहणम्॥

(आक्षेपभाष्यम्)

इह च- सर्वस्तोमः, सर्वपृष्टः, 'सर्वस्य सुपि' इत्याद्युदात्तत्वं न प्राप्नोति॥

(एकदेशिसमाधानभाष्यम्)

तच्चापि वक्तव्यम्॥

(सिद्धान्तिसमाधानभाष्यम्)

न वक्तव्यम्। 'न लुमताङ्गस्य' इत्येव सिद्धम्।

कथम्?॥

न लुमता लुप्तेऽङ्गाधिकारः प्रतिनिर्दिश्यते॥

किं तर्हि?॥

योऽसौ लुमता लुप्यते तस्मिन् यदङ्गं तस्य यत्कार्यं तन्न भवति॥

(आक्षेपभाष्यम्)

एवमपि-सर्वस्वरो न सिध्यति॥

(समाधानभाष्यम्)

कर्तव्योऽत्र यत्नः। न लुमताङ्गस्य॥६३॥

(५८ उपधासंज्ञासूत्रम्॥१।१।९ आ. ५ सू.॥)

अलोऽन्त्यात्पूर्व उपधा॥१।१।६५॥

(अल इत्यस्य पञ्चम्यन्तत्वनिर्णयाधिकरणम्)

(आक्षेपभाष्यम्)

किमिदमल्ग्रहणमन्त्यविशेषणम्?॥

(इष्टापत्तिभाष्यम्)

एवं भवितुमर्हति॥

(आक्षेपभाष्यम्)

॥*॥ उपधासंज्ञायामल्ग्रहणमन्त्यनिर्देशश्चेत्संघातप्रतिषेधः॥१॥*॥

(भाष्यम्)

उपधासंज्ञायामल्ग्रहणमन्त्यनिर्देशश्चेत्संघातस्य प्रतिषेधो वक्तव्यः॥ संघातस्योपधासंज्ञा प्राप्नोति॥

तत्र को दोषः?।

'शास इदङ्हलोः' शिष्टः, शिष्टवान्। संघातस्येत्त्वं प्राप्नोति॥

(प्रथमान्तपक्षाभ्युपगमभाष्यम्)

यदि पुनरलन्त्यादित्युच्यते॥

(प्रथमान्तपक्षे दूषणभाष्यम्)

एवमप्यन्त्योऽविशेषितो भवति॥

तत्र को दोषः?॥

संघातादपि पूर्वस्योपधासंज्ञा प्रसज्येत॥

तत्र को दोषः?॥

'शास इदङ्हलोः' शिष्टः, शिष्टवान्। शकारस्येत्त्वं प्रसज्येत॥

सूत्रं च भिद्यते॥

(सिद्धान्तभाष्यम्)

यथान्यासमेवास्तु॥

(आक्षेपस्मारणभाष्यम्)

ननु चोक्तम्-*उपधासंज्ञायामल्ग्रहणमन्त्यनिर्देशश्चेत् संघातप्रतिषेधः* इति॥

(परिहारभाष्यम्)

नैष दोषः॥

(४७२ समाधानवार्तिकम्॥२॥)

॥*॥ अन्त्यविज्ञानात्सिद्धम्॥*॥

(भाष्यम्)

सिद्धमेतत्॥

कथम्?॥

अलोऽन्त्यस्य विधयो भवन्तीत्यन्त्यस्य भविष्यति॥

(४७३ समाधानबाधकवार्तिकम्॥३॥)

॥अन्त्यविज्ञानात् सिद्धमिति चेन्नानर्थकेऽलोऽन्त्यविधिरनभ्यासविकारे॥

(भाष्यम्)

अन्त्यविज्ञानात् सिद्धमिति चेत्। तन्न॥

किं कारणम्?॥

'नानर्थकेऽलोऽन्त्यविधिरनभ्यासविकारे'॥

अनर्थकेऽलोन्त्यविधिर्नेत्येषा परिभाषा कर्तव्या॥

किमविशेषेण?॥

नेत्याह। अनभ्यासविकारे-अभ्यासविकारान् वर्जयित्वा। 'भृञामित्' 'अर्तिपिपर्त्योश्च' इति॥

(प्रयोजनजिज्ञासाभाष्यम्)

कान्येतस्याः परिभाषायाः प्रयोजनानि?।

(४७४ परिभाषाप्रयोजनवार्तिकम्॥४॥)

॥*॥ प्रयोजनमव्यक्तानुकरणस्यात इतौ॥*॥

'अव्यक्तानुकरणस्यात इतौ' इत्यन्त्यस्य प्राप्नोति। अनर्थकेऽलोन्त्यविधिर्न न भवतीति न दोषो भवति॥

(प्रयोजननिराकरणभाष्यम्)

नैतदस्ति प्रयोजनम्। आचार्यप्रवृत्तिर्ज्ञापयति-नान्त्यस्य पररूपं भवतीति। यदयम्-'नाम्रेडितस्यान्त्यस्य तु वा' इत्याह॥

(४७५ प्रयोजनवार्तिकम्॥५॥)

॥*॥४७५ घ्वसोरेद्धावभ्यासलोपश्च॥*॥

(भाष्यम्)

ध्वसोरेद्धावभ्यासलोपश्चेत्यन्त्यस्य प्राप्नोति। अनर्थकेऽलोऽन्त्यविधिर्नेति न दोषो भवति॥

(प्रयोजननिरारणभाष्यम्)

एतदपि नास्ति प्रयोजनम्। पुनर्लोपवचनसामर्थ्यात्सर्वस्य भविष्यति॥

(निराकरणयुक्त्यन्तरैकदेशिभाष्यम्)

अथवा-शिल्लोपः करिष्यते। स 'शित्सर्वस्य' इति सर्वादेशो भविष्यति॥

(आक्षेपभाष्यम्)

स तर्हि शकारः कर्तव्यः॥

(समाधानभाष्यम्)

न कर्तव्यः॥ क्रियते न्यास एव द्विशकारको निर्देशः'-ध्वसोरेद्धावभ्यासलोपश्च' इति॥

(४७६ प्रयोजनवार्तिकम्॥६॥)

॥*॥ आपि लोपोऽकोऽनचि॥*॥

(न्यासान्तरत्वशङ्कानिराकरणभाष्यम्)

तिष्ठति सूत्रम् अन्यथा व्याख्यायते॥

(वार्तिकव्याख्याभाष्यम्)

आपि हलि लोप इत्यन्त्यस्य प्राप्नोति। अनर्थकेऽलोऽन्त्यविधिर्नेति न दोषो भवति॥

(प्रयोजननिराकरणभाष्यम्)

एतदपि नास्ति प्रयोजनम्। अन एव लोपं वक्ष्यामि॥

(गौरवाक्षेपभाष्यम्)

तदनो ग्रहणं कर्तव्यम्?॥

(गौरवनिराकरणभाष्यम्)

न कर्तव्यम्।

प्रकृतमनुवर्तते।

क्व प्रकृतम्?।

'अनाप्यकः' इति॥

(अनुवृत्तिबाधकभाष्यम्)

तद्वै प्रथमानिर्दिष्टम्, षष्ठीनिर्दिष्टेन चेहार्थः॥

(अनुवृत्तिसाधकभाष्यम्)

हलीत्येषा सप्तमी अन्निति प्रथमायाः षष्ठीं प्रकल्पयिष्यति-'तस्मिन्निति निदिष्टे पूर्वस्य' इति॥

(४७७ प्रयोजनवार्तिकम्॥७॥)

॥*॥ अत्र लोपोऽभ्यासस्य॥*॥

(भाष्यम्)

अन्त्यस्य प्राप्नोति। 'नानर्थकेऽलोऽन्त्यविधिः' इति न दोषो भवति।

(प्रयोजननिराकरणभाष्यम्)

एतदपि नास्ति प्रयोजनम्। अत्र ग्रहणसामर्थ्यात्सर्वस्य भविष्यति॥

(प्रयोजनसाधकभाष्यम्)

अस्त्यनदत्रग्रहणस्य प्रयोजनम्।

किम्?।

सन्नधिकारोऽपेक्ष्यते। इह मा भूत्-दधौ ददौ॥

(प्रयोजनबाधकभाष्यम्)

अन्तरेणाप्यत्रग्रहणं सन्नधिकारमपेक्षिष्यामहे॥

(प्रयोजनसाधकभाष्यम्)

संस्तर्हि सकारादिरपेक्ष्यते-सनि सकारादाविति। इह मा भूत्-जिज्ञापयिषतीति॥

(प्रयोजनबाधकभाष्यम्)

अन्तरेणाप्यत्रग्रहणं सनं सकारादिमपेक्षिष्यामहे॥

(प्रयोजनसाधकभाष्यम्)

प्रकृतयस्तर्ह्यपेक्ष्यन्ते-एतासां प्रकृतीनां लोपो यथा स्यात्। इह मा भूत्-पिपक्षति, यियक्षति॥

(प्रयोजनबाधकभाष्यम्)

अन्तरेणाप्यत्रग्रहणमेताः प्रकृतीरपेक्षिष्यामहे॥

(प्रयोजनसाधकभाष्यम्)

विषयस्तर्ह्यपेक्ष्यते-'मुचोऽकर्मकस्य गुणो वा' इति। इह मा भूत्-मुमुक्षति गामिति॥

(प्रयोजनबाधकभाष्यम्)

अन्तरेणाप्यत्रग्रहणमेतं विषयमपेक्षिष्यामहे॥

कथम्?॥

अकर्मकस्येत्युच्यते, तेन यत्रैवायं मुचिरकर्मकस्तत्रैव भविष्यति॥ तस्मान्नार्थोऽनया परिभाषया-नानर्थकेऽलोऽन्त्यविधिरिति॥

(४७८ न्यासान्तरवार्तिकम्॥८॥)

॥*॥ अलोऽन्त्यात् पूर्वोऽलुपधेति वा॥*॥

(भाष्यम्)

अथवा व्यक्तमेव पठितव्यम्-अलोऽन्त्यात्पूर्वोऽलुपधासंज्ञो भवतीति॥

(आक्षेपभाष्यम्)

तर्तर्हि वक्तव्यम्?॥

(परिहारभाष्यम्)

न वक्तव्यम्?॥

(४७९ समाधानवार्तिकम्॥९॥)

॥*॥ अवचनाल्लोकविज्ञानात् सिद्धम्॥*॥

(भाष्यम्)

अन्तरेणापि वचनं लोकविज्ञानात् सिद्धमेतत्॥ तद्यथा-लोके-अमीषां ब्राह्मणानामन्त्यात्पूर्व आनीयतामित्युक्ते यथाजातीयकोऽन्त्यस्तथाजातीयकोऽन्त्यात्पूर्व आनीयते। अलोऽन्त्यात्पूर्व उपधा॥६५॥

(५९-६० परिभाषासूत्रे॥१।१।९ आ. ६-७॥ सू.॥)

तस्मिन्निति निर्दिष्टे पूर्वस्य ॥१।१।६६॥

तस्मादित्युत्तरस्य॥१।१।६७॥

(उदाहरणनिरूपणाधिकरणम्)

(आक्षेपभाष्यम्)

किमुदाहरणम्?॥

(समाधानभाष्यम्)

इह तावत्-'तस्मिन्निति निर्दिष्टे पूर्वस्य' इति 'इको यणचि', दध्यत्र-मध्वत्र॥ इह 'तस्मादित्युत्तरस्य' इति-'द्वयन्तरुपसर्गेभ्योऽप ईत्' द्वीपमन्तरीपं-समीपम्॥

(समाधानबाधकभाष्यम्)

अन्यथाजातीयकेन शब्देन निर्देशः क्रियते, अन्यथाजातीयक उदाह्रियते॥

(प्रत्याक्षेपभाष्यम्)

किं तर्ह्युदाहरणम्॥?

(प्रत्याक्षेपसमाधानभाष्यम्)

इह तावत्-'तस्मिन्निति निर्दिष्टे पूर्वस्य' इति-'तस्मिन्नणि च युष्माकास्माकौ' इति॥ 'तस्मादित्युत्तरस्य' इति-'तस्माच्छसो नः पुंसि' इति॥

(सिद्धान्तिभाष्यम्)

इदं चाप्युदाहरणम्-'इको यणचि', द्व्यन्तरुपसर्गेभ्योऽप ईद्' इति॥

कथम्?॥

सर्वनाम्नाऽयं निर्देशः क्रियते। सर्वनाम च सामान्यवाची। तत्र सामान्ये निर्दिष्टे विशेषा अप्युदाहरणानि भवन्ति॥

(आक्षेपभाष्यम्)

किं पुनः सामान्यम्, को विशेषः?॥

(समाधानभाष्यम्)

गौः सामान्यम्। कृष्णो विशेषः॥

(आक्षेपभाष्यम्)

न तर्हीदानीं कृष्णः सामान्यम्, गौर्विशेषो भवति?॥

(समाधानभाष्यम्)

भवति च॥

(आक्षेपभाष्यम्)

(समाधानभाष्यम्)

यदि तर्हि सामान्यमपि विशेषः, विशेषोऽपि सामान्यम्, सामान्यविशेषौ न प्रकल्पेते॥

(समाधानभाष्यम्)

प्रकल्पेते च॥

कथम्?॥

विवक्षातः?॥

यदाऽस्य गौः सामान्येन विवक्षितो भवति कृष्णो विशेषत्वेन, तदा गौः सामान्यम् कृष्णो विशेषः। यदाऽस्य कृष्णः सामान्येन विवक्षितो भवति गौर्विशेषत्वेन विवक्षितः, तदा कृष्णः सामान्यम्, गौर्विशेषः।

(दृष्टान्तान्तरभाष्यम्)

अपर आह-'प्रकल्पेते च'

कथम्?॥

पितापुत्रवत्। तद्यथा-स एव कञ्चित्प्रति पिता भवति, कञ्चित्प्रति पुत्रो भवति। एवमिहापि स एव कञ्चित्प्रति सामान्यं, कञ्चित्प्रति विशेषः। एते खल्वपि नैर्देशिकानां वार्त्ततरका भवन्ति, ये सर्वनाम्ना निर्देशाः क्रियन्ते। एतैर्हि बहुतरकं व्याप्यते।

(आक्षेपभाष्यम्)

अथ किमर्थमुपसर्गेण निर्देशः क्रियते?॥

(समाधानभाष्यम्)

शब्दे सप्तम्या निर्दिष्टे पूर्वस्य कार्यं यथा स्यात्॥ अर्थे मा भूत्-जनपदे, अतिशायन इति॥

(आक्षेपभाष्यम्)

किं गतमेतदुपसर्गेण, आहोस्विच्छब्दाधिक्यादर्थाधिक्यम्॥

(समाधानभाष्यम्)

गतमित्याह॥

कथम्?॥

निरयं बहिर्भावे वर्तते। तद्यथा-निष्क्रान्तो देशाद्-निर्देशः, बहिर्देश इति गम्यते। शब्दश्च शब्दाद्बहिर्भूत्। अर्थोऽबहिर्भूतः॥

(आक्षेपभाष्यम्)

अथ निर्दिष्टग्रहणं किमर्थम्?।

(४८० समाधानवार्तिकम्॥१॥)

॥*॥ निर्दिष्टग्रहणमानन्तर्यार्थम्॥*॥

(भाष्यम्)

निर्दिष्टग्रहणं क्रियते। आनन्तर्यमात्रे आनन्तर्यार्थम्। कार्यं यथा स्यात्-'इको यणचि' दध्यत्र-मध्वत्र। इह मा भूत्-समिधौ समिधः, दृषदौ-दृषदः॥

(सूत्रस्य नियमार्थताधिकरणम्)

(आक्षेपभाष्यम्)

किमर्थं पुनरिदमुच्यते?॥

(४८१ समाधानवार्तिकम्॥२॥)

॥*॥ तस्मिँस्तस्मादिति पूर्वोत्तरयोर्योगाविशेषान्नियमार्थं वचनं दध्युदकं पचत्योदनम्॥*॥

(भाष्यम्)

तस्मिंस्तस्मादिति पूर्वोत्तरयोर्योगयोरविशेषान्नियमार्थोऽयमारम्भः। ग्रामे देवदत्तः, पूर्वः पर इति संदेहः। ग्रामाद्देवदत्तः, पूर्वः पर इति संदेहः। एवमिहापि-दध्युदकम्। पचत्योदनम्॥ 'इको यणचि' इति-उभाविकौ, उभावचौ। अचि पूर्वस्य, अचि परस्येति संदेहः। 'तिङ्ङतिङः' इति-अतिङः पूर्वस्य, अतिङः परस्येति संदेहः॥ इष्यते चाचि पूर्वस्य स्याद्, अतिङश्च परस्येति॥ तच्चान्तरेण वचनं न सिध्यतीति। नियमार्थं वचनम् एवमर्थमिदमुच्यते॥

(काकुभाष्यम्)

अस्ति प्रयोजनमेतत्?॥

(समाधानभाष्यम्)

किं तर्हीति?॥

(उभयनिर्देशे पञ्चमीनिर्देशबलीयस्त्वाधिकरणम्)

(आक्षेपभाष्यम्)

अथ यत्रोभयं निर्दिश्यते, किं तत्र पूर्वस्य कार्यं भवति। आहोस्वित् परस्येति?॥

(४८२ समाधानवार्तिकम्॥३॥)

॥*॥ उभयनिर्देशे विप्रतिषेधात्पञ्चमीनिर्देशः॥*॥

(भाष्यम्)

उभयनिर्देशे विप्रतिषेधात्पञ्चमीनिर्देशो भविष्यति॥

(भाष्यम्)

किं प्रयोजनम्?॥

(४८३ प्रयोजनवार्तिकम्॥४॥)

॥*॥ प्रयोजनमतो लसार्वधातुकानुदात्तत्वे॥*॥

(भाष्यम्)

वक्ष्यति-*तास्यादिभ्योऽनुदात्तत्वे सप्तमीनिर्देशोऽभ्यस्तसिजर्थः*इति। तस्मिन् क्रियमाणे तास्यादिभ्यः परस्य लसार्वधातुकस्य, लसार्वधातुके परतस्तास्यादीनामिति संदेहः॥ तास्यादिभ्यः परस्य लसार्वधातुकस्य॥

(४८४ प्रयोजनवार्तिकम्॥५॥)

॥*॥ बहोरिष्ठादीनामादिलोपे॥*॥

(भाष्यम्)

बहोरुत्तरेषामिष्टेमेयसाम्, इष्ठेमेयःसु परतो बहोरिति संदेहः॥ बहोरुत्तरेषामिष्ठेमेयसाम्॥

(४८५ प्रयोजनवार्तिकम्॥६॥)

॥*॥ गोतो णित्॥*॥

गोतः परस्य सर्वनामस्थानस्य, सर्वनामस्थाने परतो गोत इति संदेहः॥ गोतः परस्य सर्वनामस्थानस्य॥

(४८६ प्रयोजनवार्तिकम्॥७॥)

॥*॥ रुदादिभ्यः सार्वधातुके॥*॥

(भाष्यम्)

रुदादिभ्यः परस्य सार्वधातुकस्य, सार्वधातुके परतो रुदादीनामिति संदेहः॥ रुदादिभ्यः परस्य सार्वधातुकस्य॥

(४८७ प्रयोजनवार्तिकम्॥८॥)

॥*॥ आने मुगीदासः॥*॥

(भाष्यम्)

आस उत्तरस्यानस्य, आने परत आस इति संदेहः॥ आस उत्तरस्यानस्य॥

(४८८ प्रयोजनवार्तिकम्॥९॥)

॥*॥ आमि सर्वनाम्नः सुट्॥*॥

(भाष्यम्)

सर्वनाम्न उत्तरस्यामः, आमि परतः सर्वनाम्न इति संदेहः॥ सर्वनाम्न उत्तरस्यामः॥

(४८९ प्रयोजनवार्तिकम्॥१०॥)

॥*॥ घेर्ङित्याण् नद्याः॥*॥

(भाष्यम्)

नद्या उत्तरेषां ङिताम्, ङित्सु परतो नद्या इति संदेहः॥ नद्या उत्तरेषां ङिताम्॥

(४९० प्रयोजनवार्तिकम्॥११॥)

॥*॥ याडापः॥*॥

(भाष्यम्)

आप उत्तरस्य ङितः, ङिति परत आप इति संदेहः॥ आप उत्तरस्य ङितः॥

(४९१ प्रयोजनवार्तिकम्॥१२॥)

॥*॥ ङमो ह्रस्वादचि ङमुण् नित्यम्॥*॥

ङम उत्तरस्याऽचः, अचि परतो ङमः इति संदेहः॥ ङम उत्तरस्याचः॥

(४९२ समाधानहेत्वनुपपत्तिवार्तिकम्॥१३॥)

॥*॥ विभक्तिविशेषनिर्देशानवकाशत्वादविप्रतिषेधः॥*॥

(भाष्यम्)

विभक्तिविशेषनिर्देशस्यानवकाशत्वादयुक्तोऽयं प्रतिषेधः। सर्वत्रैवात्र कृतसामर्थ्या सप्तमी, अकृतसामर्थ्या पञ्चमीति कृत्वा पञ्चमीनिर्देशो भविष्यति॥

(४९३ एकदेशिसमाधानवार्तिकम्॥१४॥)

॥*॥ यथार्थं वा षष्ठीनिर्देशः॥*॥

(भाष्यम्)

यथार्थं वा षष्ठीनिर्देशः कर्तव्यः। यत्र पूर्वस्य कार्यमिष्यते तत्र पूर्वस्य षष्ठी कर्तव्या। यत्र परस्य कार्यमिष्यते तत्र परस्य षष्ठी कर्तव्या॥

(आक्षेपभाष्यम्)

स तर्हि तथा निर्देशः कर्तव्यः॥

(आक्षेपनिरासैकदेशिभाष्यम्)

न कर्तव्यः। अनेनैव प्रक्लृप्तिर्भविष्यति-तस्मिन्निति निर्दिष्टे पूर्वस्य षष्ठी, तस्मादित्युत्तरस्य षष्ठीति॥

(आक्षेपभाष्यम्)

तत्तर्हि षष्ठीग्रहणं कर्तव्यम्॥

(समाधानभाष्यम्)

न कर्तव्यम्। प्रकृतनुवर्तते॥

क्व प्रकृतम्?।

'षष्ठी स्थानेयोगा' इति॥

(४९४ प्रकल्पपक्षे दूषणवार्तिकम्॥१५॥)

॥*॥ प्रकल्पकमिति चेन्नियमाभावः॥*॥

(भाष्यम्)

प्रकल्पकमिति चेन्नियमस्याभावः। उक्तं चैतत्-नियमार्थोऽयमारम्भ इति॥

(दूषणान्तरभाष्यम्)

प्रत्ययविधौ खल्वपि पञ्चम्यः प्रकल्पिकाः स्यु॥

तत्र को दोषः?॥

'गुप्तिज्किद्भयः सन्' गुप्तिज्किद्भ्य इत्येषा पञ्चमी सन्निति प्रथमायाः षष्ठीं प्रकल्पयेत्-'तस्मादित्युत्तरस्य' इति॥

(दूषणान्तरबाधकभाष्यम्)

अस्तु। न कश्चिदन्य आदेशः प्रतिनिर्दिश्यते। तत्राऽन्तर्यतः सनः सन्नेव भविष्यति॥

(दूषणान्तरसाधकभाष्यम्)

नैवं शक्यम्। इत्संज्ञा न प्रकल्पेत॥ उपदेश इतीत्संज्ञोच्यते॥

(४९५ प्रकल्पकपक्षे आक्षेपान्तरवार्तिकम्॥१६॥)

॥*॥ प्रकृतिविकाराव्यवस्था च॥*॥

(भाष्यम्)

प्रकृतिविकारयोश्च व्यवस्था न प्रकल्पते। 'इको यणचि' अचीत्येषा सप्तमी यणिति प्रथमायाः षष्ठीं प्रकल्पयेत्-'तस्मिन्निति निर्दिष्टे पूर्वस्य' इति॥

(४९६ प्रकल्पकपक्षे आक्षेपान्तरवार्तिकम्॥१७॥)

॥*॥ सप्तमीपञ्चम्योश्च भावादुभयत्र षष्ठीप्रक्लृप्तिस्तत्रोभयकार्यप्रसङ्गः॥*॥

(भाष्यम्)

सप्तमीपञ्चम्योश्च भावादुभयत्रैव षष्ठी प्राप्नोति। तास्यादिभ्य इत्येषा पञ्चमी लसार्वधातुक इत्यस्याः सप्तम्याः षष्ठीं प्रकल्पयेत्-'तस्मादित्युत्तरस्य' इति। तथा लसार्वधातुक इत्येषा सप्तमी तास्यादिभ्य इति पञ्चम्याः षष्ठीं प्रकल्पयेत्-'तस्मिन्निति निर्दिष्टे पूर्वस्य' इति॥

तत्र को दोषः?॥

तत्रोभयकार्यप्रसङ्गः॥

तत्र उभयोः कार्यं प्राप्नोति॥

(प्रकरणकपक्षे दूषणोद्धारभाष्यम्)

नैष दोषः। यत्तावदुच्यते-*प्रकल्पकमिति चेन्नियमाभावः* इति। मा भून्नियमः॥ सप्तमीनिर्दिष्टे पूर्वस्य षष्ठी प्रकल्पते, पञ्चमीनिर्दिष्टे परस्य। यावता सप्तमीनिर्दिष्टे पूर्वस्य षष्ठी प्रकलप्यते, पञ्चमीनिर्दिष्टे परस्य। नोत्सहते सप्तमीनिर्दिष्टे परस्य कार्यं भवितुं, नापि पञ्चमीनिर्दिष्टे पूर्वस्य॥

(आक्षेपबाधकभाष्यम्)

यदप्युच्यते-'प्रत्ययविधौ पञ्चम्यः प्रकल्पिकाः स्युः' इति॥ सन्तु प्रकल्पिकाः॥

(आक्षेपस्मारणभाष्यम्)

ननु चोक्तम्-'गुप्तिज्किद्भ्यः सन्' इत्येषा पञ्चमी सन्निति प्रथमायाः षष्ठीं प्रकल्पयेत्-'तस्मादित्युत्तरस्य' इति॥

(परिहारस्मारणभाष्यम्)

परिहृतमेतत्-न कश्चिदन्य आदेशः प्रतिनिर्दिश्यते। तत्रान्तर्यतः सनः सन्नेव भविष्यति-इति॥

(परिहारबाधकभाष्यम्)

ननु चोक्तम्-नैवं शक्यमित्संज्ञा न प्रकल्पेत। उपदेश इति इत्संज्ञोच्यते-इति॥

(परिहारबाधानुपपत्तिभाष्यम्)

स्यादेष दोषो यदीत्संज्ञा आदेशं प्रतीक्षेत। तत्र खलु कृतायामित्संज्ञायां लोपे च कृते आदेशो भविष्यति। उपदेश इति हीत्संज्ञोच्यते॥

(परिहारान्तरभाष्यम्)

अथवा नानुत्पन्ने सनि प्रक्लृप्त्या भवितव्यम्। यदा चोत्पन्नः सन्, तदा कृतसामर्थ्या पञ्चमीति कृत्वा प्रक्लृप्तिर्न भविष्यति॥

(आक्षेपान्तरबाधकभाष्यम्)

यदप्युच्यते-*प्रकृतिविकाराव्यवस्था च *-इति॥

अत्रापि प्रकृतौ षष्ठी इक इति, विकृतौ प्रथमा यणिति। यत्र च नाम सौत्री षष्ठी नास्ति, तत्र प्रक्लृप्त्या भवितव्यम्॥

(परिहारान्तरभाष्यम्)

अथवाऽस्तु तावदिको यणिति यत्र नाम सौत्री षष्ठी॥ यदि चेदानीमचीत्येषा सप्तमी यणिति प्रथमायाः षष्ठी प्रकल्पयेत्-'तस्मिन्निति निर्दिष्टे पूर्वस्य' इति॥

अस्तु न कश्चिदन्य आदेशः प्रतिनिर्दिश्यते। तत्राऽऽन्तर्यतो यणो यणेव भविष्यति॥

(आक्षेपान्तरबाधकभाष्यम्)

यदप्युच्यते-*सप्तमीपञ्चम्योश्च भावादुभयत्र षष्ठीप्रक्लृप्तिस्तत्रोभयकार्यप्रसङ्गः*- इति॥ नैष दोषः॥ आचार्यप्रवृत्तिर्ज्ञापयति-'नोभे युगपत्प्रकल्पिके भवतः' इति॥ यदयम् 'एकः पूर्वपरयोः' इति पूर्वपरग्रहणं करोति॥ तस्मिन्निति निर्दिष्टे पूर्वस्य॥ तस्मादित्युत्तरस्य॥६७॥

(६१ संज्ञासूत्रम्॥१।१।९ आ.।८ मं सू.॥)

स्वं रूपं शब्दस्याशब्दसंज्ञा॥१।१।६८॥

(अर्थवत्परिभाषासाधनाधिकरणम्)

(आक्षेपभाष्यम्)

रूपग्रहणं किमर्थम्। न 'स्वं शब्दस्याशब्दसंज्ञा' भवतीत्येव रूपं शब्दस्य संज्ञा भविष्यति। न ह्यन्यत्स्वं शब्दस्यास्त्यन्यदतो रूपात्?॥

(समाधानभाष्यम्)

एवं तर्हि सिद्धे सति यद्रूपग्रहणं करोति तज्ज्ञापयत्याचार्यः-अस्त्यन्यद्रूपात्स्वं शब्दस्येति॥

किं पुनस्तत्?॥

अर्थः॥

किमेतस्य ज्ञापने प्रयोजनम्?॥

'अर्थवद्ग्रहणे नानर्थकस्य'

इत्येषा परिभाषा न कर्तव्या भवति॥

(सूत्रप्रयोजनाधिकरणम्)

(आक्षेपभाष्यम्)

किमर्थ पुनरिदमुच्यते?।

(४९७ समाधानवार्तिकम्॥१॥)

॥*॥ शब्देनार्थगतेरर्थे कार्यस्यासंभवात् तद्वाचिनः संज्ञाप्रतिषेधार्थं स्वंरूपवचनम्॥*॥

(भाष्यम्)

शब्देनोच्चारितेनार्थो गम्यते-गामानय दध्यशानेति, अर्थ आनीयते अर्थश्च भुज्यते। अर्थे कार्यस्यासंभवाद्, इह च व्याकरणे अर्थे कार्यस्यासंभवः'-अग्नेर्ढग्' इति न शक्यतेऽङ्गारेभ्यः परो ढक् कर्तुम्। शब्देनार्थगतेरर्थे कार्यस्यासंभवाद् यावन्तस्तद्वाचिनः शब्दास्तावद्भ्यः सर्वेभ्यः उत्पत्तिः प्राप्नोति। इष्यते च-तस्मादेव स्यादिति। तच्चान्तरेण यत्नं न सिध्यतीति तद्वाचिनः संज्ञाप्रतिषेधार्थं स्वंरूपवचनम्। एवमर्थमिदमुच्यते॥

(४९८ समाधाननिराकरणवार्तिकम्॥)

॥*॥ न वा शब्दपूर्वको ह्यर्थे संप्रत्ययस्तस्मादर्थनिवृत्तिः॥*॥

(भाष्यम्)

न वा एतत्प्रयोजनमस्ति॥

किं कारणम्?॥

शब्दपूर्वको ह्यर्थे संप्रत्ययः। आतश्च शब्दपूर्वकः। योऽपि ह्यसावाहूयते नाम्ना। नाम च यदानेन नोपलब्धं भवति, तदा पृच्छति-'किं भवानाह' इति, शब्दपूर्वकश्चास्य संप्रत्ययः।॥ इह च व्याकरणे शब्दे कार्यस्य संभवः, अर्थेऽसंभवः। तस्मादर्थनिवृत्तिः। तस्मादर्थस्य निवृत्तिर्भविष्यति॥

(प्रयोजनभाष्यम्)

इदं तर्हि प्रयोजनम्-अशब्दसंज्ञेति वक्ष्यामीति। इह मा भूत्-'दाधा घ्वदाप्' 'तरसमपौ घः' इति॥

(४९९ प्रयोजननिराकरणवार्तिकम्॥३॥)

॥*॥ शब्दसंज्ञाप्रतिषेधानर्थक्यं वचनप्रामाण्यात्॥*॥

(भाष्यम्)

शब्दसंज्ञायाः प्रतिषेधोऽनर्थकः॥

शब्दसंज्ञायां स्वरूपविधिः कस्मान्न भवति?॥

वचनप्रामाण्यात्। शब्दसंज्ञावचनसामार्थ्यात्॥

(प्रयोजनसाधकभाष्यम्)

ननु च वचनप्रामाण्यात् संज्ञिनां संप्रत्ययः स्यात्, स्वरूपग्रहणाच्च संज्ञायाः॥

(प्रयोजनबाधकभाष्यम्)

एतदपि नास्ति प्रयोजनम्। आचार्यप्रवृत्तिर्ज्ञापयति-शब्दसंज्ञायां न स्वरूपविधिर्भवतीति। यदयम्-'ष्णान्ता षड्' इति षकारान्तायाः संख्यायाः षट्संज्ञां शास्ति। इतरथा हि वचनप्रामाण्याच्च नकारान्तायाः संख्यायाः संप्रत्ययः स्यात्, स्वरूपग्रहणाच्च षकारान्तायाः॥

(प्रयोजनसाधकभाष्यम्)

नैतदस्ति ज्ञापकम्। न हि षकारान्ता संज्ञास्ति॥ का तर्हि? डकारान्ता॥

(प्रयोजनबाधकभाष्यम्)

असिद्धं जश्त्वम्। तस्यासिद्धत्वात् षकारान्ता॥

(प्रयोजनभाष्यम्)

मन्त्राद्यर्थं तर्हीदं वक्तव्यम्॥ मन्त्रे, ऋचि, यजुषीति यदुच्यते, तन्मत्रशब्दे, ऋक्शब्दे, यजुःशब्दे च मा भूत्॥

(५०० प्रयोजननिराकरणवार्तिकम्॥४॥)

॥*॥ मन्त्राद्यर्थमिति चेच्छास्त्रसामर्थ्यादर्थगतेः सिद्धम्॥*॥

(भाष्यम्)

मन्त्राद्यर्थमिति चेत्। तन्न॥

किं कारणम्?॥

शास्त्रस्य सामर्थ्यादर्थस्य गतिर्भविष्यति। मन्त्रे ऋचि यजुषीति यदुच्यते, मन्त्रशब्दे ऋक्शब्दे यजुःशब्दे च तस्य कार्यस्य संभवो नास्तीति कृत्वा मन्त्रादिसहचरितो योऽर्थस्तस्य गतिर्भविष्यति, साहचर्यात्॥

(न्यूनतानिराकरणाधिकरणम्)

(५०१ आक्षेपवार्तिकम्॥५॥)

॥*॥ सितद्विशेषाणां वृक्षाद्यर्थम्॥*॥

(भाष्यम्)

सिन्निर्देशः कर्तव्यः। ततो वक्तव्यम्-'तद्विशेषाणां ग्रहणं भवति' इति॥

किं प्रयोजनम्?॥

वृक्षाद्यर्थम्। 'विभाषा वृक्षमृग-' इति-प्लक्षन्यग्रोधं प्लक्षन्यग्रोधाः॥

(५०२ आक्षेपवार्तिकम्॥६॥)

॥*॥ पित्पर्यायवचनस्य च स्वाद्यर्थम्॥*॥

(भाष्यम्)

पिन्निर्देशः कर्तव्यः। ततो वक्तव्यम्-पर्यायवचनस्य, च तद्विशेषाणां च ग्रहणं भवति स्वस्य च रूपस्येति॥

किं प्रयोजनम्?॥

स्वाद्यर्थम्। 'स्वे पुषः' स्वपोषं पुष्यति। रैपोषम्। धनपोषम्। अश्वपोषम्। गोपोषम्॥

(५०६ आक्षेपवार्तिकम्॥७॥)

॥*॥जित्पर्यायवचनस्यैव राजाद्यर्थम्॥*॥

(भाष्यम्)

जिन्निर्देशः कर्तव्यः। ततो वक्तव्यम् पर्यायवचनस्यैव ग्रहणं भवति।

किं प्रयोजनम्?॥

राजाद्यर्थं। 'सभा राजाऽमनुष्यपूर्वा'-इनसभम्, ईश्वरसभम्॥ तस्यैव न भवति-राजसभा॥ तद्विशेषाणां च न भवति-पुष्पमित्रसभा, चन्द्रगुप्तसभा॥

(५०४ आक्षेपवार्तिकम्॥८॥)

॥*॥ झित्तस्य च तद्विशेषाणां च मत्स्याद्यर्थम्॥*॥

(भाष्यम्)

झिन्निर्देशः कर्तव्यः। ततो वक्तव्यम्- तस्य च ग्रहणं भवति तद्विशेषाणां चेति॥

किं प्रयोजनम्?॥

मत्स्याद्यर्थम्?॥ 'पक्षिमत्स्यमृगान् हन्ति'-मात्सिकः॥ तद्विशेषाणाम्-शाफरिकः। शाकुलिकः। पर्यायवचनानां न भवति-अजिह्मान् हन्ति, अनिमिषान् हन्तीति॥ अस्यैकस्य पर्यायवचनस्येष्यते-मीनान् हन्ति मैनिकः॥

स्वं रूपं शब्दस्याशब्दसंज्ञा॥६८॥

(६२-ग्रहणकशास्त्रम्॥१।१।९आ. मं.सू.॥)

६२-अणुदित्सवर्णस्य चाप्रत्ययः॥६९॥

(भाव्यमानेनेति परिभाषाज्ञापनाधिकरणम्)

(जिज्ञासाभाष्यम्)

अप्रत्यय इति किमर्थम्?॥

(समाधानभाष्यम्)

'सनाशंसभिक्ष उः' 'अ सांप्रतिके॥'

(आक्षेपभाष्यम्)

अत्यल्पमिदमुच्यते-अप्रत्यय इति। 'अप्रत्ययादेशटित्किन्मितः' इति वक्तव्यम्॥ प्रत्यये-उदाहृतम्॥ आदेशे-'इदम् इश्' इतः, इह॥ टिति-लविता, लवितुम्। किति-बभूव। मिति-हे अनड्वन्॥

(टिद्ग्रहणवैयर्थ्यसाधकभाष्यम्)

टितः परिहारः-आचार्यप्रवृत्तिर्ज्ञापयति-'न टिता सवर्णानां ग्रहणं भवति' इति। यदयम्-'ग्रहोऽलिटि दीर्घत्वं शास्ति॥

(ज्ञापकत्वनिराकरणभाष्यम्)

नैतदस्ति ज्ञापकम्। नियमार्थमेतत् स्यात्-ग्रहोऽलिटि दीर्घ एवेति॥

(ज्ञापकान्तरभाष्यम्)

यत्तर्हि 'वृत्तो वा ' इति विभाषां शास्ति॥

(यौगिकत्वे पर्युदासवैयर्थ्यभाष्यम्)

सर्वेषामेष परिहारः-'भाव्यमानेन सवर्णानां ग्रहणं न' इत्येवं भविष्यति॥

(संज्ञापरत्वेऽपि पर्युदासवैयर्थ्यभाष्यम्)

प्रत्यये भूयान् परिहारः-अनभिधानात्प्रत्ययः सवर्णान् न ग्रहीष्यति। यान् हि प्रत्ययः सवर्णान् गृह्णीयाद् न तैरर्थस्याभिधानं स्यात्। अनभिधानान्न भविष्यति॥

(प्रयोजनभाष्यम्)

इदं तर्हि प्रयोजनम्-इह केचित्प्रतीयन्ते, केचित्प्रत्याय्यन्ते। ह्रस्वाः प्रतीयन्ते, दीर्घाः प्रत्याय्यन्ते। यावच्च ब्रूते-प्रत्याय्यमानेन सवर्णानां ग्रहणं नेति, तावदप्रत्यय इति॥

(आक्षेपभाष्यम्)

कं पुनर्दीर्घः सवर्णग्रहणेन गृह्णीयात्?॥

(प्रयोजनसाधकभाष्यम्)

ह्रस्वम्॥

(प्रयोजननिराकरणभाष्यम्)

यत्राधिक्यान्न ग्रहीष्यति॥

(प्रयोजनसाधकभाष्यम्)

प्लुतं तर्हि गृह्णीयात्॥

(प्रयोजननिराकरणभाष्यम्)

अनण्त्वान्न ग्रहीष्यति॥

(सिद्धान्तप्रयोजनभाष्यम्)

एवं तर्हि सिद्धे सति यद् 'अप्रत्ययः' इति प्रतिषेधं शास्ति, तज्ज्ञापयत्याचार्यो-भवत्येषा परिभाषा-'भाव्यमानेन सवर्णानां ग्रहणं न' इति॥

(अण्ग्रहणप्रयोजनाधिकरणम्)

(आक्षेपभाष्यम्)

किमर्थं पुनरिदमुच्यते?

(५०५ समाधानवार्तिकम्॥१॥)

॥*॥ अण् सवर्णस्येति स्वरानुनासिक्यकालभेदात्॥*॥

(भाष्यम्)

अण् सवर्णस्येत्युच्यते। स्वरभेदादानुनासिक्यभेदात् कालभेदाच्चाण् सवर्णान्न गृह्णीयाद्। इष्यते च ग्रहणं स्यादिति। तच्चान्तरेण यत्नं न सिध्यतीत्येवमर्थमिदमुच्यते।

(भाष्यम्)

अस्ति प्रयोजनमेतत्॥

किं तर्हीति?॥

(५०६ आक्षेपवार्तिकम्॥२॥)

॥*॥ तत्र प्रत्याहारग्रहणे सवर्णाग्रहणमनुपदेशात्॥*॥

(भाष्यम्)

तत्र प्रत्याहारग्रहणे सवर्णानां ग्रहणं न प्राप्नोति-'अकः सवर्णे दीर्घः' इति॥

किं कारणम्?॥

अनुपदेशात्। यथाजातीयकानां संज्ञा कृता तथाजातीयकानां संप्रत्यायिका स्याद्। ह्रस्वानां च क्रियते ह्रस्वानामेव संप्रत्यायिका स्याद्, दीर्घानां न स्यात्॥

(आक्षेपबाधकभाष्यम्)

ननु च ह्रस्वाः प्रतीयमाना दीर्घान् संप्रत्याययिष्यन्ति॥

(५०७ आक्षेपसाधकवार्तिकम्॥३॥)

॥*॥ ह्रस्वसंप्रत्ययादिति चेदुच्चार्यमाणशब्दसंप्रत्यायकत्वाच्छब्दस्यावचनम्॥*॥

(भाष्यम्)

ह्रस्वसंप्रत्ययादिति चेदुच्चार्यमाणः शब्दः संप्रत्ययको भवति, न संप्रतीयमानः। तद्यथा-ऋगित्युक्ते संपाठमात्रं गम्यते, नास्या अर्थो गम्यते॥

(समाधानभाष्यम्)

एवं तर्हि वर्णपाठ एवोपदेशः करिष्यते॥

(५०८ (१) समाधानबाधकवार्तिकप्रथमखण्डम्॥)

॥*॥ वर्णपाठ उपदेश इति चेदवरकालत्वात् परिभाषाया अनुपदेशः॥*॥

(भाष्यम्)

वर्णपाठ उपदेश इति चेदवरकालत्वात् परिभाषाया अनुपदेशः॥

(आक्षेपभाष्यम्)

किं परा सूत्रात् क्रियत इत्यतोऽवरकाला?।

(समाधानभाष्यम्)

नेत्याह। सर्वथाऽवरकालैव। वर्णानामुपदेशस्तावत्। उपदेशोत्तरकालेत्संज्ञा। इत्संज्ञोत्तरकाल 'आदिरन्त्येन संहेता' इति प्रत्याहारः। प्रत्याहारोत्तरकाला सवर्णसंज्ञा॥ सवर्णसंज्ञोत्तरकालम् 'अणुदित्सवर्णस्य चाप्रत्ययः' इति। सैषाऽवरकाला-उपदेशोत्तरकाला वर्णानामुत्पत्तौ निमित्तत्वाय कल्पयिष्यत इत्येतन्न॥

(५०८ (२)समाधानबाधकवार्तिकद्वितीयखण्डम्॥४॥)

॥*॥ तस्मादुपदेशः॥*॥

(भाष्यम्)

तस्मादुपदेशः कर्तव्यः॥

(अण्ग्रहणप्रत्याख्यानाधिकरणम्)

(५०९ आक्षेपवार्तिकम्॥५॥)

॥*॥ तत्रानुवृत्तिनिर्देशे सवर्णाग्रहणमनण्त्वात्॥*॥

(भाष्यम्)

तत्रानुवृत्तिनिर्देशे सवर्णानां ग्रहणं न प्राप्नोति-'अस्य च्वौ' 'यस्येति च॥

किं कारणम्?॥

अनण्त्वात्। न ह्येतेऽणो येऽनुवृत्तिनिर्देशे॥ के तर्हि?॥

येऽक्षरसमाम्नाय उपदिश्यन्ते॥

(आक्षेपबाधकभाष्यम्)

एवं तर्ह्यनण्त्वादनुवृत्तौ न, अनुपदेशाच्च प्रत्याहारे न। उच्यते चेदम्-अण् सवर्णान् गृह्णातीति। तत्र वचनाद्भविष्यति॥

(५१० आक्षेपसाधकवार्तिकम्॥६॥)

॥*॥ वचनाद्यत्र तन्नास्ति॥*॥

(भाष्यम्)

नेदं वचनाल्लभ्यम्। अस्ति ह्यन्यदेतस्य वचने प्रयोजनम्॥

किम्?॥

य एते प्रत्याहाराणामादितो वर्णास्तैः सवर्णानां ग्रहणं यथा स्यात्॥

(समाधानान्तरभाष्यम्)

एवं तर्हि-

(५११ (१) सिद्धान्तसमाधानअण्प्रत्याख्यानवार्तिकम्)

॥*॥ सवर्णेऽण्ग्रहणमपरिभाष्यमाकृतिग्रहणात्॥*॥

(भाष्यम्)

सवर्णेऽण्ग्रहणमपरिभाष्यम्॥

कुतः?॥

आकृतिग्रहणात्। अवर्णाकृतिरुपदिष्टा सर्वमवर्णकुलं ग्रहीष्यति। तथेवर्णाकृतिस्तथोवर्णाकृतिः॥

(आक्षेपभाष्यम्)

ननु चान्याऽऽकृतिरकारस्यान्याऽऽकारस्य च॥

(५११ (२) समाधानवार्तिकद्वितीयखण्डम्)

॥*॥ अनन्यत्वाच्च॥*॥

(भाष्यम्)

अनन्याकृतिरकारस्याकारस्या च ॥

(५११ (३) समाधानसाधकवार्तिकतृतीयखण्डम्॥७॥)

॥*॥ अनेकान्तो ह्यनन्यत्वकरः॥*॥

(भाष्यम्)

यो ह्यनेकान्तेन भेदो नासावन्यत्वं करोति॥ तद्यथा-न यो गोश्च गोश्च भेदः सोऽन्यत्वं करोति॥ यस्तु खलु गोश्चाश्वस्य च भेदः सोऽन्यत्वं करोति॥

(भाष्यम्)

अपर आह-

(वार्तिकपाठान्तरम्)

॥*॥ सवर्णेऽण्ग्रहणमपरिभाष्यमाकृतिग्रहणादन्यत्वम्॥*॥

(भाष्यम्)

सवर्णेऽण्ग्रहणमपरिभाष्यम्। आकृतिग्रहणादनन्यत्वं भविष्यति। अनन्याऽऽकृतिरकार-स्याकारस्य च॥

(वार्तिकपाठान्तरखण्डम्)

॥*॥ अनेकान्तो ह्यनन्यत्वकरः॥*॥

यो ह्यनेकान्तेन भेदो नासावन्यत्वं करोति। तद्यथा- न यो गोश्च गोश्च भेदः सोऽन्यत्वं करोति। यस्तु खलु गोश्चाश्वस्य च भेदः सोऽन्यत्वं करोति।

(५१२ सिद्धान्तवार्तिकम्॥८॥)

॥*॥ तद्वच्च ह्लग्रहणेषु॥*॥

एवं च कृत्वा हल्ग्रहणेषु सिद्धं भवति। 'झलो झलि' अवात्ताम् अवात्त।

यत्रैतन्नास्ति – अण् सवर्णान् गृह्णाति॥

(५१३ सिद्धान्तसाधकवार्तिकखण्डम्)

॥अनेकान्तो ह्यनन्यत्वकरः॥

(भाष्यम्)

इत्युक्तार्थम्॥

(५१४ सिद्धान्तसाधकवार्तिकम्॥१०॥)

॥*॥ द्रुतविलम्बितयोश्चानुपदेशात्॥*॥

(भाष्यम्)

द्रुतविलम्बितयोश्चानुपदेशान्मन्यामहे-'आकृतिग्रहणात् सिद्धम्' इति। यदयं कस्यांचिद् वृत्तौ वर्णानुपदिश्य सर्वत्र कृती भवति॥

(काकुभाष्यम्)

अस्ति प्रयोजनमेतत्॥

किं तर्हीति॥

(वृत्तिपृथक्त्वाधिकरणम्)

(५१५ (१) आक्षेपवार्तिकप्रथमखण्डम्॥)

॥*॥ वृत्तिपृथकत्वं नोपपद्यते॥*॥

(भाष्यम्)

वृत्तेस्तु पृथक्त्वं नोपपद्यते॥

(५१५ (२) आक्षेपवार्तिकद्वितीयखण्डम्॥११॥)

॥*॥ तस्मात्तत्र तपरनिर्देशात्सिद्धम्॥*॥

(भाष्यम्)

तस्मात्तत्र तपरनिर्देशः कर्तव्यः॥

(समाधानभाष्यम्)

न कर्तव्यः। क्रियते न्यास एव- 'अतो भिस ऐस्' इति॥ अणुदित्सवर्णस्य चाप्रत्ययः॥६९॥

(६३ तपरसंज्ञासूत्रम्॥१। १। ९ आ. १०. मं. सू.॥)

तपरस्तत्कालस्य ॥१।१।७०॥

(तत्कालपदसाधनाधिकरणम्)

(आक्षेपभाष्यम्)

अयुक्तोऽयं निर्देशस्तत्कालस्येति। तदित्यनेन कालः प्रतिनिर्दिश्यते, तदित्ययं च वर्णः। तत्रायुक्तं वर्णस्य कालेन सह सामानाधिकरण्यम्॥

(प्रत्याक्षेपभाष्यम्)

कथं तर्हि निर्देशः कर्तव्यः?।

(प्रत्याक्षेपसमाधानभाष्यम्)

तत्कालकालस्येति॥

(आक्षेपभाष्यम्)

किमिदं तत्कालकालस्येति।

(समाधानभाष्यम्)

तस्य कालस्तत्कालः, तत्कालः कालो यस्येति सोऽयं तत्कालकालस्तत्कालकालस्येति॥

(तटस्थाक्षेपभाष्यम्)

स तर्हि तथा निर्देशः कर्तव्यः॥

(सिद्धान्तिसमाधानभाष्यम्)

न कर्तव्यः। उत्तरपदलोपोऽत्र द्रष्टव्यः। तद्यथा-उष्ट्रमुखमिव मुखं यस्य सोऽयमुष्ट्रमुखः। खरमुखः। एवं तत्कालकालस्तत्कालस्तत्कालस्येति॥

(समाधानान्तरभाष्यम्)

अथवा साहचर्यात्ताच्छब्द्यं भविष्यति, कालसहचरितो वर्णोऽपि काल एव॥

(विध्यर्थत्वनिर्णयाधिकरणम्)

(आक्षेपभाष्यम्)

किं पुनरिदं नियमार्थम, आहोस्वित् प्रापकम्?॥

(प्रत्याक्षेपभाष्यम्)

कथं च नियमार्थं स्यात्? कथं वा प्रापकम्?॥

(प्रत्याक्षेपसमाधानभाष्यम्)

यद्यत्राण्ग्रहणमनुवर्तते, ततो नियमार्थम्। अथ निवृत्तम्, ततः प्रापकम्॥

(विशेषजिज्ञासाभाष्यम्)

कश्चात्र विशेषः?॥

(५१६ नियमपक्षे दूषणवार्तिकम्॥१॥)

॥*॥ तपरस्तत्कालस्येति नियमार्थमिति चेद्दीर्घग्रहणे स्वरभिन्नाग्रहणम् ॥*॥

(भाष्यम्)

'तपरस्तत्कालस्य' इति नियमार्थमिति चेद्दीर्घग्रहणे स्वरभिन्नानां ग्रहणं न प्राप्नोति॥

केषाम्?॥

उदात्तानुदात्तस्वरिता[नुनासिका]नाम्॥

(प्रापकपक्षाभ्युपगमभाष्यम्)

अस्तु तर्हि प्रापकम्॥

(५१७ प्रापकपक्षे दूषणवार्तिकम्॥२॥)

॥*॥प्रापकमिति चेद् ह्रस्वग्रहणे दीर्घप्लुतप्रतिषेधः॥*॥

(भाष्यम्)

प्रापकमिति चेद् ह्रस्वग्रहणे दीर्घप्लुतप्रतिषेधो वक्तव्यः

(समाधानभाष्यम्)

न वक्तव्यः॥

(५१८ समाधानवार्तिकम्॥३॥)

॥*॥ विप्रतिषेधात् सिद्धम्॥*॥

(भाष्यम्)

अण् सवर्णान् गृह्णातीत्येतदस्तु, 'तपरस्तत्कालस्य' इति वा। 'तपरस्तत्कालस्य' इत्येतद्भवति विप्रतिषेधेन। अण् सवर्णान् गृह्णातीत्यस्यावकाशः-ह्रस्वा अतपरा अणः। 'तपरस्तत्कालस्य' इत्यस्यावकाशः-दीर्घास्तपराः। ह्रस्वेषु तपरेषूभयं प्राप्नोति। 'तपरस्तत्कालस्य' इत्येतद्भवति विप्रतिषेधेन॥

(स्फोटस्यैकत्वनिरूपणाधिकरणम्)

(भाष्यम्)

यद्येवम्-

(५१९ आक्षेपवार्तिकम्॥४॥)

॥*॥ द्रुतायां तपरकरणे मध्यमविलम्बितयोरुपसंख्यानं कालभेदात्॥*॥

(भाष्यम्)

द्रुतायां तपरकरणे मध्यमविलम्बितयोरुपसंख्यानं कर्तव्यम्। तथा मध्यमायां द्रुतविलम्बितयोः। तथा विलम्बितायां द्रुतमभ्यमयोः। किं पुनः कारणं न सिध्यति?॥

कालभेदात्। ये हि द्रुतायां वृत्तौ वर्णास्त्रिभागाधिकास्ते मध्यमायाम्। ये च मध्यमायां वर्णास्त्रिभागाधिकास्ते विलम्बितायाम्॥

(५२० (१) समाधानवार्तिकप्रथमखण्डम्॥)

॥*॥ सिद्धं त्ववस्थिता वर्णा वक्तुश्चिराचिरवचनाद् वृत्तयो विशिष्यन्ते॥॥*॥

(भाष्यम्)

सिद्धमेतत्॥

कथम्?॥

अवस्थिता वर्णा द्रुतमध्यमविलम्बितासु॥

किं कृतस्तर्हि वृत्तिविशेषः?॥

वक्तुश्चिराचिरवचनाद् वृत्तयो विशिष्यन्ते। वक्तैव कश्चिदाश्वभिधायी भवति-आशु वर्णानभिधत्ते, कश्चिच्चिरेण कश्चिच्चिरतरेण [कश्चिच्चिरतमेन]। तद्यथा तमेवाध्वानं कश्चिदाशु गच्छति, कश्चिच्चिरेण, कश्चिच्चिरतरेण [कश्चिच्चिरतमेन]। रथिक आशु गच्छति, आश्विकश्चिरेण, पदातिश्चिरतरेण [शिशुश्चिरतमेन]॥

(समाधानबाधकभाष्यम्)

विषम उपन्यासः। अधिकरणमत्राध्वा ब्रजिक्रियायाः। तत्रायुक्तं यदधिकरणस्य वृद्धिह्रासौ स्याताम्॥

(समाधानसाधकभाष्यम्)

एवं तर्हि-स्फोटः शब्दः। ध्वनिः शब्दगुणः॥

(आक्षेपभाष्यम्)

कथम्?॥

(५२०(२) समाधानवार्तिकदृष्टान्तखण्डम्॥५॥)

॥*॥ भेर्याघातवत्॥*॥

(भाष्यम्)

तद्यथा-भेर्याघातः भेरीमाहत्य कश्चिद्विंशतिपदानि गच्छति, कश्चित्त्रिंशत्, कश्चिच्चत्वारिंशत्। स्फोटस्तावानेव भवति। ध्वनिकृता वृद्धिः॥

ध्वनिः स्फोटश्च शब्दानां ध्वनिस्तु खलु लक्ष्यते॥

अल्पो महांश्च केषांचिदुभयं तत्स्वभावतः॥१॥

तपरस्तकालस्य॥७०॥

(६४ प्रत्याहारसंज्ञासूत्रम्॥१।१।९ आ. ११ शं सू.॥)

आदिरत्येन सहेता ॥१।१।७१॥

(संज्ञिनिरूपणाधिकरणम्)

॥५२१ आक्षेपवार्तिकम्॥१॥

(आदिरन्त्येन सहेतेत्यसंप्रत्ययः संज्ञिनोऽनिर्देशात्॥*॥)

(भाष्यम्)

आदिरन्त्येन सहेतेति असंप्रत्ययः॥

किं कारणम्?॥

संज्ञिनोऽनिर्देशात्। न हि संज्ञिनो निर्दिश्यन्ते॥

(५२२ न्यासान्तरेण समाधानवार्तिकम्॥२॥)

॥*॥ सिद्धं त्वादिरिता सह तन्मध्यस्येति वचनात्॥*॥

(भाष्यम्)

सिद्धमेतत्॥

कथम्?॥

आदिरन्त्येन सहेता गृह्यमाणः स्वस्य च रूपस्य ग्राहकस्तन्मध्यानां चेति वक्तव्यम्॥

(५२३ यथान्यासेनैव समाधानवार्तिकम्॥३॥)

॥*॥ संबन्धिशब्दैर्वा तुल्यम्॥*॥

(भाष्यम्)

संबन्धिशब्दैर्वा तुल्यमेतत्॥ तद्यथा-संबन्धिशब्दाः-मातरि वर्तितव्यम्, पितरि शुश्रूषितव्यमिति॥ न चोच्यते-स्वस्यां मातरि, स्वस्मिन् पितरीति। संबन्धाच्च गम्यते-या यस्य माता, यो यस्य पितेति। एवमिहाप्यादिरन्त्य इति संबन्धिशब्दावेतौ। तत्र संबन्धादेतद्वन्तव्यम्-यं प्रति य आदिरन्त्य इति च भवति, तस्य ग्रहणं भवति, स्वस्य च रूपस्येति॥ आदिरन्त्येन सहेता॥७१॥

(६५ संज्ञासूत्रम्॥१।१। ९। आ. १२ शं सू.॥)

येन विधिस्तदन्तस्य॥१।१।७२॥

(तदन्तविधिविषयनिर्णयाधिकरणम्॥)

(आक्षेपभाष्यम्)

इह कस्मान्न भवति-'इको यणचि' दध्यत्र मध्वत्र?॥

(समाधानभाष्यम्)

अस्तु। अलोऽन्त्यस्य विधयो भवन्तीत्यन्त्यस्य भविष्यति॥

(अनिष्टापत्तिभाष्यम्)

नैवं शक्यम्। ये अनेकाल आदेशास्तेषु दोषः स्याद्-'एचोऽयवायावः' इति ॥

(अनिष्टापत्तिनिराकरणभाष्यम्)

नैष दोषः। यथैव प्रकृतितस्तदन्तन्तिविधिर्भवति, एवमादेशतोऽपि भविष्यति। तत्रैजन्तस्यायाद्यन्ता आदेशा भविष्यति?॥

(आक्षेपभाष्यम्)

यदि चैवं क्वचिद्वैरूप्यं तत्र दोषः स्याद्—ब्रह्मेन्द्रः ब्रह्मोदकम्।

(आक्षेपान्तरभाष्यम्)

अपि चान्तरङ्गबहिरङ्गे न प्रकल्पेयाताम्॥

तत्र को दोषः?॥

स्योनः, स्योना। अन्तरङ्गलक्षणस्य यणादेशस्य बहिरङ्गलक्षणो गुणो बाधकः प्रसज्येत। ऊनशब्दमाश्रित्य यणादेशो, नशब्दमाश्रित्य गुणः॥

(आक्षेपान्तरभाष्यम्)

अल्विधिश्च न प्रकल्पेत-द्यौः पन्थाः स इति॥

(न्यासान्तरोपसंहारभाष्यम्)

तस्मात्-'प्रकृते तदन्तविधिः' इति वक्तव्यम्॥

(न्यासान्तरनिराकरणभाष्यम्)

न वक्तव्यम्। येनेति करण एषा तृतीया। अन्येन चान्यस्य विधिर्भवति। तद्यथा-देवदत्तस्य समाशं शरावैरोदनेन च यज्ञदत्तः प्रतिविधत्ते। तथा-संग्रामं हस्त्यश्वरथपदातिभिः। एवमिहाप्यचा धातोर्यतं विधत्ते। अकारेण प्रातिपदिकस्य इञं विधत्ते।

(विशेषणविशेष्यभावयोर्यथेष्टत्वाधिकरणम्)

(५२४ आक्षेपवार्तिकम्॥१॥)

॥*॥ येन विधिस्तदन्तस्येति चेद् ग्रहणोपाधीनां तदन्तोपाधिप्रसङ्गः॥*॥

(भाष्यम्)

येन विधिस्तदन्तस्येति चेद् ग्रहणोपाधीनां तदन्तोपाधिताप्रसङ्गः॥ ये ग्रहणोपाधयस्ते तदन्तोपाधयः स्युः॥

तत्र को दोषः?॥

'उतश्च प्रत्ययादसंयोगपूर्वाद्' इति असंयोगपूर्वग्रहणमुकारान्तविशेषणं स्यात्॥

तत्र को दोषः?॥

असंयोगपूर्वग्रहणेन इहैव पर्युदासः स्यात्-अक्ष्णुहि, तक्ष्ण्हीति। इह न स्याद्-आप्नुहि, शक्नुहीति ॥

तथा 'उदोष्ठ्यपूर्वस्य' इति ओष्ठ्यपूर्वग्रहणमृकारान्तविशेषणं स्यात्॥

तत्र को दोषः?॥

ओष्ठ्यपूर्वग्रहणेन इह प्रसज्येत-संकीर्णम्, संगीर्णमिति। इह च न स्याद्-निपूर्ताः पिण्डा इति॥

(५२५ समाधानवार्तिकम्॥॥२॥)

॥*॥ सिद्धं तु विशेषणाविशेष्ययोर्यथेष्टत्वात्॥*॥

(भाष्यम्)

सिद्धमेतत्?॥

कथम्?॥

यथेष्टं विशेषणविशेष्ययोर्योगो भवति। यावता यथेष्टम्। इह तावद्-'उतश्च प्रत्ययादसंयोगपूर्वाद्' इति नासंयोगपूर्वग्रहणेन उकारान्तं विशेष्यते॥

किं तर्हि?॥

उकार एव विशेष्यते-उकारो योऽसंयोगपूर्वस्तदन्तात्प्रत्ययादिति॥

तथा-'उदोष्ठ्यपूर्वस्य' इति नौष्ठ्यपूर्वग्रहणेन ऋकारान्तं विशेष्यते॥ किं तर्हि? ऋकार एव विशेष्यते- ऋकारो य ओष्ठयपूर्वस्तदन्तस्य धातोरिति॥

(तदन्तसंज्ञाप्रतिषेधाधिकरणम्)

(५२६ आक्षेपवार्तिकम्३॥)

॥*॥ समासप्रत्ययविधौ प्रतिषेधः॥*॥

(भाष्यम्)

समासविधौ प्रत्ययविधौ च प्रतिषेधो वक्तव्यः॥ समासविधौ तावत्-द्वितीया श्रितादिभिः समस्यते-कष्टश्रितः, नरकश्रितः। कष्टं परमश्रित इत्यत्र मा भूत्॥

प्रत्ययविधौ-'नडादिभ्यः फक्' नडस्यापत्यं नाडायनः। इह न भवति-सूत्रनडस्यापत्यं सौत्रनाडिः॥

(प्रत्याक्षेपभाष्यम्)

किमविशेषेण?॥

(समाधानभाष्यम्)

नेत्याह॥

(५२७ आक्षेपपरिशेषवार्तिकम्॥४॥)

॥*॥ उगिद्वर्णग्रहणवर्जम्॥*॥

(भाष्यम्)

उगिद्ग्रहणं वर्णग्रहणं च वर्जयित्वा॥

उगिद्ग्रहणम्-'उगितश्च' भवती अतिभवती महती अतिमहती॥

वर्णग्रहणम्-'अत इञ्' दाक्षिः प्लाक्षिः॥

(आक्षेपभाष्यम्)

अस्ति चेदानीं कश्चित्केवलोऽकारः प्रातिपदिकं, यदर्थो विधिः स्यात्॥

(समाधानभाष्यम्)

अस्तीत्याह-अततेर्डः-अः, तस्यापत्यम् 'अत इञ्' इः॥

(तन्मध्यपतितन्यायाधिकरणम्)

(५२८ आक्षेपवार्तिकम्॥५॥)

॥*॥ अकच्श्नम्वतः सर्वनामाव्ययधातुविधावुपसंख्यानम्॥*॥

(भाष्यम्)

अकज्वतः सर्वनामाव्ययविधौ श्नम्वतो धातुविधावुपसंख्यानं कर्तव्यम्॥

अकज्वतः सर्वनामविधौ-सर्वके विश्वके। अव्ययविधौ-उच्चकैः नीचकैः॥

श्नम्वतः-भिनत्ति छिनत्ति।

किं पुनः कारणं न सिध्यति?॥

इह-तस्य वा ग्रहणं भवति, तदन्यस्य वा। न चेदं तद्, नापि तदन्तम्॥

(५२९ समाधानवार्तिकम्॥६॥)

॥*॥ सिद्धं तु तदन्तान्तवचनात्॥*॥

(भाष्यम्)

सिद्धमेतत्॥

कथम्?॥

तदन्तान्तवचनात्। तदन्तान्तस्येति वक्तव्यम्॥

किमिदं तदन्तान्तस्येति?॥

तस्यान्तस्तदन्तस्तदन्तोऽन्तो यस्य तदिदं तदन्तान्तं तदन्तान्तस्येति॥

(तटस्थाक्षेपभाष्यम्)

स तर्हि तथा निर्देशः कर्तव्यः॥

(सिद्धान्तिसमाधानभाष्यम्)

न कर्तव्यः। उत्तरपदलोपोऽत्र द्रष्टव्यः। तद्यथा उष्ट्रमुखमिव मुखमस्य उष्ट्रमुखः, खरमुखः। एवमिहापि तदन्तः अन्तो यस्य सोऽयं तदन्तस्तदन्तस्येति॥

(५३० यथान्यासेऽपि समाधानवार्तिकम्॥७॥)

॥*॥ तदेकदेशविज्ञानाद्वा सिद्धम्॥*॥

(भाष्यम्)

तदेकदेशविज्ञानाद्वा पुनः सिद्धमेतत्। तदेकदेशभूतस्तद्ग्रहणेन गृह्यते॥ तद्यथा- गङ्गा यमुना देवदत्तेति। अनेका नदी गङ्गां यमुनां च प्रविष्टा गङ्गायमुनाग्रहणेन गृह्यते। तथा-देवदत्तास्थो गर्भो देवदत्ताग्रहणेन गृह्यते॥

(समाधानबाधकभाष्यम्)

विषम उपन्यासः। इह केचिच्छब्दा अक्तपरिमाणानामर्थानां वाचका भवन्ति-य एते संख्याशब्दाः परिमाणशब्दाश्च। पञ्च सप्तेति एकेनाप्यपाये न भवन्ति। द्रोणः खारी आढकमिति नैवाधिके भवन्ति, न न्यूने। केचिद् यावदेव तद्भवति तावदेवाहुः-य एते जातिशब्दा गुणशब्दाश्च। तैलं घृतमिति खार्यामपि भवन्ति, द्रोणेऽपि॥ शुक्लो नीलः कृष्णः इति हिमवत्यपि भवति, वटकणिकामात्रेऽपि द्रव्ये। इमाश्चापि संज्ञा अक्तपरिमाणानामर्थानां क्रियन्ते ताः केनाधिकस्य स्युः॥

(समाधानसाधकभाष्यम्)

एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति-

'तदेकदेशभूतं तद्ग्रहणेन-' गृह्यते इति। यदयं 'नेदमदसोरकोः' इति सककारयोरिदमदसोः प्रतिषेधं शास्ति॥

कथं कृत्वा ज्ञापकम्?॥

इदमदसोः कार्यमुच्यमानं कः प्रसङ्गो यत्सककारयोः स्यात्। पश्यति त्वाचार्यः-'तदेकदेशभूतं तद्ग्रहणेन गृह्यते' इति। ततः सककारयोः प्रतिषेधं शास्ति ॥

(तदन्तसंज्ञोदाहरणाधिकरणम्)

(आक्षेपभाष्यम्)

कानि पुनरस्य योगस्य प्रयोजनानि।

(५३१ प्रयोजनवार्तिकम्॥८॥)

॥*॥ प्रयोजनं सर्वनामाव्ययसंज्ञायाम्॥*॥

(भाष्यम्)

सर्वनामाव्ययसंज्ञायां प्रयोजनम्॥ सर्वे परमसर्वे। विश्वे परमविश्वे। उच्चैः परमोच्चैः। नीचैः परमनीचैरिति॥

(५३२ प्रयोजनवार्तिकम्॥९॥)

॥*॥ उपपदविधौ भयाद्यादिग्रहणम्॥*॥

(भाष्यम्)

उपपदविधौ भयाद्यादिग्रहणं प्रयोजनम्॥ भयंकरः अभयंकरः। आढ्यकरणं स्वाढ्यंकरणम्॥

(५३३ प्रयोजनवार्तिकम्॥१०॥)

॥*॥ ङीब्विधावुगिद्ग्रहणम्॥*॥

(भाष्यम्)

ङीब्विधावुगिदग्रहणं प्रयोजनम्।

(भाष्यम्)

ङीब्विधावुगिद्ग्रहणं प्रयोजनम्। भवती अतिभवती। महती अतिमहती॥

(५३४ प्रयोजनवार्तिकम्॥११॥)

॥*॥ प्रतिषेधे स्वस्रादिग्रहणम्॥*॥

(भाष्यम्)

ङीप्रतिषेधे स्वस्रादिग्रहणं प्रयोजनम्। स्वसा परमस्वसा। दुहिता पहमदुहिता॥

(५३५ प्रयोजनवार्तिकम्॥१२॥)

॥*॥ अपिरमाणविस्तादिग्रहणं च॥*॥

(भाष्यम्)

अपरिमाणबिस्तादिग्रहणं च डीप्प्रतिषेधे प्रयोजनम्॥ 'अपरिमाणबिस्ताचितकम्बल्येभ्यो न तद्धितलुकि' द्विबिस्ता द्विपरमबिस्ता। त्रिबिस्ता त्रिपरमबिस्ता। द्व्याचिता द्विपरमाचिता॥

(५३६ प्रयोजवार्तिक॥१३॥)

॥*॥ दिति॥*॥

(भाष्यम्)

दितिग्रहणं च [ण्यविधौ] प्रयोजनम्॥ दितेरपत्यं दैत्यः। अदितेरपत्यमादित्यः। 'दित्यदित्यादित्य-' इत्यदितिग्रहणं न कर्तव्यं भवति॥

(५३७ प्रयोजनवार्तिकम् ॥१४॥)

॥*॥ रोण्या अण्॥*॥

(भाष्यम्)

रोण्या अण्ग्रहणं च प्रयोजनम्। आजकरौणः॥ सैंहिकरौणः॥

(५३८ आक्षेपवार्तिकम्॥१५॥)

॥*॥ तस्य च॥*॥

(भाष्यम्)

तस्य चेति वक्तव्यम्॥ रौणः॥

(प्रत्याक्षेपभाष्यम्)

किं पुनः कारणं न सिध्यति। न तदन्ताच्च तदन्तविधिना सिद्धम्, केवलाच्च व्यपदेशिवद्भावेन?॥

(समाधानभाष्यम्)

'व्यपपदेशिवद्भावोऽप्रातिपदिकेन'॥

(आक्षेपभाष्यम्)

किं पुनः कारणं 'व्यपदेशिवद्भावोऽप्रातिपदिकेन'॥

(समाधानभाष्यम्)

इह सूत्रान्ताठ्ठग्भवति, दशान्ताड्डो भवतीति केवलादुत्पतिर्मा भूदिति॥

(समाधानबाधकभाष्यम्)

नैतदस्ति प्रयोजनम्। सिद्धमत्र तदन्ताच्च तदन्तविधिना, केवलाच्च व्यपदेशिवद्भावेन। सोऽयमेवं सिद्धे सति यदन्तग्रहणं करोति तज्ज्ञापयत्याचार्यः-सूत्रान्तादेव, दशान्तादेवेति॥

(समाधानसाधकभाष्यम्)

नात्र तदन्तादुत्पत्तिः प्राप्नोति। इदानीमेव ह्युक्तम्-*समासप्रत्ययविधौ प्रतिषेधः*इति॥

(गौरवाक्षेपभाष्यम्)

सा तर्ह्येषा परिभाषा कर्तव्या॥

(गौरवनिराकरणभाष्यम्)

न कर्तव्या। आचार्यप्रवृत्तिर्ज्ञापयति'व्यपदेशिवद्भावोऽप्रातिपदिकेन'-इति। यदयम्-'पूर्वादिनिः' 'सपूर्वाच्च' इत्याह॥

(ज्ञापकनिराकरणभाष्यम्)

नैतदस्ति ज्ञापकम्॥ अस्ति ह्यन्तदेतस्य वचने प्रयोजनम्॥

किम्?॥

सपूर्वादिनिं वक्ष्यामीति॥

(ज्ञापकान्तरभाष्यम्)

यत्तर्हि योगविभागं करोति॥ इतरथा 'पूर्वात्सपूर्वादिनिः' इत्येव ब्रूयात्॥

(आक्षेपभाष्यम्)

किं पुनरयमस्यैव शेषः-*तस्य च* इति?॥

(समाधानभाष्यम्)

नेत्याह। यच्चानुक्रान्तं, यच्चानुक्रंस्यते, सर्वस्यैव शेषः-*तस्य च* इति॥

(५३९ प्रयोजनवार्तिकम्॥१६॥)

॥*॥ रथसीताहलेभ्यो यद्विधौ॥*॥

(भाष्यम्)

रथसीताहलेभ्यो यद्विधौ प्रयोजनम्। रथ्यः परमरथ्यः । सीत्यं परमसीत्यम्। हल्या परमहल्या॥

(५४० प्रयोजनवार्तिकम्॥१७॥)

॥*॥ सुसर्वार्धदिक्छब्देभ्यो जनपदस्य॥*॥

(भाष्यम्)

सुसर्वार्धदिक्छब्देभ्यो जनपदस्य प्रयोजनम्॥

सु-सुपाञ्चालकः। सुमागधकः। सु॥

सर्व-सर्वपाञ्चालकः। सर्वमागधकः। सर्व॥

अर्ध-अर्धपाञ्चालकः। अर्धमागधकः। अर्ध॥

दिक्छब्द-पूर्वपाञ्चालकः। अपरपाञ्चालकः। पूर्वमागधकः। अपरमागधकः॥

(५४१ प्रयोजनवार्तिकम्॥१८॥)

॥*॥ ऋतोर्वृद्धिमद्विधाववयवानाम्॥*॥

(भाष्यम्)

ऋतोर्वृद्धिमद्विधाववयवानां प्रयोजनम्। पूर्वशारदम्। अपरशारदम्। पूर्वनैदाघम्। अपरनैदाघम्॥

(५४२ प्रयोजनवार्तिकम्॥१९॥)

॥*॥ ठञ्विधौ संख्यायाः॥*॥

(भाष्यम्)

ठञ्विधौ संख्यायाः प्रयोजनम्॥ द्विषाष्टिकं पञ्चषाष्टिकम्।

(५४३ प्रयोजनवार्तिकम्॥२०॥)

॥*॥ धर्मान्नञः॥*॥

(भाष्यम्)

धर्मान्नञः प्रयोजनम्। धर्मं चरति धार्मिकः। अधर्मं चरति अधार्मिकः॥ *अधर्माच्च* इति न वक्तव्यं भवति॥

(पदाङ्गाधिकारपरिभाषाधिकरणम्)

(५४४ आक्षेपवार्तिकम्॥२१॥)

॥*॥ पदाङ्गाधिकारे तस्य च तदुत्तरपदस्य च॥*॥

(भाष्यम्)

पदाङ्गाधिकारे तस्य च तदुत्तरपदस्य चेति वक्तव्यम्।

(भाष्यम्)

पदाधिकारे किं प्रयोजनम्?॥

(५४५ प्रयोजनवार्तिकम्॥२२)

॥*प्रयोजनमिष्टकेषीकामालानां चिततूलभारिषु॥*॥

(भाष्यम्)

इष्टकेषीकामालानां चिततूलभारिषु प्रयोजनम्॥ इष्टकचितं चिन्वीत। पक्वेष्टकचितं चिन्वीत। इषीकतूलेन, मुञ्जेषीकतूलेन। मालभारिणी कन्या, उत्पलमालभारिणी कन्या॥

(भाष्यम्)

अङ्गाधिकारे किं प्रयोजनम्।

(५४६ प्रयोजनवार्तिकम्॥२३॥)

॥*॥ महदप्स्वसृनमृ॒णां दीर्घविधौ॥*॥

(भाष्यम्)

महदप्स्वसृनमृणां दीर्घविधौ प्रयोजनम्॥

महत्-महान्। एवं परममहान् । महत्।

अप्-आपस्तिष्ठन्ति। एवं स्वापस्तिष्ठन्ति। अप्॥

स्वसृ-स्वसा स्वसारौ स्वसारः। एवं परमस्वसा परमस्वसारौ परमस्वसारः। स्वसृ॥

नसृ-नसा नसारौ नसारः। एवं परमनसा परमनसारौ परमनसारः॥ नसृ॥

(५४७ प्रयोजनवार्तिकम्॥२४॥)

॥*॥ पद्युष्मदस्मदस्थ्याद्यनडुहो नुम्॥*॥

(भाष्यम्)

पद्भावः प्रयोजनम्॥ द्विपदः पश्य।

(आक्षेपभाष्यम्)

अस्ति चेदानीं कश्चित् केवलः पाच्छब्दो यदर्थो विधिः स्यात्?॥

(समाधानभाष्यम्)

नास्तीत्याह॥

(प्रयोजनदर्शक भाष्यम्)

एवं तर्हि अङ्गाधिकारे प्रयोजनं नास्तीति कृत्वा पदाधिकारस्य प्रयोजनमुक्तम्-'हिमकाषिहतिषु च'। यथा पत्काषिणौ पत्काषिणः। एवं परमपत्काषिणौ परमपत्काषिणः॥

(आक्षेपभाष्यम्)

यदि तर्हि पदाधिकारे पादस्य तदन्तविधिर्भवति 'पादस्य पदाज्यातिगोपहतेषु' यथेह भवति-पादेनोपहतं पदोपहतम्। एवमत्रापि स्यात्-दिग्धपादेनोपहतं दिग्धपादोपहतमिति॥

(समाधानभाष्यम्)

एवं तर्ह्यङ्गाधिकार एव प्रयोजनम्॥

(आक्षेपभाष्यम्)

ननु चोक्तम्-न केवलः पाच्छब्द इति॥

(समाधानभाष्यम्)

अयमस्ति पादयतेरप्रत्ययः-पात् पदः पदा पदे। पत्॥

(भाष्यम्)

युष्मत् अस्मत्-यूयं वयम्। परमयूयं परमवयम्॥

अस्थ्यादि-अस्थ्ना दध्ना सक्थ्ना। परमास्थ्ना परमदध्ना परमसक्थ्ना॥

अनडुहो नुम्-अनड्वान् परमानड्वान्॥

(५४८ प्रयोजनवार्तिकम्॥ २५॥)

॥*॥ द्युपथिमथिपुंगोसखिचतुरनडुत्त्रिग्रहणम्॥*॥

(भाष्यम्)

द्युपथिमथिपुंगोसखिचतुरनडुत्त्रिग्रहणं प्रयोजनम्॥ द्यौः सुद्यौः। पन्थाः सुपन्थाः। मन्थाः परममन्थाः। पुमान् परमपुमान्। गौः सुगौः। सखा सखायौ सखायः, सुसखा सुसखायौ सुसखायः, परमसखा परमसखायौ परमसखायः। चत्वारः परमचत्वारः। अनड्वाहः परमानड्वाहः। त्रयाणां परमत्रयाणाम्।

(५४९ प्रयोजनवार्तिकम्॥२६॥)

॥*॥ त्यदादिविधिभस्त्रादिस्त्रीग्रहणं च॥*॥

(भाष्यम्)

त्यदादिविधिभस्त्रादिस्त्रीग्रहणं च प्रयोजनम्॥ सः अतिसः॥ भस्त्रका भस्त्रिका, बहुभस्त्रका बहुभस्त्रिका, निर्भस्त्रका निर्भस्त्रिका॥ स्त्रीग्रहणं च प्रयोजनम्। स्त्रियौ स्त्रियः। राजस्त्रियौ राजस्त्रियः॥

(५५० प्रयोजनवार्तिकम्॥२७॥)

॥*॥ वर्णग्रहणं च सर्वत्र॥*॥

(भाष्यम्)

वर्णग्रहणं च सर्वत्र प्रयोजनम्॥

क्व सर्वत्र?॥

अङ्गाधिकारे चान्यत्र च। अन्यत्रोदाहृतम्। अङ्गाधिकारे-'अतो दीर्घो यञि, सुपि च' इहैव स्यात्-आभ्याम्। घटाभ्यामित्यत्र न स्यात्॥

(५५१ प्रयोजनवार्तिकम्॥२८॥)

॥*॥ प्रत्ययग्रहणं चापञ्चम्याः॥*॥

(भाष्यम्)

प्रत्ययग्रहणं च अपञ्चम्याः प्रयोजनम्॥ यञिञोः फञ्भवति-गार्ग्यायणः, वात्स्यायनः। परमगार्ग्यायणः, परमवात्स्यायनः। दाक्षायणः, परमदाक्षायणः॥

अपञ्म्या इति किमर्थम्?॥

दृषत्तीर्णा, परिषत्तीर्णा॥

(५५२ आक्षेपवार्तिकम्॥२९॥)

॥ अलैवानर्थकेन॥*॥

(भाष्यम्)

अलैवानर्थकेन, नान्येनानर्थकेनेति वक्तव्यम्॥

किं प्रयोजनम्?॥

हन्ग्रहणे प्लीहन्ग्रहणं मा भूत्। उद्ग्रहणे गर्मुद्ग्रहणं। स्त्रीग्रहणे शस्त्रीग्रहणम्। संग्रहणे पायसंग्रहणं मा भूत्॥

(वार्तिकवैयर्थ्याक्षेपभाष्यम्)

किमर्थमिदमुच्यते, न 'पदाङ्गाधिकारे तस्य च तदुत्तरपदस्य च' इत्येव सिद्धम्। न चेदं तत्, नापि तदुत्तरपदम्॥

(परिभाषानावश्यकत्वलाघवभाष्यम्)

तन्न वक्तव्यं भवति॥

(आक्षेपभाष्यम्)

किं पुनरत्र ज्यायः?॥

(समाधानभाष्यम्)

तदन्तविधिरेव ज्यायान्। इदमपि सिद्धं भवति-परमातिमहान्। एतद्धि नैव तद्, नापि तदुत्तरपदम्॥

(५५३ प्रयोजनवार्तिकम्॥३०॥)

॥*॥ अनिनस्मन्ग्रहणानि च॥*॥

(भाष्यम्)

अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ति॥

अन्-राज्ञेत्यर्थवता, साम्नेत्यनर्थकेन। अन्॥ इन्-दण्डीत्यर्थवता, वाग्म्मीत्यनर्थकेन। इन्॥ अस्-सुपया इत्यर्थवता, सुस्रोता इत्यनर्थकेन। अस्॥ मन्-सुशर्मा इत्यर्थवता, सुप्रथिमा इत्यनर्थकेन। मन्॥

(तदन्तसंज्ञापवादनिरूपणम्)

(५९४ आक्षेपवार्तिकम्॥३१॥)

॥* यस्मिन्विधिस्तदादावल्ग्रहणे॥*॥

(भाष्यम्)

यस्मिन्विधिस्तदादाविति वक्तव्यम् ॥

किं प्रयोजनम्?॥

'अचि श्नुधातुभ्रुवां य्वोरियङुवङौ' इति इहैव स्यात्-श्रियौ भ्रुवौ। श्रियो भ्रुव इत्यत्र न स्यात्॥ येन विधिस्तदन्तस्य॥७२॥

(अथ वृद्धसंज्ञाप्रकरणम्)

(६६ वृद्धसंज्ञाप्रकरणम्॥१।१।९ आ. । १३ सू.)

वृद्धिर्यस्याचामादिस्तद् वृद्धम्॥१।१।७३॥

(तत्तत्पदकृत्यनिर्वचनाधिकरणम्)

(आक्षेपभाष्यम्)

वृद्धिग्रहणं किमर्थम्?॥

(समाधानभाष्यम्)

'यस्याचामादिस्तद् वृद्धम्' इतीयत्युच्यमाने 'दात्ताराक्षिताः' अत्रापि प्रसज्येत। वृद्धिग्रहणे पुनः क्रियमाणे न दोषो भवति॥

(आक्षेपभाष्यम्)

अथ यस्यग्रहणं किमर्थम्?॥

(समाधानभाष्यम्)

यस्येति व्यपदेशाय॥

(आक्षेपभाष्यम्)

अथाज्ग्रहणं किमर्थम्?॥

(समाधानभाष्यम्)

'वृद्धिर्यस्यादिस्तद् वृद्धम्' इतीयत्युच्यमाने इहैव स्यात्-ऐतिकायनीयाः औपगवीयाः। इह न स्यात्-गार्गीया वात्सीया इति। अज्ग्रहणे पुनः क्रियमाणे न दोषो भवति॥

(आक्षेपभाष्यम्)

अथादिग्रहणं किमर्थम्?॥

(समाधानभाष्यम्)

'वृद्धिर्यस्याचां तद् वृद्धम्' इतीयत्युच्यमाने-सभासंनयने भवः साभासंनयनः-इत्यत्रापि प्रसज्येत। आदिग्रहणे पुनः क्रियमाणे न दोषो भवति॥

(सूत्रोपपादनाधिकरणम्)

(५५५ आक्षेपवार्तिकम्॥१)

॥*॥ वृद्धसंज्ञायामजसंनिवेशादनादित्वम्॥*॥

(भाष्यम्)

वृद्धसंज्ञायामजसंनिवेशाददिरित्येतन्नोपपद्यते। न ह्यचां सन्निवेशोऽस्ति॥

(आक्षेपबाधकभाष्यम्)

ननु चैवं विज्ञायते-अजेवादिरिति॥

(आक्षेपसाधकभाष्यम्)

नैवं शक्यम्। इहैव प्रसज्येत-औपगवीयाः। इह न स्यात्-गार्गीयाः॥

(आक्षेपभाष्यम्)

एकान्तादित्वं तर्हि विज्ञायते॥

(५५६ आक्षेपसाधकवार्तिकम्॥२॥)

॥*॥ एकान्तादित्वे च सर्वप्रसङ्गः॥*॥

(भाष्यम्)

इहापि प्रसज्येत-सभासन्नयने भवः साभासन्नयन इति॥

(५५७ समाधानवार्तिकम्॥३॥)

॥*॥ सिद्धमजाकृतिनिर्देशात्॥*॥

(भाष्यम्)

सिद्धमेतत्॥

कथम्?।

'अजाकृतिनिर्देशात्'। अच आकृतिनिर्दिश्यते॥

(आक्षेपभाष्यम्)

एवमपि व्यञ्जनैर्व्यवहितत्वान्न प्राप्नोति॥

(५५८ समाधानवार्तिकम्॥४॥)

॥*॥ व्यञ्जनस्याविद्यमानत्वं यथान्यत्र॥*॥

(भाष्यम्)

व्यञ्जनस्याविद्यमानवद्भावो वक्तव्यः। 'यथाऽन्यत्र'। यथाऽन्यत्रापि व्यञ्जनस्याविद्यमानवद्भावो भवति॥

क्वान्यत्र?॥

स्वरे॥

(न्यूनतापूर्त्यधिकरणम्)

(५५९ आक्षेपवार्तिकम्॥५॥)

॥*॥ वा नामधेयस्य॥*॥

(भाष्यम्)

वा नामधेयस्य वृद्धसंज्ञा वक्तव्या॥ देवदत्तीयाः। दैवदत्ताः। यज्ञदत्तीयाः। याज्ञदत्ताः॥

(५६० आक्षेपवार्तिकम्॥६॥)

॥*॥ गोत्रोत्तरपदस्य च॥*॥

(भाष्यम्)

गोत्रोत्तरपदस्य च वृद्धसंज्ञा वक्तव्या॥

कम्बलचारायणीयाः। ओदनपाणिनीयाः। घृतरौढीयाः॥

(५६१ वार्तिकन्यासान्तरम्॥७॥)

॥*॥ गोत्रान्ताद्वाऽसमस्तवत्॥*॥

(भाष्यम्)

गोत्रान्ताद्वा असमस्तवत्प्रत्ययो भवतीति वक्तव्यम्॥ एतान्येवोदाहरणानि॥

(आक्षेपभाष्यम्)

किमविशेषेण?॥

(समाधानभाष्यम्)

नेत्याह।

(५६२ शेषवार्तिकम्॥८॥)

॥*॥ जिह्वाकात्यहरितकात्यवर्जम्॥*॥

(भाष्यम्)

जिह्वाकात्यं हरितकात्यं च वर्जयित्वा। जैह्वाकाताः हारितकाताः॥

(आक्षेपभाष्यम्)

किं पुनरत्र ज्यायः?॥

(समाधानभाष्यम्)

गोत्रान्ताद्वाऽसमस्तवद् इत्येव ज्यायः॥ इदमपि सिद्धं भवति- पिङ्गलकाण्व्यस्य छात्राः पैङ्गलकाण्वाः। वृद्धिर्यस्याचामादिस्तद्वृद्धम्॥७३॥

(६७ वृद्धसंज्ञासूत्रम्॥१।१।९ आ.। १४ सू.॥)

त्यदादीनि च॥१।१।७४॥

(अनुवृत्तिनिर्णयाधिकरणम्)

(आक्षेपभाष्यम्)

यस्याचामादिग्रहणमनुवर्तते, उताहो न॥

(भाष्यम्)

किं चात्?।

(अनुवृत्तिपक्षे दूषणभाष्यम्)

यद्यनुवर्तते, इह च प्रसज्येत-त्वत्पुत्रस्य च्छात्रास्त्वात्पुत्राः, मात्पुत्राः। इह च न स्यात्-त्वदीयो मदीय इति॥

(निवृत्तिपक्षे दूषणभाष्यम्)

अथ निवृत्तम्, 'एङ् प्राचां देशे' यस्याचामादिग्रहणं कर्तव्यम्॥

(अनुवृत्तिपक्षाभ्युपगमभाष्यम्)

एवं तर्ह्यनुवर्तते॥

(आक्षेपभाष्यम्)

कथं त्वात्पुत्रा मात्पुत्रा इति?॥

(समाधानभाष्यम्)

सम्बन्धमनुवर्तिष्यते 'वृद्धिर्यस्याचामादिस्तद् वृद्धम्'। 'त्यदादीनि च' वृद्धसंज्ञानि भवन्ति, वृद्धिर्यस्याचामादिस्तद् वृद्धम्॥ 'एङ् प्राचां देशे' यस्याचामादिग्रहणमनुवर्तते, वृद्धिग्रहणं निवृत्तम्। तद्यथा-कश्चित्कान्तारे समुपस्थिते सार्थमुपादत्ते, स यदा निष्क्रान्तकान्तारो भवति तदा सार्थं जहाति॥ त्यदादीनि च॥

(६८ वृद्धसंज्ञासूत्रम्॥१।१।१।९ आ. १५ सू.)

एङ् प्राचां देशे॥१।१।९।१५॥

(विषयनिर्णयाधिकरणम्)

(आक्षेपवार्तिकम्॥१॥)

॥*॥ एङ् प्राचां देशे शैषिकेषु॥

(भाष्यम्)

एङ् प्राचां देशे शैषिकेष्विति वक्तव्यम्। सैपुरिकी सैपुरिका। स्कौनगरिकी स्कौनगरिकेति॥

एङ् प्राचां देशे॥७५॥

इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये प्रथमाध्यायस्य प्रथमपादे नवममाह्निकम्। पादश्चायं समाप्तः॥